श्रीभारतीतीर्थवेदशास्त्रग्रन्थमाला - चतुर्थं कुसुमम्

॥ तत्त्वचिन्तामणिविवेचनम् ॥

TATTHWA CHINTHAMANI VIVECHANAM

गङ्गेशोपाध्यायकृत तत्त्वचिन्तामणेः अभिनवा व्याख्या

अनुमान खण्डम्

व्याख्यातारः - परमहंस श्रीचन्द्रशेखरभारतीस्वामिनः



सम्पादकः - डा.राजारामशुक्लः, वाराणसी

॥ श्रीशङ्कर अद्वैतशोधकेन्द्रम् ॥

श्रीश्रीजगद्गुरु शङ्कराचार्य महासंस्थानम्,
दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी - ५७७ १३९

श्रीभारतीतीर्थवेदशास्त्रग्रन्थमाला - चतुर्थं कुसुमम्

॥ तत्त्वचिन्तामणिविवेचनम् ॥

TATTHWA CHINTHAMANI VIVECHANAM

गङ्गेशोपाध्यायकृत तत्त्वचिन्तामणेः अभिनवा व्याख्या

अनुमान खण्डम्

व्याख्यातारः - परमहंस श्रीचन्द्रशेखरभारतीस्वामिनः

सम्पादकः - डा.राजारामशुक्लः, वाराणसी

॥ श्रीशङ्कर अद्वैतशोधकेन्द्रम् ॥

श्रीश्रीजगद्गुरु शङ्कराचार्य महासंस्थानम्,

दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी - ५७७ १३९



श्रीभारतीतीर्थवेदशास्त्रग्रन्थमाला – चतुर्थं कुसुमम्

॥ श्रीशङ्कर अद्वैतशोधकेन्द्रम् ॥

श्रीश्रीजगद्गुरु शङ्कराचार्य महासंस्थानम्,

दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी – ५७७ १३९

श्रीभारतीतीर्थवेदशास्त्रग्रन्थमाला - चतुर्थं कुसुमम्

॥ तत्त्वचिन्तामणिविवेचनम् ॥

TATTHWA CHINTHAMANI VIVECHANAM

गङ्गेशोपाध्यायकृत तत्त्वचिन्तामणेः अभिनवा व्याख्या

अनुमान खण्डम्

व्याख्यातारः - परमहंस श्रीचन्द्रशेखरभारतीस्वामिनः

सम्पादकः - डा.राजारामशुक्लः, वाराणसी

॥ श्रीशङ्कर अद्वैतशोधकेन्द्रम् ॥

श्रीश्रीजगद्गुरु शङ्कराचार्य महासंस्थानम्,

दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी - ५७७ १३९

Tatthwachinthamani Vivechanam - A New Commentary on Tatthwachinthamani of Gangeshopadhyaya by Paramahamsa Sri Chandrashekhara Bharathi Swami

Published by - Sri Shankara Advaitha Research Centre
Sri Sri Jagadguru Shankaracharya Maha Samsthanam
Dakshinamnaya Sri Sharada Peetham, Sringeri - 577 139
Karnataka

प्रकाशनसमयः -तारण वत्सरीय भाद्रपद पूर्णिमा
2004

प्रतयः -५००

सर्वेऽधिकाराः - स्वायत्तीकृताः

मूल्यम् -

प्राप्तिस्थानम् - श्रीश्रीजगद्गुरु शङ्कराचार्य महासंस्थानम्,
दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी - ५७७ १३९

Type setting by - Ravi Shankara Pandya,
Tara Press,
Kamaccha, Varanasi - 2

Printed by - Abhinav Offset,
76, Lattice Bridge Road,
Thiruvanmiyur,
Chennai -
Ph: 24482059



His Holiness Sri Sri Bharathi Theertha Mahaswamiji

श्रीश्रीजगद्गुरु शङ्कराचार्य महासंस्थानम्,
दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी।

श्रीविद्या
शङ्कर

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासन प्राणायाम प्रत्याहारधारणाध्यानसमाध्यष्टाङ्ग योगानुष्ठाननिष्ठ तपश्चक्रवर्ति अनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक सर्वतन्त्रस्वतन्त्र आदिराजधानी विद्यानगरमहाराजधानी कर्णाटकसिंहासन प्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरु भूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीमज्जगद्गुरु श्रीमदभिनवविद्यातीर्थमहास्वामि गुरुकरकमलसञ्जात

श्रीजगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थमहास्वामिभिः

आस्तिकमहाजनेषु नारायणस्मरणपुरस्सरं विरचिता आशिषस्समुल्लसन्तु।

इह खल्वास्तिकदर्शनेषु महर्षिगौतमप्रणीतं न्यायदर्शनमन्यतममास्ते। मिथ्याज्ञान नाशस्यापवर्ग हेतुत्वं प्रतिपादयदिदं दर्शनं औपनिषदस्य दर्शनस्य सामीप्यं भजते। अत एव भगवत्पादा अपि आचार्यप्रणीतं न्यायोपबृंहितं सूत्रमिति दुःखजन्मेत्यादिन्याय सूत्रमुदाजह्रुर्भाष्ये। तदस्य दर्शनस्य सम्यगध्ययनं शास्त्रान्तराध्यने नितरामुपकरोतीति न परोक्षं सुधियाम्। दिङ्नागादि बौद्धदार्शनिकैराकुलीकृतस्य वैदिकाध्वनः समुद्धरणाय न्यायवार्तिककारादयः बहु प्रयेतिर इति निश्चप्रचं न्यायवार्तिकतात्पर्यटीकाद्यनुशीलिनां विदुषाम्।

गच्छता कालेन नैयायिकाः पदार्थविवेचने नवीनं पन्थानमनुसस्रुः यस्य पथो निर्माता मिथिलामण्डलमण्डनायमानः निखिलदर्शनपारदृश्वा सुगृहीतनामधेयो

॥ प्रकाशकीयम् ॥

शृंगगिरिजगद्गुरुमहासंस्थाने नैकशतवर्षेभ्यः परिरक्ष्यमाणे सरस्वतीभण्डारनाम्नि ग्रन्थालये तालपत्रमय्यः परश्शतं मातृकाः नानाशास्त्रसम्बद्धाः विद्योतन्ते। तास्वन्यतमेयं तत्त्वचिन्तामणिव्याख्या। इयं च श्रीचन्द्रशेखरभारतीस्वामिभिः प्रणीता। एते च आद्यन्तयोः मङ्गलश्लोके रामचन्द्रभारतीन् स्वगुरुत्वेन निरदिक्षन्। अत एते शृंगगिरिजगद्गुरुपरम्परायां विंशतितमाचार्याणां अन्तेवासिन इति निश्चीयते। तत्र चान्यदपि कारणं यदेते **विद्याशङ्कर एष सर्वजगदानन्दाय सञ्जायतामिति** विद्याशङ्करस्मरणमकार्षुः। शृंगगिरि सम्बन्धाभावे तन्नोपपद्यते। विद्याशङ्करस्यात्रैव सत्वात्। यद्यपीमे रामचन्द्रभारतीस्वामिनां शिष्याः तथाऽपि शृंगगिरि मठाधिपतयो नासन्। अत एव तेषां निकटे शास्त्राध्ययनमात्रं कृतवन्त इति प्रतीयते। रामचन्द्रभारतीस्वामिनां कालश्च ईशवीय षोडशशतकस्य पूर्वार्धम् (1517-1546 A.D.)। अत एतेषामपि कालः षोडशशतकस्य उत्तरार्धं स्यात्।

इयं च मातृका नागराक्षरेष्वस्ति। अतस्तां कर्णाटकाक्षरेषु अलेखयन् इतः चत्वारिंशद्वर्षेभ्यः प्राक् **जगद्गुरु श्रीमदभिनव विद्यातीर्थमहास्वामिनः**। स ग्रन्थः प्रकाशनीयः इति ते अभिप्रायन्। विदिततदाशयाः अस्मद्गुरवः **जगद्गुरुश्रीभारतीतीर्थ महास्वामिनः** तं ग्रन्थं संस्कृताक्षरेषु लेखयित्वा अस्य सम्पादनकर्मणि नैयायिक प्रवराणां वाराणसेयानां अधुना देवभूयंगतानां श्रीजयरामशुक्लमहाभागानामात्मजं न्याये कृतपरिश्रमं राजारामशुक्लमहोदयं न्ययूयुजन्। स च महत्या श्रद्धया श्रीचरणानामाशयमनुरुध्य मूलेन सह व्याख्यां संयोज्य वाराणस्यामेव अक्षरसंयोजनं विधाप्य अशुद्धीस्संशोध्य ग्रन्थमिमं सज्ज्यकार्षीत्। तस्मै श्रीचरणनिरवग्रहानुग्रह भाजनाय विपश्चिते कार्तज्ञ्यमावेदयामि। अक्षरसंयोजनं विहितवते वाराणसीस्थ तारामुद्रणालयाधिपतये, मुद्रापणं कृतवते मद्रपुरीस्थ अभिनव आफ् सेट् मुद्रणालयाधिपतये च धन्यवादाः।

अपूर्वग्रन्थप्रकाशनाय बद्धपरिकरेण श्रीशंकरअद्वैतशोधकेन्द्रेणैवास्य प्रकाशनं विधीयते। तर्करसिकास्सुधियः ग्रन्थमिमं समादृत्य अस्माकमुत्साहं समभिवर्धयन्त्विति निवेद्य विरमामि।

वे.रा.गौरीशङ्करः
शृङ्गगिरि जगद्गुरु श्रीमठीयप्रशासकः

गङ्गेशोपाध्यायः। तदीयः तत्त्वचिन्तामणिग्रन्थः आसेतोरातुषाराद्रेः विद्वल्लोकेनाभिष्टुतो विलसति। अत एव तद्ग्रन्थव्याख्यातैव नैयायिक इति व्यपदेशमर्हतीति तादात्विकी प्रथेति संगिरन्ते वृद्धाः।

सूत्रकृता हि निश्रेयसाय ज्ञेयतया निर्दिष्टेषु पदार्थेषु प्रमाणस्यैवादौ निर्दिष्टत्वेन मानाधीना मेयसिद्धिरिति न्यायेन च प्रमाणस्यैवाभ्यर्हिततया प्रत्यक्षादिप्रमाणचतुष्टय निरूपणमेव प्राधान्येन तत्त्वचिन्तामणौ व्यधायि। तत्राप्यनुमाननिरूपणे महत्कौशलं नैयायिकानाम्। अत एव ग्रन्थेऽस्मिन् अनुमानखण्डमेव प्रकामं विततमास्ते। अत्र एकैकस्मिन्नपि विषये आदौ पूर्वपक्षमुपक्षिप्य पश्चात् सिद्धान्तः प्रत्यपादि।

तत्त्वचिन्तामणेः परश्शतं व्याख्याः प्राणायिषत। तासु बह्व्यः कालगर्भ एव विलिल्यिरे। काश्चन परं अध्येतॄणां भाग्योदयेन प्राकाशिषत। तासु रघुनाथशिरोमणेः दीधितिरेव ललामायते। अत एव सव्याख्या सा पठनपाठनयोस्समाद्रियते।

अधुना अप्रकाशितचरी काचित् मणिव्याख्या प्रकाश्यत इति नितरां मोदामहे। अस्याश्च रचयितारः **श्रीचन्द्रशेखरभारत्याख्या** यतिवर्याः। शृंगगिरि शारदापीठ गुरुपरम्परायां विंशतितमाचार्याणां **जगद्गुरु श्रीरामचन्द्रभारती** महास्वामिनाम् अन्तेवासिन इमे स्वामिन इति अदसीय मङ्गलश्लोकादवगम्यते। नव्यन्याये अमीषां विशिष्टं वैदुष्यमासीदिति एतद्व्याख्यावलोकनेन स्फुटीभवति। ग्रन्थोऽयं संस्थानद्वारा प्रकाशनीय इत्यस्मद्गुरु चरणानां संकल्प आसीत् स चाधुना फलेग्रहिर्जात इति महदिदं नः प्रमोदस्थानम्। संपादनकर्मणि अस्माभिरादिष्टः विद्वान् राजारामशुक्लः महत्या श्रद्धया कार्यमिदं निरवहत्। इत्थमेव कार्येऽस्मिन् कृतसाह्यान् सर्वानपि श्रेयःपरम्परा वितीर्य समनुगृह्णातु भगवानतरुणरोहिणीरमणचूडामणिः ग्रन्थोऽयं तर्करसिकानां मनांसि प्रसादयन् विशिष्टं प्रचारमेत्विति चाशास्महे।

इति नारायणस्मरणम्

श्री

शृङ्गगिरिः
तारणवत्सरीय निजश्रावणशुक्लप्रतिपत्
इन्दुवासरः १६.८.२००४

॥ प्रकाशकीयम् ॥

शृंगगिरिजगद्गुरुमहासंस्थाने नैकशतवर्षेभ्यः परिरक्ष्यमाणे सरस्वतीभण्डारनाम्नि ग्रन्थालये तालपत्रमय्यः परश्शतं मातृकाः नानाशास्त्रसम्बद्धाः विद्योतन्ते। तास्वन्यतमेयं तत्त्वचिन्तामणिव्याख्या। इयं च श्रीचन्द्रशेखरभारतीस्वामिभिः प्रणीता। एते च आद्यन्तयोः मङ्गलश्लोके रामचन्द्रभारतीन् स्वगुरुत्वेन निरदिक्षन्। अत एते शृंगगिरिजगद्गुरुपरम्परायां विंशतितमाचार्याणां अन्तेवासिन इति निश्चीयते। तत्र चान्यदपि कारणं यदेते **विद्याशङ्कर एष सर्वजगदानन्दाय सञ्जायता**मिति विद्याशङ्करस्मरणमकार्षुः। शृंगगिरि सम्बन्धाभावे तन्नोपपद्यते। विद्याशङ्करस्यात्रैव सत्वात्। यद्यपीमे रामचन्द्रभारतीस्वामिनां शिष्याः तथाऽपि शृंगगिरि मठाधिपतयो नासन्। अत एव तेषां निकटे शास्त्राध्ययनमात्रं कृतवन्त इति प्रतीयते। रामचन्द्रभारतीस्वामिनां कालश्च ईशवीय षोडशशतकस्य पूर्वार्धम् (1517-1546 A.D.)। अत एतेषामपि कालः षोडशशतकस्य उत्तरार्धं स्यात्।

इयं च मातृका नागराक्षरेष्वस्ति। अतस्तां कर्णाटकाक्षरेषु अलेखयन् इतः चत्वारिंशद्वर्षेभ्यः प्राक् **जगद्गुरु श्रीमदभिनव विद्यातीर्थमहास्वामिनः**। स ग्रन्थः प्रकाशनीयः इति ते अभिप्रायन्। विदिततदाशयाः अस्मद्गुरवः **जगद्गुरुश्रीभारतीतीर्थ महास्वामिनः** तं ग्रन्थं संस्कृताक्षरेषु लेखयित्वा अस्य सम्पादनकर्मणि नैयायिक प्रवराणां वाराणसेयानां अधुना देवभूयंगतानां श्रीजयरामशुक्लमहाभागानामात्मजं न्याये कृतपरिश्रमं राजारामशुक्लमहोदयं न्ययूयुजन्। स च महत्या श्रद्धया श्रीचरणानामाशयमनुरुध्य मूलेन सह व्याख्यां संयोज्य वाराणस्यामेव अक्षरसंयोजनं विधाप्य अशुद्धीस्संशोध्य ग्रन्थमिमं सज्ज्यकार्षीत्। तस्मै श्रीचरणनिरवग्रहानुग्रह भाजनाय विपश्चिते कार्तज्ञ्यमावेदयामि। अक्षरसंयोजनं विहितवते वाराणसीस्थ तारामुद्रणालयाधिपतये, मुद्रापणं कृतवते मद्रपुरीस्थ अभिनव आफ् सेट् मुद्रणालयाधिपतये च धन्यवादाः।

अपूर्वग्रन्थप्रकाशनाय बद्धपरिकरेण श्रीशंकरअद्वैतशोधकेन्द्रेणैवास्य प्रकाशनं विधीयते।तर्करसिकास्सुधियः ग्रन्थमिमं समादृत्य अस्माकमुत्साहं समभिवर्धयन्त्विति निवेद्य विरमामि।

वे.रा.गौरीशङ्करः
शृङ्गगिरि जगद्गुरु श्रीमठीयप्रशासकः

॥ सम्पादकीयम् ॥

इदमधुना विदुषां पुरतः समुपस्थाप्यते महामहोपाध्याय गङ्गेशोपाध्याय विरचित तत्त्वचिन्तामणेः अनुमानखण्डस्य अप्रकाशितचरं तत्त्वचिन्तामणिविवेचनाभिधं व्याख्यारत्नम्। अस्याः प्रणेतारः श्रीचन्द्रशेखरभारतीस्वामिनः इतः चतुश्शतवर्षपूर्वं शृंगगिरिप्रान्ते व्यराजन्तेति कथा प्रथीयसी। न्यायदर्शने एषां चतुरस्रं पाण्डित्यमासीदिति एतद्व्याख्यादर्शनेन सुस्पष्टं प्रतीयते।

तत्त्वचिन्तामणेः परश्शतं व्याख्या आसन्। तासु काश्चिदेव अंगुलिमेयाः समुपलभ्यन्ते। एतद्व्याख्याप्रणेतारोऽपि बह्व्यः मणिव्याख्यास्साक्षादकार्षुरिति व्याख्यारम्भगतेन 'बहुभिः पीण्डतैर्यद्यदनुमाने विवेचितम्। विचारयति तत्सर्वं चन्द्रशेखर भारती॥' इत्यदसीयेन पद्येन अवगम्यते। कामं सन्त्वन्याः शतशो व्याख्याः तथाऽपि अस्यास्तु वैशिष्ट्यमनपवदनीयमेवेति न परोक्षमेतद्व्याख्यानुशीलिनां सुधियाम्। अत एव खलूच्यते 'द्राक्षाफले सत्यपि किं रसज्ञैः नास्वाद्यते हृद्यरसो रसालः' इत्यभियुक्तैः।

इयं व्याख्या प्राक्तनीः दीधित्यादीर्व्याख्या अनुसरन्त्यपि क्वचित् क्वचित् अभिनवं पन्थानमुपदर्शयति। परन्तु रुचिदत्तमिश्रकृतप्रकाशव्याख्याया अत्र बहुत्र साम्यमध्यक्षयन्तो मन्यामहे यदिमे व्याख्यातारः रुचिदत्तमिश्रेषु महान्तमादरमावहन्तीति। तथाऽपि क्वचित्तस्याः खण्डनमपि दृश्यते। इयं शैली नैयायिकेषु दृष्टचर्येव। तथा हि गदाधरभट्टाचार्याः दीधितिकारे महान्तमादरमावहन्तोऽपि क्वचित्तं तिरोऽकुर्वन्निति व्यक्तमेव व्युत्पत्तिवादादौ। रुचिदत्तकृतव्याख्याया अध्ययने शोधने च प्रवृत्तानामियं भूयिष्ठमुपकरिष्यतीति मन्यामहे।

ग्रन्थस्यास्य शैली नातिक्लिष्टा नाति सरला च। इमे क्वचिदत्यन्तं विवेचयन्ति क्वचिन्नितरां संक्षिपन्ति। कानिचित् प्रकरणानि नैवास्पृशन्नपि। प्राचीनान् विदुष उदाहरन्तोऽपि नामग्राहं न निरदिक्षन्। विशेषतो यज्ञदत्तोपाध्यायान् जयदेवमिश्रांश्च निर्दिशन्ति। एतैः शब्दमणावपि व्याख्या विरचिता। साप्यचिरेणैव प्रकाशयिष्यते। प्रत्यक्षोपमानयोरदसीया व्याख्या अद्य यावन्नोपलब्धा। अतस्तै रचिता न वेति न निर्णेतुं पारयामः। परन्तु अस्यामेव व्याख्यायां 'इत्यन्यथाख्यातिसाधनावसरे उक्तप्रायम्' इति पंक्तिः दृश्यते। तेन प्रत्यक्षखण्डे तैर्व्याख्या रचितेति उन्नीयते।

इयं व्याख्या शृङ्गेरीमठीयग्रन्थागारे तालपत्रग्रन्थरूपेण देवनागराक्षरेषु आसीत्। तां च जगद्गुरुचरणाः आदौ कर्णाटकलिप्या विलेख्य ततः संस्कृताक्षरेषु लेखयित्वा मन्निकटे प्रदाय मूलेन सह इयं संयोज्य मुद्रणाय सज्जीकरणीयेति मामादिक्षन्। ईदृशं दुष्करं कार्यं

कर्तुमात्मानमनीशं मन्यमानोऽपि श्रीचरणानां कृपया सर्वं सम्पत्स्यत इति धैर्येण कार्येऽस्मिन् प्रावर्तिषि। अस्य सम्पादने भूयान् श्रमः समजनि। द्वित्रैः प्रतिलिपी करणात् बहुत्र त्रुटयः पर्यदृश्यन्त। क्वचित्तु विपरीतार्थोऽपि भासते स्म। महता अवधानेन प्रत्यक्षरं परिशील्य संशोधनं विहितम्। परन्तु समीकरणमिदं सर्वथैव निर्दुष्टमिति न वक्तुं शक्यम्। यत्र विषयविशेषे मितंपचमतेर्मे धीर्न प्रासरत् स तथैव स्थापितः कालान्तरे मनीषिप्रवराश्शोधयिष्यन्तीति धिया। यत्र तु लेखनटङ्कनादौ दोषाः सुस्पष्टं प्रत्यभासन्त ते निश्शङ्कं समशोधिषत। यत्र क्वचित् मूलपाठापेक्षया समीचीनः पाठः समभाव्यत तत्र पाठद्वयमपि प्रादर्श्यत।

सम्पादनक्रमे मया प्रदत्ताः चिह्नविशेषाः पाठकानां सौकर्याय प्रदर्श्यन्ते।

१. अधिकाक्षरयोजनाय [ ] एतच्चिह्नं प्रदर्श्य तत्र तदक्षरं सूचितम्। यथा 'अवच्छेदका [न] वच्छिन्न----।' अर्थात् अवच्छेदकावच्छिन्न इति पाठो मातृकायां दृश्यते, किन्तु स न युक्तः, तत्स्थाने अवच्छेदकानवच्छिन्न इति पाठो युक्त इति।

२. परिवर्तनाय ( ) एतच्चिह्नं प्रदर्श्य तत्र परिवर्तनीयांशस्सूचितः। यथा 'साध्यव्यापक (व्याप्य) ----।' अर्थात् व्यापक इत्यस्य स्थाने व्याप्य इति पठनीयम् इति।

३. अनावश्यकत्वद्योतनाय (?)एतच्चिह्नं प्रदत्तम्। यथा 'अवच्छेदका (न?)वच्छिन्न ----।' अर्थात् अवच्छेदकानवच्छिन्न इति पाठो मातृकायामस्ति , किन्तु तत्र नकारः अनावश्यकः। अवच्छेदकावच्छिन्न इति पाठ एव युक्त इति।

४. केचिदंशाः मातृकायामपि कोष्ठके स्थापिताः। तेऽत्रापि { } इति कोष्ठके स्थापिताः।

अन्ते निवेशितं परिशिष्टमपि पाठकान् मोदयिष्यतीति विश्वसिमि। शुद्धिपत्रिकाया अनावश्यकतायै बहु प्रयतितम्। एवमपि 'सुनिपुणानामपि सूक्ष्मापराधदर्शना'दिति भगवत्पादोक्तरीत्या यदि काश्चन त्रुटयस्संभवेयुः तर्हि ताः क्षमाशीलैर्विद्वद्भिस्समीकर्तव्या इत्यभ्यर्थये।

मदपेक्षया विद्यावयोवृद्धेषु बहुषु सत्स्वपि विद्वत्सु श्रीचरणा यदस्मिन् कार्ये मामेव न्ययुञ्जत तत्र कारणं मयि तेषामव्याजकृपैव। इत्थमेवानुकम्प्योऽयं जनस्सर्वदेति तान् प्रार्थयन् तेषां चरणसरोजयोरिदं समर्पयन्नात्मानं धन्यं मन्ये।

इत्थं विदुषामनुचरः
डा. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानम्
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

अनुक्रमणिका

	विषयाः	पृष्ठसंख्या
१	अनुमितिप्रकरणम्	१
२	व्याप्तिपञ्चकप्रकरणम्	१७
३	सिंहव्याघ्रलक्षणप्रकरणम्	१८
४	व्यधिकरणधर्मावच्छिन्नाभावप्रकरणम्	१९
५	पूर्वपक्षप्रकरणम्	२३
६	सिद्धान्तलक्षणप्रकरणम्	२६
७	सामान्याभावप्रकरणम्	३०
८	विशेषव्याप्तिप्रकरणम्	३४
९	अत एवचतुष्टयप्रकरणम्	४८
१०	व्याप्तिग्रहोपायप्रकरणम्	४९
११	तर्कप्रकरणम्	५५
१२	व्याप्त्यनुगमप्रकरणम्	५९
१३	सामान्यलक्षणाप्रकरणम्	६५
१४	उपाधिप्रकरणम्	७१
१५	पक्षताप्रकरणम्	८७
१६	परामर्शप्रकरणम्	९३
१७	केवलान्वय्यनुमानप्रकरणम्	१०९
१८	केवलव्यतिरेक्यनुमानप्रकरणम्	११३
१९	अर्थापत्तिप्रकरणम्	१२७
२०	अवयवप्रकरणम्	१३५
२१	सामान्यनिरुक्तिप्रकरणम्	१४०
२२	सव्यभिचारप्रकरणम्	१४३
२३	साधारणप्रकरणम्	१४५
२४	असाधारणप्रकरणम्	१४६
२५	अनुपसंहारिप्रकरणम्	१४७
२६	विरुद्धप्रकरणम्	१४८

२७	सत्प्रतिपक्षप्रकरणम्	१५१
२८	असिद्धिप्रकरणम्	१५४
२९	बाधप्रकरणम्	१५८
३०	हेत्वाभासानामसाधकतासाधकत्वप्रकरणम्	१६४
३१	ईश्वरवाद:	१६८
३२	शक्तिवाद:	१९४
३३	मुक्तिवाद:	२११
३४	परिशिष्टम् – १ ग्रन्थे समुद्धृता: केचन नियमा:	
	२ ग्रन्थे समुद्धृता: न्याया:	
	३ ग्रन्थे चर्चिता ग्रन्थकारा ग्रन्थाश्च	

तत्त्वचिन्तामणिः

(श्रीचन्द्रशेखरभारतीकृतव्याख्यासंवलितः)

।। अनुमितिप्रकरणम् ।।

(चि.)**प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते।**

।।व्याख्या।।

मोलौ यस्य सुरापगा पुरजयस्तम्भे पताकायते
गौरी सा शरदभ्रसुन्दरतनौ शम्पेव विद्योतते ।
कण्ठे सा गरलद्युतिर्नवघनश्रेणीव सञ्जायते
विद्याशङ्कर एष सर्वजगदानन्दाय सञ्जायताम् ।।१।।

मीमांसातर्कवेदागमसकलगुरुर्विश्वविख्यातकीर्ति-
र्दृप्यद्वादीभकुम्भस्थलदलनविधौ प्रौढसिंहावतारः ।
तत्पादाम्भोजनिर्यन्मधुमधुररसासक्तचित्तस्य विघ्नं
प्रारब्धे सर्वतोऽस्मिन् हरतु मम गुरु**र्भारती रामचन्द्रः** ।।२।।

बहुभिः पण्डितैर्यद्यदनुमाने विवेचितम् ।
विचारयति तत्सर्वं **चन्द्रशेखरभारती** ।।३।।

पूर्वापरग्रन्थैकवाक्यताप्रयोजकाकांक्षाबीजभूतामवसरसङ्गतिं प्रदर्शयन्नेव शिष्यावधानार्थमिदानीमनुमाननिरूपणं क्रियत इति प्रतिजानीते **प्रत्यक्षोपजीवकत्वादिति**। तथा च हेतुहेतुमद्भावप्रदर्शनेनावसरसङ्गत्या प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणं क्रियत इत्यर्थः। अत्र प्रत्यक्षस्यानुमानोपजीव्यत्वं साक्षात्परम्परया वा हेतुत्वम्।

यद्यप्यनुमानोपनीतप्रत्यक्षे, प्रामाण्यग्राहकत्वेन च प्रत्यक्षमात्रेऽनुमानस्या-प्युपजीव्यत्वं तथाप्यनुमानं न प्रत्यक्षत्वावच्छेदेनोपजीव्यं किन्तु तत्तत्प्रत्यक्षत्वा-

तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानम्,

वच्छेदेन[१]। प्रत्यक्षन्त्वनुमानत्वावच्छेदेनैव तथा।[२] प्रामाण्यग्राहकत्वेऽप्यनुमानस्य प्रत्यक्षोत्पत्तावनुपजीव्यत्वाच्चेति[३]।

उपमानस्यानन्तराभिधाने हेतुमाह — **बहुवादिसम्मतत्वादिति**। तथा चाल्पवादिविप्रतिपत्तिनिरासपूर्वकनिरूपणीयतया प्रथममनुमानं शिष्यजिज्ञासाविषय इत्युपमाननिरूपणात्पूर्वभावोऽनुमाननिरूपणस्येति भाव:। सूचीकटाहन्यायोपदर्शने तात्पर्यमिति केचित्।

वस्तुतस्तु यद्यपि प्रथममक्लिष्टेन बहुविप्रतिपत्तिनिरास: कर्तुं शक्यत इति वैपरीत्यमनर्हं तथापि यत्रोपमानं परैरन्तर्भावनीयं यतो वाऽस्माभिर्बहिर्भावनीयं तदनुपदर्शने उपमानमपि विचारयितुं न शक्यत इत्यनुमानप्राथम्यमिति सार:। अथानुमानं निरूप्यत इति पाठेऽप्यथशब्दस्यैवायमर्थ इति ध्येयम्। यद्वोद्देशक्रमानुरोधादाह[४]— अथानुमानं निरूप्यत इति।

तत्रानुमाने निरूपणीये करणस्य क्रियाविशेषाधीनवैलक्षण्यतया तल्लक्षणाय क्रियामेव लक्षयति **व्याप्तीति**। अत्र व्याप्तिविशिष्टपक्षधर्मपदयोरेकैकानुपादाने विशिष्टपरामर्शाप्राप्तिरित्युभयमुपात्तम्।

अत्रोपाध्याया:– व्याप्तिविशिष्टश्चासौ पक्षधर्मश्चेति कर्मधारयस्तदनन्तरञ्च तल्प्रत्यय:। व्याप्तिविशिष्टत्वे सति पक्षधर्मत्वमिति भाव:[५]। व्याप्तिविशिष्टपक्षधर्मताया ज्ञानमिति षष्ठीसमास:। तथा च व्याप्तिवैशिष्ट्यसामानाधिकरण्येन यो यदा वस्तुगत्या पक्षस्तद्धर्मत्वं यज्ज्ञानं विषयीकरोति[६]— वह्निव्याप्यधूमवानयमित्याद्याकारकं तृतीयलिङ्गपरामर्शात्मकं तज्जन्यं ज्ञानमनुमितिरित्यर्थ:।

---

१. अनुमानोपनीतप्रत्यक्षत्वाद्यवच्छेदेनेत्यर्थ:। तथा च प्रत्यक्षत्वं नोपजीवकतावच्छेदकमपितु तद्व्यक्तित्वादिकमिति भाव:।

२. अनुमानस्य प्रत्यक्षप्रामाण्यग्राहकतया [(द्र.-त.चि. प्रामाण्यस्यानुमेयत्वात् पृ.सं. १६) (प्रत्यक्षं प्रमाणं प्रमितिकरणतावच्छेदकधर्मवत्त्वादित्याद्यनुमानाकार:)] प्रत्यक्षत्वावच्छेदेनाप्यनुमानस्योपजीव्यत्वमस्त्येवत्यत आह - प्रामाण्येति। तथा चोक्तापत्तिद्वयी समाधानद्वयेन निराकृतेति ध्येयम्।

३. तथा च प्रत्यक्षोपजीवकत्वादित्यस्य प्रत्यक्षोपजीवकोत्पत्तिकत्वादित्यर्थ:।

४. प्रत्यक्षानुमानोपमानशब्दा: प्रमाणानि (न्या.सू. १-१-३) इति सूत्रे

५. 'धर्मत्वं भावमाह' इति पाठो मातृकायाम्

६. 'सामानाधिकरण्येन' इत्यस्य तद्धर्मत्वेऽन्वय: । तथा च व्याप्तिवैशिष्ट्यसमानाधिकरणं पक्षधर्मत्वं विषय:।

नन्वेवं भ्रमानुमित्यव्याप्तिस्तत्र व्याप्तिविशिष्टस्य पक्षधर्मताबाधेन समानाधिकरणार्थककर्मधारयसमासबाधेन तद्घटितलक्षणवाक्यबाधात्। न च तत्राव्याप्तिर्[1]न दोषोऽनुमानप्रमाणलक्षणाय प्रमारूपाया एवानुमितेरिह लक्ष्यत्वादिति वाच्यं, तत्राव्याप्तौ सत्यां तदीयधर्म्यंशप्रमायामव्याप्तेर्दोषत्वात्। न च साऽपि न सङ्ग्राह्येति वाच्यं, प्रमासामान्यलक्षणेन तस्या अपि सङ्ग्रहात् सामान्यलक्षण-सङ्गृहीतस्य विशेषलक्षणसङ्ग्राह्यत्वनियमादिति चेत्— तत्तदर्थस्याभिधेयतामात्रेण सर्वसमासानां साधुत्वानुशासनेन यथोक्तकर्मधारयस्य तत्राबाधात्। अत एव वस्तुगत्या यो न राजपुरुषस्तत्रापि राजपुरुषपदं साधु प्रतिपादकञ्च।

न च पदसाधुत्वेऽपि तत्र सामानाधिकरण्यस्य बाधितत्वेन तदर्थक-खण्डवाक्यस्यायोग्यतया तद्घटितलक्षणवाक्यं बाधितमित्यव्याप्तिस्तदवस्थेति वाच्यं, भ्रमविषयप्रतिपादकवाक्यस्य बाधितार्थकखण्डवाक्यघटितस्यैव योग्यत्वस्वीकारात्। अत एव रजतत्वाभाववति रजतत्वप्रकारकज्ञानवानयमिति सर्वजनप्रसिद्धव्यवहारोऽपि। न च तत्र रजतत्वाभाववद्विशेष्यकत्व-रजतत्वप्रकारकत्वयोर्ज्ञान एव धर्मिण्यन्वयो न तु तदभाववद्विशेष्यकत्व-तत्त्वयोः, अयोग्यत्वादिति वाच्यं, शब्देन तयोरन्वय-बोधं विना तदुभयवैशिष्ट्यावगाहित्वस्य भ्रमज्ञानधर्मि-तदुभयप्रकारकत्वग्रहेऽपि समूहालम्बनवद् भ्रमत्वाग्रहत्वप्रसङ्गात्। न च खण्डवाक्यार्थज्ञानेऽयोग्यतासत्त्वे तद्बोधानुपपत्तौ तदुपश्लिष्टमहावाक्यार्थज्ञानेऽपि योग्यताधीर्नास्ति, खण्डवाक्यार्थानुपस्थितौ तत्र पदार्थान्तरसंसर्गबोधस्य ग्रहीतुमशक्यत्वादिति वाच्यं, खण्डवाक्यस्य समभिव्याहृतपदार्थान्तरोपस्थापितज्ञानविशेषविषयतापन्नविशेषपरत्वावगमे तस्यैव बाधितार्थोपस्थापकत्वात्। न चैवं वह्निना सिञ्चतीत्यपि योग्यं स्यादिति वाच्यं, समभिव्याहृतज्ञानविशेषविषयपरत्वे इष्टत्वात्, तात्पर्यविषयत्वस्याबाधात् तस्य तद्विषयत्वात्, तादृशवैशिष्ट्यसंसर्गस्यापि ज्ञानेन बाधः, तस्यालीकत्वेन बाधासम्भवात्। न चैवमसत्ख्यातिः, सदुपरागेण तदभ्युपगमात्। यत्र चासंसृष्टयोरेव ज्ञानानुपरागेण संसर्गः प्रतिपाद्यस्तद्वाक्यमयोग्यं, तात्पर्यविषयसंसर्गबाधात्। अत एव भ्रमाकाराभिलापोऽपि योग्य एव, अन्यथा भ्रमस्यानिर्वचनीयविषयतापत्तिरित्याहुः।

तदपरे न क्षमन्ते, अव्याप्तेः, तथाहि-वह्निव्याप्यधूमवानयमिति तृतीयलिङ्ग-परामर्शस्य न व्याप्तिवैशिष्ट्यसामानाधिकरण्यं विषयः, तद्वैशिष्ट्यस्याप्रकारतया

---

१. अत्राव्याप्तिरित्यस्य लक्षणागमनमित्येवार्थो न तु दोषविशेषः, तस्या अदूषणत्वस्योप-पादयितुमशक्यत्वात्। अत एवाग्रे भ्रमानुमितेरलक्षत्वेऽङ्गीकृतेऽपि 'तत्राव्याप्तौ सत्याम्' इत्यादिकथनं सङ्गच्छते ।

तत्सम्बन्धागोचरत्वात्। अन्यथा भासमानवैशिष्ट्यप्रतियोगिन एव प्रकारतया तत्रापि व्याप्तिवैशिष्ट्यस्य प्रकारा(रता)पत्तेः। अत एव पक्षवृत्तित्वसामानाधिकरण्यमपि दुर्लभम्। तद्धि तदधिकरणाधिकरणत्वम्। न च पक्षवृत्तित्वाधिकरणत्वं परामर्शगोचरः, तस्याप्रकारत्वात्। एवञ्च यथोक्तकर्मधारयलभ्यतदुभयसामानाधिकरण्यालाभः। न च यदि विशिष्टज्ञानप्रकारीभूतधर्ममात्रसम्बन्धविषयत्वं तदा विशिष्टज्ञाने विशेष्यस्याप्रकारतया तत्सम्बन्धस्तत्र न भासेतेति वाच्यं, प्रकारानुपरागेण सम्बन्धभानानभ्युपगमात्। विशेष्यसम्बन्धग्रहस्तु तस्याप्रकारत्वेऽपि, विशेषणस्यैव प्रकारत्वात्। न च विशिष्टज्ञाने विशेष्यविशेषणोभयनिरूपितसम्बन्धसम्बन्धोऽपि भासते, समूहालम्बेन तु तदुभयसम्बन्धमात्रम्। अन्यथा तयोरवैलक्षण्यप्रसङ्गादिति वाच्यम्, अपसिद्धान्तात्,अननुभवाच्च। वैलक्षण्यञ्च तयोः प्रकारादिकृतमिति मूल एवोक्तत्वादिति। तस्मात्समासान्तरमनुसरणीयमिति।

अत्रेदं प्रतिभाति– विशिष्टबुद्धेः सम्बन्धाविषयत्वे दण्डीति बुद्धौ सत्यां पुरुषो दण्डसम्बन्धवान्न वेति संशयापत्तेः। न च दण्डसम्बन्धस्य प्रकारत्वे भासमाने तत्सम्बन्धो भासते, सम्बन्धभानस्य सम्बन्धिप्रकारत्वनियमादत्र चातथात्वादिति वाच्यं, साक्षात्परम्परासाधारणसम्बन्धिनः प्रकारत्वे भासमाने सम्बन्धभानाभ्युपगमात्। साक्षात्सम्बन्धिनस्तथात्वे गौरवात्। तथा च दण्डस्य प्रकारतया भाने दण्डसम्बन्धवत् तत्सम्बन्धपरम्पराभानमपीत्यनुपपत्त्यभावात्। यथा तृतीयानुव्यवसायपरम्पराज्ञानत्वेन स्वविषयकज्ञानं प्रथमव्यवसायविषयमादाय गृह्णाति, न तु विशिष्य स्वविषयकज्ञानविषयज्ञानपरम्परां, तादृग्विषयशतभारमन्थराया धियोऽननुभवादित्यभ्युपेयते, तथा सम्बन्धपरम्परानुभवेऽपि प्रथमसम्बन्धप्रतियोगिप्रकारत्वेन स्वरूपेण सम्बन्धसम्बन्धपरम्परामवगाहते न तु विशिष्येत्यभ्युपगमेऽनुपपत्त्यभावात्। न चैवं सम्बन्धपरम्परानुभवस्वीकारे विषयानवस्था स्यादिति वाच्यं, समवाये सम्बन्धान्तरानभ्युपगमेनानवस्थाविरहात्। न चैवं रूपवान् तत्समवायवान् तत्सम्बन्धवानित्यादिप्रतीतीनामवैलक्षण्यं स्यादिति वाच्यम्, एकत्र रूपसमवायस्य स्वरूपेण अपरत्र तस्य प्रकारतया तत्सम्बन्धस्य स्वरूपेणापरत्र च सम्बन्धस्यानधिकरणतया स्वरूपेण प्रकारतया च तस्यैव भानेन विशेषात्। समूहालम्बनविशिष्टज्ञानयोश्च प्रकारादिकृत एव विशेषो न तु विशिष्टज्ञाने सम्बन्धसम्बन्धविषयत्वं, समूहालम्बने तु विशेषणविशेष्यसम्बन्धमात्रविषयत्वमित्येवं विशेषोऽभ्युपेयते। तथा च यद्युक्तविशिष्टप्रतीतीनामुक्तक्रमेण विशेषस्तदा विशिष्टज्ञाने सम्बन्धस्वरूपेण समूहालम्बने सम्बन्धसम्बन्धतावच्छेदकरूपेणानुभूयत इत्यनुभवसिद्धेन तयोर्भेदः स्वीक्रियतां कृतमनुभवविरुद्धसम्बन्धसम्बन्धविषयत्वस्वीकारेणेत्यनुयोगानुपपत्तेः। तस्माद्विशिष्टबुद्ध्यां सम्बन्धपरम्परानभ्युपगमे नोक्ताव्याप्त्यवकाश इति दिक्।

वाचस्पतिमिश्रास्तु- व्याप्तिविशिष्टश्च पक्षधर्मश्च तौ तथा, तयोर्भावस्तथा चेति द्वन्द्व एवात्र समासः। न च द्वन्द्वस्य समस्यमानपदार्थभेदगर्भतया तदुभयभेदावगाहिज्ञानलाभादसम्भवः, वास्तवतद्भेदगर्भतया तस्य प्रमानुमित्य-व्याप्तिस्तत्र व्याप्तिविशिष्टस्यैव पक्षधर्मत्वेन तदुभयभेदाभावादिति वाच्यं, तादृशपदार्था(र्थता)वच्छेदकभेद एव तत्समासस्य नीलघटयोरित्यादौ प्रमाणप्रमेयसंशये-त्यादिसूत्रे(ण?) च बहुशो दर्शनादित्याहुः।

तच्चिन्त्यम्, द्वन्द्वस्य समस्यमानपदार्थभेद[ा]गर्भत्वेऽपि समस्यमानपदार्थभेद-प्रतिपादकतया व्याप्तिविशिष्टपक्षधर्मयोर्भेदोपस्थितेरभेदावगाहिज्ञानालाभादसम्भवः। न च द्वन्द्वस्य न समस्यमानभेदप्रतिपादकत्वं किन्तु पदार्था(र्थता)वच्छेदकभेद-प्रतिपादकत्वं, तच्चाव्याहतमेवेति वाच्यं, तथा सति धवखदिरावित्यत्र धवखदिरौ भिन्नावभिन्नौ वेति संशयापत्तेः। न च पदार्था(र्थता)वच्छेदकभेदप्रतिपत्तेर्न तथा संशयः, तस्यास्तत्राप्रतिबन्धकत्वात्। अन्यथा नीलघटयोः प्रमाणप्रमेययोरित्यत्रापि तादृशसंशयाभावापत्तेरिति।

यत्तु तत एव[१] व्याप्तिविशिष्टपदस्य धर्मपरतया व्याप्तिविशिष्टत्व-पक्षधर्मत्वप्रकारकज्ञानजन्यत्वलाभे वास्तवभेदतदवगाहनयोः सम्भवेऽपि नोक्तदोषसम्भवः। न चोभयसामानाधिकरण्यावगाहिज्ञानालाभादुभयवार्तानभिज्ञान्योन्यासंसृष्टव्याप्ति-पक्षधर्मताज्ञानजन्यप्रत्यक्षेऽतिव्याप्तिरिति वाच्यम्, एकत्र धर्मिणीतिविशेषणप्रक्षेपेण तादृशज्ञानलाभादिति, तत्तुच्छं, वह्निव्याप्यधूमवानित्यादिपरामर्शेऽव्याप्तेः, प्रकारत्वेऽपि तदुभयवैशिष्ट्यस्याप्रकारत्वात्, पक्षधर्मत्वस्य च संसर्गरूपतया सर्वथैवाप्रकारत्वाच्चा-व्याप्तेः। न चैतादृशपरामर्शादनुमितिर्न भवतीति वाच्यम्, अनुभवविरोधात्, लाघवेन व्याप्यः पक्षधर्मो न वेत्यादिसंशयविरोधिन एव परामर्शस्यानुमितिहेतुत्वाच्च।

यदपि सम्बन्धमात्रस्य वैशिष्ट्यतया व्याप्तिविशिष्टा-व्याप्तिसमानाधिकरणा पक्षधर्मतेत्येवं कर्मधारयः स्वीक्रियतामिति निरस्तं, भ्रमानुमित्यव्याप्तेरिति, तन्न मनोरमं, तत्र भ्रमविषयप्रतिपादकवाक्यस्यैव समभिव्याहृतज्ञानपदार्थान्वये तस्यापि योग्यत्वाद् भ्रमानुमित्यव्याप्तेरभावादित्युक्तत्वात्।

यत्तु व्याप्तिविशिष्टस्य पक्षधर्मतेति तत्पुरुषः। भ्रमविषयप्रतिपादकवाक्यस्यैव समभिव्याहृतज्ञानपदार्थान्वये तस्यापि योग्यत्वाद् भ्रमानुमित्यव्याप्तेरभावादिति, तन्न, तस्योत्तरपदार्थप्रधानतया पूर्वपदार्थस्य व्याप्तिविशिष्टत्वस्य ज्ञानान्वयानुपपत्तेः। अन्यथा राजपुरुषमानयेत्यत्राप्यानयने राज्ञोऽन्वयापत्तेरिति।

वस्तुतस्तु कर्मधारयातिरिक्ते सर्वत्र व्याप्तिविशिष्टपक्षधर्मयोरभेदानुपस्थितेरभेदा-वगाहिज्ञान[ा]लाभादसम्भवः, कर्मधारस्यैव तदुपस्थापकत्वादिति। तस्माद् व्याप्ति-विशिष्टञ्च तत् पक्षधर्मताज्ञानञ्चेति कर्मधारयः साधीयान्। व्याप्तिविशिष्टपदस्य

---

१. 'त एव' इति मातृकायां पाठः

व्याप्तिविषयकत्वार्थकत्वाद् यत्र यः सम्बन्धः स एव तस्य तद्वैशिष्ट्यमित्यभ्युपगमात्। न च भिन्नभिन्नाधिकरणकोभयविषयकज्ञानजन्यप्रत्यक्षातिव्याप्तिरिति वाच्यम्, एकत्र धर्मिणीति विशेषणेन[१] तन्निरसनात्।

यद्वा व्याप्तिविशिष्टञ्च तत् पक्षधर्मताज्ञानञ्चेति कर्मधारयः। व्याप्तिविशिष्टत्वञ्च व्याप्तिविषयकत्वं तत्प्रकारकत्वमिति यावत्। एवञ्च व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यत्वं पर्यवस्यति। न चैवं (यत्र?) विशकलितं व्यभिचाराभावं सहचारञ्च स्मरतः पक्षवृत्तिहेतौ तदुभयवैशिष्ट्यभानाद्यत्रानुमितिस्तत्राव्याप्तिः, व्याप्तेः पूर्वानुपस्थितत्वेन तत्राप्रकारकत्वात्। न च ततोऽनुमितिरेव नोत्पद्यत इति वाच्यम्, अनुभवविरोधादिति चेत्? न, व्यभिचारज्ञानविरोधिप्रकारेण व्याप्तिविषयकत्वस्यैव व्याप्तिप्रकारकत्वेन विवक्षितत्वात्। तादृशश्च प्रकारो व्याप्तिघटकयत्समानाधिकरणात्यन्ताभावादिरूपः। अत एव प्रमेयत्वप्रकारकव्याप्तिज्ञानान्नानुमितिः, तस्य व्यभिचारज्ञान [I] विरोधित्वात्। तज्ज्ञानस्य च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन जनकत्वं विवक्षितम्। तेन तदनुव्यवसाये, तज्जनितस्मरणे ज्ञानजन्यवाक्यार्थज्ञानादौ च नातिव्याप्तिरिति वक्ष्यते।

न चैवं व्याप्तिज्ञानत्वेनैवातिप्रसक्तेन जनकत्वमुच्यतां किं व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन, गौरवादिति वाच्यं, व्याप्ति(प्रकारकत्वं हि?) ज्ञानत्वं हि व्याप्तिविषयकज्ञानत्वम्। व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वञ्च विशिष्टविषयकज्ञानत्वम्। तथा च विशिष्टविषयकज्ञानत्वेन जनकत्वे निरुच्यमाने व्याप्तिरूपविशेषणविषयकज्ञानत्वेनैव जनकत्वमुच्यतामित्युपदेशस्यानौचित्यात्। विषयताजन्यत्वं हि लक्षणार्थः। तत्र च विषयतायामेकत्र विशिष्टं परिचायकमन्यत्र विशेषणमात्रमित्येव भेदात्। न च गौरवं बाधकं, विशेष्यताविशेषस्य लक्षणप्रविष्टत्वेन विशिष्टविषयतायास्तदानीमनुपस्थितत्वेन युगपदुपस्थित्यभावात्। अत एव विशिष्टविशेषणतामात्रजन्यत्वं विवक्ष्य व्याप्तिज्ञानं करणमित्यत्र ग्रन्थकृता तावन्मात्रजन्यत्वमेवानुमितिलक्षणमित्यग्रे वक्तव्यमिति।

वयन्तु व्याप्तिविशिष्टश्चासौ पक्षधर्मश्चेति कर्मधारयः। व्याप्तिविशिष्टत्वं व्याप्तिमत्त्वम्। धर्मपदोत्तरतल्[२]प्रत्ययेन पक्षधर्मतालाभः। एवञ्च व्याप्तिसमानाधिकरणपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरित्यर्थः। न च कर्मधारयोत्तरतल्[३] प्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यव्युत्पत्तेर्व्याप्तिसामानाधिकरण्यं न लभ्यते किन्तु

---

१. 'विशेषेण' इति पाठो मातृकायाम्।

२. 'त्रल्' इति पाठो मातृकायाम्।

३. 'त्रल्' इति पाठो मातृकायाम्।

व्याप्तिविशिष्टत्वसामानाधिकरण्यमिति वाच्यं, द्वन्द्वोत्तरभावप्रत्ययस्यैव तथात्वान्न त्वन्यस्यापि। तथा च वैयाकरणा द्वन्द्वात्परमिति। न चैवं भ्रमानुमित्यव्याप्तिः, तत्र व्याप्तिसमानाधिकरणायाः पक्षधर्मताया अभावादिति वाच्यम्, इष्टत्वात्[१] प्रमाण-(धर्मि?)विभाजकप्रमाया एवात्र लक्ष्यत्वात्। न च धर्म्यंशप्रमा प्रमाणविभाजिका[२], स्वप्नतर्कादेरपि धर्म्यंशप्रमात्वेन तत्करणपरिगणनापत्तेः। प्रत्युत तयैव भ्रमानुमितेर-सङ्ग्राह्यतया तत्रातिव्याप्त्यापत्तेश्च। अत एवेन्द्रियार्थसन्निकर्षोत्पन्नम(न्नेऽ)व्यभिचारित्वं विशेषणम्। अन्यथा तद्द्वयवच्छेदानुपपत्तेः। न च सामान्यलक्षणेन तस्या अपि सङ्गृहीतत्वाद् विशेषलक्षणेनापि तत्सङ्ग्रहावश्यकत्वमिति वाच्यं, विपक्षबाधकाभावात्। एवञ्च सम्बन्धमात्रस्यैव वैशिष्ट्यतया व्याप्तिविशिष्टा व्याप्तिसमानाधिकरणा पक्षधर्मतेति कर्मधारयः साधीयानिति बोद्धव्यम्। धर्म्यंशप्रमाया असङ्ग्राह्यत्वेन तत्राव्याप्तेरदोषत्वात्। न चैवं व्याप्तिविशिष्टस्य पक्षधर्मतेत्यपि षष्ठीतत्पुरुषः कथन्न स्यादिति वाच्यं, तस्योत्तरपदार्थप्रधानतया पूर्वपदार्थस्य व्याप्तिविशिष्टत्वस्य ज्ञानान्वयानुपपत्तेः। अन्यथा राजपुरुषमानयेत्यत्राप्यानयने राज्ञोऽन्वयापत्तेरित्युक्तत्वात्। व्याप्तिविशिष्टपक्षधर्मयोरभेदोपस्थापकाभावेन तदभेदावगाहिज्ञानालाभाच्च[३], कर्म-धारयस्यैव समस्यमानयोरभेदोपस्थापकत्वात्।

अस्तु वा भ्रमानुमितेरपि सङ्ग्राह्यत्वं तथापि नानुपपत्तिः, पूर्वोक्तगत्यैव तत्सङ्ग्रहादित्यालोचयामः।

नन्वेवमपि विशेषदर्शनजन्ये संशयविपर्ययोत्तरप्रत्यक्षेऽतिव्याप्तिः, तत्रापि पुरुषत्वव्याप्यकरादिमानयमित्याद्याकारकतृतीयलिङ्गपरामर्शस्यैव जनकत्वादिति चेत्?

अत्रोपाध्यायाः– सिषाधयिषाविरहदशायां सिद्धेरनुमानेतरसाधकमानस्य चानुमितौ प्रतिबन्धकत्वमिति सर्वजनसिद्धम्। तथा च सिषाधयिषाविरहसहकृतसिद्ध्यनुमानाति-रिक्तसिद्धिकरणान्यान्यत्वावच्छिन्नाभावः पक्षता। एवञ्च तत्र पुरुषादौ सिषाधयिषा-विरहसहकृतस्यानुमानातिरिक्तस्य प्रत्यक्षस्यैव साधकमानस्य सत्त्वेन पक्षताविरहादुक्त-लक्षणागमनान्न तत्रातिव्याप्तिः।

न च सिषाधयिषाविरहे सति सिद्धिदशायामेव न पक्षता नत्वनुमानातिरिक्त-साधकमानदशायामिति वाच्यं, तर्हि पक्षतासत्त्वे तत्रानुमित्यापत्तेः। प्रत्यक्षसामग्र्या

---

१. 'इष्टत्वादिति' इति पाठो मातृकायाम्।

२. 'विभाजका' इति पाठो मातृकायाम्।

३. 'ज्ञानलाभाच्च' इति पाठो मातृकायाम्।

प्रतिबन्धादिति चेत्? तर्हि प्रत्यक्षसामग्र्यां सत्यामनुमित्सादशायामनुमितिर्न स्यात्। अनुमित्सयापि हि पक्षतैवापादनीया, सा च तत्र प्रत्यक्षसामग्रीसत्त्वे सत्यनुमितिं प्रत्यप्रयोजिकैव त्वया कृता। न च लाघवात् सिषाधयिषाविरहसहकृतसिद्ध्यभावमात्रं पक्षता, सिषाधयिषाविरहसहकृतं तु सिद्धिकरणान्तरं प्रतिबन्धकमिति तदभावोऽपि प्रतिबन्धकाभावत्वेनानुमितावपेक्षणीय एवेति वाच्यं, सिद्ध्यनुमानातिरिक्तसिद्धिकरण-सामान्याभावस्य पक्षतात्वेन, सामान्याभावस्यैकत्वेन तन्मात्रं हेतुः, अन्यथा पक्षतात्वेन सिद्ध्यभावः प्रतिबन्धकाभावत्वेन च तथाविधकरणाभावो हेतुरिति हेतुद्वयकल्पनागौरवापत्तेः। न च पक्षतासत्त्वेपि संशयोत्तरप्रत्यक्षस्थलानुमितावनुमित्सापि हेतुरिति तदभावान्नानुमितिरिति वाच्यम्, अनुमितिमात्रे तस्याव्यभिचारे संशयोत्तरानुमितौ मानाभावेनाजनकत्वात्। किञ्चान्यत्र क्लृप्तानुमितिसामग्री तत्रास्ति न वा? आद्ये तस्याः फलाव्यभिचारादनुमित्यात्पत्तेः। अन्त्ये तद्विरहादेव कार्यानुत्पत्तावनुमित्साया अजनकत्वापत्तेः। न चोक्तस्य पक्षतात्वे तस्य चानुमितिगर्भत्वेऽन्योन्याश्रयः, प्रकारान्तरेणानुमितित्वादिनाऽनुमितिनिरूपणसम्भवादिति।

तच्चिन्त्यं, सिषाधयिषाविरहसहकृतसिद्ध्यभावस्यैव पक्षतात्वेन तत्र तत्सत्त्वात्। न चैवं तत्रानुमितिः स्यादित्युक्तमिति वाच्यं, समाने विषये सिषाधयिषा-विरहसहकृतानुमानातिरिक्तसाधकमानस्यैव प्रतिबन्धकत्वात्। ननु यत एव सिषाधयिषाविरह-सहकृतसिद्धिवत् तथाभूतसाधकमानस्यापि प्रतिबन्धकत्वमत एव विनिगमना-विरहादुभयान्यान्याभावः पक्षतेति चेत्? भवेदेवं यदि तदुभयान्यान्याभावत्वेन कारणता स्यात्। न चैवं, येन हि रूपेण यत्र यस्य प्रतिबन्धकत्वं तदवच्छिन्नाभावत्वेनैव तत्र तदभावस्य प्रयोजकत्वात्, अन्यथा मणिमन्त्राद्यन्योन्याभावत्वेन दाहादिप्रयोजकत्वे मण्याद्यभावकूटस्य हेतुत्वमिति सिद्धान्तो व्याहन्येत। एवं तथाभूतत्वेन तथाभूतसाधकमानत्वञ्चानुमितौ प्रतिबन्धकत्वमिति तादृशसिद्ध्यभावत्वेन तादृश-साधकमानाभावत्वम्। न चाभावद्वयस्य कारणत्वं भवति नत्वेकस्य, तदुभयान्या-न्यत्वावच्छिन्नसामान्याभावत्वेन रूपेणाजनकत्वादित्युक्तत्वात्। अत एव सामान्याभावस्य कारणत्वे लाघवमभावद्वयस्य कारणत्वे गौरवमित्यपास्तं, तेन रूपेणाजनकत्वात्।

ननु तथापि कारणत्वाविशेषे तादृशसिद्ध्यभाव एव पक्षता, न तु तादृशसाधकमानाभाव इत्यत्र किं विनिगमकं? येन संशयोत्तरप्रत्यक्षस्थले पक्षता स्यादिति चेत्? अत्रोभयोः कारणत्वे किं पक्षपदप्रवृत्तिनिमित्तमिति प्रश्नस्य फलितोऽर्थः। तत्र लाघवात्, योग्यत्वात् प्रथमोपस्थितत्वाच्च तादृशसिद्ध्यभावत्वमेव तदित्युत्तरम्। तादृशसाधकमानाभावश्च पक्षपदाप्रतिपाद्योऽपि पक्षतावदनुमितौ कारणमिति संशयोत्तरप्रत्यक्षस्थले पक्षतासत्त्वेऽपि तदभावान्नानुमितिरिति दिक्। अपि चास्तु

संशयविपर्ययोत्तरप्रत्यक्षस्थले पक्षता। तथापि तस्याः पृथक् कारणत्वेन कारणतावच्छेदकत्वे मानाभावात्। पक्षधर्मतापदेन साध्याधिकरणत्वाभिमतधर्मता विवक्षणीया। तज्ज्ञानजन्यत्वञ्च तत्रापीत्यतिव्याप्तिर्वज्रलेपायत एव।

यत्तु संशयविपर्ययोत्तरप्रत्यक्षस्थले विशेषदर्शनस्य न तत्त्वेन जनकत्वं, प्रत्यक्षप्रतिबन्धकीभूतस्य विशेषदर्शनाभावविशिष्टसंशयस्य विशेषणाभावप्रयुक्तम-भावमापादयतस्तत्र तस्योपयोगित्वेनान्यथासिद्धत्वादिति, तदपि चिन्त्यम्। संशयस्य हि प्रतिबन्धकत्वं तत्कोटिकज्ञानमात्रे तन्मात्रकोटिकज्ञाने वा? नाद्यः, संशयानन्तरमपि संशयोदयात्। नान्त्यः, तन्मात्रकोटिकज्ञानानुत्पत्तिरहितापरकोटिज्ञानसामग्री सत्त्वप्रयुक्ता न तु तदुभयकोट्यारोपरूपसंशयरूपप्रतिबन्धकसत्त्वप्रयुक्ता मानाभावात्। अन्यथा घटपटसमूहालम्बनकाले घटमात्रगोचरज्ञाने तत्समूहालम्बनस्य प्रतिबन्धकत्वा-भ्युपगमापत्तिः, तत्सत्त्वे तदनुत्पत्तेः, पटज्ञानसामग्रीसमावेशात् पटगोचरत्वेन न घटमात्रगोचरं तत्र ज्ञानं न तु समूहालम्बेन प्रतिबन्धादिति यदि तदैतदत्रापि तुल्यं, तस्माद्यथा घटपटोभयज्ञानसामग्र्योभयज्ञानम्, एकज्ञानसामग्र्या चैकमात्रज्ञानं तथो-भयकोट्यारोपसामग्र्यां सत्यामुभयारोपरूपः संशयः, एककोटिज्ञानसामग्र्या वैकल्ये चैकमात्रकोटिकं ज्ञानं न त्वेकस्यापरत्र प्रतिबन्धकत्वमिति। अयमेव विशेषो यदेक (त्व?)धर्मिगतत्वेन भासमानयोः स्थाणुत्वपुरुषत्वयोर्विरोधभानसामग्र्या विरोधोऽपि प्रकाश्यत इति तदुभयारोपः संशय आपद्यते। एकस्मिन् धर्मिणि भासमानविरुद्ध-नानाकोटिकज्ञानस्यैव संशयत्वात्। घटपटोभयज्ञाने तु न तथेति तस्य निश्चयत्वमेव। अत एव यत्र स्थाणुत्वपुरुषत्वयोर्विरोध(अविरोध)भ्रमस्तत्रस्थाणुःपुरुषश्चेति निश्चय एव वृक्षः शिंशपा चेति[वत्]।

मिश्रचरणास्तु संशयोत्तरप्रत्यक्षे विशेषदर्शनं न परामर्शरूपं जनकं किन्तु करादि पुरुषत्वव्याप्यम्, अयञ्च करादिमान् इति ज्ञानद्वयात्मकमेव। अत एव तदुत्पत्तौ तत्कल्पने मानाभावात्। तथा च न तत्रातिव्याप्तिरिति, तच्चिन्त्यं, दैवाद् यत्र[१] तादृशः परामर्शस्तत्र तज्जन्यप्रत्यक्षे तथाप्यतिव्याप्तेः, लाघवेन तत्र तादृशपरामर्शस्यैव कारणत्वात् (च?) अन्यानुमितावपि ज्ञानद्वयस्यैव कारणत्वापत्तावसम्भवापत्तेरिति।

अत्रेदं प्रतिभाति— अनुमितौ हि तथाविधविशिष्टज्ञानकल्पनमावश्यकम्, अनुमितेः करणजन्यतया करणस्य च सव्यापारकत्वनियमेन तथाविधविशिष्ट-

---

१. 'दैवात् तत्रमेव तादृशः...' इति पाठो मातृकायाम्।

ज्ञानरूपव्यापारद्वारैव तद्व्याप्त्यादिज्ञानादेः करणत्वाभ्युपगमात्। प्रत्यक्षे तु तथाविधविशिष्टज्ञानकल्पनं नावश्यकं, तद्धि न व्यापारतया, चक्षुरादिसंयोगस्यैव तथात्वात्। नापि करणतया, चक्षुरादेरेव करणत्वात्। किन्तु सहकारितया। सहकारिता चावश्यकल्पनीयात् तद्धेतोर्ज्ञानद्वयादेव[1]। न चानुमितावपि मनः करणमस्तु, व्याप्तिज्ञानं व्यापारः। तथा च न तत्रापि तदावश्यकमिति वाच्यं, तथा सति व्याप्तिज्ञानाव्यवहितसमय एवानुमित्युत्पत्त्यापत्तेः, भावभूतकारणान्तरानपेक्षत्वादिति।

अन्येतु विशेषदर्शनस्य न तत्त्वेन जनकत्वं, किन्तु भ्रमविरोधिप्रत्यक्षविशेषदर्शनत्वादिना। अन्यथा शंखपीतत्वभ्रमानन्तरं श्वैत्यव्याप्यशंखत्वरूपविशेषदर्शने श्वैत्यप्रत्यक्षतापत्तेरिति, तन्न, एवमपि संशयोत्तरप्रत्यक्षेऽतिव्याप्त्यवारणात्। न हि तत्रापि तस्य न तत्त्वेन जनकत्वं, व्याप्यदर्शनमात्रस्य भ्रममात्राविरोधित्वेऽपि संशयमात्रविरोधित्वादिति।

मिश्रास्तु पक्षतासहकृतव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति विवक्षितम्। पक्षता च यथोक्तसिद्ध्यभावमात्रम्, उक्तयुक्तेः। तथा च संशयविपर्ययोत्तरप्रत्यक्षस्थले पक्षतायाः सत्त्वेपि तत्र तस्या अजनकत्वादनुव्यवसायादावपि तस्या अजनकत्वान्नातिव्याप्तिः। न चैवं पक्षताजन्यत्वमेवास्त्विति वाच्यं, पक्षतात्वेन जनकत्वस्याविवक्षिततया सिषाधयिषाविरहसहकृतसिद्ध्यभावरूपायास्तस्या योग्यत्वेन तद्गोचरप्रत्यक्षेऽतिव्याप्तेः। न च पक्षतासहकृतव्याप्तिधीजन्यत्वमेवास्त्विति वाच्यं, व्याप्तिधीविषयकपक्षधर्मताविषयकसमूहालम्बनसम्भवेन नातिव्याप्तिः। पक्षतासहकृतपरामर्शसत्त्वे चानुमितेरेवोत्पत्तेस्तदुभयगोचरसमूहालम्बनानुव्यवसायाभावात् प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वात्।

यत्तु साधकमानाभावस्यापि पक्षतात्वस्वीकारे प्रकृतविवक्षायां न दोषः। न च तथा सति पक्षताजन्यत्वमात्रमस्तु लक्षणम्, उक्तपक्षतायाश्चातीन्द्रियत्वेन पदान्तरव्यावृत्ततज्जन्यप्रत्यक्षातिव्याप्तेरभावादिति वाच्यं, सामान्यप्रत्यासत्तीभूय तया जनिते प्रत्यक्षे पदान्तरं विनाऽतिव्याप्तेः। न च साक्षात्प्रत्यासत्तिरिह तु स्वरूपसत्यास्तस्या जनकत्वं विवक्षितम्, अन्यथा यः प्रमानुमितिविषयः पक्षः स व्याप्यवानिति व्याप्तिप्रत्यक्षातिव्याप्तेरुभयोपादानेप्यवारणात्, तत्प्रत्यक्षस्यापि प्रत्यासत्तीभूततादृशपक्षताजन्यत्वादिति वाच्यम्, उक्तप्रत्यक्षे हि पक्षताज्ञानस्य हेतुत्वं न तु पक्षताया इति स्वरूपसद्विशेषणानुपादानात्। तत्प्रत्यक्षस्य सामान्य-

---

१. 'तद्धेत्वोः ज्ञानद्वययोरेव' इति पाठो मातृकायाम्।

प्रत्यासत्तिजन्यव्याप्तिप्रत्यक्षजन्यत्वादिति, तन्न, एवं ह्युत्तरज्ञानपदवैयर्थ्यापाताद्, उक्तपक्षतापरामर्शाभ्यामन्याजननात्। किञ्चैवमुक्तपक्षतासहितव्याप्तिधीजन्यत्वमेव लक्षणमस्तु, न तु तत्सहितं व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं, व्यर्थविशेषणत्वात्। मन्मते तु पक्षतायोग्यत्वेन पक्षताव्याप्तिसमूहालम्बनप्रत्यक्षातिव्याप्तिवारकत्वेन तत्सार्थकत्वात्। विशिष्टज्ञानसहितपक्षतायाश्च न समूहालम्बनं, तयोरनुमितिसामग्रीत्वेन तदानीं प्रत्यक्षानुत्पत्तेः। न च सिद्ध्यभावस्यापि पक्षतात्व उत्तरज्ञानपदवैयर्थ्यं[1] तयोरन्यत्राजनकत्वादिति वाच्यं, सिषाधयिषायाः पक्षतात्वे तध्वंसे विरोधिगुणत्वेन परामर्शस्य, प्रतियोगित्वेन सिषाधयिषाया जनकत्वेन तत्रातिव्याप्तिवारकतया सार्थकत्वात्। न च सिषाधयिषा न पक्षता, किन्तु तद्विरहविशिष्टसिद्ध्यभाव इति वाच्यं, विशिष्टाभावस्य सम्बन्धरूपविशिष्टप्रतियोगिकत्वेन तद्विरहसिद्ध्योश्च स्वरूपमेव[2] सम्बन्ध इति तदभावस्य पक्षतात्वपर्यवसाने सिषाधयिषायामेव पक्षतात्वपर्यवसानादित्याहुः। तच्चिन्त्यम्, अत्र हि विरोधिज्ञानानुपरागकालीनत्वं व्याप्यवत्त्वपरामर्शविशेषणं न वा? आद्ये पक्षतासहकृतेतिविशेषणवैयर्थ्यात्, सिषाधयिषाविरहसहकृतसिद्धेरपि विरोधित्वात् तदनुव्यवसायाद्यतिव्याप्त्यसिद्धेः। अन्त्ये बाधसत्प्रतिपक्षावतारकालीनपरामर्शेन पक्षतासहकृतेन जनिते तदु-भयविषयकसमूहालम्बने तथाप्यतिव्याप्तेः। [न] च परामर्शांशे तत्त्वेन जनकत्वं विवक्षितम्, अनुव्यवसाये च न तथेति नोक्तदोषः इति वाच्यम्, एवं सति पक्षतासहकृतेत्यस्य वैयर्थ्यापातात्। न च विपरीतप्रमाजिज्ञासयोरेव तत्रोत्पत्त्याऽ-नुमितिवदनुव्यवसायादेरप्यनुत्पत्तिरिति वाच्यं, तथापि दैवाद्यत्र तथा समूहालम्बनं तत्रातिव्याप्तेः सन्देहेऽपि सन्दिग्धातिव्याप्तेरवारणात्। किञ्च यत्रालोकेन वह्निमनुमिनुयामिति सिषाधयिषातः पर्वते पक्षता तत्पर्वतवृत्तिधूमे च व्याप्तिज्ञानाद् वह्निव्याप्यधूमवानयमिति तृतीयलिङ्गपरामर्शः, तत्रानुमितिसामग्र्यभावात् तदुभयजन्यसमूहालम्बनेऽतिव्याप्तेः। न च स्वसहकारिभूतपक्षता विवक्षिता, तत्र च पक्षतायाः तत्परामर्शसहकारित्वादिति वाच्यं, तथासत्यतिगौरवापत्तेः। किञ्चांशतः सिद्धसाधनस्थले भागासिद्धौ च परामर्शोत्पत्तौ बाधकाभावेन तदुभयसमूहालम्बनं दुर्लभम्। न च तदुभयत्रैक-देशेऽनुमितिरेवोत्पद्यते न तदुभयसमूहालम्बनमिति वाच्यम्, अपसिद्धान्तात्। अन्यथा सकर्तृक[त्व]ानुमाने घटसाधारणपक्षत्वेनांशतः सिद्धसाधनेऽपि क्षितौ सकर्तृकत्वानुमानं स्यादेवेति सर्वसिद्धतद्व्यार्वतनप्रयासवैयर्थ्यापत्तेः। अस्तु वा तदुभयत्राप्यनुमितिस्तथापि यत्र मन्त्रादिना महर्षिशापाद्वा प्रतिनियतदाहादि-प्रतिबन्धवदनुमितिमात्रप्रतिबन्धस्तत्र तदुभयसमूहालम्बने बाधकाभावात्।

---

१. 'उत्तरपदज्ञानवैयर्थ्यम्' इति पाठो मातृकायाम्।

२. 'स्वरूपावेव' इति पाठो मातृकायाम्।

यत्तु प्रथमं वह्नौ सिषाधयिषारूपपक्षता जाता, प्रतिबन्धकसत्त्वान्न वह्न्यनुमितिजनकपरामर्शोऽथ तत्रैव सिषाधयिषायामयं गुणो न वेति दैवात्संशयस्तदनन्तरं गुणत्वव्याप्येच्छात्ववतीयमतो गुण इति तत्सिषाधयिषाविशेष्यकं गुणत्वप्रकारकं प्रत्यक्षमुत्पद्यते। तत्र प्रत्यक्षे विशेष्यतया तत्सिषाधयिषा जनिका, विशेषदर्शनत्वेन तथाविधपरामर्शो जनक इति पक्षतासहकृततथाविधज्ञानजन्यज्ञानत्वं लक्षणमिति व्यापकं स्यादेव। न च तत्र गुणत्वानुमितिरेव जन्यते न तु प्रत्यक्षमिति वाच्यं, समाने विषयेऽनुमित्साविरहे प्रत्यक्षसामग्र्या बलवत्त्वात्। न च विशेष्यरूपानुमित्सा चेत् कथमनुमित्साविरह इति वाच्यं, तस्या भिन्नविषयकत्वेन प्रत्यक्षाप्रतिबन्धकत्वात्। न हि सा गुणत्वविषया किन्तु वह्निविषयेत्याहुः। तच्चिन्त्यं, पक्षतासमानप्रकारकव्याप्यपरामर्शसहकृतत्वस्य विवक्षितत्वेन तद्दोषाभावसम्भवात्। यच्च विशिष्टाभावस्य सम्बन्धाभावरूपतयेत्यादि, तदपि न, एवं हि सिषाधयिषायां सिद्ध्यभावे परमनुमितिः स्यात्, तयोरेव विशिष्टाभावरूपत्वेन पक्षतात्वपर्यवसानात्। एवञ्चानपेक्षितानुमित्यभावापत्तेस्तयोश्चैकरूपाभावेना[न]नुगतत्वापत्तेरिति।

नवीनास्तु विशेषदर्शनस्य संशयविपर्ययोत्तरप्रत्यक्षकारणत्वाभावादेव नातिव्याप्तिः। तथाहि-विशेषदर्शनस्य हेतुत्वं प्रत्यक्षमात्रे वा, संशयोत्तरप्रत्यक्षमात्रे वा, संशयोत्तरैकमात्रकोटिकप्रत्यक्षे वा?, नाद्यः, व्यभिचारात्। न द्वितीयः, संशयानन्तरं विशेषदर्शनं विना संशयान्तरस्याप्यनुदयप्रसङ्गात्। न तृतीयः, एवं हि विशेषदर्शने सत्येकमात्रकोटिकज्ञानं भवतु, उभयकोट्यारोपरूपसंशयानुत्पादः कथम्, उभयकोट्यारोप (रूप?) सामग्र्याः संशयहेतुत्वेन तत्सत्त्वे तद्भावावश्यम्भावात्[१], कार्याभावस्य सामग्रीविरहप्रयोज्यत्वनियमात्। अथैककोटिव्याप्यदर्शनस्यैव तद्धर्मिकापरकोटिज्ञानप्रतिबन्धकतयाऽपरकोटिज्ञानसामग्रीविरहादेव [न] संशय इति चेत्? हन्त! एवमपरकोटिज्ञानसामग्रीविरहे सामान्यसामग्रीतयैव तन्मात्रकोटिकज्ञानमस्तु न तु तन्मात्रकोटिकप्रत्यक्षज्ञानत्वं कार्यतावच्छेदकं, तत्कोटिव्याप्यदर्शन(त्वं) कारणतावच्छेदकं मानाभावात्। यथा पटादिज्ञानसामग्रीविरहे सति घटज्ञानसामान्यसामग्रीतयैव घटमात्रगोचरं ज्ञानं न तु तज्ज्ञानत्वावच्छिन्नं प्रति विशेषसामग्र्यन्तरमपि कल्प्यते। तथा च विशेषदर्शनस्यापरकोटिज्ञानप्रतिबन्धकत्वेनोपयोगित्वं न तु जनकत्वेनेति। किञ्च कुङ्कुमं गन्धवन्न वा कुङ्कुमं न गन्धवद् इति संशयविपर्ययोत्तरं तद्गन्धाभिव्यञ्जकतैलसम्बन्धे कुङ्कुमं गन्धवदिति प्रत्यक्षे, गृहं घटवन्न वा गृहं घटाभाववदिति संशयविपर्ययोत्तरं प्रदीपादिसमवधाने गृहं घटवदिति प्रत्यक्षे च विशेषदर्शनस्य व्यभिचारात् समानकरणकसंशयविपर्ययोत्तरप्रत्यक्षे

१. 'तदभावावश्यम्भावात्' इति पाठो मातृकायाम्।

प्रतिबन्धकाधीनसंशयविपर्ययप्रत्यक्षोत्तरप्रत्यक्षे वा तस्य हेतुत्वं वाच्यम्। न हि प्रकृतस्थले समानकरणकं संशयविपर्ययोत्तरप्रत्यक्षं, संशयविपर्यययोर्मानसत्वात्, तदुत्तरप्रत्यक्षस्य च चाक्षुषत्वाद् बाह्यालोकरूपसहकारिविरहप्रयुक्तत्वेन प्रतिबन्धकानधीनत्वाच्चानल्पकल्पनापातादिति नापत्तिरिति। न च यदि व्याप्यदर्शनस्यापरकोटिज्ञानप्रतिबन्धकत्वं तदा श्वैत्यव्याप्यशंखत्वदर्शने सति पीतप्रत्यक्षं न स्यादिति वाच्यं, तत्कोटिप्रत्यक्षसामग्रीकालीनतत्कोटिव्याप्यदर्शनस्यानन्यगत्या प्रतिबन्धकत्वेन स्वीकारात्, श्वैत्यप्रत्यक्षसामग्र्याश्च तत्र मानाभावात्। नन्वेवं विशेषदर्शनस्याहेतुत्वे बाध्यबाधकव्यवस्था-अवधारणत्वानवधारणत्वविभागश्च ज्ञाने न स्यात् सामग्र्यवैचित्र्ये फलावैचित्र्यादिति चेत्? न, विशेषदर्शनाव्यवहितोत्तरोत्पत्तिकत्वेनापि बाधकत्वसम्भवात्। अवधारणञ्च ज्ञाने तत्कोटिविषयत्वे सत्यपरकोट्यवच्छेदविषयत्वमपरकोटिव्यवच्छेदभानसामग्रीसमाजादार्थसमाजमहिम्नैवोपपन्नं न विशेषसामग्र्यन्तरं कल्पयति। न च संशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनमपि हेतुरिति मूलग्रन्थविरोधः, उक्तयुक्त्या हेतुशब्दस्य प्रयोजकत्वार्थकत्वात्। अस्तु वा विशेषदर्शनस्य तत्र हेतुत्वं, तथापि प्रकृते तस्य तत्त्वेन जनकत्वस्य विवक्षितत्वात् नातिप्रसङ्गः। न हि तत्र तस्य तत्त्वेन जनकत्वं किन्तु संशयविरोधित्वेन। अन्यथा स्थाणुपुरुषसंशयानन्तरम् अयं न स्थाणुरित्याप्तवाक्यात् पुरोवर्तिनि स्थाणुत्वाभावावगतौ पुरुषत्वव्याप्यदर्शनं विना पुरुषप्रत्ययानुदयप्रसङ्गः। न चैवमेवास्त्विति वाच्यं, स्थाणुत्वाभावनिश्चये संशये निवृत्ते इन्द्रियसन्निकर्षादौ सत्यपि न पुरुषप्रत्यक्षमित्यस्यानुभवबाधितत्वात्। संशयविरोधित्वेन तु प्रयोजकत्वे विपरीतनिश्चयस्यापि संशयविरोधित्वापत्तेः। न च पुरोवर्तिनि न स्थाणुत्वमित्याप्तवाक्यात् पुरोवर्तिनि स्थाणुत्वाभावावगतौ पुरोवर्ती पुरुषः स्थाणुपुरुषान्यतरत्वे सति स्थाणुत्वाभाववत्त्वादित्यनुमानादेव पुरुषज्ञानसम्भवेन तथाविधज्ञानस्य तथात्वेनैव जनकत्वमिति वाच्यम्, एतावत्प्रणालीमविदुषोऽपि तदवगमात् पुरुषं साक्षात्करोमीति तदनुभवाच्च।

उपाध्यायास्तु पक्षतोपरक्तपरामर्शस्याव्यवहितोत्तरकाले जनकत्वं विवक्षितं, तेन नानुव्यवसायादौ तदनुपरक्तव्यवहितजन्येऽतिव्याप्तिः। न चैवं निरन्तरानुमितिद्वयगोचरानुमित्साधीनपक्षतासहकृतपरामर्शजन्यद्वितीयानुमितौ निरन्तरपरामर्शद्वयात्मकसत्प्रतिपक्षस्थले प्रथमस्य द्वितीयेन नाशे विनश्यदवस्थद्वितीयेन प्रतिबन्धकाभावे सति जनितानुमितौ चातिव्याप्तिरिति वाच्यं, स्वाव्यवहितप्राक्कालवृत्तिपक्षतोपरक्तपरामर्शस्य जनकत्वाभ्युपगमात्[१]। न च परामर्शानुव्यवसायाभावेन तत्कारणत्वग्रहासम्भवः, अनुमित्यनन्तरं पक्षताविरहे विनश्यदवस्थस्यानुव्यवसायात्।

---

१. 'जनकत्वमभ्युपगमात्' इति पाठो मातृकायाम्।

न च तदुपरक्तस्याग्रहे कथं तादृशस्य जनकत्वग्रहः ? पक्षतायाः सहकारित्वेन तथाजनकत्वाभावात् परस्यासंवलनदशायां द्वयोरपि ग्रहे कारणत्वग्रहानुपपत्त्यभावात्। न च तथापि परामर्शोत्पत्तौ बाधेनानुमितिप्रतिबन्धे तदनुव्यवसाये सत्प्रतिपक्षितपरामर्शानुव्यवसाये चातिव्याप्तिरिति वाच्यं, पूर्वत्र व्याप्तिविरहज्ञानस्यापरत्र किमत्र तत्त्वमिति जिज्ञासायामेवोत्पत्तेः। विरोधिज्ञानानुपरागकालीनत्वेन वा परामर्शविशेषणान्नोक्तदोषः। न चैवं पीतः शंख इति ज्ञानदशायां श्वैत्यानुमित्यव्याप्ते[१]स्तज्जनकपरामर्शस्य विरोधिविषयकज्ञानकालीनत्वादिति वाच्यं, पीतज्ञानस्य श्वैत्यानुमितिविरोधिविषयकत्वेऽपि विरोधित्वाभावादित्याहुः।

तन्न, उक्तपरामर्शे विरोधिज्ञानानुपरागकालीनत्वं विशेषणन्न वा? आद्ये तत एव तद्दोषाभावसम्भवात्। द्वितीये फलतो न कश्चिद्विशेषः।

वयन्तु-पूर्वोक्तकर्मधारयसमासबलाद्व्याप्तिसमानाधिकरणपक्षधर्मताज्ञानं यत्तज्जन्यज्ञानमनुमितिरित्यर्थः। एवं सति कुत्रापि नातिव्याप्तिः तत्र सर्वत्र पक्षतायाः वक्ष्यमाणबाधकेनानवच्छेदकत्वादित्यालोचयामः।

अस्मद्गुरवस्तु-पक्षतावच्छिन्नं व्याप्तिविशिष्टं व्याप्तिविषयकं यत्पक्षधर्मताज्ञानं वस्तुगत्या यः पक्षस्तद्धर्मताज्ञानं तज्जन्यज्ञानमनुमितिरित्यर्थः। न चानुव्यवसायस्मरणोपनयजन्यज्ञानजन्यशाब्दज्ञानव्याप्तिविशिष्टपक्षधर्मत्वरूपसादृश्यज्ञानजन्योपमितिसंशयविपर्ययोत्तरप्रत्यक्षादिष्वतिव्याप्तिः, पक्षतावच्छिन्नतादृशज्ञानजन्यत्वाभावात्। न चानुव्यवसायादिषु व्यभिचारात् पक्षतावच्छिन्नतादृशज्ञानाजन्यत्वेऽपि[२] संशयविपर्ययोत्तरप्रत्यक्षे पक्षतावच्छिन्नस्यैव तादृशज्ञानस्य जनकत्वेऽतिव्याप्तिरेवेति वाच्यं, तत्रापि धारावाहिकप्रत्यक्षदर्शनेन पक्षतावच्छिन्नतादृशज्ञानस्याजनकत्वात्।

वस्तुतस्तु इदं रजतमितिज्ञाने यथा क्वचित् स्वरूपसतो रजतत्वस्य वैशिष्ट्यविषयत्वं क्वचिदसतः, उभयथापीदं रजतमित्येवज्ञानं, तथा व्याप्तिविशिष्टपदं स्वरूपसद्व्याप्तिविषयत्वे वैज्ञानिकव्याप्तिविषयत्वे चोभयथाऽपि सम्भवतीति व्याप्तिविशिष्टपदं ज्ञानविषयतापन्नव्याप्तिमत्परम्। तथा च भ्रमप्रमासाधारणज्ञाविषयतापन्नव्याप्तिकपक्षधर्मतालाभे समासानियमेन न काचिदनुपपत्तिः। प्रत्युतैकैकसमासाश्रयणेऽपरापरसमासोपस्थापिते तदर्थे नानुमितिः स्यात्। न

---

१. 'श्वैत्यमित्यनुव्याप्तेः' इति पाठो मातृकायाम्।

२. 'ज्ञानजन्यत्वेऽपि' इति पाठो मातृकायाम्।

तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते। अथानुमानं न प्रमाणं

चेष्टापत्तिः, अनुभवविरोधात्। न हि घटोऽयं, घटत्ववानयं, घटे घटत्वमित्यासां प्रतीतीनां घटवैशिष्ट्यविषयत्वे विशेषः। तथा व्याप्तिविशिष्टः पक्षधर्मः, व्याप्तिविशिष्टस्य पक्षधर्मता, व्याप्तिविशिष्टे पक्षधर्मता, पक्षधर्मस्य व्याप्तिवैशिष्ट्यं, पक्षधर्मे व्याप्तिवैशिष्ट्यमित्यादिप्रतीतीनां तत्कर्मधारयादिसमासोत्पाद्यानां व्याप्तिपक्षधर्मता-सामानाधिकरण्यविषयत्वे[1] [न] कश्चिद्विशेष इति संक्षेपः।

नन्वनुमितावनुमितित्वं कार्यतावच्छेदकम्। तच्चेदुपस्थितं तदेव लक्षणमस्तु लाघवात् प्रथमोपस्थितत्वाच्च। न चानुगतधर्मग्रहं विना तत्रोक्तज्ञानजन्यत्वग्रहसम्भव इति चेन्न, तत्र ह्यनुमितित्वं गृहीतमेव किन्तु लक्ष्यतावच्छेदकतयोपयोगि। न ह्येकमेव लक्षणं लक्ष्यतावच्छेदकञ्च सम्भवति। इतरभेदसाधने तयोरभेदेऽन्वय-व्याप्तिग्राहकेणैव पक्षतावच्छेदकावच्छिन्नसाध्यसिद्धिसम्भवेन सिद्धसाध [नात्] व्यतिरेकिण्यन्वयव्याप्तेरेव ग्रहणाभिप्रायकत्वात्। तदुपस्थितावप्येतल्लक्षणेऽ-प्यनुपपत्त्यभावाच्च। तृणारणिमणिन्यायेन कारणत्वग्रहे कार्यतावच्छेदकोप-स्थित्यपेक्षाध्रौव्यमपि नेत्यलमसद्ग्रहणेनेति।

तदिति। व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यप्रमाकरणम्। यद्वाऽनुमानम्-अनु-मानपदवाच्यम्, (यद्वा?) अनुमानतया व्यवहर्तव्यम् इत्यर्थः। तेन न पौनरुक्त्यमिति-भावः।

अनुमानं प्रमाणमसहमानश्चार्वाकः प्रत्यवतिष्ठते— **अथेति।** धूमदर्शनानन्तरं वह्न्यर्थिप्रवृत्तिजनकधीकरणं न प्रमाणमित्यर्थ इति **मिश्राः**। तन्न, लिङ्गतज्ज्ञानयो[2]-रुक्तरूपेणोपग्रहेऽपि हेतोरसिद्धिः[3]। धूमलिङ्गे सिद्धसाधनेनाश्रयासिद्ध्या तज्ज्ञाने स्वरूपासिद्ध्या व्यभिचारशङ्काविषयत्वस्य हेतावभावात्। न चानुमानप्रमाणत्वाभिमतं धूमादि न प्रमाणं व्यभिचारसंशयविषयत्वात् सम्प्रतिपन्नवदित्यर्थ इति नवीनमतं सम्यक्, सिद्धसाधनात्। धूमादेर[4]कारणतयाऽप्रमाणत्वात्। तस्माद्धूमो न प्रमाकरण-

---

१. 'सामान्याधिकरण्यविषयत्वे' इति पाठो मातृकायाम्।

२. 'लिङ्गकज्ञानयोः' इति पाठो मातृकायाम्।

३. 'हेतोरसिद्धः' इति पाठो मातृकायाम्।

४. 'धूमादेव कारणतया' इति पाठो मातृकायाम्।

योग्योपाधीनां योग्यानुपलब्ध्याऽभावनिश्चयेऽप्ययोग्योपाधिशङ्कया व्यभिचार-संशयाच्छतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात् संवादेन च प्रामाण्याभिधानादिति नाप्रत्यक्षं प्रमाणमिति, न, अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात्, एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्, तयोश्च परकीययोरप्रत्यक्षत्वात्, अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च।

अपि चानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणतापत्तेः प्रामाण्यस्यानुमेयत्वात्, स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः। व्याप्तिग्रहोपायश्च वक्ष्यते।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ अनुमितिप्रकरणं समाप्तम्

ज्ञानविषयो व्यभिचारशङ्काविषयत्वात् सम्प्रतिपन्नवत्। न च तन्मते प्रतियोग्यप्रसिद्धिः, चार्वाकमते पराभ्युपेतस्यासत्ख्यात्युपनीतस्यैव निषेधसम्भवादित्यर्थः।

नाप्रत्यक्षं प्रमाणमिति। इतीति हेतौ। तथा च यतोऽनुमानं न प्रमाणमतो नाप्रत्यक्षं शब्दादिकमपि प्रमाणं शब्दस्यानुमानाधीनप्रथमसङ्केतग्रहमूलकत्वादुपमानस्य चानुमानमूलकातिदेशवाक्यरूपशब्दमूलकत्वादित्यर्थः। अतो नोपक्रमोपसंहारविरोधः।

सम्प्रति शब्दादिप्रामाण्ये विवादाभावादप्रत्यक्षपदमनुमानपरं सामान्यशब्दस्यापि प्रकरणवशाद् विशेषपरत्वाभ्युपगमादित्यपि केचित्।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायाम् अनुमितिप्रकरणं समाप्तम्

।। व्याप्तिपञ्चकप्रकरणम् ।।

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः?। न तावदव्यभिचरितत्वम्। तद्धि न 'साध्याभाववदवृत्तित्वम्', साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्, साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्, सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्, साध्यवदन्यावृत्तित्वं वा, केवलान्वयिन्यभावात्।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचित्तामणौ व्याप्तिपञ्चकप्रकरणं समाप्तम्

तदिति। अव्यभिचरित्वमित्यर्थः। **साध्याभाववदवृत्तित्वमिति**। न चाकाशातिव्याप्तिः, वृत्तिमत्त्वे सतीतिविशेषणात्। आकाशादेर्व्याप्यत्वेऽपि पक्षधर्मताविरहात् न तत्रानुमितिरतो न विशेषणमित्यप्यन्ये।

संयोगादिसाध्यकसद्धेतावव्याप्तेर्लक्षणान्तरमाह **साध्यवदिति**।

एवं साध्याभाववदिति व्यर्थमित्यपरितोषादाह **साध्यवदिति**।

ननु यत्किञ्चित् साध्यवत्प्रतियोगिकान्योन्याभावसामानाधिकरण्यं धूमादावपीत्यव्याप्तिरित्यरुचेराह **सकलेति।** सकलपदमशेषपरं न त्वशेषानेकपरमतो यत्रैकमेव साध्यं तत्र [न] साकल्याप्रसिद्धिरित्यवधेयम्।

ननु संयोगादिसाध्यकसद्धेतावव्याप्तिरित्यनुशयेनाह **साध्यवदन्येति।** साध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाववदवृत्तित्वमित्यर्थः। अन्योन्याभावश्च व्याप्यवृत्तिरिति नोक्तदोषः। अत्रापि वृत्तिमत्त्वे सतीतिविशेषणमतो नाकाशादावतिव्याप्तिरिति ध्येयम्।

केवलान्वयिनीति। केवलान्वयिधर्मसाध्यक इत्यर्थः।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां व्याप्तिपञ्चकप्रकरणं समाप्तम्

।। सिंहव्याघ्रलक्षणप्रकरणम् ।।

नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैय्यधिकरण्यानधिकरणत्वं वा। तदुभयमपि साध्यानधिकरणानधिकरणत्वम्। तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चाप्रसिद्धम्।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ सिंहव्याघ्रलक्षणप्रकरणं समाप्तम्

नापीति। अत्र साध्यासामानाधिकरण्यं साध्यसामानाधिकरण्यनिषेधः। साध्यवैय्यधिकरण्यं तु विशब्दमहिम्ना साध्या [धि] करणभिन्नाधिकरणत्वमिति नाभेदः।

प्रथमपक्षे साध्याधिकरणानधिकरणत्वानधिकरणत्वविवक्षायां व्यभिचारिसाधारण्यापत्त्या द्वितीयपक्षस्य साध्यानधिकरणानधिकरणत्व एव पर्यवसानादुभयपक्षे तदेव तात्पर्यविषयं वर्णयित्वा ज्ञापयति **तदुभयमपीति।**

यद्वा साध्यासामानाधिकरण्यं साध्यवन्मात्रावृत्तित्वम्। साध्यवैय्यधिकरण्यं तु साध्यानधिकरणवृत्तित्वम्। एवञ्चोभयलक्षणस्य साध्यानधिकरणानधिकरणत्व एव पर्यवसानमित्याह **तदुभयमपीति।**

तत्र केवलान्वयिनीत्यर्थः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां सिंहव्याघ्रलक्षणप्रकरणं समाप्तम्

।। व्यधिकरणधर्मावच्छिन्नाभावप्रकरणम् ।।

अथेदं वाच्यं ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात्। न चैवं घट एव व्यभिचारः, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वं हि व्यभिचारः। न च वाच्यत्वाभावो घट इति चेत्तर्हि तादृशसाध्याभाव-सामानाधिकरण्याभावो व्याप्तिस्तथा चाप्रसिद्धिः।

प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकस्तद्वैशिष्ट्यज्ञानस्य[१] अभावधी-हेतुत्वात्। अन्यथा निर्विकल्पादपि घटो नास्तीति प्रतीत्यापत्तेः। गवि शशशृङ्गं नास्तीति प्रतीतेरप्रसिद्धेः, शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ व्यधिकरणधर्मावच्छिन्नाभावप्रकरणं समाप्तम्

तद्वैशिष्ट्यज्ञानस्येति। प्रतियोगिनि त्ववच्छेदकधर्मवैशिष्ट्यज्ञानस्येत्यर्थः। **अन्यथेति**। प्रतियोगिधीमात्रस्याभावधीहेतुत्व इत्यर्थः। न च विशिष्टवैशिष्ट्यज्ञानस्य विशेषणता-वच्छेदकप्रकारकविशेषणज्ञानजन्यत्वात् कथं निर्विकल्पकाद् घटो नास्तीति प्रतीतिरिति वाच्यं, विशिष्टज्ञानमात्रे विशेषणतानवच्छेदकाप्रकारकविशेषणज्ञानत्वेन हेतुत्वात्। अन्यथा विशिष्टवैशिष्ट्यावगाहि-अवैशिष्ट्यविशेषणज्ञानयोः[२] सामग्रीभेदकल्पने गौरवापत्तेः। अत एव प्रमेयत्वप्रकारकज्ञानान्न दण्डीति बुद्धिस्तस्य विशेषणता-नवच्छेदकप्रमेयत्वप्रकारकत्वात्। विशेषणविशेष्ययोरुभयोः स्वस्वविशेषण-वैशिष्ट्यग्रहसामग्रीसत्त्वे विशिष्टवैशिष्ट्यबोधोपपत्तेः। अस्तु वा तथा। तथापि प्रकृते घटाभावप्रतीत्यापत्तेरित्यर्थो न तु तदाकारप्रतीत्यापत्तेरित्यर्थः। तथा च निर्वि-कल्पस्यारोपहेतुत्वेन विशिष्टज्ञानस्यैव तथात्वमवश्यं स्वीकरणीयमिति भावः। ननु व्यधिकरणवैशिष्ट्यज्ञानं भ्रमरूपं सम्भवत्येव। न हि प्रतियोगितावच्छेदक-प्रकारकप्रतियोगिप्रमात्वेन तत्र हेतुत्वं गौरवात्। किन्तु तादृशप्रतियोगिज्ञानत्वेन लाघवात्। अत एव न निर्विकल्पकादप्यभावधीः। न चास्य व्यधिकरणधर्मावच्छिन्नस्य प्रतियोगिनः सर्वथाऽसत्त्वेनासत्ख्यात्यापत्तिः, वाच्यत्वमात्रस्यैव प्रतियोगित्वात्। तत्र च व्यधिकरणो धर्मोऽवच्छेदकस्तद्वैशिष्ट्यज्ञानञ्च तत्रान्यथाख्यातिरूपमेव।

---

१. ''तद्विशिष्टज्ञानस्य'' इति पाठो यद्यपि प्रचलितः प्राप्यते च बहुत्र पुस्तकेषु तथापि अत्र व्याख्यानानुसारी पाठः समादृतः।

२. न विद्यते वैशिष्ट्यं यत्रेति तथाभूतं यद्विशेषणम् । विशेषणतावच्छेदकवैशिष्ट्यरहितमिति यावत्। तद्विषयकज्ञानस्येत्याशयः स्यात् ।

अथ वाच्यत्वं क्वचित् न समवेतमिति विशेषदर्शने सत्येव वाच्यत्वं समवायितया घटे नास्तीति प्रतीतेस्तेनाभ्युपगमः। अन्यथा तादृशाभावप्रतिपत्तावस्य केवलान्वयित्वग्रहासम्भवात्। तथा च तादृशभ्रमस्यापि तत्राभावात् कथं तदभावधीरिति चेत्? न, प्रतियोगिव्यधिकरणसंसर्गज्ञानवद् व्यधिकरणधर्मावच्छिन्नप्रतियोगिज्ञानस्याहार्यस्यैव तत्रोपयोगित्वात्। आहार्यज्ञानस्य विशेषदर्शनाप्रतिबध्यत्वात्। अथ प्रतियोगिव्यधिकरणसंसर्गज्ञानस्य निषेध्यधीप्रतिक्षेप्यविषयासंज्ञकत्वमात्रेणोपयोगादाहार्यस्यापि तस्याभावप्रतीतावुपयोगित्वमुचितम्। प्रतियोगितावच्छेदकवैशिष्ट्यज्ञानत्वस्य त्वभावरूपससम्बन्धिकपदार्थज्ञाने सम्बन्धितावच्छेदकावच्छिन्नसम्बन्धिज्ञानत्वेनोपयोगित्वादनाहार्यस्यैव तस्यान्वयव्यतिरेकाभ्यां तत्रोपयोगित्वमभ्युपेयमिति चेत्? न, अनाहार्यतादृशज्ञानत्वेन हेतुत्वे गौरवात्। नन्वेवमनाहार्यघटपटादिज्ञानेऽपि तत्संयोगप्रत्यक्षत्वापत्तिरिति चेत्? न, संयोगादिप्रत्यक्षे सम्बन्धितावच्छेदकप्रकारकानाहार्यसम्बन्धिज्ञानस्य प्रत्यक्षरूपविशेषसामग्र्या अवश्यकल्पनीयत्वात्। तदभावादेव तदभावोपपत्तेः। अन्यथाऽनाहार्यघटपटस्मरणादिरूपज्ञाने सति तत्संयोगप्रत्यक्षापत्तिः।

न चानाहार्यत्वं सामान्यसामग्र्यामेव विशेषणमस्त्विति वाच्यं, विशेषसामग्र्यां तद्विशेष[ण]स्यावश्यकत्वात्। अन्यथाऽनाहार्यघटपटस्मरण आहार्यघटप्रत्यक्षे च सति तत्संयोगप्रत्यक्षत्वापत्तिः। ननु गवि शशीयतया शृङ्गाभावनिश्चयो नानुपलब्धिमात्राद्, अतीन्द्रियोच्छेदापत्तेः। किन्तु योग्यानुपलब्धेः। योग्यता च शशीयतावच्छिन्नशृङ्गतदुपलम्भकसामग्रीरूपा। सा च तादृशशृङ्गस्यापारमार्थिकतया दोषादिघटितैव वाच्या (तु?)। तथा च तस्यां सत्यां न तादृशशृङ्गानुपलब्धिस्तदनुपलब्धौ न सेति कथं तादृशशृङ्गाभावो गवि प्रतीयेत। तस्माद् गवि शशशृङ्गं नास्तीत्याकाराऽपि यदि धीस्तदा गोः शृङ्गाधिकरणकशशीयत्वप्रतियोगिकाभावविषयतया कथञ्चिदुपपादनीयेति चेत्? न, प्रतियोग्युपलम्भकसामग्र्या गुणदोषभिन्नाया अवश्यवाच्यत्वात्। अन्यथा प्रतियोगिग्राहकगुणदोषाभावे घटाभावग्रहोऽपि न स्यात्। तयोरन्यतरसत्त्वे प्रतियोगिप्रमाऽप्रमयोरन्यतरापत्तावनुपलब्ध्यसिद्ध्यापत्तेः। न च प्रकृते दोषभिन्ना तदुपलम्भकसामग्री नास्त्येवेति वाच्यं, चक्षुरादेरेव तथात्वात्। न हि दोषमात्रादेव शशीयत्वावच्छिन्नशृङ्गोपलब्धिः। किञ्च नैषा योग्यानुपलब्धिरभावग्राहिका[१], संयोगाद्यभावस्याप्रत्यक्षतापत्तेः। किन्तु यत्र हि यत्सत्त्वमनुलब्धिविरोधि[२] तत्र तस्याभावो गृह्यत इत्याकारिका। सा च प्रकृतेऽप्यस्त्येव, गवि शशीयत्वावच्छिन्नशृङ्ग[सत्त्व]स्यानुपलब्धिविरोधित्वात्। न च यत्र यदारोप्यते तत्र तस्याभावो गृह्यते, न च गवि शृङ्गमारोप्यते तत्र तस्य सत्त्वात्। न च शशीयत्वविशिष्टशृङ्ग-

१. 'ग्राहिता' इति पाठो मातृकायाम्	२. 'यत्सत्त्वमनुपलब्धिः' इति पाठो मातृकायाम्

(त्व?) मारोप्यते, अप्रमितेः इति[१] वाच्यं शशीयत्वविशिष्टशृङ्गस्यैवारोप्यत्वात्, लाघवादारोप्यज्ञानमात्रस्यैव हेतुत्वात्। न त्वारोप्यप्रमायाः, गौरवात्। अस्तु वा गोः शृङ्गे शशीयत्वमारोप्यं तत्रापि नानुपपत्तिः। शृङ्गत्वभानसामग्र्या प्रतियोगिनि शशीयत्वे शृङ्गत्वमपि भासते। न हि शशीयत्वमिह नास्तीत्येव प्रतीतिः, किन्तु शश(:?) शृङ्गं [नास्तीति।] न च प्रतियोगितावच्छेदकमात्रमेव प्रतियोगिनि भासत इति कथं तत्र शृङ्गत्वमपि भासतामिति वाच्यं, प्रमेयो घटो नास्तीत्यत्र [I] तादृशस्यापि प्रमेयत्वस्य घटे भासनादिति, मैवं, प्रतियोगितावच्छेदकविशिष्टप्रतियोग्युपलम्भाभावोऽभावप्रतीतिमात्रे हेतुरिति व्यधिकरणधर्मावच्छिन्नप्रतियोग्युपलम्भासिद्ध्या तदभावासिद्धेः। न च परेषां भ्रमरूपस्तदुपलम्भोऽस्त्येवेति वाच्यं, वाच्यत्वं न समवेतमिति सत्यपि विशेषदर्शने तथाप्रतीतेर्भ्रमस्यापि प्रमापूर्वकत्वाद् अन्यथाऽतिप्रसङ्गात्। तथा प्रमायास्तस्या अलीकत्वेनासम्भवात्। न च वाच्यत्वमेव प्रतियोगि वाच्यत्वत्वमेव प्रतियोगितावच्छेदकं तादृशञ्च प्रसिद्धमेव। तत्र समवेतत्वं स्वभानसामग्र्या भासते। एवञ्च शशीयत्वमेव प्रतियोगि तत्र च स्वभानसामग्र्या शृङ्गत्वमपि भासत इत्युच्यत इति चेत्, प्रमाणाभावात्। न चेदं रजतं गेहे नास्तीति भ्रमोपस्थितनिषेधेन व्यधिकरण-धर्मावच्छिन्नाभावसिद्धिः, तत्रेदन्त्वस्यैव तदवच्छेकत्वात्। न हि भ्रमेण तदवच्छेदकत्वं गृहीतमिति वस्त्वपि तथा, भ्रमोच्छेदापत्तेः। किञ्च शशीयत्वशृङ्गयोरभावे ईदृशानुगतबुद्धिरस्त्विति दण्डिपुरुषाभाव इवायं विशिष्टाभावो वाच्यः, स च सम्बन्धाभावपर्यवसन्न एवेति नायं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः। वस्तुतस्तु प्रतियोग्यभावयोः स्वरूपं सम्बन्धः। न हि तदपहाय प्रतियोगित्वादि शक्यनिर्वचनम्। न च व्यधिकरणधर्मावच्छिन्नस्य तादृशधीजननयोग्यत्वलक्षणः स्वरूपसम्बन्धोऽस्ति, अलीकस्याजनकत्वात्, सत्त्वगर्भत्वाज्जनकत्वस्य, परमते तु जनकत्वमेव सत्त्वमिति सुतरां व्यधिकरणधर्मावच्छिन्नेन तदिति संक्षेप इति **जयदेवमिश्राः।**

अन्ये तु प्रतियोगितावच्छेदकत्वं हि तदन्यूनानतिरिक्तदेशवृत्तित्वं तद्व्यावृत्तधी-जनकत्वं वा? नाद्यः, व्यधिकरणधर्मस्य तदसम्भवात्। अन्यथा वैयधिकरण्यासिद्धिः। नान्त्यः, तदतिरिक्तदेशवृत्तित्वेन तस्य तद्व्यावर्तकत्वाभावात्। न च तद्धर्मविशिष्टप्रतियोगिज्ञानस्याभावनिरूपकत्वमित्येव तस्य प्रतियोगितावच्छेदकत्वमिति वाच्यं, घटत्वेन घटो नास्तीत्यत्र घटत्वपटत्वोभयधर्मविशिष्टप्रतियोगिज्ञानस्याभाव-धीहेतुत्वेन द्वयोरप्यवच्छेदकत्वापत्तावेकस्यैव समानाधिकरणव्यधिकरणधर्मावच्छिन्न-प्रतियोगिकत्वापत्तेः। न चेष्टापत्तिः, समानाधिकरणधर्मावच्छिन्नप्रतियोगिकाभावस्यापि केवलान्वयित्वाभ्युपगमापत्तेः, परिभाषापत्तेश्च। तस्मात्प्रतियोगितान्यूनानतिरिक्तदेशवृत्तेरेव

१. 'अप्रमेरिति' पाठो मातृकायाम्।

तदवच्छेदकत्वान्न व्यधिकरणधर्मावच्छिन्नाभावसिद्धिः। अत एव धर्ममात्रं प्रतियोगितावच्छेदकं न तूक्तरूपं गौरवादिति निरस्तम्, उक्तबाधकात्। अन्यूनानतिरिक्तवृत्तिधर्मद्वये चावच्छेदकत्वे लाघवादिविनिगमकमित्याहुः।

विष्णुपत्युपाध्यायास्तु यदि गवि शशीयं शृङ्गं नास्तीति प्रतीत्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावोऽभ्युपेयस्तदा पटत्वावच्छिन्नघटे घटत्वं नास्तीति प्रतीत्या व्यधिकरणधर्मावच्छिन्नाधिकरणताकोप्यरिक्ताभावोऽभ्युपेयःस्यात्। न चेष्टापत्तिः, अपसिद्धान्तात्। अथ घटे घटत्वस्य सत्त्वात् सविशेषणे हीति न्यायेन तत्प्रतीतेर्घटे घटत्वाभावमात्रविषयत्वमिति चेत्, हन्तैवं गवि शृङ्गस्य सत्त्वात् तत्प्रतीतेः[१] सविशेषणे हीति न्यायेन शृङ्गे शशीयत्वाभावमात्रविषयत्वमिति तुल्यम्। अत एव वा रक्ते घट इदानीमयं न श्याम इति धीः श्यामत्वस्यैव विशेषणस्याभावमवगाहते। यदि च गवि शृङ्गसत्त्वेऽपि प्रतियोगितावच्छेदकावच्छिन्नस्याभावविरोधित्वात् शशीयत्वावच्छिन्नशृङ्गाभावो न विरुद्धस्तदा घटे घटत्वसत्त्वेऽप्यधिकरणतावच्छेदकावच्छिन्ने प्रतियोगितावच्छेदकावच्छिन्नसत्त्वस्याभावविरोधित्वात् पटत्वावच्छिन्ने घटे घटत्वाभावोऽपि न विरुद्धः। वस्तुतस्तु शृङ्गस्य प्रतियोगिनः सत्त्वात् कथं तदभावः, प्रतियोगितदभावयोरेकत्र विरोधात्। न च प्रतियोगितावच्छेदकावच्छिन्नस्य तद्विरोधित्वं तादृशञ्च तत्र नास्तीति वाच्यं, लाघवेन प्रतियोगित्वेनैव विरोधित्वात्, न तु तदवच्छेदकावच्छिन्नत्वेन गौरवात्। अत एव घटवति घटपटौ न स्त इति प्रतीत्या व्यासज्यप्रतियोगिको विद्यमानघटप्रतियोगिकोऽभावो न सिध्यतीति वक्ष्यत इत्याहुः।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां व्यधिकरणधर्मावच्छिन्नाभावप्रकरणं समाप्तम्

---

१. 'सत्प्रतीतेः' इति पाठो मातृकायाम्।

॥ पूर्वपक्षप्रकरणम् ॥

अथ साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वं व्याप्तिः, केवलान्वयिनि साध्यासामानाधिकरण्यं निरधिकरण आकाशादौ प्रसिद्धमिति चेत्, न, साध्यासामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधिकरणत्वं वा, केवलान्वयिनि, यत्किञ्चित्साध्याधिकरणानधिकरणे धूमे चाव्याप्तेः। नापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं, पर्वतीयवह्नेर्महानसीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्, द्रव्यत्वादेरव्याप्यतापत्तेश्च। न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वाऽभावविशेषणं देयं, संयोगादौ साध्ये सत्त्वादेरनैकान्तिकत्वाभावप्रसङ्गात्। न हि प्रतियोगिविरोधी संयोगादेरपरोऽत्यन्ताभावोऽस्ति, अधिकरणभेदेनाभावभेदाभावात्। नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं व्याप्तिः, मूले वृक्षः कपिसंयोगवान्नेत्यबाधितप्रतीतेस्तदन्योन्याभावस्यापि तत्र सत्त्वात्। न चैवं भेदाभेदः, अवच्छेदकभेदेन तत्सत्त्वाभ्युपगमात्। साधनवन्निष्ठान्योन्याभावप्रतियोगिसाध्यवद्यस्येति षष्ठ्यर्थव्याप्यव्यापकभावानिरूपणात् साध्यसाधनयोर्व्याप्तिनिरूप्यत्वाद् वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च विशेषाभावकूटादेवाभावव्यवहारोपपत्तौ सामान्याभावे मानाभावात्। नापि साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यानधिकरणसाध्यसामानाधिकरण्यं, साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेः, महानसादौ समवायितया वह्निवह्निमतोरत्यन्तान्योन्याभावयोः सत्त्वाद्धूमादावप्युक्तलक्षणाभावाच्च।

अथेति। ननु साध्यासमानाधिकरणत्वं साध्यानधिकरणाधिकरणत्वं[१] साध्याधिकरणानधिकरणत्वं वा? नाद्यः, केवलान्वयिन्यप्रसिद्धेः, साध्यासामानाधिकरण्यं निरधिकरण आकाशादौ प्रसिद्धमित्यग्रिमग्रन्थविरोधश्च। नान्त्यः, साधिकरणपदवैयर्थ्यापत्तेः, साध्याधिकरणानधिकरणानधिकरणत्वस्य साध्यसामानाधिकरण्यमात्रपर्यवसानतया व्यभिचारिण्यतिव्याप्तेश्चेति चेत्?

अत्रोपाध्याः साध्यासामानाधिकरण्यं साध्याधिकरणानधिकरणत्वमेव। अतो नाप्रसिद्धिः नवाऽग्रिमग्रन्थविरोधः। न च व्यभिचारिसाधारण्यं साधिकरणपदवैयर्थ्यञ्चेति वाच्यं, यतो व्यभिचारिसाधारण्यमत एव साधिकरणपदं दत्तम्। तथा च सतिसप्तमीमहिम्ना तस्मिन् सत्येव साधिकरणत्वं साध्यसामानाधिकरण्यव्यापकाधिकरणताकत्वरूपं लभ्यते। तदपि साध्यसामानाधिकरण्यावच्छिन्नमधि-

१. 'साध्यानधिकरणत्वम्' इति पाठो मातृकायाम्

अथानौपाधिकः सम्बन्धो व्याप्तिः, उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः, व्यापकत्वं तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं, व्यभिचारे चावश्यमुपाधिः, प्रतियोगित्वं न विरोधित्वं सहानवस्थाननियमलक्षणं गोत्वाश्वत्वयोरतथात्वात्, अन्योन्याभावप्रतियोगिन्यसत्त्वाच्च। किन्तु यथाऽधिकरणाभावयोः स्वरूपविशेषः सम्बन्धस्तथा प्रतियोगित्वमनुयोगित्वमपि। अभावविरहात्मत्वं वेति चेत्, यत्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधो न धूमादौ, प्रकृतसाध्यव्यापक-साधनाव्यापकधर्मश्च सिद्ध्यसिद्धिभ्यां न निषेद्धुं शक्यः। यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं यावत्साधनाव्यापके च घटत्वादौ साध्यव्यापकत्वं निषिध्यत इति चेत्?, न, व्यधिकरणत्वात्। यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेत्? न, सोपाधेरपि तथात्वात्, तथाहि साधनस्य वह्नेरव्यापकं यावदार्द्रेन्धनं तत्प्रत्येकमव्यापकं साध्यधूमस्य, द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तद्व्यापकं महानसीयवह्नेः।

नापि साध्यं यावदव्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वं साध्याव्यभिचारित्वस्यैव गमकत्वात्। तच्च दूषितम्।

नापि कार्त्स्न्येन सम्बन्धो व्याप्तिः, एकव्यक्तिके तदभावात्। नानाव्यक्तिके सकलधूमसम्बन्धस्य प्रत्येकवह्नावभावात्। अत एव न कार्त्स्न्येन साध्येन सम्बन्धो व्याप्तिः, विषमव्याप्ते तदभावाच्च। न च यावत्साधनाश्रयाश्रितसाध्यसम्बन्धः, साधनाश्रयमहानसादौ सकले प्रत्येकं वह्नेराश्रितत्वाभावात्। नापि साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यं, यावद्धर्मसामानाधिकरण्यं हि यावत्तद्धर्माधिकरणाधिकरणत्वं, तच्चाप्रसिद्धं साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः।

नापि स्वाभाविकः सम्बन्धो व्याप्तिः, स्वभावजन्यत्वे तदाश्रितत्वादौ वाऽव्याप्त्यतिव्याप्तेः। नाप्यविनाभावः, केवलान्वयिन्यभावात्।

करणसम्बन्धसम्बन्धलक्षणं साधिकरणत्वं लभ्यते। तदवच्छिन्नत्वमपि व्यापकीभूततत्कत्वमेव। तस्यैव चाधिकरणसम्बन्धः साध्यसामानाधिकरण्यावच्छिन्नो भवति यस्याधिकरणतायाः साध्याधिकरणता व्यापिका भवति। व्यभिचारिणस्त्वधिकरणतायाः साध्याधिकरणता न व्यापिका, व्यभिचारस्थल एव तस्य साध्यसामानाधिकरण्यं विनाऽधिकरणसम्बन्धसत्त्वादिति भवति व्यभिचारिव्यावृत्तिरिति। एवञ्चात्र यद्यपि साध्यानधिकरणाधिकरणत्वं न विवक्षितं, तथाप्यक्षरार्थतासम्भवमात्रेण, तदप्यग्रे दूषणाय विकल्पयिष्यतीति ध्येयमित्याहुः।

अथ सम्बन्धमात्रं व्याप्तिः, व्यभिचारिसम्बन्धस्यापि केनचित्सह व्याप्तित्वाद् धूमादिव्याप्तिस्तु विशिष्यैव निर्वक्तव्येति, तन्न, लिङ्गपरामर्शविषय-व्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात्। न च सम्बन्धमात्रं तथा, तद्बोधादनुमित्यनुत्पत्तेः। नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदं, सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात्।

केवलान्वयिनि केवलान्वयिधर्मसम्बन्धो व्यतिरेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिः। एतयोरनुमितिविशेषजनकत्वम्। अनुमितिमात्रे पक्षधर्मतैव प्रयोजिका। न चातिप्रसङ्गः, विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्व-नियमादिति केचित्, तदपि न, साध्यवदन्यावृत्तित्वस्य धूमेऽसत्त्वाद् वह्निमत्पर्वतान्यस्मिन् धूमसत्त्वात्। न च सकलसाध्यवदन्यावृत्तित्वं, वह्निमतां प्रत्येकं तथात्वात्, सर्वत्र लक्षणे साध्यत्व-साधनत्व-तदभिमतत्वानां व्याप्तिनिरूप्यत्वेनात्माश्रयः। साध्यत्वं हि न सिद्धिकर्मत्वं सिषाधयिषाविषयत्वं वा, महानसीयवह्नौ तदभावात्। न च सामान्यतो व्याप्त्यवगमोऽस्त्येव परस्य कथमन्यथा दूषणेनासाधकतां साधयेदिति वाच्यं, स्वार्थानुमानोपयोगि-व्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ पूर्वपक्षप्रकरणं समाप्तम्

मिश्रास्तु - वस्तुतस्तु नञ्व्यत्यासे न साध्यं साध्यविरोधि साध्याधिकरणा-नधिकरणमिति यावत्। तच्च साध्याभावगगनसाधारणमिति न केवलान्वयिन्यप्रसिद्धिः। तथा च साध्यं सामानाधिकरण्यानधिकरणं यस्य स तथा। व्यभिचारिणि च साध्यविरोधिना साध्याभावेनैव हेतोः सामानाधिकरण्यान्न प्रसङ्गः। एतावता च साध्याभावे हेतुसामानाधिकरण्याभावो लब्धो न तु हेतौ साध्यसामानाधिकरण्यम्। तच्चानुमितिहेतुव्यापकत्वज्ञानहेतुत्वस्य निरस्यत्वादिति साधिकरणत्वम्। तदर्थश्च साध्याधिकरणाधिकरणत्वमित्याहुः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां पूर्वपक्षप्रकरणं समाप्तम्

।। सिद्धान्तलक्षणप्रकरणम् ।।

अत्रोच्यते– प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ सिद्धान्तलक्षणप्रकरणं समाप्तम्

प्रतियोग्यसमानाधिकरणेति। अत्र यत्पदं हेत्वभिमत्परम्। तथा च हेतुसमानाधिकरणः प्रतियोग्यसमानाधिकरणो योऽत्यन्ताभावस्तत्प्रतियोगितावच्छेदकावच्छिन्नं यदवच्छिन्नं न भवति तदवच्छिन्नेन हेतुतावच्छिन्नसामानाधिकरण्यं हेतुतावच्छिन्नव्याप्तिरित्यर्थः। अत्र धूमादावव्याप्तिवारणायावच्छेदकावच्छिन्नेनेति। न चैवमपि धूमादावव्याप्तिस्तत्तद्वह्नित्वादेस्तादृगभावप्रतियोगितावच्छेदकत्वादिति वाच्यं, वह्नित्वावच्छिन्न(त्व?)स्य तत्तद्वह्नित्वानवच्छिन्नत्वात् न्यूनाधिकदेशवृत्तित्वेनानवच्छेदकत्वात्। यद्वा नञ्व्यत्यासेन प्रतियोगितानवच्छेदकावच्छिन्नत्वमर्थः। तथा सत्त्वे तद्दोषशङ्काऽपि नेत्यर्थः। एवं हि सर्वस्यैव धूमस्य सर्वेण वह्निना सहैका व्याप्तिरुक्ता भवतीति नात्रावच्छेदकपदवैयर्थ्यशङ्कापीति ध्येयम्। प्रतियोगितावच्छेदकत्वं[1] तु प्रतियोगितातिरिक्तदेशावृत्तित्वं प्रतियोगितानधिकरणावृत्तित्वं वा। न तु प्रतियोगितावच्छक्तिप्रत्ययजनकत्वम्। तेन जनकत्वस्य व्याप्तिरूपनियमगर्भत्वान्नात्माश्रयादिः। न च प्रतियोगित्वं स्वरूपसम्बन्धः। तच्च विशिष्टधीजननयोग्यत्वमित्यात्माश्रय इति वाच्यं, व्याप्तिग्रहे तथाजनकत्वाश्रयस्य विषयत्वान्न तु जनकत्वस्य सम्बन्धत्वस्य तत्राप्रवेशात्।

प्रतियोग्यसमानाधिकरणत्वमत्यन्ताभावविशेषणं त्वयमेतत्संयोगी एतत्वादित्यादावव्याप्तिनिश्चयेन तद्वारणार्थम्। न च तत्र व्याप्तिसत्त्वे ततः संयोगाभावावच्छिन्नदेशेऽपि तदनुमानापत्तिः, बाधेन तत्र तदननुमितेः, गन्धप्रागभावावच्छिन्नो घटो गन्धवान् इत्यत्रेव[2], अन्यथा संयोगावच्छिन्नप्रदेशेऽपि तन्न स्यात्। न च हेतुमति बाधे व्यभिचारनियमः, तादृशसाध्याभावसहचारस्य तत्त्वात्। अभावज्ञानमात्रस्याविरोधत्वेनानायत्यैव प्रतियोगिविरुद्धाभावसहचारस्य तथा वाच्यत्वात्। न चैवं बाधासङ्कीर्णस्थलान्तरानुसरणापत्तिः, अशोकवनिकान्यायात्। अन्यथा यत्र नानोदाहरणसम्भवस्तत्रैकमात्रोपादानेऽपि तदापत्तिप्रसङ्गः।

यज्ञपत्युपाध्यायास्तु सिद्धसाधनादेव तत्र नानुमितिर्न तु बाधात्। पक्षतावच्छेदकसामानाधिकरण्यमात्रं हि साध्यस्यानुमित्या विषयीक्रियते। न तु तदवच्छेदेनापादकाभावात्। न च पक्षधर्मतैवापादिका तस्याः सोपपादकपक्षीयसाध्यमात्रापादनसामर्थ्यात्। न तु पक्षतावच्छेदकधर्मावच्छिन्नसाध्येऽपि, तेन विना

---

१. 'प्रतियोगितानवच्छेदकत्व' इति पाठो मातृकायाम्

२. 'इत्यत्र एव' इति पाठो मातृकायाम्

तदुपपत्तेः। न च पक्षीयसाध्यं विनाऽनुपपत्तिरज्ञानभानप्रयोजिका भ्रान्तानुमित्यनुत्पत्त्यापत्तेः। नाऽपि ज्ञाता, पक्षीयसाध्यज्ञानं विना तदसम्भवादिति वाच्यं, पक्षे साध्यं विना पक्षवृत्तिसाधनमनुपपन्नमित्येवमनुपपत्तिज्ञानसम्भवात्। न च पक्षतावच्छेदकावच्छिन्न-हेतुज्ञानात् तदवच्छिन्नानुमितिः, येन प्रकोरण पक्षे हेतुज्ञानं तत्प्रकारकसाध्य-स्यानुमितिविषयत्वात्। अन्यथा नियामकान्तराभावेऽतिप्रसङ्गापत्तेरिति वाच्यं, तादृशधर्मावच्छेदेन हेतुसम्बन्धस्य पक्षधर्मतात्वाभावाल्लाघवेन पक्षवृत्तित्वमात्रस्य तत्त्वात्। तथा च यदवच्छेदेन[1] हेतुसम्बन्धस्तदवच्छिन्नसाध्यसम्बन्धे पक्षधर्मतायाः सामर्थ्याभावात्। तस्मात् सिद्धसाधनादेव तत्र नानुमितिरिति प्राहुः।

तच्चिन्त्यं, व्यावर्तकधर्मस्यौत्सर्गिकं विशेषणत्वं, तस्य साक्षात्सम्बन्धत्वात् न तूपलक्षणत्वं, तस्य परम्परासम्बन्धत्वेन गौरवात्। एवञ्च पक्षतावच्छेदकधर्मस्यापि विशेषणतया तदवच्छेदेन साध्यसम्बन्धस्यानुमितिविषयत्वात्। तस्य च रागसिद्ध्या सिद्धसाधनाभावात्। अत एव वाजपेयेन यजेतेत्यत्र कर्मनामधेयत्वमुपपद्यते। अन्यथा यत्र वाजपेयसाध्यता तत्र स्वर्गसाधनता इत्युपलक्षणभावेनाप्यन्वयोपपत्तावेककालावच्छेदेन तदुभयान्वयाप्रसत्त्या कर्मनामधेयत्वकल्पनानुपपत्तेः।

द्रव्यत्वे संयोगव्याप्त्यव्याप्तिवारणाय[2]प्रतियोग्यसमानाधिकरणपदं तु न देयं, द्रव्ये संयोगसामान्याभावस्याभावेन[3]संयोगत्वस्य तादृशाभावप्रतियोगितानवच्छेदकत्वात्। न च यावद्विशेषाभावसत्त्वेन द्रव्ये सामान्याभावोऽस्त्येव तस्य तद्व्याप्यत्वादिति वाच्यं, तथा सति द्रव्यं न संयोगीति प्रत्ययापत्तेः। न च यत्किञ्चित्प्रतियोगिसत्त्वं सामान्याभावं प्रत्यविरोधीति वाच्यम्, एवं हि मानाभावेन तत्र तत्सत्त्वासिद्धेः। यावद्विशेषाभावस्याप्येकावच्छिन्नस्य सामान्याभावव्याप्यत्वात्। न च वृक्षत्वावच्छेदेन संयोगवृत्त्यभावेन तदवच्छेदेन सामान्याभावोऽस्ति, यावद्विशेषाभावस्यापि तदवच्छेदेन वृत्तेस्तद्व्याप्यत्वेऽपि दोषाभावादिति वाच्यं, प्रतियोग्यधिकरणताव्यापक-धर्मस्याविरोधेनाभावाधिकरणतावच्छेदकत्वाभावाात्। अन्यथाऽत्यन्ताभावाधिकरणतायाः प्रतियोग्यधिकरणताव्यापकत्वापत्तौ तयोरविरोधापत्तेः। एकावच्छेदेनैव तयोर्विरोधः, न चात्र वृक्षत्वावच्छेदेन संयोगवृत्तिरिति चेत्? तर्हि वृक्षत्वावच्छेदेन संयोगोऽवयवावच्छेदेन तदभावो वर्तत इत्यस्यापि स्वीकारापत्तेः। न च तथा प्रतीतेरभावान्न तथेष्यत {प्रतीयते} इति वाच्यं, वृक्षत्वावच्छेदेन संयोगाभावप्रतीतेरप्यभावात्।

---

१. 'तदवच्छेदेन' इति पाठो मातृकायाम्

२. 'संयोगव्याप्ति अतिव्याप्तिवारणाय' इति पाठो मातृकायाम्

३. 'संयोगसामान्याभावेन' इति पाठो मातृकायाम्

यत्तु तत्र सन्दिग्धाव्याप्तिवारकतया तत्पदं संयोगसामान्याभावस्य क्वचिदाकाशप्रदेशे सन्देहात्। सर्वदेशावच्छेदेन संयोगसत्त्वे मानाभावादिति, तन्न, सन्दिग्धव्यर्थविशेषणापत्तेः।

ननु सामानाधिकरण्यं समानेनाधिकरणेन सम्बन्धः। सम्बन्धत्वञ्च विशिष्ट-धीनियामकत्वम्। नियामकत्वञ्च जनकत्वगर्भम्। तच्च व्याप्तिगर्भमिति चक्रकापत्तिरिति चेत्? न, नियामकस्य सम्बन्धस्य व्याप्तिधीविषयत्वेऽपि नियामकत्वरूप-तत्सम्बन्धत्वाविषयकत्वात्। संसर्गविधयैव तत्र तद्भानाभ्युपगमात्। प्रकारत्वे वाऽप्यस्य संयोगत्वादिनैव रूपेण तथात्वात्, न तु सम्बन्धत्वेन, तज्ज्ञानानान्तु सम्बन्धज्ञानत्वेन जनकत्वमिति नानुपपत्तिः।

यद्वा सम्बन्धत्वं न विशिष्टधीजनकत्वम्। किन्तु विशेषणविशेष्यान्यविशिष्ट-धीविषयत्वम्। विशिष्टधीश्च विशेषणत्वधीः, तत्त्वं तत्स्वरूपसम्बन्धविशेषः। अन्यथा समूहनभेदानुपपत्तेः। स्वरूपसम्बन्धोऽपि स्वरूपेणैव भासते। न तु सम्बन्धत्वेनेति। न च सम्बन्धस्वरूपस्य व्याप्तिप्रवेशे तेषां संयोगादिरूपत्वेना-ननुगमेऽनुमितिजनकत्वाभाव इति वाच्यं, तेषां संयोगादिविषयत्वेनाननुगतानामेव सम्बन्धज्ञानत्वेनानुगतानामनुमितिजनकत्वाविरोधात्। इष्टसाधनताज्ञाने स्वरूप-सदिष्टत्वस्येव स्वरूपसत एव सम्बन्धत्वस्य नियामकत्वादित्युक्तत्वादिति। स्वरूपसम्बन्धश्च विशेषणताविशेष एवेत्याहुः।

अत्यन्ताभावपदञ्च विरोधिपरं न तु संसर्गाभावविशेषपरम्। तेनायं घटात्यन्ताभाव-वान् प्रमेयत्वादित्यत्र व्यभिचारिण्यभावाप्रतियोगिकाभावानभ्युपगमेन प्रमेयत्व-समानाधिकरणात्यन्ताभावप्रतियोगिघटात्यन्ताभावसमानाधिकरणत्वेनातिव्याप्तिरिति दूषणमलग्नकं बोध्यम्। विरोधित्वमपि न नियमघटितं, किन्त्वनवच्छेदेन सहानवस्थितत्वम्।

एतेन संसर्गाभावघटितमत्यन्ताभावत्वम्। संसर्गाभावत्वञ्च प्रतियोग्या-रोपजन्यज्ञानविषयाभावत्वम्। जन्यत्वञ्च नियमगर्भमित्यात्माश्रय इति निरस्तम्। अत एव च जातौ व्यक्तेः कालिकी व्याप्तिः स्यात्। प्रलये तद्ध्वंससत्त्वेन तदत्यन्ताभावाभावात्। नित्यत्वेन तत्रापि तदभ्युपगमेन नित्ययोरपि कालिकी व्याप्तिर्न स्यात्। प्रलये तदत्यन्ताभावस्यापि सत्त्वेन परस्परं परस्परसमानाधिकरणात्यन्ता-भावप्रतियोगित्वादित्यपि दूषणं परास्तं वेदितव्यम्। कालिकव्याप्तौ ध्वंसस्यापि विरोधित्वेनातिप्रसङ्गाभावेन तदत्यन्ताभावसत्त्वासत्त्वयोस्तदानीमविचारणीयत्वात्।

वस्तुतस्तु प्रतियोगिसमवायिदेश एव तयोर्विरोधात् प्रलयकाले व्यक्तिध्वंससत्त्वेऽपि तदत्यन्ताभावसत्त्वमप्रत्यूहमन्यथा तस्य नित्यत्वभङ्गापत्तेः। न चैवं नित्ययोरपि न कालिकव्याप्तिः स्यादित्युक्तमिति वाच्यं, तदा तदत्यन्ताभावसत्त्वेऽपि तस्य प्रतियोगिसमानाधिकरणत्वात् कालिव्याप्तौ तस्य विरोधित्वाभावात्। अत्यन्ताभावपदेन च विरोधित्वस्योक्तत्वात्। न च व्यक्तिध्वंसस्यापि प्रतियोगिसमवायिदेशवृत्तित्वेन प्रतियोगिसमानाधिकरणत्वादुक्तातिप्रसङ्गस्तदवस्थ एवेति वाच्यं, ग्राह्यसम्बन्धेनासामानाधिकरण्यस्योक्तत्वात्। अस्ति च तद्ध्वंसे तथा, प्रतियोग्यसमानकालत्वात्। समानकालत्वस्य ग्राह्यत्वात्। तस्माद्दैशिकव्याप्तौ प्रतियोग्यसमानदेशत्वं, कालिकव्याप्तौ प्रतियोग्यसमानकालत्वं प्रतियोग्यसमानाधिकरणत्वं पर्यवस्यतीति नोक्त दोष इति द्रष्टव्यम्।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां सिद्धान्तलक्षणप्रकरणं समाप्तम्

।। सामान्याभावप्रकरणम् ।।

सामान्यावच्छिन्नप्रतियोगिताकाभावः पृथगेव, अन्यथा सकलप्रसिद्धरूपाभावे प्रसिद्धरूपवदन्यत्वे चावगते वायौ रूपं न वा, वायू रूपवान्न वेति संशयो न स्याद्, विशेषाभावकूटस्य निश्चितत्वात्।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ सामान्याभावप्रकरणं समाप्तम्

ननु सामान्यं यदि विशेषाभावप्रतियोगितावच्छेदकं तदा तदभावप्रतियोगितावच्छेदकमेव न स्यादित्यायातम्। विशेषाभावकूटातिरिक्तस्य सामान्याभावस्याभावात्। एवञ्च वह्निसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधूमत्वावच्छिन्नसमानाधिकरणत्वाद्वह्नेर्धूमव्याप्यत्वापत्तिरित्यत आह **सामान्येति।** तथा च वह्निसमानाधिकरणायोगोलकीयसामान्याभावप्रतियोगितावच्छेदकत्वाद् धूमत्वस्य नोक्तदोष इत्यर्थः। **अन्यथेति।** विशेषाभावकूटस्यैव सामान्याभावरूपत्वे रूपविशेषाभावकूटस्य वायौ निश्चितत्वेन संशयविषयत्वायोगाद् वायौ रूपन्न वेति संशयो न स्यादित्यर्थः।

अत्र वदन्ति-विशेषाभावानामेवानिश्चितेन[१] रूपाभावत्वेन संशयविषयताऽस्तु। न च रूपत्वाश्रयप्रतियोगिकाभावत्वं तत्र निश्चितमेव, तत्प्रतियोगिवर्गे रूपत्वनिश्चयाद् रूपत्वावच्छिन्नप्रतियोगिकाभावत्वमपि कथमनिश्चितं, यदि स एव रूपसामान्यविरहात्मा तदुभयातिरिक्तं च रूपाभावत्वं दुर्वचमिति वाच्यं, रूपत्वेन शङ्कितधर्मस्य वायुवृत्तित्वसन्देहात् तदनिश्चयात्। न च तादृशसंशयविरहदशायामपि वायौ प्रसिद्धरूपविशेषाभावसमूहे निश्चिते रूपसंशयदर्शनान्नैवमिति वाच्चं, रूपत्वस्य निश्चितविशेषाभावप्रतियोगिमात्रवृत्तित्वसन्देहमन्तरेण तादृशसंशयस्य युक्तिबाधितत्वात्। गृहनिष्ठाभावप्रतियोगिमात्रवृत्ति[२]घटत्वमिति ज्ञाने सति विशेषदर्शनाद्गेहे घटो न वेति संशयदर्शनात्। किञ्चरूपवत्त्वाश्रययावदभावत्वं रूपाभावत्वं, तच्च तावद्रूपाभावावधारणेनावधारितम्, एतावन्त्येव रूपाणीत्यनवधारणात्। किञ्च यदि सामान्याभावस्तादृशसंशयविषयतयाऽभ्युपेयस्तदाद्यक्षणे घटे रूपं नवेति संशयदर्शनात् तत्रापि सामान्याभावस्वीकारापत्तेः। न चेष्टापत्तिः, तत्र कस्यचित्प्रागभावेन कस्यचिदत्यन्ताभावेन यावत्प्रतियोगिकैकाभावासम्भवात्। सामान्याभावस्य च तथात्वात्। किञ्च विशेषाभावानां सामान्यावच्छिन्नप्रतियोगिकाभावत्वं धर्मः कल्प्यताम् , न त्वतिरिक्तसामान्याभावोऽपि, धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वात्। न च सामान्याभावासिद्धौ सामान्यावच्छिन्नप्रतियोगिकाभावत्वमेवाप्रसिद्धमिति वाच्यं, सामान्यावच्छिन्नप्रतियोगिकत्वे सत्यभावत्वं तत्त्वं , तच्च प्रसिद्धमेव। न चैवं यत्किञ्चिदभावग्रह एव तद्ग्रहापत्तिः, व्यासज्यवृत्तिधर्मवत् सकलतदाश्रय-

---

१. 'विशेषाभावानामेव (वा) निश्चितेन' इति पाठो मातृकायाम्

२. 'मात्रव्यक्तिघटत्वम्' इति पाठो मातृकायाम्

वृत्तिवेद्यत्वाभ्युपगमात्। अन्यथा धर्मिकल्पनागौरवापत्तेरित्युक्तसंशयानुरोधेन न सामान्याभावसिद्धिरिति पूर्वपक्षः।

तत्र **वाचस्पतिमिश्राः** वायौ रूपन्न वेति संशयो रूपत्वावच्छिन्नप्रतियोगिकत्वेनाभावमवगाहते। रूपविशेषाभावसमूहश्च न तथेति तादृशसंशयानुपपत्त्याऽतिरिक्त एव रूपसामान्याभावस्तद्विषयः। न च तादृशसंशयो निश्चयो वा तथात्वेन नाभावमवगाहते, तत्प्रतियोगितान्यूना[न] तिरिक्तवृत्तित्वस्यावच्छेदकत्वस्य तत्रास्फुरणात्, किन्तु रूपत्वोपहितप्रतियोगिकत्वेन विशेषाभावसाधारण्येनैव रूपेणेति वाच्यं, तथा सति रूपत्वोपहितधर्मप्रतियोगिकाभावत्वस्य विशेषाभावनिश्चये निश्चितत्वात् तादृशसंशय एव न स्यात्। अन्यथा नीलघटवत्तया निश्चिते घटसामान्यसंशयापत्तेः। विशेषनिश्चये सामान्यस्य निश्चितत्वात्। असंशये प्रकृतेऽप्युक्तसामान्यनिश्चये तुल्यत्वात्। अत एवैतादृशनिश्चय एव प्रमाणत्वेनोपन्यासार्ह इत्यपि अशोकवनिकादेशन्यायेन अनादेयम्। न च विशेषाभावनिश्चयप्रदर्शनमेवं सत्यनुपयुक्तमेव स्यात् , तदुपदर्शनस्यार्थापत्तावुपयोगित्वात्, त्वया च प्रत्यक्षस्योपन्यासादिति वाच्यं , विशेषाभावानां सामान्यधर्मानवच्छिन्नप्रतियोगिकत्वप्रदर्शनार्थं तदुपन्यासात्। अन्यथा तेषामेव तथात्वसिद्धौ सामान्याभावासिद्धि[1]प्रसङ्गादित्याहुः।

तच्चिन्त्यं, विशेषाभावानामेव लाघवेन सामान्यावच्छिन्नप्रतियोगिकत्वधर्मस्वीकारे तत्रैव तदनिश्चयेनोक्तसंशयाद्युपपत्तावतिरिक्तसामान्याभावासिद्धेः। अन्यथा धर्मिकल्पनापत्तेरित्युक्तत्वादिति।

यज्ञपत्युपाध्यायास्तु सामान्याभावानभ्युपगमे मिलितघटद्वये यावद्रूपाभावसत्त्वेन रूपमिह नास्तीति प्रतीत्यापत्तेः। तद्घटद्वयवृत्तिरूपविशेषयोरपि तत्रैव घटद्वये स्वस्वानधिकरणघटव्यक्त्यवच्छेदेन यावदभावसत्त्वात्। यावद्विशेषाभावस्यैव त्वया तादृशबुद्धिविषयत्वाभ्युपगमात्। न चैकाधिकरण्यविशिष्टास्ते तादृशबुद्धिविषया इति वाच्यम्, ऐकाधिकरण्यस्य भावात्मकत्वे तदभावस्याभावात्मकत्वापत्तौ तदुभयकरम्बितवस्तूपलम्भापत्तेः। उपलक्षणत्वे मिलितवृत्तीनामपि क्वचिदेकाधिकरणवृत्तित्वेन तदुपलक्षितत्वात् तादृशबुद्धिविषयत्वापत्तेः। न चैकाधिकरणस्था एव ते तथा बुद्धिविषया इति वाच्यं, प्रत्येतव्यसत्त्वे प्रतीतेर्निवारयितुमशक्यत्वात्। किञ्च यावद्विशेषाभावसमूहोऽतिरिक्तो भावरूपश्चेत्? तदा सप्रतियोगिकत्वानुपपत्तिः। अभावरूपश्चेद्? विवादाभावः। अनतिरिक्तश्चेत्? रूपाभावा इति बहुत्वोल्लेखिप्रत्ययापत्तेरित्याहुः।

---

१. 'सामान्याभावसिद्धि...' इति पाठो मातृकायाम्

तदपि चिन्त्यं, यावद्विशेषाभावानामधिकरणभेदप्रतीतेस्तादृशधीप्रतिबन्धकत्वात्। यत्राधिकरणे यदवच्छेदेन सामान्याभावव्याप्यता यावद्विशेषाभावस्य त्वया वाच्या, तत्राधिकरणे तदवच्छेदेन ते सामान्याभावबुद्धिं जनयन्तीत्यभ्युपगमात्। अन्यथा वृक्षे यावत्संयोगाभावसत्त्वे सामान्याभावप्रतीत्यापत्तेः, तस्य तद्व्यापकत्वात्। प्रतियोग्य-समानाधिकरणतावच्छेदकधर्मावच्छिन्नानां सामान्याभावव्याप्यत्वे तादृशानामेव तेषां सामान्याभावव्यवहारहेतुत्वाभ्युपगमे मिलितघटद्वये प्रसङ्गाभावात्। घटद्वये च प्रत्येकं यावद्विशेषाभावाभावे समुदितेऽपि तथात्वमेव, प्रत्येकोभयातिरिक्तसमुदायस्यान-भ्युपगमात्। अभ्युपगमे वा तत्र रूपसामान्याभावप्रतीतेरिष्टत्वात्। न च यथा द्वित्व-समानाधिकरणाः यावद्विशेषाभावा इति प्रतीतिस्तथा द्वित्वसमानाधिकरणं रूपं नास्तीत्यादिप्रतीतिः स्यादिति वाच्यम्, अत्र हि द्वित्वे रूपसामान्याभावसामानाधिकरण्य-विषयत्वमापाद्यते? रूपे द्वित्वसामानाधिकरण्याभावविषयत्वं वा?, नाद्यः, इष्टापत्तेः, विशेषाभावकूटस्यैव सामान्याभावरूपत्वात्। नान्त्यः, बाधात्। अन्यथाति-रिक्तसामान्याभावपक्षेऽपि वायुघटवृत्तिद्वित्वसमानाधिकरणो रूपसामान्याभाव इति प्रतीतिवद् द्वित्वसमानाधिकरणं रूपन्नास्तीत्यपि प्रतीतिः स्यात्।

यत्तु प्रत्येतव्यशरीरस्य यावद्विशेषाभावस्य नानाधिकरणेऽपि सत्त्वे तत्प्रतीति-निवारणमशक्यमिति, तन्न, प्रत्येतव्यस्य यावद्विशेषाभावस्य प्रत्येकघटावृत्तित्वेन नानाधिकरणवृत्तित्वाभावात्। प्रत्येतव्यैकदेशो हि नानाधिकरणवृत्तिः, न तु प्रत्येतव्योऽपि।

यच्च समूहस्य सामान्याभावप्रतीतिविषयत्व इह रूपाभाव इत्येकत्वोल्लेखिनी तत्प्रतीतिर्न स्यादिति, तदपि न, एवं ह्याद्यक्षणे घटे रूपाभाव इति धीर्न स्यात्। न हि तत्र सामान्याभावस्तद्विषयः, कस्यचित्प्रागभावेन कस्यचिदत्यन्ताभावेन तावत्प्रतियोगिकैकाभावासम्भवात्। अन्यथा तस्याभ्रान्तत्वप्रसङ्गः। न चैवं तत्राप्याद्यक्षणे घटे रूपाभावप्रतीत्यनन्तरं रूपसामान्याभावसंशयोत्पत्तिरिति वाच्यं, प्रतियोगिवत् तत्प्रागभावस्यापि सामान्यात्यन्ताभावविरोधित्वेन तत्र तन्निश्चयस्यैव तत्प्रतिबन्धकत्वात्। किञ्च यावद्विशेषाभावानां बहुत्वेऽप्येको धान्यराशिरितिवद् एकत्वप्रत्ययोपपत्तेः, न हि तत्र राशित्वमतिरिक्तं द्रव्यम्, अवयव्यनभ्युपगमात्। संयोगभेदानाञ्च बहुत्वाद् गम्यगमकभावोऽप्यभेदेऽपि रूपीतरेण नानुपन्न इति।

केचित्तु प्रतीतिभेद एव सामान्याभावे मानम्। इह रूपं नास्तीति रूपत्वावच्छिन्नाभावोऽवगम्यते। नीलं रूपं नास्तीत्यादिना विशेषाभाव इति, तत्तुच्छं, यावद्विशेषाभावानामेव तद्विषयत्वात्। यथा घटोऽस्तीति सामान्यतः प्रतीतेः घटविशेषा एव विषया इति।

यदपि रूपाभावप्रतीतौ बहूनां विषयत्वे कारणत्वे वा गौरवमित्येकस्यैव सामान्याभावस्य विषयत्वं कारणत्वं वा लाघवात्। यथा क्षितिसकर्तृकत्वानुमानमेकमेवेश्वरं, यथा वा सम्बन्धानुमानमेकमेव समवायं विषयीकरोतीति, तदपि न, दृष्टान्ते हि सर्वस्यैव कल्प्यत्वेन लाघवादेक एव कल्प्यत इत्युचितम्। अत्र तु यावद्विशेषाभावानां क्लृप्तत्वात् प्रतीतेस्तद्विषयत्वेनैवोपपत्तावक्लृप्तसामान्याभावकल्पनायामेव गौरवम्। अन्यथोक्तयुक्त्या घटोऽस्तीतिप्रतीत्या बहुघटवत्यपि गृह एक एव घटो विषयीक्रियेत। न चेष्टापत्तिः, विनिगमकाभावात्। किञ्चैवं यावद्विशेषाभावः प्रतीतिपथं नावतरेदेव, सर्वत्र तत्सहचरितसामान्याभास्यैव विषयत्वसम्भवादिति।

जयदेवमिश्रास्तु प्रतियोगिभेदेनाभावभेदाभ्युपगमे घटप्रतियोगिकानां चतुर्णामप्यभेदः स्यादिति तत्कालतत्संसर्गतादात्म्यात्मकावच्छेदकभेदेन तत्र भेदः सर्वसम्मत इति सामान्यावच्छेदकस्य सत्त्वे तदवच्छिन्नाभाव आवश्यकः, बाधकाभावे ससम्बन्धिकपदार्थमात्रस्यैव सम्बधितावच्छेदकभेदेन भेदकल्पनादित्याहुः।

विष्णुपत्युपाध्यायास्तु मण्यादेरभावस्य दाहादौ कारणताग्राहकमानाल्लाघवसहकृतादेकाभावसिद्धौ विशेषाभावातिरिक्तस्य तस्य सिद्धिः। अन्यथा स्वरूपसम्बन्धेनैव विशिष्टज्ञानोपपत्तौ समवायासिद्धिप्रसङ्गात्। न च कूटत्वेन विशेषाभावानामेव तद्विषयत्वमस्त्विति वाच्यं, समवायतुल्यत्वादित्याहुः।

अस्मदुपाध्यायास्तु सामान्याभावानभ्युपगमेऽन्धकारप्रत्ययानुपपत्तिः, उद्भूतरूपतेजस्त्वावच्छिन्नसामान्याभावस्य तत्त्वात्। न च यावत्तेजःसंसर्गाभाव एव अन्धकारोऽस्तु, तथा सति सामान्यलक्षणयाऽपि तत्तत्तेजस्त्वस्य प्रतियोगितावच्छेकस्यानुपस्थितौ तत्तदवच्छिन्नानां तावतामभावानामग्रहणादन्धकारप्रत्ययस्यैवासिद्धेरित्युक्तत्वादिति दिक्।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां सामान्याभावप्रकरणं समाप्तम्

।। विशेषव्याप्तिप्रकरणम् ।।

यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यम्।

सामान्यव्याप्तिमुक्त्वा विशेषव्याप्तिमाह **यद्वेति**। परं लाघवमिति हृदयम्। ननु पृथिवीत्वादेर्गन्धादिव्यक्तिव्याप्यत्वमेव न स्यात्, सर्वस्यैव गन्धादेः पृथिवीत्वादिसमानाधिकरणात्यन्ताभावप्रतियोगित्वादिति, मैवं, स्वाधिकरणीभूतयद्व्यक्तिनिष्ठाभावाप्रतियोगिनी[1] या व्यक्तिः तदधिकरणत्वं तद्व्यक्तौ तद्व्याप्तिरित्यर्थात्। अस्ति च पृथिवीत्वाधिकरणीभूतयद्व्यक्तिनिष्ठाभावाप्रतियोगिनी या गन्धव्यक्तिस्तधिकरणत्वं तदधिकरणे पृथिवीत्वस्य व्याप्तिः। न चैवं द्रव्यत्वमपि तदधिकरणे गन्धव्याप्यं स्यात्, तदधिकरणे तद्व्याप्यत्वादेव[2]। परन्तु द्रव्यत्वत्वावच्छेदेन न तद् गृह्यते, व्याप्त्यनधिकरणवृत्तित्वात्। पृथिव्यधिकरणवृत्तिद्रव्यत्वेन तु गृह्यत एव, पृथिवीत्वाधिकरणस्य सर्वस्य तथाभावेन पृथिवीत्वावच्छेदेन व्याप्तिग्रहे बाधाभावात्। यद्वा तत्त्वावच्छिनाधिकरणे तत्तद्व्यक्तिनिष्ठात्यन्ताभावाप्रतियोग्यधिकरणत्वं व्याप्तिः। अस्ति च पृथिवीत्वावच्छिन्नाधिकरणेषु तथा, सर्वस्य तथाभावात्। द्रव्यत्वावच्छिन्नाधिकरणेषु च न तथा, सर्वेषु तथात्वाभावात्। क्वचिद्विशेषव्यक्तीनामसम्भवात्। धूमादौ तत्तद्धूमादेरेव हेतुत्वेन तदवच्छिन्नप्रत्येकाधिकरणे तथाभावादिति।

यत्तु **यज्ञपत्युपाध्यायाः** पृथिवीत्वं गन्धव्याप्यमेव न, किन्तु गन्धवत्त्वोपाधिव्याप्यं, गन्धवत्त्वस्य चैकत्वात्। न चैवं संयोगवत्त्वस्यैव व्यापकत्वे प्रतियोगीत्यादि व्यर्थं, संयोगवत् संयोगित्वस्याप्यव्याप्यवृत्तित्वादिति, तन्न, गन्धाननुमानापत्तेः। न चेष्टापत्तिः, अनुभवविरोधात्। वह्न्यादावप्युक्तप्रकारसम्भवेन तत्तद्वह्न्यादेरेव व्याप्तिरित्यग्रिमग्रन्थसन्दर्भविरोधात्। अन्योन्याभावगर्भायां गन्धवत्त्वोपाधावप्यव्याप्यतापत्तेश्चेति। वस्तुतस्तु तादृशात्यन्ताभावप्रतियोगितावच्छेदकं यन्न भवति तदवच्छिन्नेन सामानाधिकरण्यमित्यर्थः। न चैवं पूर्वलक्षणाभेदः, तत्र हि तदवच्छिन्नेन येन केनापि सामानाधिकरण्यं हेतुतावच्छेदकावच्छिन्नस्य व्यधिकरणस्यापि सर्वस्यैव व्याप्तिः, इह तु तादृशस्यापि समानाधिकरणयोरेव व्याप्तिरिति मताद् भेदः। तथा चायोगोलकीयो वह्निरत्र मते न व्यापक इत्यपि बोध्यम्। अन्यथा धूमत्ववह्नित्वादि[3]-

---

१. 'निष्ठाभावप्रतियोगिनी' इति पाठो मातृकायाम्

२. इष्टापत्तिरित्याशयः

३. 'धूमत्वादिवह्नित्वादि' इति पाठो मातृकायाम्।

यत्समानाधिकरणान्योन्याभावप्रतियोगि यद्वन्न भवति तेन समं तस्य सामानाधिकरण्यं वा, स्वसमानाधिकरणान्योन्याभावाप्रतियोगि यद्वत्कत्वं वा। अन्यवृत्तिवह्नितद्वतोरन्यवृत्तिधूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वाद् व्यधिकरणवह्निधूमयोर्न व्याप्तिः। किन्तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना। न चैवं धूममात्रे न व्याप्तिरिति वाच्यं, सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात्। धूमसम्बन्धिवह्निस्तद्व्याप्य एव। युगपदुत्पन्नविनष्टयोश्च व्याप्तिरेव।

कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः।

पुरस्कारेणैतद्व्याप्त्यनभिधानेऽनुमित्यनुपयोगित्वापत्तिः। तदिदं वक्ष्यति तत्तद्वह्नितत्तद्धूमयोरेव व्याप्तिः स्यान्न तु धूमत्ववह्नित्वावच्छेदेन। न च तदनुमानोपयोगीत्यादि व्यभिचारज्ञानप्रतिबन्धकतानापत्तेश्च।

अत्यन्ताभावगर्भलक्षणे प्रतियोगिवैयधिकरण्यप्रवेशाद् गौरवमित्यत आह **यदिति।** यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यदवच्छिन्नं न भवति तदवच्छिन्नेन येन यस्य सामानाधिकरण्यं तयोः व्याप्तिरित्यर्थः। न चैवं साध्यसामानाधिकरण्यमित्येवास्तु किं पूर्वप्रतीकेनेति वाच्यं, गन्धादिव्यभिचारिणि द्रव्यत्वेऽतिव्याप्तिवारकत्वात्।

स्वेति। स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्धर्मावच्छिन्नं यत्कत्वं स्वस्य तद्धर्मावच्छिन्नव्याप्यत्वमित्यर्थः। नन्वेवं पर्वतीयवह्निग्रहं विना पर्वतीयधूमव्याप्तिग्रहे कथं तस्मादनुमितिरिति चेत्? न, सामान्यलक्षणया वह्निनिरूपितधूमनिष्ठव्याप्तित्वेन तद्व्याप्तेरपि ग्रहात्, सम्बन्धिद्वयप्रत्यक्षत्वे सम्बन्धस्यापि प्रत्यक्षत्वात्। वह्नित्वधूमत्वादिना सकलवह्न्याद्युपस्थितौ सर्वासां विशेषव्याप्तीनां ग्रह इत्यप्याहुः।

नन्वत्यन्ताभावगर्भलक्षण इदं संयोगि सत्त्वादित्यत्रातिव्याप्तिरित्यत आह **कर्मणीति।** नन्वेवमधिकरणभेदेनाभावभेदाभावाद् य एव संयोगाभावः कर्मणि प्रतियोग्यसमानाधिकरणः स एव द्रव्यत्वसमानाधिकरण इति द्रव्यत्वेऽपि संयोगव्याप्तिर्न स्यादिति चेत्? न, प्रतियोग्यसामानाधिकरण्यरूपविशेषणवैशिष्ट्यावच्छेदेन यत्समानाधिकरणत्वरूपवैशिष्ट्यस्यात्यन्ताभावे विवक्षितत्वात्। अधिकरणभेदेनाभावभेदान्नातिप्रसङ्ग इत्याहुः।

नन्वेकस्यैव प्रतियोगिसामानाधिकरण्यं तद्वैयधिकरण्यञ्च विरुद्धमित्यवच्छेदकभेदेन ग्राह्यम्। तथा चावश्यकत्वात् तद्गर्भमेव लक्षणमस्तु, किं तज्ज्ञानाधीनज्ञानेन

यद्वा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणम् । कर्मणि च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वम् । न चान्योन्याभावस्याव्याप्यवृत्तित्वम्, अभेदस्याबाधितप्रत्यभिज्ञानात् ।

प्रतियोग्यसमानाधिकरणत्वविशेषणेनेत्याशयेनाह **यद्वेति**। अत्रापि साधनसामानाधिकरण्यावच्छेदेन प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं विवक्षणीयं, तेन नोक्तातिव्याप्तिस्तदवस्थेति ध्येयम्।

अन्योन्याभावोऽप्यव्याप्यवृत्तिरित्यभिमानेन प्रसञ्जितामव्याप्तिमुद्धरति **न चेति। अभेदस्येति।** तथा च तत्र संयोगात्यन्ताभावो भासेत न तु तद्वदन्योन्याभाव इति भावः। ननु प्रत्यभिज्ञानबलेन वृक्षत्वेनाभेदेऽपि संयोगवत्त्वेन वृक्षे तद्भेदोस्तु मूले वृक्षः कपिसंयोगवान्न वेत्यबाधितप्रतीतेः। संयोगतदभावयोरिवावच्छेद[क]भेदेनाविरोधाच्च। किञ्च संयोगाभावेन संयोगवदन्योन्याभावान्यथासिद्धौ घटाद्यन्योन्याभावोऽपि न सिध्येत्, घटत्वाद्यत्यन्ताभावेनैव तत्प्रतीत्यन्यथासिद्धेरिति चेत्?

अत्राहुः - घटत्वत्वज्ञानं विना घटत्वात्यन्ताभावज्ञानं न सम्भवति। तच्च घटान्यावृत्तित्वगर्भम्। घटान्यत्वञ्च घटत्वात्यन्ताभाववत्त्वमेवेत्यात्माश्रयादस्त्वतिरिक्तस्तत्र घटान्योन्याभावः। इह तु घटादिसंयोगत्वस्यावच्छेदकस्य भानध्रौव्ये तत एवावश्यकाद्बुध्यन्यथासिद्धौ न तद्वति तद्वदन्योन्याभावः स्वीक्रियते। ननु तथापि समानाधिकरणनिषेधबुद्धेरवच्छेदकात्यन्ताभावविषयत्वे घटो न पटो नेत्यत्रापि घटत्वात्यन्ताभाव[1] एव विषयोऽभ्युपेयतां विनिगमकाभावात्। तथा च समानाधिकरणनिषेधबुद्धेरन्योन्याभावविषयत्वं व्यधिकरणनिषेधबुद्धेरत्यन्ताभावविषयत्वमित्यभ्युपगमो व्याहन्येति चेत्? बाधकाभावे सति समानाधिकरणबुद्धेरन्योन्याभावविषयत्वाभ्युपगमात्। प्रकृते च मूले संयोगावच्छिन्नाद् वृक्षात् शाखायां संयोगाभावावच्छिन्नो वृक्षोऽभिन्न इत्यभेदप्रतीतेः सर्वजनसिद्धाया बाधकत्वात्। तदिदमुक्तम्-**अभेदस्याबाधितप्रत्यभिज्ञानादिति**।

केचित्तु घटो न पटो नेत्यत्रापि घटत्वा[द्य]त्यन्ताभावस्य स्फुरणाद्, घटाद्यन्योन्याभावस्यैव तदत्यन्ताभावरूपत्वात्, समानाधिकरणव्यधिकरणनिषेधप्रतीतिभ्याञ्चान्योन्याभावत्वात्यन्ताभावत्वयोरभिमानात्। न च संयोगात्यन्ताभावस्य तद्वदन्योन्याभावरूपत्वे संयोगवदन्योन्याभावस्याव्याप्यवृत्तित्वं स्यादिति चेत्? इष्टत्वात्। न चैवं संयोगव्याप्त्यतिव्याप्तिः, प्रतियोगितावच्छेदकव्यधिकरणत्वेनान्यो-

१. 'घटात्यन्ताभाव' इति पाठो मातृकायाम्

व्याप्यव्यापकभावाज्ञानेऽपि वस्तुसतस्तथात्वेनाज्ञायमानस्य सम्बन्धत्वेनैव भानस्य षष्ठ्यर्थत्वात्। न चैवमननुगमो दोषाय, कस्य का व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात्।

भावविशेषणात्। प्रतियोगितावच्छेदकव्यधिकरणधर्मेणाधिकरणोपस्थितौ समानाधिकरण-निषेधप्रतीत्याऽन्योन्याभावत्वं विषयीक्रियते, अधिकरणे प्रतियोगितातादात्म्यरूपेण तत्सामग्रीसत्त्वात्। अन्यथा त्ववच्छेदकात्यन्ताभावत्वं, तत्र ह्यधिकरणे तत्तादात्म्यग्रहस्य तदन्योन्याभावग्रहप्रतिबन्धकतया प्रतीतेरन्यथोपपादयितुमशक्यत्वात्। अत एव रूपादि न संयोगवदिति प्रतीतेरपि तदन्यताभावविषयत्वापत्तिरिति निरस्तं, तत्र प्रतियोगितादात्म्यारोपसम्भवेनान्योन्याभावत्वविषयत्वबाधकाभावात्। अन्यथा प्रतियोग्यधिकरणयोरभेदापत्तेः। न च समानाधिकरणनिषेधप्रतीतेरत्यन्ताभाव-विषयत्वमदृष्टचरमिति वाच्यं, प्रमाणबलेनात्रैव तत्कल्पनात्। अन्यथा तु ज्ञानस्य भ्रमत्वापत्तिरित्याहुः।

कस्य का व्याप्तिरित्यननुगतस्यैवेति। न चैवमप्यननुगमादनुमितिमात्रहेतु-त्वमशक्यग्रहमेव स्यादिति वाच्यं, तत्तत्साधकानुमितिं प्रति तत्तद्व्याप्तिज्ञानस्य हेतुत्वावधारणात्, इच्छाज्ञानयोरिव तत्तद्विषयकत्वेनेति भावः। नन्वनुमितित्वा-वच्छिन्नकार्यतानिरूपितकारणतावच्छेदरूपाभावेन तस्याकस्मिकतापत्तिः। न च पक्षधर्मताज्ञानमेव तत्प्रयोजकं, पक्षताया अननुगमेन स्वरूपसत्तद्धर्मता-ज्ञानस्याप्यननुगमात्। न च व्यभिचारज्ञानासहकृतसहचारज्ञानं तत्र हेतुरिति वाच्यं, तस्य व्याप्तिज्ञानं प्रति हेतुत्वेनानुमितिं प्रतित्यन्यथासिद्धत्वेनाहेतुत्वादिति चेत्?

अत्र केचित्- अनुगतहेतुत्वाभावादनुमितित्वस्यैकस्य कार्यतावच्छेदकस्याभावात् प्रत्यक्षादिभिन्नज्ञानत्वेन त्वनुमितिपदसङ्केतग्रहोपपत्तेरित्याहुः।

जयदेवमिश्रास्तु वस्तुसमानाधिकरणात्यन्ताभावाप्रतियोगिवस्तुसामानाधि-करण्यत्वमनुगतमिति तज्ज्ञानस्यैवानुमितित्वप्रयोजकत्वात्। न च धूमत्वादिना तत्तत्साधनोपस्थितावपि व्याप्तिग्रहे सत्यनुमितिदर्शनान्नैवमिति वाच्यं, स्वरूपसता तेन रूपेणानुगतानां व्याप्तीनां प्रातिस्विकरूपेणैव ज्ञानस्यानुमितिजनकत्वाभ्युपगमात्। यद्वा धूमत्वादिविशेषप्रकारकग्रहस्यापि वस्तुत्वादिविषयकत्वनियमेन तज्ज्ञानस्यापि सम्भवात्। न चैतादृशनियमे मानाभावः, तद्विषयकसंशयानुपपत्तेरेव मानत्वात्। न चैवं प्रमयेत्वादावपि संशयाभावेन तथात्वं स्यादिति वाच्यं, तस्यानेकपदार्थघटितत्वेन विशेषणग्रहं विना ग्रहानुपपत्तेः। अनुगतप्रतीत्या च वस्तुत्वस्यानुगतस्याखण्डस्यैव

अथ धूमवति वह्निह्रदौ न स्तः, धूमवान् वह्निमद्ह्रदो न भवतीति प्रतीतेर्व्यासज्यवृत्तिप्रतियोगिकौ वह्निवह्निमतोरत्यन्तान्योन्याभावौ धूमवति विद्येत इति कथमेते लक्षण इति चेत्?, न, तादृशाभावानभ्युपगमात्।

सिद्ध्या तदनपेक्षणात्। तदुक्तं **वर्धमानचरणैः लीलावतीप्रकाशे** अयं पदार्थः, अयं पदार्थ इत्यनुगतप्रतीत्या पदार्थत्वस्यैकस्य सिद्धेरिति। न च सखण्डत्वेऽपि तदुपपत्तिः, विशेषणाननुगमेनाननुगतत्वापत्तेः[१]। वह्निव्याप्यधूमवानयमिति शाब्दबोधेऽपि तज्ज्ञानान्न तत्र व्यभिचार इत्याहुः। तत्त्वादीनामनुगतत्वात्[२] नानुपपत्तिः, अत एव प्रमादिपदसङ्केतोऽपि सुग्रह इत्यप्याहुः।

अथ धूमवति वह्निह्रदौ न स्तः, धूमवान् वह्निमद्ह्रदो न भवतीत्यादि। न चात्यन्ताभावगर्भलक्षणे नाव्याप्तिः[३], प्रतियोग्यसमानाधिकरणपदेनैवाभिमतसिद्धि(द्धे)-रिति वाच्यं, तस्य प्रतियोगिता[वच्छेदका]वच्छिन्नासामानाधिकरण्यपरत्वात् तस्य च तत्रापि सत्त्वात्। (न?) एकसत्त्वे तादृशधर्मावच्छिन्नस्याभावात्। उभयसत्त्व एव तादृशप्रतियोगिसामानाधिकरण्यसम्भवात्। न चैतादृशविवक्षाया निर्बीजत्वेन व्यर्थत्वं, प्रयोजनस्य तत्रैवोक्तत्वात्। न चैकस्यापि प्रतियोगितावच्छेदकावच्छिन्नत्वात् नैवमिति वाच्यं, तादृशधर्मावच्छिन्नयावदसामानाधिकरण्यस्य विवक्षितत्वात्। न च व्यर्थविशेषणत्वम्, उक्तोत्तरत्वादिति भावः।

केचित्तु प्रतियोग्यसामानाधिकरण्यं प्रतियोगिसामानाधिकरण्याभावः। स च प्रतियोगिसमानाधिकरणाभावेऽप्यस्त्येव। हेतुसमानाधिकरणाभावे प्रतियोगिसामानाधिकरण्यद्रव्यत्वे न स्त इति प्रतीतेः। न चैवमव्याप्तिवारकत्वाभावात्तदुपादनमनर्थकमितिवाच्यं, दूषणमात्रवादिनो ममानिष्टाभावादित्याहुः।

तादृशाभावानभ्युपगमादिति। प्रतियोगिनि वह्नौ सति तदभावासम्भवात्। प्रत्येकाभावादेव तादृशबुद्ध्युपपत्तौ मिलिताभावे मानाभावाच्चेति भावः। नन्वेकघटसत्त्वे घटौ न स्त इति प्रतीत्यन्यथानुपपत्त्या तत्सिद्धिः। न हि तत्र सामान्याभावो विषयस्तस्य यत्किञ्चित्प्रतियोगिसत्त्वविरोधात्। नापि विशेषाभावः, एकस्योभयप्रतियोगित्वाभावात्। तस्मादनन्यगत्यैव तादृशाभावाभ्युपगम इति चेत्? न, तादृशप्रतीतेरपराभावविषयत्वेनैवोपपत्तेः, सविशेषणे हीति न्यायात् स्रग्वी ध्वस्त इति वत् । न

---

१. पंक्त्यारम्भे अनुलेखककृतं × इति चिह्नं मातृकायां दृश्यते

२. 'तत्त्वादीनामननुगतत्वात्' इति पाठो मातृकायाम्

३. 'लक्षणे अतिव्याप्तिः' इति पाठो मातृकायाम्।

च प्रतियोगितावच्छेदकभेदेनाभावभेदव्यवस्थापनाद् द्वित्वावच्छिन्नप्रतियोगिताकाभाव आवश्यक इति वाच्यं, तावता हि तदुभयाभाववति द्वित्वावच्छिन्नाभावः सिध्यतु न त्वेकसत्त्वे। न च प्रतियोगितावच्छेदकावच्छिन्नस्याभावविरोधित्वादेकसत्त्वेऽपि द्वयाभावो न विरुद्ध इति वाच्यं, लाघवात् प्रतियोगित्वेनैव विरोधित्वादिति।

जयदेवमिश्रास्तु-अवच्छेदकभेदेनावच्छेद्याभेदाद्[1] व्यासज्यवृत्तिधर्मावच्छिन्न-प्रत्येकपर्यवसितप्रतियोगिताकोऽभावोस्तु, न तु प्रतियोगिता व्यासज्यवृत्तिः, माना-भावात्, उक्ताभावेनैव तादृशप्रतीत्युपपत्तेः। न चावच्छेदकस्य व्यासज्यवृत्तित्वे प्रतियोगिताया अपि तथात्वं, मानाभावात्। अभावाभावरूपायाः प्रतियोगितायाः प्रत्येकतदुभयरूपधर्मस्वरूपायाः द्व्यात्मकत्वासम्भवाच्च। न च प्रतियोगितायाः प्रत्येकपर्यवसाने द्वित्वादेरवच्छेदकत्वानुपपत्तिस्तस्यातिरिक्तदेशवृत्तित्वाद् इति वाच्यं, तादृशप्रतियोगितात्वावच्छिन्नं प्रति तस्यावच्छेदकत्वात्। अन्यथातिरिक्तवृत्तित्वेन सामान्यस्यापि तत्प्रतियोगिताया अनवच्छेदकत्वापत्तेः। न च सामान्याभाव-प्रतियोगिताऽप्येकैवेति वाच्यं, प्रतियोगिता हि स्वरूपम्। न चानेकमेकस्वरूपं, विरोधात्। अत एव मिलिताभावप्रतियोगिताऽपि न व्यासज्यवृत्तिः, द्वयोरेकरूपत्वासिद्धेः। न चैवं सामान्याभाववत्तस्यापि यत्किञ्चित्प्रतियोगिसत्त्वविरोधित्वादेकसत्त्वे द्वयं नास्तीति प्रतीतिर्न स्यादिति वाच्यं, तस्य प्रतियोगितावच्छेदकावच्छिन्नसत्त्वविरोधित्वं, सामान्याभावस्य च यत्किञ्चित्प्रतियोगिताश्रयसत्त्वविरोधित्वमिति प्रतीतिबलेन कल्पनात्। प्रतियोगिताया अपि व्यासज्यवृत्तित्वाभ्युपगमे तादृशेनैव विरोधित्वाभ्युपगमात्। तस्मादुक्तयुक्त्या व्यासज्यवृत्ति(त्ते)रपि प्रतियोगितावच्छेदकत्वं स्वीक्रियत एव। प्रतियोगिता परं न व्यासज्यवृत्तिरित्येतद्ग्रन्थतात्पर्यमित्याहुः, तच्चिन्त्यं, तादृशाभावप्रतियोगितायाः प्रत्येकनिष्ठत्वे तस्य सामान्याभावादवैलक्षण्यापत्तौ तद्वद् यत्किञ्चित्प्रतियोगिसत्त्वविरोधित्वापत्तेः। न च द्वयोरेकस्वरूपत्वाभावात् नैवमिति वाच्यं, द्वित्वेनैकत्वात्। न चैवं घटत्वेन घटानामैक्यात् तत्रापि प्रतियोगित्वमेकं स्यादिति वाच्यं, तन्मतेनेष्टत्वात्। नन्वेवं व्यासज्यवृत्तिधर्माच्छिन्नप्रतियोगिता-कसामान्यावच्छिन्नप्रतियोगिताकाभावयोरेकस्य यावत्प्रतियोगिसत्त्वविरोधित्वमपरस्य यत्किञ्चित्तद्विरोधित्वमिति कथं स्यादुभयोस्तुल्यत्वादिति चेत्? यो हि संसर्गो यत्रारोप्य निबध्यते, तेन संसर्गेणाभावस्य विरोधित्वम्, अन्यथा संयुक्तदेशे समवायितयाऽभावो न स्यात्। तथा च यत्रोभयप्रतियोगिताधिकरणनिष्ठैकसं-सर्गारोपादभावधीस्तत्रोभयसत्त्वं विरोधि, एकसत्त्वे तादृशाभावसत्त्वात्। यत्र चैकधर्मावच्छिन्नाशेषस्य प्रत्येकसंसर्गारोपादभावधीस्तत्र यत्किञ्चित्सत्त्वं विरोधि, यत्किञ्चित्सत्त्वे तादृशाभावाभावात्। न चैवं घटपटोभयसंयोगवति भूतलेऽ-प्युभयप्रतियोगिकैकसंयोगाभावेनोभयसत्त्वेऽपि तादृशाभावसत्त्वादुभयसत्त्वमपि विरोधि न स्यादिति वाच्यम्, अधिकरणनिष्ठोभयसंयोगभेदेऽपि विशेषणताविशेषात्मकस्य

---

१. 'अवच्छेदकभेदात्' इति पाठो मातृकायाम्

अभ्युपगमेऽपि वा तत्र तदुभयं प्रतियोगि, न वह्निवह्निमन्तौ।

अथवाऽनौपाधिकत्वं व्याप्तिः। तच्च यावत्स्वसमानाधिकरणात्यन्ताभाव-प्रतियोगितावच्छेदकावच्छिन्नं यत् तत्प्रतियोगिकात्यन्ताभावसमानाधिकरणं यत् तेन समं सामानाधिकरण्यम्। न ह्येवं सोपाधिः, तत्र साधनसमानाधिकरणात्यन्ता-भावप्रतियोगिन आर्द्रेन्धनवत्त्वादेरुपाधेर्योऽत्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात्, उपाधेः साध्यव्यापकत्वात्। एतदेव यावत्स्वव्यभिचारि-व्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वं गीयते।

यद्वा यावद्यत्समानाधिकरणात्यन्ताभावाप्रतियोगिप्रतियोगिकात्यन्ताभावा-सामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वम्। सोपाधौ तु साध्य-वन्निष्ठात्यन्ताभावाप्रतियोगिन उपाधेर्योऽत्यन्ताभावस्तेन समं हेतोः सामाना-धिकरण्यम्, उपाधेः साधनाव्यापकत्वात्।

स्वरूपसम्बन्धस्यैकत्वात् तस्यैवाभावविरोधित्वात्। न च स्वरूपद्वयस्य भेदात् कथमेकसम्बन्धरूपत्वं, ज्ञानविषययोरिव सम्बन्धस्वभावात्। अन्यथा तत्राप्येकसम्बन्धरूपता न स्यात्। स च समवायेन क्वचित्संयोगेनेत्यन्यदेतत्।

उपाध्यायास्तु— घटसत्त्वेऽपि यत्र घटपटौ न स्त[1] इति धीस्तत्र तदुभयसाहित्याभावेन तादृशबुद्ध्युपपत्तौ तादृशाभावानभ्युपगमात्। ननु तदुभयसाहित्यप्रसिद्धावपि घटत्वपटत्वे द्रव्यत्वगुणत्वे नेह स्त इति धीर्न स्यात्, तयोः साहित्याप्रसिद्धेः। न च तवापि तदुभयसाहित्याप्रसिद्धौ कथं तन्निषेध इति वाच्यं, प्रतियोगितावच्छेदकद्वित्वावच्छिन्नयोः स्वस्वाधिकरणस्थयोरेव प्रसिद्धावधिकरणे चाप्रसिद्धतदुभयसाहित्यात्मकसंसर्गारोपेणाभावप्रतीत्युपपत्तेः। अभावधीहेत्वारोपविषयस्य संसर्गस्यालीकस्यैवाभ्युपगमादिति चेत्, काले घटत्व-पटत्वसाहित्यस्य प्रसिद्धौ तदन्यत्रारोप्य निषेधसम्भवादिति न किञ्चिदेतत्।

तादृशाभावप्रतियोगितावच्छेदकं यन्न भवति तदवच्छिन्नसामानाधिकरण्य-मित्यर्थेऽव्याप्तिशङ्का[2] तादृशाभावाभ्युपगमपक्षेऽपि नेति प्रौढिवादेनाह **अभ्युपगमेऽपीति।**

यावत्साध्यव्यापकव्याप्यत्वपर्यवसितमनौपाधिकत्वमाह **यावद्यत्समानाधि-करणात्यन्ताभावेति।** अत्र यत्पदं साध्यपरम्। सोपाधावतिव्याप्तिवारणाय **यावदिति** प्रथमात्यन्ताभावविशेषणम्। तदपि व्यतिरेकिधर्मपरम्। तेन तादृशप्रमेयत्वाद्यभावाप्रसिद्ध्या न कोपि दोषः। न चैवं केवलान्वयिसाध्यके हेतौ साध्यव्यापकस्य व्यतिरेकिणो धर्मस्याप्रसिद्धिरिति वाच्यम्, आकाशाद्यत्यन्ताभावस्य तादृशस्य तत्रापि सत्त्वात्।

---

१. 'घटपटौ स्तः' इति पाठो मातृकायाम्

२. 'अतिव्याप्तिशङ्का' इति पाठो मातृकायाम्

तथा च साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगी व्यतिरेकित्वे सति साध्यव्यापक इति यावत्। तत्प्रतियोगिकात्यन्ताभावनिष्ठसामानाधिकरण्याभावकत्वमेवानौपाधिकत्वमित्यर्थः। तेनात्यन्ताभावनिष्ठसामानाधिकरण्याभावस्य हेतुनिष्ठानौपाधिकत्वरूपत्वं विरुद्धं न भवतीति ध्येयम्। नन्वसामानाधिरण्यं न तदधिकरणानधिकरणत्वं, मेयत्वव्यापकाकाशात्यन्ताभावाभावात्मकाकाशादेरधिकरणाप्रसिद्धेः। किन्तु तदनधिकरणाधिकरणत्वम्[१]। तच्च सोपाधिसाधारणम्। आर्द्रेन्धनाभावानधिकरण आर्द्रेन्धनवति महानसादौ वह्निसत्त्वादिति चेत् ?, मैवम् , तादृशात्यन्ताभावेऽसामानाधिकरण्यं सामानाधिकरण्याभावो यस्येत्यर्थात्। आकाशरूपेऽप्यभावे मेयत्वासामानाधिकरण्यस्य सत्त्वात्। स्वाधिकरणानधिकरणत्वस्य तत्र सत्त्वात्। आर्द्रेन्धनाभावे तु वह्न्यधिकरणानधिकरणत्वाभावात्। यद्वाऽसामानाधिकरण्यं तदनधिकरणाधिकरणत्वमेव। तदपि तदनधिकरणता व्यापिका यदधिकरणतायास्तत्त्वम् । वह्न्यधिकरणतायाश्चार्द्रेन्धनात्यन्ताभावानधिकरणता न व्यापिका, अयोगोलके व्यभिचारात्। न चापदार्थत्वं बाधकं , विवक्षात्वात् । न चैवं लाघवाद् यावत्साध्यव्यापकाधिकरणता व्यापिका यदधिकरणताया इत्येव विवक्ष्यतां किं तदत्यन्ताभावादिगर्भत्वेन, गौरवात्। अपदार्थव्याख्यानस्योभयत्रापि तुल्यत्वादिति चेत्? तस्य लक्षणान्तरत्वात्। प्रकृतलक्षणे व्यर्थत्वाभावात्। अन्यथा व्यापकपदमपि त्यज्यताम्। साध्याधिकरणताव्यापकाधिकरणताकत्वस्यैव लघुत्वादिति।

वाचस्पतिमिश्रास्तु असामानाधिकरण्यं सामानाधिकरण्यविरोधी धर्मः । स चोक्तक्रमेण द्वेधा। तथा चैकमादाय प्रसिद्धिः। अपरमादाय व्यभिचारिव्यावृत्तिरित्याहुः, तच्चिन्त्यम्, एकैकप्रतिक्षेपेनान्यतरोपादान उक्तदोषानिवृत्तेरुभयोपादानेऽ ननुगमापत्तेः। न चासामानाधिकरण्यत्वेनैव द्वयोरनुगमः, शब्दमात्रसाम्यात्। गौः विषाणिनी गोत्वादिति वदिति।

पुनरपि **मिश्रचरणा** एव यावदिति चरमात्यन्ताभावविशेषणम्। तथा च साध्यव्यापकप्रतियोगिताका यावन्तोऽत्यन्ताभावास्तदसामानाधिकरण्यमित्यर्थः। तेन साध्यव्यापकस्य प्रमेयत्वादेरभावाप्रसिद्ध्यापि न दोष इति भावः। नन्वेवं साध्यव्यापकोपस्थापकपदस्यासर्वपरतायां किञ्चित्परत्वे तत्प्रतियोगिकनानाविशेषणावच्छिन्नयावदत्यन्ताभावमादाय सोपाधेरपि सङ्ग्रहप्रसङ्गः। न च यावत्पदस्य विशेषणपरतया विशेष्यान्वये तदवच्छेदकावच्छिन्नाशेषोपस्थितौ नातिप्रसङ्ग इति वाच्यं, साध्यव्यापकपदस्यासर्वपरतया यत्किञ्चित्परत्वे तत्प्रतियोगिकाभावत्वस्य

१. 'तदनधिकरणानधिकरणत्वम्' इति पाठो मातृकायाम्

विशेष्यतावच्छेदकतया तदवच्छिन्नाशेषोपस्थितावपि व्यभिचारिण्यतिव्याप्तितादवस्थ्यात्। अत एव यावन्ति पाकसम्पादकानि तावन्ति ते संयातानीत्यत्र पाकपदस्य यत्किञ्चित्पाकपरत्वम्, अन्यथाऽसम्भवात्। यथा यावद्घटोपलम्भकसमवधाने घटानुपलब्ध्या घटाभावधीरित्यत्र घटपदस्य यत्किञ्चिद्घटपरत्वम्, अन्यथा सकलघटोपलम्भकसमवधानस्यैकत्रासम्भवेन घटाभावधीरेव न स्यादिति चेत्, मैवम्, तत्र तथैव तात्पर्येणैकमात्रपाकाद्युपस्थितेः। अत्र तु साध्यव्यापकत्वाश्रय-प्रतियोगित्वं यावति तावदत्यन्ताभावे तात्पर्यमिति तावदुपस्थितिः। तथाप्युत्पत्तेश्चासिद्धेः, अन्यथा प्रतिबन्धकाभावकूटस्य कारणत्वमित्यादौ का गतिः। तत्रापि यावत्त्वस्यैक-कूटपदार्थत्वे तदुक्तरीत्यैकप्रतिबन्धकप्रतियोगिकयावदभावस्य हेतुत्वेऽन्यतमप्रतिबन्धक-सत्त्वेऽपि कार्यापत्तेः। न च तत्र प्रतिबन्धकाभावत्वेन हेतुत्वं, न कूटत्वेनेति वाच्यम्, अन्योन्याश्रयात्। न च तत्र यावत्पदं प्रतियोगिविशेषणमेवेति वाच्यम्, उत्तम्भकस्यापि मन्त्रौषधादिभेदेन नानात्वात्, एकोत्तम्भकाभावविशिष्टयावन्मण्याद्यभावमादायाति-प्रसङ्गतादवस्थ्यात्। उत्तम्भके च यावदिति विशेषणे यत्किञ्चित्तादृशमण्यभाव-मादायातिप्रसङ्गात्। न चोभयत्र तद्विशेषणम्, मणित्वाश्रयविशिष्टाभाव एव तद्विशेषणेऽतिप्रसङ्गनिवृत्तावुभयत्र तदुपादाने गौरवात्। उत्तरग्रन्थस्तु साध्यव्यापक-त्वगर्भलक्षण इत्येवं परतया नेयः। अत एव साध्यव्यापकत्व इति बहुषु ग्रन्थेषु पाठः सङ्गच्छत इत्याहुः।

ननु मेरुः घटाद्विभक्तो द्रव्यत्वादित्यत्रातिव्याप्तिः, तत्संयोगवत्त्वस्य तत्रोपाधि-त्वादन्यस्य चातथाभावात्। तथा च तस्याव्याप्यवृत्तित्वेन हेतोस्तदत्यन्ताभावा-सामानाधिकरण्यासिद्धेरिति चेत्? न, अत्रापि प्रतियोग्यसमानाधिकरणत्वेना-त्यन्ताभावविशेषणात्। घटनिष्ठसंयोगध्वंसवत्त्वादेरपि साध्यव्यापकस्याव्याप्यवृत्तित्वेन विशेषणावश्यकत्वात्। साध्यव्यापकव्याप्यवृत्तिधर्ममात्रस्यैव साधनव्यापकत्वेन विशेषणदानावश्यकत्वात्। अत एव काले यावत्साध्यव्यापकात्यन्ताभावसामानाधिकरण्यं वस्तुमात्रस्यैवेत्यसम्भव इत्यपि निरस्तं, प्रतियोगिवैयधिकरण्यावच्छेदेनासामानाधिकरण्यस्य विवक्षितत्वात्। न च गोत्वाश्वत्वयोः कालिकव्याप्त्यतिव्याप्तिस्तयोः परस्परात्यन्ताभाव-समानाधिकरणत्वादिति वाच्यं, ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धेनासामानाधिकरण्यस्य विवक्षितत्वात्। यद्यपि साध्यव्यापकवत्यपि रूपान्तरेण तदत्यन्ताभावसत्त्वाद्धेतौ तदसामानाधिकरण्यमसम्भवि, तथापि व्यापकताप्रविष्टसम्बन्धावच्छिन्नतदत्यन्ताभावा-सामानाधिकरण्यस्य विवक्षितत्वेन तस्य सम्भवात्। व्यक्तेश्च स्वव्यापकतया प्रलयेऽपि तदवच्छेदेन तदत्यन्ताभावसत्त्वेन तत्समानाधिकरणतया जातेस्तत्रातिव्याप्त्यभावादिति।

केचित्तु तत्रातिव्याप्तिनिवृत्त्यर्थं द्वितीयात्यन्ताभावपदं पूर्वोक्तन्यायेन विरोधिपरं वाच्यम्। तथा च व्यक्तिध्वंसस्य तद्विरोधिनः प्रलये सत्त्वात्तेन सामानाधिकरण्याज्जातेर्नातिव्याप्तिः। न चैवं कालिकव्याप्तिपुरस्कारेण घटप्रागभावेन तदा तद्रूपसाधने घटस्य रूपकालव्यापकतया स्वप्रागभावरूपसाधनाव्यापकतया तदुपाधिके तत्रातिव्याप्तिः, प्रागभावस्य घटविरोधिस्वसामानाधिकरण्येऽपि तद्विरोधिध्वंसासामानाधिकरण्यादिति वाच्यं, यावत्पदस्य द्वितीयात्यन्ताभावविशेषणतया तद्व्यावृत्तेः, साध्यव्यापकविरोधिना स्वेनैव स्वसामानाधिकरण्याद् यावत्तदसामानाधिकरण्यासिद्धेरित्याहुः।

जयदेवमिश्रास्तु– उक्तानौपाधिकत्वस्य प्रमेयत्वादौ सत्त्वेऽपि दुर्ज्ञेयत्वम्। तथाहि प्रमेयत्वव्यापकस्यात्यन्ताभावस्यातीन्द्रियत्वेनानुमानगम्यत्वे तदनुमानस्यापि केवलान्वयित्वेन तद्व्यापककेवलान्वय्यन्तरप्रसिद्धिरनुसरणीया स्यात्। साऽपि केवलान्वय्यनुमानान्तरेणेत्येवमनवस्थापत्तेः। परस्परप्रसिद्ध्याऽनौपाधिकत्वग्रहेऽन्योन्याश्रयात्। न च समवायस्याव्याप्यवृत्तित्वेन तदभावस्यापि केवलान्वयितया तमादाय केवलान्वयिनि सुग्रहमनौपाधिकत्वं, तस्य योग्यप्रतियोगिकत्वेन योग्यत्वादिति वाच्यं, समवायस्य स्वरूपतो योग्यत्वेऽपि समवायत्वस्य प्रतियोगितावच्छेदकस्यायोग्यत्वेन विशिष्टायोग्यतया तदभावस्याप्ययोग्यत्वात्, प्रतियोगितावच्छेदकावच्छिन्नयोग्यत्वस्याभावयोग्यतायां योग्यानुपलब्धिनिर्वाहे तन्त्रत्वात्। तथा च यावदिति साध्यव्यापकविशेषणमेव। तत्प्रतियोगिकात्यन्ताभावासामानाधिकरण्यमित्यत्र न व्यत्यासः। तथा सति स्वसमानाधिकरणात्यन्ताभावाप्रतियोगियावत्साध्यव्यापकत्वमित्यर्थपर्यवसाने नाप्रसिद्धिः, न वा सोपाधिसाधारण्यं, नापि व्यतिरेकिधर्मत्वविवक्षागौरवमित्याहुः, तच्चिन्त्यम्, अनौपाधिकत्वस्य व्याप्तिलक्षणतया तज्ज्ञानस्यानुमित्यहेतुत्वेन प्रमेयत्वादौ तद्रूपलक्षणेन तज्ज्ञानासम्भवेऽप्यनुपपत्त्यभावात्। अनौपाधिकत्वन्तु लक्षणमित्यस्य स्वयमेव ग्रन्थकृताभिधानात्। तत्रान्यतोऽपि व्याप्तिज्ञानेऽनुमितिसम्भवात्।

यदपि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगियावत्साध्यव्यापकत्वमनौपाधिकत्वं निरुक्तम्। तत्रापि लाघवेन तादृशसाध्यकत्वस्यैवानतिप्रसक्ततया व्यापकत्वपर्यन्तस्य व्यर्थत्वात्। यच्च समवायत्वस्यापि इन्द्रियत्वं (नैन्द्रियकत्वं), तदपि न, पञ्चपदार्थभिन्नभावत्वस्य समवायत्वस्य योग्यत्वात्, अन्यस्य चानिरुक्तेः। भावत्वस्यापि समवायरूपत्वेन योग्यत्वात्। न च तथापि तावन्मात्रप्रसिद्धावप्यनेकाशेषरूपयावत्त्वगर्भानौपाधिकत्वाप्रसिद्धिरिति वाच्यम्, अशेषमात्रस्यैव लाघवेन यावत्पदार्थत्वात्। अनेकत्वविशेषणस्य व्यर्थत्वादिति।

यद्वा यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः । तथाहि धूमस्य वह्निसम्बन्धित्वे धूमत्वमवच्छेदकं, धूममात्रस्य वह्निसम्बन्धित्वात्। वह्नेस्तु धूमसम्बन्धे न वह्नित्वमवच्छेदकं, धूमासम्बन्धिनि गतत्वात् । न ह्यतिप्रसक्तमवच्छेदकं संयोगादौ तथात्वादर्शनात् । किन्तु वह्नावार्द्रेन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं तादृशञ्च व्याप्यमेव ।

यत्सम्बन्धितावच्छेदकेति। यत्पदं साध्यपरम्। तथा च यत्साध्यसम्बन्धितावच्छेदकरूपवत्त्वञ्चास्य साधनस्य तस्य सा तत्साध्यसम्बन्धिका तत्साध्यव्याप्तिरित्यर्थः। धूमसम्बन्धिता वह्नेरपीत्यत उक्तम्-**अवच्छेदकरूपवत्त्वमिति**। सम्बन्धिता च सामानाधिकरण्यम्। तेन घटकारणतालक्षणतत्सम्बन्धितावच्छेदकदण्डत्वव्यवच्छिन्ने दण्डे घटव्यापकत्वं(व्याप्यत्वं) नापद्यत इति ध्येयम्।

नन्ववच्छेदकत्वं नावच्छित्तिप्रत्ययजनकत्वं, जनकत्वस्य नियमगर्भत्वे[न] अन्योन्याश्रयात्। नाप्यन्यूनानतिरिक्तवृत्तित्वं, धूमत्वस्यापि वह्निसामानाधिकरण्यन्यूनवृत्तित्वात्, आलोकादौ वह्निसमानाधिकरणेऽवृत्तेः। नापि तदनतिरिक्तदेशवृत्तित्वम्, इदं सुखि आत्मत्वादित्यादौ व्यभिचारिणि गतत्वात्, आत्मत्वस्य सुखसमानाधिकरणत्वेनात्मत्व[त्व]स्य सुखसामानाधिकरण्यानतिरिक्तवृत्तित्वात्। न च साध्याभावसमानाधिकरणावृत्तित्वं तत्, केवलान्वयिन्यभावात्। नापि साध्यसामानाधिकरण्याभावाधिकरणावृत्तित्वं, साध्यसामानाधिकरण्या[नधिकरण]वृत्तित्वं वा, केवलान्वयिनि साध्यसामानाधिकरण्याभावा(न?)धिकरणस्य, [साध्य]-सामानाधिकरण्यानधिकरणस्य चाकाशस्यैव प्रसिद्धेरिति वाच्यम्, एवं ह्ययमेतत्कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः स्यात्, एतद्वृक्षत्वस्यापि मूलावच्छेदेनैतत्कपिसंयोगसामानाधिकरण्याभावाधिकरणत्वात्, एतत्कपिसंयोगसामानाधिकरण्यानधिकरणत्वाच्च। एतद्वृक्षत्वे तत्संयोगसामानाधिकरण्यासत्त्वात्, कथं तदभावस्तदनधिकरणत्वं चेद्? अवच्छेद[क]भेदादिति गृहाणेति चेत्?

उच्यते - अधिकरणैकदेशानवच्छेदे[न] साध्यसामानाधिकरण्याभाववान् यस्तदवृत्तित्वम्। एतद्वृक्षत्वे चाधिकरणैकदेशमूलाद्यवच्छेदेनैव साध्यसामानाधिकरण्याभाववत्त्वमिति विशिष्टव्यतिरेकस्य तत्रापि सत्त्वान्नाव्याप्तिः। आत्मत्वे त्वीश्वररूपाधिकरणवृत्तित्वावच्छेदेनैव साध्यसामानाधिकरण्याभाववत्त्वं, न तु तदेकदेशावच्छेदेनेति न तत्रातिव्याप्तिः। केवलान्वयिनि तादृशसाध्यसामानाधिकरण्याभाववत्त्वं गगनादौ प्रसिद्धमित्यवसेयम्। यद्वा सामानाधिकरण्यानधिकरणावृत्तित्वमेव तत्त्वं विवक्षितं,

केवलान्वयिनि साध्यसामानाधिकरण्यानधिकरणस्याकाशस्य प्रसिद्धेः। न चायं वृक्ष एतत्कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः, एतद्वृक्षत्वस्यापि मूलावच्छेदेनैतत्कपि-संयोगसामानाधिकरण्यानधिकरणवृत्तित्वादिति वाच्यं, मूलावच्छेदेनैतत्कपिसंयोग-सामानाधिकरण्याभाववत्त्वेऽपि सामानाधिकरण्याधिकरणभिन्नत्वाभावात्। अन्योन्या-भावस्याव्याप्यवृत्तित्वानभ्युपगमात्।

यज्ञपत्युपाध्यायास्तु अनतिरिक्तदेशवृत्तित्वमेवावच्छेदकत्वम्। नीलधूमत्वादेश्च तथाभूतेन रूपेण[1] व्याप्तिग्रहे गौरवात्। अत एव न तेन रूपेण लिङ्गत्वेनोपदर्शनमपि। व्याप्तिग्रहप्रकारीभूतधर्मेणैव लिङ्गत्वोपदर्शनात्। अस्तु वा तथाभूतधर्मान्तराघटकत्वे सति तदनतिरिक्तदेशवृत्तित्वं तत्। नीलधूमत्वञ्च धूमत्वेनैव तादृशधर्मे घटितमिति नावच्छेदकानवच्छेदकमित्याहुः।

नन्वयमभिधेयवान् प्रमेयत्वादित्यादिव्याप्यादावव्याप्तिः[2], प्रमेयत्वस्य तादृश-सामानाधिकरण्याभाववति गगनादौ वृत्तेः। न च तत्र व्याप्तिरेव नेति वाच्यं, तत्रानुमानवृत्तेर्निष्कलङ्कत्वेन[3] प्रमेयत्वावच्छेदेनैव गृह्यमाणाया वृत्तिमति प्रमेयेऽ-भिधेयव्याप्तेरवश्यवाच्यत्वादिति चेत्? मैवं, वृत्तिमत्प्रमेयत्वमादायैवोक्तलक्षणस्य तत्र सत्त्वात्, वृत्तिमत्त्वभागस्य च व्यभिचारबाधकत्वात् प्रमेयत्वमात्रेणैव तत्र व्याप्तिनिरूपणम्। न च प्रमेयत्वमात्रमतिप्रसक्तत्वान्न तन्निरूपकमिति वाच्यं, व्यर्थविशेषणत्वरहितत्वे सति व्यभिचारिव्यावृत्तत्वमेव हि धर्मस्य व्याप्तिनिरूपकत्वे तन्त्रं, न त्वनतिरिक्तत्वमपि, गौरवात्। न चात्र वृत्तिमत्प्रमेयत्वस्यैव तथात्वे तदवच्छिन्नस्यैव व्यापकत्वं स्यात्, न गगनादेरिति वाच्यम्, इष्टापत्तेः। यद्वा वृत्तिमत्प्रमेयत्वस्यावच्छेदकत्वेऽपि प्रमेयत्वेनैव व्याप्तिग्रहः। व्यर्थविशेषणशून्यत्वे सति व्यभिचारिव्यावृत्तत्वेन ज्ञातधर्मस्यैव व्याप्तिग्राहकत्वात्। तथा च व्याप्तिग्राहकसामग्र्यां सत्यामतिप्रसक्तधर्मेणापि तद्ग्रहेऽनुपपत्त्यभावात्। ननु प्रकृतसाध्यनिरूपकव्यभिचारि-व्यावृत्तत्वेन ज्ञातत्वं तथा वाच्यम्। अन्यथा धर्ममात्रस्यैव यत्किञ्चिद्व्यभिचारित्वेन तद्व्यावृत्तत्वाप्रसिद्धेः। तथा च प्रमेयव्यभिचार्यप्रसिद्ध्या तद्व्यावृत्तत्वाप्रसिद्धेः। न च प्रकृतसाध्यसामानाधिकरण्यविरहिव्यावृत्तत्वं तदर्थः, प्रमेयसामानाधिकरण्यविरही

---

१. 'तथाप्यभिमतेन रूपेण' इति पाठो मातृकायाम्।

२. 'व्याप्त्यादावव्याप्तिः' इति

३. ''वृत्तित्वेर्निष्क....'' इति पाठो मातृकायाम्।

गगनादिरेव प्रसिद्ध इति वाच्यं, तथाप्यभिधेयत्वस्य केवलान्वयितया तत्र व्यावृत्तत्वाभावादिति चेत्? न, प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्याप्रतियोगिभूत-सामानाधिकरण्यात्यन्ताभाव[वद्]वृत्तिमन्मात्रवृत्तित्वेन ज्ञातत्वे सति व्यर्थविशेषण-शून्यत्वस्य तदर्थत्वात्। प्रमेयत्वञ्च तादृशवृत्तिमन्मात्रवृत्तीति तेन रूपेणोपस्थिते प्रमेयादौ व्याप्तिपरिच्छेदात्। उक्तरूपस्य च गुरुत्वेऽप्यवच्छेदकानवच्छेदकसाधारणत्वेन व्यापकतया व्याप्तिधीप्रयोजकत्वादिति।

यत्तु यन्मत एतद्व्याप्तिज्ञानमनुमितिजनकं तन्मते व्यभि(चारि?)चारज्ञाने सत्यप्येतज्ज्ञानस्य निष्प्रत्यूहत्वात् कथं नानुमितिः, ग्राह्याभावज्ञानस्यैव विरोधित्वात्। तथा च साध्यनिष्ठस्य साधननिष्ठस्य वा व्यभिचारज्ञानस्य व्याप्तिज्ञाने साक्षात्प्रतिबन्धकत्वेनोपाधिवद् व्यभिचारोऽपि न हेत्वाभासान्तरं स्यादिति नवीनानां दूषणम्। तन्न भद्रं, तत्र व्यभिचारज्ञानस्य साधनतावच्छेदकातिप्रसक्तत्वविषयत्वेनानतिप्रसक्तत्वधीप्रतिबन्धकत्वेन साक्षादेव प्रतिबन्धकत्वात्।

अस्मदुपाध्यायास्तु अवच्छित्तिप्रत्ययजनकत्वमेवावच्छेदकत्वम्। न चात्माश्रयः, अत्र जनकत्वस्यात्यन्ताभावगर्भनियमगर्भत्वात्। न त्वेतन्नियमगर्भत्वात्[१]। यद्वा जनकत्वं स्वरूपसबन्धविशेष इति नोक्तदोषः। यद्वा जनकत्वं सामानाधिकरण्यगर्भम्। व्याप्तिश्च[न][२] तद्गर्भेति नानुपपत्तिरिति दिक्।

वाचस्पतिमिश्रास्तु साध्याधिकरणता साध्यसम्बन्धिता, तदवच्छेदकाधिकरणता-प्रतियोगिकत्वम्। अवच्छेदकत्वञ्च स्वरूपसम्बन्धविशेष एव। एवं धूमाधिकरणता वह्न्यधिकरणताया अवच्छेदिका, धूममात्रस्य वह्निसम्बन्धित्वात्। न तु वह्न्यधिकरणता धूमाधिकरणतावच्छेदिका, धूमासम्बन्धिन्ययोगोलकादौ तत्सत्त्वात्। एवञ्च धूमत्वस्य विशेषणीभूय नियामकतया प्रयोजकत्वमित्युक्तमित्याहुः।

वस्तुतस्तु साध्यसम्बन्धिता साध्याधिकरणता, सा अवच्छेदिका-व्यापिका यस्या अधिकरणतायाः, तत्प्रतियोगित्वमित्यर्थः। तथा च साध्याधिकरणताव्यापकाधिकरणतात्वमिति लक्षणार्थेन नावच्छेदकत्वादिविवक्षावकाशः[३]। व्यापकत्वञ्चोक्तमेव। न च धूमस्य धूमत्वमवच्छेदकमिति ग्रन्थविरोधः, धूमवत्त्वमवच्छेदकमिति तदर्थत्वात्।

१+२. नियमो व्याप्तिः, सा च 'यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः'। इयं च व्याप्तिर्न सामानाधिकरण्यगर्भा।

३. 'लक्षणार्थेनानवच्छेदकत्वादि...' इति पाठो मातृकायाम्

अथवा यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तत्तस्य व्याप्यम्। वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते सोपाधौ तूपाधिना।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ विशेषव्याप्तिप्रकरणं समाप्तम्

अथवेति। सम्बन्धिता व्याप्तिरिति पूर्वलक्षणार्थः। तदवच्छेदकरूपवत्त्वं व्याप्तिरित्येतल्लक्षणार्थ इत्यतो न पौनरुक्त्यम्। अवच्छेदकत्वं पूर्वोक्तमेव ग्राह्यमिति ध्येयम्। न चात्र मते धूमत्वस्यैव व्याप्तित्वपर्यवसाने धूमत्वं कथं तदवच्छेदकमभेदादिति वाच्यम्, उपहितानुपहितभेदेन तयोरुपपत्तेः। **उपाधिनेति**। अजनकत्वादिसम्बन्धे-नार्द्रेन्धनाद्वह्न्यादौ धूमादिसामानाधिकरण्यावच्छेदकत्वादित्यर्थः। यद्यप्यार्द्रेन्धनप्रभव-वह्निमत्त्वं विशिष्टं तथा, तथापि विशिष्टस्यावच्छेदकत्वे विशेषणस्यापि तत्त्वमिति भावः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां विशेषव्याप्तिप्रकरणं समाप्तम्

।।अत एवचतुष्टयप्रकरणम्।।

अत एव साधनतावच्छेदकभिन्नेन येन साधनताभिमते साध्यसम्बन्धोऽवच्छिद्यते स एव तत्र साधने विशेषणमुपाधिरिति वदन्ति।

अत एव च तत्र साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकत्वं लक्षणं ध्रुवम्। व्यभिचारिणि साधन एकत्र साध्यतदभावयोर्विरोधेनावच्छेदकभेदं विना तदुभयसम्बन्धाभावादवश्यं साध्यसम्बन्धितावच्छेदकमस्ति। तदेव च साधनावच्छिन्नसाध्यव्यापकं साधनाव्यापकं तत्रोपाधिः। अत एव व्यभिचारे चावश्यमुपाधिरिति सङ्गच्छते। अन्यथा व्यभिचारादेव तत्रागमकत्वेन व्यभिचारेण न तदनुमानम्, अप्रयोजकत्वात्। अत एव च तस्य साध्यसम्बन्धितावच्छेदकरूपलक्षणा व्याप्तिः साधनताभिमते चकास्तीति स्फटिके जपाकुसुमवदुपाधिरसावुच्यते। लक्षणन्तु साध्यसाधनसम्बन्धव्यापकत्वे सति साधनाव्यापकत्वम्। विषमव्याप्तस्तु नोपाधिपदवाच्यः, प्रवृत्तिनिमित्ताभावात्। दूषकता च तस्य व्यभिचारोन्नायकतया। न च व्यभिचारोन्नायकत्वमेवोपाधित्वम्, अप्रयोजकसाध्यव्यापकव्यभिचारिणोऽप्युपाधित्वापत्तेरिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ अत एवचतुष्टयप्रकरणं समाप्तम्

।।इति व्याप्तिवादः।।

अत्रैवोपष्टम्भकत्वेन प्रभाकरमतमाह **अत एवेति**। उपष्टम्भकान्तरमाह **अत एवेति**। तत्रोपाधावार्द्रेन्धनादाविदं लक्षणं ध्रुवमित्यर्थः। अन्यथा तस्यानुपाधित्वे तत्सङ्ग्राहकमिदं लक्षणमि(म)तिव्यापकं स्यादिति भावः। ननु भवेदप्येवं यदि तत्रावच्छेदकमावश्यकं स्यादित्यत आह-**व्यभिचारिणीति**। **अन्यथेति**। व्यभिचारोपपादकत्वेनोपाध्यकल्पनेऽनुमानदूषकत्वेनैव च तत्कल्पने स्फुटव्यभिचारे चेदनुमानं न शक्यते, अप्रयोजकत्वात्। तथा चोपपादकं विनोपपाद्यानुपपत्तिरूपतर्कसाचिव्याद्व्यभिचारेण तदनुमानमित्यर्थः। नन्वेवं हेतौ स्ववृत्तिधर्मोपनायकत्वमुपाधित्वम्। तथा च विषमव्याप्तौ नोपाधिः स्यादित्यत आह **लक्षणमिति**। शास्त्र उपाधिव्यवहारनिमित्तम्। तथा च शास्त्रपरिभाषितैतन्निमित्तवशाद्विषमव्याप्तोऽप्युपाधिव्यवहारविषय इत्यर्थः। **अप्रयोजकेति**। न चेष्टापत्तिः, तयोः शास्त्र उपाधिव्यवहाराभावादिति भावः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायाम् अत एवचतुष्टयप्रकरणं समाप्तम्

।।इति व्याप्तिवादः।।

।। व्याप्तिग्रहोपायप्रकरणम् ।।

सेयं व्याप्तिर्न भूयोदर्शनगम्या, दर्शनानां प्रत्येकमहेतुत्वात्, आशुविनाशिनां क्रमिकाणां मेलकाभावात्। न च तावद्दर्शनजन्यसंस्कारा इन्द्रियसहकृता व्याप्तिधीहेतवः, प्रत्यभिज्ञायामिन्द्रियस्य तथात्वकल्पनादिति वाच्यं, समानविषये स्मरणे प्रत्यभिज्ञाने च संस्कारो हेतुरतः कथं संस्कारेण व्याप्तिज्ञानं जन्येत? अन्यथाऽतिप्रसङ्गः।

किञ्च सम्बन्धभूयोदर्शनं भूयःसु स्थानेषु दर्शनं, भूयसां वा दर्शनं, भूयांसि वा दर्शनानि? न तथा, एकत्र रूपरसयोर्द्रव्यत्वघटत्वयोश्च व्याप्तिग्रहात्। एकत्रैव धारावाहिके तद्धीप्रसङ्गात्, भूयस्त्वस्य त्रिचतुरादित्वेनाननुगमाच्च।

अपि च पार्थिवत्वलौहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात्। तर्कसहकृतं तथेति चेत्? तर्हि सहचारदर्शनव्यभिचारादर्शनसहकृतः स एव व्याप्तिग्राहकोऽस्तु, आवश्यकत्वात्, किं भूयोदर्शनेन? न च तेन विना तर्क एव नावतरति, प्रथमदर्शने व्युत्पन्नस्य तर्कसम्भवात्। न चैवमेवास्तु, तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थानात्। जातमात्रस्य प्रवृत्तिनिवृत्तिहेत्वनुमितिजनक-व्याप्तिज्ञानं तर्कं विनैवातो नानवस्थेति चेत्? तर्हि व्यभिचारात्सोऽपि व्याप्तिग्रहे न हेतुः। न चैतद्बुद्धाववान्तरजातिरस्ति सामान्यप्रत्यासत्त्या सर्वोपसंहारादविना-भावग्रहः सामान्यरूपता च न सकृद्दर्शनगम्येति भूयोदर्शनापेक्षेति चेत्? न, सामान्यस्य हि प्रत्यासत्तित्वं लाघवान्न तु सामान्यतया ज्ञातस्य, तदनभ्युपगमाच्च। न च काकतालीयत्वादिशङ्काव्युदासार्थं द्वितीयादिदर्शनापेक्षेति वाच्यं, द्वितीयादिदर्शनेऽपि शङ्कातादवस्थ्यात्। न त्वनौपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुः, तद्देशकालतत्रावस्थितघटादीनामुपाधित्वशङ्कानिरासः कस्यचित्साधन-व्यापकत्वज्ञानेन कस्यचित् साध्याव्यापकत्वज्ञानेन स्यात्, तच्च भूयोदर्शनं विना नावतरतीति चेत्? न, अयोग्योपाधिव्यतिरेकस्यानुमानाधीन-ज्ञानत्वेनानवस्थापातात्।

नन्वस्तु निरुक्ता व्याप्तिः, तथापि तज्ज्ञानासम्भवान्नानुमानं प्रमाणमित्यभिप्रेत्य मीमांसकमुखेन चार्वाको भूयोदर्शनस्य व्याप्तिग्राहकतामपाकरोति **सेयमित्यादिना**। सकृद्दर्शनगम्यत्वञ्च सुखनिरस्यमेवेति भावः।

नन्वव्यभिचारविशेषितः सहचारो व्याप्तिः, तथा च प्रत्यभिज्ञायामिव विशेष्यांशे समानविषयत्वमस्त्येवेति विकल्प्य दूषणान्तरमाह **किञ्चेति**। ननु भूयस्त्वं बहुत्वं तच्चानुगतमेवेत्याह **अपि चेति**। ननु यत्रायोग्योपाधिशङ्का न जाता, तत्रैव भूयोदर्शनापेक्षा स्यादित्यत आह **अपि चेति**।

अथ साध्यसाधनसहचरितधर्मान्तराणामुपाधित्वसंशये न व्याप्तिग्रहोऽतस्तेषामनुपाधित्वज्ञानं भूयोदर्शनाधीनसाध्याव्यापकत्वज्ञाने सतीत्येतदर्थं भूयोदर्शनापेक्षा। अत एव यावता दर्शनेन तन्निश्चयस्तावद्भूयोदर्शनं हेतुरिति न वारसंख्यानियमो न वाऽननुगमः। यद्यपि चान्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वसंशयो नान्यव्याप्तिग्रहप्रतिबन्धकस्तथापि तदाहितव्यभिचारसंशयः प्रतिबन्धक इति तद्विधूननमावश्यकमिति चेत्? न, अयोग्योपाधिसंशयाधीनव्यभिचारसंशयस्य तथाप्यनुच्छेदात्। स च न भूयोदर्शनान्नाप्यनुमानादित्युक्तम्। अपि च भूयोदर्शनाहितसंस्कारो न बहिरिन्द्रियसहकारी तद्व्यापारं विनाऽपि च सहचारादिज्ञानवतो व्याप्तिग्रहात्। नापि मनसः, इन्द्रियादिवद् भूयोदर्शनजन्यसंस्कारस्य तज्जन्यस्मरणस्य वा प्रमाणान्तरत्वापत्तेः।

तस्मात् परिशेषात् सकृद्दर्शनगम्या सा। तथाहि-उपाध्यभावो व्याप्तिः। आभावश्च केवलाधिकरणं, तत्कालसम्बन्धो वा, स्वप्रकाशरूपं तज्ज्ञानं वा, तच्च प्रथमदर्शनेनावगतमेव चक्षुरादिना। न चाधिकस्तदभावोऽस्ति। न च प्रतियोगिज्ञानमधिकरणादिज्ञानजनकं येनोपाधिज्ञानं विना तन्न स्यात्। एवमुपाध्यभावे ज्ञाते किञ्चिन्न ज्ञातुमवशिष्यते। उपाध्यभावव्यवहारस्तु तद्धियमपेक्षते, दीर्घत्वादिव्यवहार इवावधिज्ञानम्। न चैवं रासभसम्बन्धतुल्यवह्निधूमसम्बन्धज्ञानादेवानुमितिः स्यादिति वाच्यम्, उपाधिस्मरणे सत्युपाधितद्व्याप्येतरसकलतदुपलम्भकसमवधाने चोपाध्यनुपलम्भसहितस्य केवलाधिकरणज्ञानस्यानुमितिहेतुत्वात् तद्व्यवहारहेतुत्वाच्च।

नन्वेवं प्रथमदर्शनेन व्याप्तिनिश्चयाद्विशेषदर्शने सति रासभादिसंशयवत् तत्संशयो न स्यादिति चेत्? व्याप्तिज्ञानानन्तरं किं विद्यमान एवोपाधिर्मयोपाधित्वेन न ज्ञात इति शङ्कया गृहीतव्याप्तावपि संशयः। अतस्तत्र भूयोदर्शनेनोपाधिनिरासद्वारा व्याप्त्यभावशङ्काऽपनीयते।

यद्वा ज्ञानप्रामाण्यसंशयाद्व्याप्तिसंशयः। यथा घटज्ञानसामग्र्यां सत्यां घटज्ञाने सति तत्प्रामाण्यसंशयाहितस्तत्संशयो न त्वग्रिमसंशयानुरोधेन तत्र घटज्ञानमेव न वृत्तमिति कल्प्यते, तथेहाप्युपाध्यभावस्य व्याप्तित्वात्तस्य च केवलाधिकरणरूपस्य प्रथमदर्शनेऽपि निश्चितत्वाद् व्याप्तिग्राहकान्तरस्याभावाच्च परिशेषेण सकृद्दर्शनस्य व्याप्तिग्राहकत्वात्तन्निश्चये प्रामाण्यसंशयादेव तत्संशयः।

न चैवं रासभेऽपि प्रथमं व्याप्तिपरिच्छेदः स्यादिति वाच्यं, तत्र व्याप्तेरभावात्, प्रत्यक्षज्ञाने विषयस्य हेतुत्वात्, क्वचिदसंसर्गाग्रहात् तथा व्यवहारो दोषमाहात्म्यात्। न चात्रापि तथा, आरोपे सति निमित्तानुसरणं, न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमात्।

केचित्तु साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं, साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं वा व्याप्तिः, तदुभयमपि योग्यं प्रत्यक्षेण वह्निधूमसम्बन्धानुभवेन प्रथममवगतमेव। महानसे योऽत्यन्ताभावोऽन्योन्याभावो वाऽवगतस्तस्य प्रतियोगी न वह्निर्न वा वह्निमानित्यनुभवात्। रासभे तथाऽवगमेऽप्यग्रे स बाध्यत इति, तन्न, एवं तद्वह्नितद्धूमयोरेव व्याप्तिः स्यात्, न तु धूमत्ववह्नित्वावच्छेदेन, न च तदनुमानोपयोगिवह्नित्वं वह्निमत्त्वं वा न प्रतियोगितावच्छेदकमिति प्रथमतो ज्ञातुमशक्यमेवेति।

मैवं, प्रकृतसाध्यव्यापकसाधनाव्यापको वा साधनत्वाभिमतेन समं प्रकृतसाध्यसम्बन्धिताच्छेदकं विशेषणं वोपाधिः। उभयथाऽपि तदभावो न व्याप्तिः, सिद्ध्यसिद्धिभ्यां तन्निषेधानुपपत्तेः। किन्तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वम्। तस्य प्रथमं ज्ञातुमशक्यत्वात्। किञ्च न वस्तुगत्या व्याप्तेर्ज्ञानं हेतुः, किन्तु व्याप्तित्वेन, तच्चोपाध्यभावत्वम्। न चोपाधेरज्ञाने तदभावत्वेन ज्ञानं सम्भवति, विशेषणज्ञानसाध्यत्वाद् विशिष्टज्ञानस्य। न च नियमतः प्रथममुपाधिधीरस्ति। यच्चोक्तं प्रतियोगिज्ञानं व्यवहारहेतुर्नाभावज्ञान इति। अस्तु तावदेवं, तथापि तदभावो मा व्यवहारि उपाध्यभावज्ञानाधीनानुमितिः स्यादेवोपाधिज्ञानं विनाऽपि, न चैवम्। वस्तुतस्तु विशेषादर्शने सहचारादिसाधारणधर्मदर्शनाद्व्यभिचारसंशयात् प्रथमदर्शनेन न व्याप्तिनिश्चयः।

नैयायिकमुखेन मीमांसकमास्कन्दयति-**मैवमिति**[1]।

ननूपाधिस्मरणे सतीत्यादिना तद्धेतोरेवेति न्यायेनोपाध्यभावप्रकारकज्ञानसामग्र्येव हेतुरित्युक्तम्। तथा च कथमुपाध्यभावज्ञानाधीनानुमितिः स्यादित्यापादनमित्यपरितोषादाह-**वस्तुतस्त्वति**।

---

१. 'सेयमिति' पाठो मातृकायाम्

अथ व्यभिचारसंशयो नाव्यभिचारनिश्चयप्रतिबन्धकः, ग्राह्यसंशयस्य निश्चयाप्रतिबन्धकत्वात्। अन्यथा संशयोत्तरं क्वापि निश्चयो न स्यादिति चेत्? न, व्यभिचारसंशयः प्रतिबन्धक इति ब्रूमः, किन्तु विशेषादर्शने सति सहचारादिसाधारणधर्मदर्शनात् संशयः स्यात्, न तु संशयसामग्रीतो निश्चयः। किञ्च यद्धीसामग्री यत्र प्रतिबन्धिका विशेषादर्शने तत्र तद्धीरपीति व्यभिचारसंशयोऽपि प्रतिबन्धकः। एवं भूयोदर्शनमपि संशायकं तर्कस्त्वनवस्थाग्रस्त एवेति कथं व्याप्तिग्रहः।

अत्रोच्यते– व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम्। ज्ञानं निश्चयः शङ्का च। सा च क्वचिदुपाधिसन्देहात् क्वचिद् विशेषादर्शनसहित-साधारणधर्मदर्शनात्। तद्विरहश्च क्वचिद् विपक्षबाधकतर्कात् क्वचित्स्वतः सिद्ध एव।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ व्याप्तिग्रहोपायप्रकरणं समाप्तम्

स्वसिद्धान्तमाह - **अत्रोच्यत** इति। व्यभिचारज्ञानाभावसहकृतसहचारज्ञानं व्याप्तिग्राहकमिति। अत्र सहचारज्ञानत्वेनैव हेतुत्वं न तु भूयोदर्शनत्वेन सकृद्दर्शनत्वेन वा। तच्च तदुभयसाधारणं, यदैव यस्य व्यभिचारज्ञानविरहसाहित्यं, तदैव तेन व्याप्तिर्गृह्यते {ग्राह्यते} इत्यर्थः। न च व्यभिचाराभावविशिष्टसाध्यसहचारस्य व्याप्तित्वेन विशेषणज्ञानं विना विशिष्टज्ञानानुपपत्तेर्नोक्तग्राहकेन व्याप्तिग्रह इति वाच्यम्, उक्तग्राहकेन व्यभिचाराभावरूपविशेषणस्यैव प्रथमं ग्रहे विशेषणज्ञानादिघटित-सामग्रीसत्त्वेन पश्चाद्व्याप्तिज्ञानोत्पत्तेरित्यत्र तात्पर्यात्। ननु सहचारज्ञानस्य हेतुत्वे मानाभावः। न च विशेषणज्ञानत्वेन तस्य हेतुत्वं सहचारविशेष्यकव्याप्तिग्रहे व्यभिचारात्। न च प्रथमं तन्न भवत्येव, मानाभावात्। धूमवानयं धूमसमानाधि-करणात्यन्ताभावाप्रतियोगिवह्निमानित्येवमपि वह्निव्याप्तिग्रहाच्च। भवतु वा विशेषणज्ञानत्वेन तस्य हेतुत्वं, तथापि सहचारज्ञानत्वेन जनकत्वाभावात्। तस्माद्व्यभिचारादिज्ञानरूपप्रतिबन्धकाभावे सति व्याप्तीन्द्रियसन्निकर्षादेव व्याप्ति-निश्चयो न तु तदपेक्षेति चेत्?

अत्राहुः— अगृहीतसहचारस्य सर्वथा व्याप्त्यनवगमात् स्वतन्त्रान्वयतिरेकाभ्यां तस्य हेतुत्वात्। अत एव सहचारभ्रमेण विरुद्धे व्याप्तिग्रहः। किञ्च

सम्बन्धविशेषावच्छिन्नतादृशाभावप्रतियोगित्वाभावो ह्यव्यभिचारः। अन्यथा धूमवत्यपि समवायितया वह्नेरभावसत्त्वे तादृशाभावप्रतियोगित्वासिद्धेः। तथा चाधिकरण-निष्ठसाध्यसंसर्गविशेषग्रहं विना तत्संसर्गावच्छिन्नतादृशाभावप्रतियोगित्वाभावः साध्येऽशक्यग्रह एव। अधिकरणे साध्यसम्बन्ध इति समानाधिकरणेन सम्बन्धावगमे विशिष्य तदनवगमदशायां साध्ये तत्सम्बन्धावच्छिन्नतादृशाभावप्रतियोगित्वाभावः साध्येऽशक्यग्रह एव। अत एव भूतले घट इति ज्ञानं सम्बन्धसामान्याभा-वमवगाहते। अन्यथा संशयानुपपत्तेरिति। वस्तुतो व्यतिरेकसहचारज्ञानस्यान्वय-व्याप्तिग्राहकत्वमित्यग्रे स्फुटम्। तस्य च न विशेषणज्ञानत्वेन हेतुत्वं, (किन्तु?) व्यतिरेकसहचारस्यान्वयव्याप्तौ विशेषणत्वाभावात्। नापि सहचारज्ञानत्वेन, अतिप्रसङ्गात्। किन्तु व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेन। तच्चान्वयव्यतिरेकसहचारसाधारणम्। यद्यपि सहचारज्ञानस्य न व्यभिचारज्ञानविरोधित्वं महानसादौ वह्नेर्धूमसहचार-ग्रहेऽप्ययोगोलके व्यभिचारग्रहात्। तथापि सहचारग्रहविषयीभूताधिकरणे व्यभिचार-ज्ञानविरोधित्वमस्त्येव। न हि यत्रैवाधिकरणे साध्यसाधनयोस्तदभावयोर्वा सहचारो गृह्यते, तत्रैव व्यभिचारज्ञानं सम्भवति। अन्वयसहचारग्रहे साध्यात्यन्ताभावस्य व्यतिरेकसहचारग्रहे साधनस्य तत्प्रागग्रहात्। साधने साध्यात्यन्ताभाव-सामानाधिकरण्यग्रहस्य व्यभिचारग्रहत्वात्। व्यभिचारज्ञानञ्च यादृशं केवलान्वयिसाधारणं प्रतिबन्धकत्वेन हेत्वाभासग्रन्थे निर्वक्तव्यं, तद्विरहोऽत्र हेतुत्वेन बोध्यः। न चैतदपि विशेषादर्शने सति साधारणधर्मदर्शनतया संशायकमेव स्यात्, न तु निश्चायकमिति वाच्यं, कोट्यस्मृतौ तर्कसहचारेण तस्य व्याप्तिनिश्चायकत्वात्। ननु व्यभिचार-ज्ञानविरहसहकृतसहचारदर्शनं तद्धेतोरेवेति न्यायेनानुमितावेव हेतुरस्तु न तु व्याप्तिज्ञान इति चेत्? न, व्यभिचारज्ञानस्य ग्राह्याभावानवगाहित्वेनानुमितौ प्रतिबन्धकत्वाभावेन तदभावाहेतुत्वात्। तस्मादनुमितिजनकीभूतमव्यभिचारज्ञानं विघटयत एव तस्यानुमितिप्रतिबन्धकत्वं, न तु साक्षादिति दिक्।

जयदेवमिश्रास्तु सामानाधिकरण्याभावज्ञानं प्रतिबन्धकमिति सामानाधिकरण्यज्ञानं हेतुः। कारणीभूतज्ञानविरोधिन एव ज्ञानस्य प्रतिबन्धकत्वात्। एवञ्च विरुद्धेऽपि सहचारभ्रमेण व्याप्तिभ्रमदर्शनादन्वयव्यतिरेकाभ्यामपि तद्धेतुत्वम्। न चाननुगमः, सहचारज्ञानत्वेनैवानुगमात्। न च प्रथमदर्शनादपि व्याप्तिधीप्रसङ्गः, व्यभिचार-ज्ञानप्रतिबन्धद्वारा हेतुत्वात्। प्रथमदर्शनस्य तथात्वे ततोऽपि व्याप्तिग्रहसम्भवात्। न चैवं व्यभिचारज्ञानविरहसहकृतेति व्यर्थं, तदभावद्वारत्वलाभार्थं तदुपन्यासात्।

अत एवोभयहेतुत्वलाभाद् द्वारसाहित्येनैव द्वारिणः फलजननात्। द्वारलाभश्च क्वचित् केवलस्य क्वचित्तर्कसहकृतस्येत्यन्यदेतदित्याहुः। तच्चिन्त्यं, स्वतः-सिद्धशङ्काविरहस्थले तस्याजनकत्वापत्तेः, द्वाराभावात्। न हि यत्कार्यं यद्द्वारा यज्जनयति तत्तेन विनापि जनयति, विरोधात्। शङ्काप्रतिबन्धकत्वस्यावच्छेदकरूपग्रहं विना ग्रहासम्भवात्। तथा च व्यभिचारज्ञानविरहसहकृतसहचारज्ञानत्वेन जनकत्व-मन्वयव्यतिरेकाभ्यामवकल्प्यत इत्येव न्याय्यमिति संक्षेपः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां व्याप्तिग्रहोपायप्रकरणं समाप्तम्

।। तर्कप्रकरणम् ।।

तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेत्? न, यावदाशङ्कं तर्कानुसरणात्। यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः। तथाहि धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति? क्वचिद्वह्निं विनाऽपि भविष्यति? अहेतुक एवोत्पत्स्यते? इति शङ्का स्यात्, सर्वत्र स्वक्रियाव्याधातः स्यात्। यदि हि गृहीतान्वयव्यतिरेकं हेतुं विनापि कार्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात्? तेन विनापि तत्सम्भवात्। तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्। शङ्कायाञ्च न नियतोपादानं, निपतोपादाने च न शङ्का।

यादृशतर्कस्य मूलभूतव्याप्तौ व्याघातेन न शङ्कावकाशस्तदाह-**धूमो यदीति**। घटादौ व्यभिचारवारणाय सत्यन्तम्। वह्निसमवहितसामग्रीजन्ये तद्वारणाय विशेष्यम्। धूमस्य वह्न्यसमवहिताजन्यत्वनिश्चयदशायामेव तर्कोऽयमभिमतस्तेन सत्यन्तविशेषणस्यैव व्यतिरेकमादाय नास्य विपर्ययपर्यवसानम्। एवञ्च वह्न्यसमवहिताजन्य इति पक्षविशेषणमप्यभिमतम्। तथा च वह्नेरेव भविष्यति, क्वचिद्वह्निं विना धूमो भविष्यतीति शङ्काद्वयमापाद्यापादकव्याप्तिग्रहापरिपन्थीभूतमप्युक्तपक्षविशेषणग्रह-परिपन्थित्वादुक्ततर्कावकाशप्रतिबन्धकमिति तदप्याशङ्क्य निराकृतमिति ध्येयम्। तर्कश्चायं वह्निजन्यत्वग्राहिप्रत्यक्षसहकारिव्यभिचारिशङ्काविरहापादको न तु व्याप्ति-ग्राहिप्रत्यक्षसहकारितदापादकः, विपर्ययग्राहिप्रत्यक्षेण सामानाधिकरण्याग्रहात्। न चैवं व्याप्तिग्राहकनिरूपणप्रस्तावे किं तदुपन्यासेनेति वाच्यं, व्यधिकरणवह्न्यजन्यत्वे विज्ञाते वह्निजन्यत्वग्रहान्तरं तादृशवह्निजन्यो धूमो यदि तादृशवह्न्यजन्यत्वे सति समानाधिकरणवह्निजन्यो न स्याद् वह्निजन्यो न स्याद् इति तर्केण व्याप्ति-ग्राहिप्रत्यक्षसहकारिशङ्काविरहापादनमिति तदुत्थानानुकूलतया तस्यापि व्याप्ति-धीप्रयोजकत्वादिति भावः।

अप्रयोजकत्वं शङ्कते - **अहेतुक** इति। **तस्मा[त्तत्त]दुपादानमिति**। ननूपादानं क्रिया। सा च न शङ्काप्रतिबन्धिका, विरोधिनिश्चयस्यैव शङ्काप्रतिबन्धकत्वात्। न चोपादानपदं तद्धेतुकार्यकारणभावनिश्चयपरं, तर्कस्य निष्फलत्वापत्तेः। न च

तर्कादेव तन्निश्चयः, अन्योन्याश्रयात्। तर्केण कार्यकारणभावनिश्चयः, तस्मिन् सति शङ्कानिवृत्तौ तर्कावतारः, अन्यथा शङ्काग्रासात् तर्कानवतारादिति। न च वह्न्यसमवहिताजन्यत्वसहकृतात् कार्यं सहेतुकमित्यनुमानात् शङ्कात्रयनिवृत्तिरिति वाच्यं, तथा सत्युक्ततर्कस्याकिञ्चित्करत्वापात्। तत एव हेतुत्वनिश्चयात्। उक्ततर्कस्य च कारणताग्राहिप्रत्यक्षसहकारित्वात्, अन्यथैतदनुमानसहकारित्वे धूमः सहेतुको न स्यादिति तर्काद्धूमस्यापि वह्न्यजन्यत्वापातात्। उक्तानुमानस्य शङ्काप्रतिबन्धकत्वे तस्यापि व्याप्त्यपेक्षायामनवस्थापत्तेरिति।

अत्रोपाध्यायाः धूमार्थं वह्नेरुपादानमित्यत्र वह्न्यसमवहितानुपादानमित्येव विवक्षितम्। तस्मात्तदुपादानमेवेत्यत्रापि वह्न्यसमवहितानुपादानमेव वह्न्युपादानत्वेन विवक्षितम्। तद्धेतुभूतञ्च तदजन्यताज्ञानं वह्निधूमयोः कार्यकारणभावाज्ञानेऽप्यन्वयव्यतिरेकाभ्यां शक्यग्रहम्[१]। न च सत्यप्यन्वयव्यतिरेकदर्शने वह्न्यसमवहितजन्यत्वशङ्कासम्भवान्न तदजन्यत्वनिश्चय इति वाच्यं, धूमोत्पत्तिपूर्वसमयगृहीतपदार्थानां तद्धेतुत्वशङ्काविषयीभूतानामेकैकव्यतिरेकेण तत्तदजन्यत्वनियमात्। न च तदन्यविषयकशङ्कायाः स्वतोऽप्यनिवृत्तिरिति वाच्यं, प्रतीतव्यभिचारपदार्थे तदसम्भवात्। अतीन्द्रियपदार्थजन्यशङ्कापिशाच्याः सर्वत्र सुलभत्वेन प्रमाणमात्रप्रवृत्तिप्रतिबन्धापत्तेः। न चैवं धूमस्य वह्निसमवहितजन्यत्वग्रहेऽप्युक्ततर्कापेक्षा न स्यादिति वाच्यं, वह्न्यसमवहिताजन्यत्वनिश्चये सत्यपि तत्र वह्निसमवहिताजन्यत्वशङ्कायां तस्य तदपेक्षणादित्याहुः, तच्चिन्त्यं, वह्न्यसमवहितानुपादानस्य तादृशशङ्काप्रतिबन्धकत्वे मानाभावात्। शङ्काया विरोधिनिश्चयनिवर्त्यत्वात्।

अन्ये तूपादानपदेन तद्धेत्वन्वयव्यतिरेकानुविधायित्वज्ञानमुक्तं, तस्य च विरोधिनिश्चयत्वेन शङ्काप्रतिबन्धकत्वात्। यदवच्छेदेन यद्व्यावर्तकधर्मदर्शनं तज्ज्ञानस्यापि शङ्काविरोधित्वात्। अत एव धूमत्वावच्छेदेन व्याप्तिनिश्चये धूमत्वदर्शनादेव पर्वतवृत्तिधूमेन व्याप्तिसंशयः। न चैवं तर्को व्यर्थस्तत्प्रयोजनस्य शङ्काविरहस्यान्यत एव सिद्धेरिति वाच्यं, तर्कस्यैवान्वयाद्यनुविधानज्ञानत्वात्। वह्निं विना न धूम इत्येव हि वह्न्यसमवहिताजन्यत्वम्। तथा च यदभावे यदभावस्तदभावेऽपि यदि तदभावस्तदा तदुत्पत्तिरेव न स्यादिति तर्के यदभावे यदभाव इति व्यतिरेकस्य तद्भावे तद्भाव इत्यन्वयस्य विषयत्वेनास्यैवान्वयाद्यनुविधायिज्ञानत्वशङ्कानिवर्तकतया तर्कत्वञ्चेति समञ्जसमित्याहुः, तन्न, अन्वयाद्यनुविधायित्वज्ञानस्यान्यथासिद्धव्यभिचारिसाधारणत्वेन शङ्काप्रतिबन्धकत्वाभावात्। नियमादिघटिततज्ज्ञानञ्च कारणत्वग्रहपर्यवसन्नमेवेति पूर्वोक्तदोषानुवृत्तिरिति।

---

१. 'शक्यग्रहः' इति पाठो मातृकायाम्

तदिदमुक्तं तदेव ह्याशङ्कते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति। न हि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते तत्कारणं तन्नेत्याशङ्क्यते चेति।

एतेन व्याघातो विरोधः। स च सहानवस्थाननियम इति तत्राप्यनवस्थेति निरस्तं, स्वक्रियाया एव शङ्काप्रतिबन्धकत्वात्।

अत एव ''व्याघातो यदि शङ्काऽस्ति न चेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः?'' इति खण्डनकारमतमप्यपास्तम् न हि व्याघातः शङ्काश्रितः, किन्तु स्वक्रियैव शङ्काप्रतिबन्धिकेति। न वा विशेषदर्शनात् क्वचिच्छङ्कानिवृरेवं स्यात्। न चैतादृशतर्कावतारो भूयोदर्शनं विनेति भूयोदर्शनादरः। न तु स स्वत एव प्रयोजकः। अत एव तदाहितसंस्कारो न मानान्तरं, तर्कस्याप्रमात्वात्।

तच्च प्रत्यक्षव्याप्तिज्ञाने हेतुः, तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात्। ननु सहचारदर्शनव्यभिचारादर्शनवद् व्यभिचारशङ्काविरह-अनुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चय इति चेत्? न, स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात्। सत्तर्काद्व्याप्तिप्रमा, तदाभासात्तदप्रमा, विशेषदर्शनसत्यत्वा-सत्यत्वाभ्यां पुरुषज्ञानमिव।

अपरे तु यत्र तर्के व्याप्त्यनुभवो मूलं तत्र तर्कान्तरापेक्षा, यत्र तु व्याप्तिस्मरणं हेतुस्तत्र न तर्कान्तरापेक्षेति नानवस्था? अस्ति च जातमात्राणामिष्टानिष्ट-साधनतानुमितिहेतुव्याप्तिस्मरणं तदानीं व्याप्त्यनुभावकाभावात्। तन्मूलानुभवमूला चाग्रे व्याप्तिस्मरणपरम्परेति।

जयदेवमिश्रास्तु उपादानमेव शङ्काप्रतिबन्धकमिति यथाश्रुत एव ग्रन्थः समीचीनः। तथाहि - न हि सर्वत्रानेनैव तर्केण धूमवह्निकार्यकारणभावग्रहः, कोटिस्मरणादिविरहेण स्वतस्सिद्धशङ्काविरहेऽन्वयादिज्ञानवतस्तद्ग्रहे व्याप्तिग्रहे वा बाधकाभावात्। स्वतस्सिद्धे शङ्काविरहेऽनेनापि तर्केण तद्ग्रहे बाधकाभावाच्च। तदिदमुक्तं क्वचित् स्वतस्सिद्ध एवेति। तस्मात् सर्वत्र शङ्का स्यादेव। ततः कुत्रापि न व्याप्तिग्रहः। ततोऽनुमानं न प्रमाणमिति यश्चार्वाको मनुते तं प्रत्युच्यते - नायं नियमः साधुः यत्सर्वत्र शङ्केति तथा सति तादृशतर्केऽपि तादृशशङ्कायां भवतोऽपि धूमार्थं वह्न्युपादानं व्याहन्येत। तदिदमाह - **न हि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते, तत्कारणं तन्नेत्याशङ्क्यते चेति।** तथा च शङ्कानवश्यम्भावान्न व्याप्तिग्रहानुपपत्तिः, नवाऽनवस्थेति सिद्धमनुमानमित्याहुः, तदपि चिन्त्यं, भवेदप्येवं

यत्तु अनादिसिद्धकार्यकारणभावविरोधादिमूलाः केचित्तर्का इति, तन्न, तत्र प्रमाणानुयोगेऽनुमान एव पर्यवसानात्। न च व्याप्तिग्रहान्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानमिति वाच्यम्, अनुपपत्तेरप्यनुमानत्वात्।

अन्ये तु विपक्षबाधकतर्कादनौपाधिकत्वग्रह इति तदधीनो व्याप्तिग्रह इति तदपि न, तर्कस्याप्रमाणत्वात्। व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेत्? न, अनवस्थाभयेन तर्कं विना व्याघातात्। यत्र शङ्काविरहस्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात्।

यत्तु योग्यानामुपाधीनां योग्यानुपलब्ध्याऽभावग्रहः, अयोग्यानान्तु साध्याव्यापकत्वसाधनव्यापकत्वसाधनादभावग्रह इत्यनौपाधिकत्वं मनसा सुग्रहमिति, तत्तुच्छम्, अनुमानेन तत्साधनेऽनवस्थानात् प्रमाणान्तरस्याभावात्।

ये चानुकूलतर्कं विनैव सहचारादिदर्शनमात्रेण व्याप्तिग्रहं वदन्ति तेषां पक्षेतरत्वस्य साध्यव्यापकत्वग्रहेऽनुमानमात्रमुच्छिद्येत। अनुमानमात्रोच्छेदकत्वादेव पक्षेतरो नोपाधिरिति चेत्? भ्रान्तोऽसि, न हि वयमुपाधित्वेन तस्य दोषत्वमाचक्ष्महे, साध्यव्यापकत्वेन तद्व्यतिरेकात्, पक्षे साध्यव्यावर्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य वज्रलेपत्वाच्च। अपि च करवह्निसंयोगः शक्त्यतिरिक्तातीन्द्रियधर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वान्न साधकम्। तत्र व्याप्तस्य पक्षधर्मत्वे किमप्रयोजकं नाम। तस्माद्विपक्षबाधकतर्काभावान्न तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ तर्कप्रकरणं समाप्तम्

यदि चार्वाकोक्तक्रमेण शङ्कामुपनीयानवस्थामापादयेत्। नत्वेतदस्ति। किन्तु व्याप्तिनिश्चायकत्वेन नैयायिकाभिमतसामग्र्याः समानधर्मदर्शनादिघटितत्वेन संशायकत्वेमेवेति कथं संशयसामग्रीतो निश्चय इति तेनोक्ते तर्करूपविशेषदर्शने सति तस्यानिश्चायकत्वमित्युत्तरिते तर्कस्य व्याप्तिमूलकतया तत्राप्येवं तर्कापेक्षायामनवस्था तदनपेक्षायाञ्च कथं संशयसामग्रीतो निश्चय इति पुनस्तेनोक्ते क्वचित्तर्कमूलव्याप्तौ व्याघातेन शङ्कैव नावतरतीत्यनवस्थोद्धारे क्रियमाण उक्तदोषस्य तर्कवैफल्यानवस्थयोरन्यतरापत्तेरनुद्धारात्। किञ्चैवमपि न चार्वाकस्य व्याघातः, तस्योपादेयतासम्भावनाया एवोपादानहेतुत्वात्। अत एव धूमादिदर्शनानन्तरं वह्न्यर्थं प्रवृत्तिश्च सम्भावनामात्रादिति तत्सिद्धान्तः। तथा च तादृशशङ्कायामप्युपादानासिद्ध्यभावेन व्याघातानुपपत्तेः। किञ्च तादृशोपादानस्य तादृशशङ्काविरहव्याप्तत्वग्रहं विना शङ्कायां तवापि तादृशक्रियाव्याघात इत्यस्योपदर्शयितुमशक्यत्वेनानवस्थातादवस्थ्यादिति संक्षेपः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां तर्कप्रकरणं समाप्तम्

।। व्याप्त्यनुगमप्रकरणम् ।।

उक्तप्रकारेष्वन्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुर्लाघवात्। अतो नाननुगमः। अनौपाधिकत्वं तल्लक्षणम्। नन्वेवमुपाधिरसिद्ध्युपजीव्यत्वेन व्यभिचार-

ननूक्तव्याप्तिप्रकाराणामननुगमेन कथमनुगतानुमितिलक्षणकार्यकारणत्वमित्यत आह **उक्तव्याप्तिप्रकारेष्विति।** अत्यन्ताभावगर्भव्याप्तावत्यन्ताभावे प्रतियोग्य-समानाधिकरणत्वप्रवेशादन्योन्याभावगर्भव्याप्त्यपेक्षया गौरवमित्यर्थः।

केचित्तु - अन्योन्याभावग्रहे प्रतियोगितावच्छेदकारोपो हेतुरिति तावन्मात्रो-पस्थितिरपेक्षणीया । अत्यन्ताभावग्रहे च तद्विशिष्टप्रतियोग्यारोपो हेतुरिति तदुपस्थितिः। तथा च ग्राहकसामग्रीलाघवादन्योन्याभावोपस्थितिः शीघ्रेति तद्गर्भैव व्याप्तिरनुमितिहेतुः। न च ग्राहकसामग्रीलाघवं न ग्राह्यकारणताविनिगमकमिति वाच्यं, शीघ्रोपस्थितिहेतुत्वेन ग्राहकसामग्रीलाघवस्य विनिगमकत्वादित्याहुः। तन्न, प्रतियोगितावच्छेदक-निर्विकल्पकस्यारोपहेतुत्वेन विशिष्टोपस्थितिस्तथा वाच्या। सा च प्रतियोगिविषयिणीति सामग्रीलाघवासिद्धेः। न चोभयविषयकज्ञानस्याप्येकत्रावच्छेदकमात्रारोपत्वेनापरत्र विशिष्टारोपत्वेन जनकत्वाल्लाघवमिति वाच्यं, तथाजनकत्वेऽप्युभयत्र जनकोपस्थिति-विषयस्य तौल्येनोपस्थितेः शीघ्रत्वविलम्बितत्वासिद्धेः। तादात्म्यविषयत्वेनारोपस्य जनकत्वे तावन्मात्रविषयत्वेन जनकत्वस्याप्रसिद्धेश्चेति।

अत्र **यज्ञपत्युपाध्यायाः** न व्याप्तिरनुमितिहेतुः। किन्तु तज्ज्ञानम्। तथा च यज्ज्ञानस्य तद्धेतुत्वे तदवच्छेदकं लघु भवति सैव व्याप्तिरुपादेया। तादृशी च गुरुशरीराऽप्यत्यन्ताभावगर्भैव सा। न हि तत्र प्रतियोग्यसमानाधिकरणत्वभागस्याप्यत्यन्ता-भावविशेषणस्य ज्ञानमनुमित्युपयोगीति तस्योपादानम्। किन्तु व्याप्तिस्वरूपकथनमात्रार्थं, तत्र तस्य ज्ञानं विनापि स्वसमानाधिकरणात्यन्ताभावप्रतियोगिवह्निसमानाधिकरणधूम-वानयमिति ज्ञाने सति वह्न्यनुमितौ विलम्बाभावात्। संयोगात्यन्ताभावोऽपि न प्रतियोगिसमानाधिकरण इति ज्ञानवतो द्रव्यत्वादिना संयोगाद्यनुमानाच्च। एवञ्च साधनसमानाधिकरणो योऽत्यन्ताभावः प्रतियोगिसमानाधिकरणत्वेन न ज्ञायते तदप्रतियोगित्वेन ज्ञायमानं यत्साध्यं साधननिष्ठतत्समानाधिकरणत्वज्ञानत्वमेव तद्व्याप्तिज्ञानस्यानुमितिहेतुतावच्छेदकं वाच्यम्। तच्चान्योन्याभावगर्भव्याप्तिज्ञानस्य तद्धेतुतावच्छेदकं यत्तदपेक्षया लघुशरीरमेव भवति। तस्यापि तद्धेतुतावच्छेदकं नोक्तस्वरूपतज्ज्ञानत्वमेव। तथा सति संयोगवदन्योन्याभावोऽप्यव्याप्यवृत्तिरिति

वद्धेत्वाभासान्तरं स्यान्न तु व्याप्त्यभावत्वेनासिद्धिरिति चेत्? तज्ज्ञान-मुपजीव्यमपि न स्वतो दूषकम्। न ह्यन्यस्य साध्यव्यापकत्वसाधना-भ्राम्यतो द्रव्यत्वेन संयोगाननुमानापत्तेः। किन्तु तत्रापि साधनसमानाधिकरणो योऽन्योन्याभावः प्रतियोगितावच्छेकसमानाधिकरणत्वेन न ज्ञायते, तत्प्रतियोगिता-नवच्छेदकत्वेन ज्ञायमानं यत्साध्यं साधननिष्ठतत्सामानाधिकरण्यज्ञानत्वमेव तदवच्छेदकं वाच्यम्। इदञ्च तदपेक्षया गुरुशरीरमेव । स्थानद्वयेऽवच्छेदकपदार्थस्याधिकस्य प्रवेशादिति ।

अत्रेदं चिन्त्यम् - भवेदेवं विपरीतगौरवं यद्यत्यन्ताभावगर्भायां प्रतियोगि-समानाधिकरणत्वेनाज्ञायमानत्वम्, अन्योन्याभावगर्भायां प्रतियोगितावच्छेदक-समानाधिकरणत्वेनाज्ञायमानत्वं स्वरूपसदवच्छेदकं स्यात्। न चैवं, किन्तूभयत्र स्वाभावसमानाधिकरणत्वेनाज्ञायमानत्वमेव विशेषणमस्तु। स चाभावोऽत्यन्ताभावस्य प्रतियोगीव[१] अन्योन्याभावस्य प्रतियोगितावच्छेदक इत्यन्यदेतत् । अवच्छेदकत्वन्तु स्वाभावत्वेनैव, न तु तेन तेन रूपेणेति कुतो विपरीतगौरवम्। तस्मादुभयत्रास्मिन् स्वरूपसदवच्छेदके समाने कुतो लाघवादन्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुरिति। यद्वाऽन्योन्याभावे प्रतियोगिवृत्तित्वेनाज्ञायमानत्वमेव विशेषणमस्तु। तथा च न विपरीतगौरवमिति ।

जयदेवमिश्रास्तु लाघवात् [इत्यस्य] लघूपस्थितिकत्वात् शीघ्रोपस्थितिकत्वात् इत्यर्थो विवक्षितो न तु वस्तुलाघवमिति विवक्षितम्। तथा चात्यन्ताभावापेक्षयान्योन्याभावस्य शीघ्रोपस्थितिकतया तद्गर्भव्याप्तिरपि तथेति सैवानुमितिहेतुः। न तु चरमोपस्थिता अन्याः। न च शीघ्रोपस्थितिकत्वमसिद्धं, तस्यावश्यकत्वात् । तथाहि धूमवह्नि-सामानाधिकरण्यग्रहकाले व्यधिकरणस्य वस्तुनो ग्रहानियमेन तदत्यन्ताभावग्रहानियमात्। प्रतियोगिज्ञानं विनाऽभावाग्रहात् । अन्योन्याभावस्तु धूमवह्न्योरप्यन्ततस्तदा सुग्रह एव। अत्यन्ताभावापेक्षया प्रतियोगिज्ञानसत्त्वेन सामग्रीसत्त्वात्। तथा च तदप्रतियोगित्वं वह्निमति सुग्रहम्। तस्मिन् सत्यपि तदग्रहे व्याप्त्यग्रहस्य सर्वसम्मतत्वात्। न च तदात्यन्ताभावप्रतियोगिनोऽपि ज्ञानमस्त्येव, अन्ततो धूमत्वादेरेव ग्रहादिति वाच्यं, न हि प्रतियोगिज्ञानमात्रमभावधीहेतुरपितु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानम्। प्रतियोगितावच्छेदकन्तु तत्र धूमत्वत्वम्। तस्य चावश्यप्रतीत्या धूमत्वमात्रज्ञानेऽपि तदत्यन्ताभावाज्ञानात्। अत एवाप्रतियोगीत्यत्रान्योन्याभावगर्भतैव, प्रतियोगित्वा-

१. 'प्रतियोग्येव' इति पाठो मातृकायाम्

व्यापकत्वज्ञानमन्यस्य साध्यव्याप्तिज्ञाने प्रतिबन्धकम्, अतिप्रसक्तेः। व्यभिचाराज्ञानस्य तद्धेतुत्वात्तद्बुद्धिस्तथा। न चानौपाधिकत्वज्ञानं व्याप्तिज्ञाने

त्यन्ताभावस्य प्रतियोगित्वत्वनिरूपणाधीननिरूपणत्वेन विलम्बितोपस्थितिकत्वादित्याहुः। तदपि चिन्त्यं, धूमवह्निव्याप्तौ तद्गतरूपादेरेव व्यधिकरणस्य योग्यव्यक्तिवृत्तितया सुग्रहरूपत्वादिप्रतियोगितावच्छेदकरूपावच्छिन्नस्य ग्रहणसम्भवात्। चक्षुरादिना रूपादौ गृह्यमाण एव द्रव्यग्रहणसम्भवात्। न च प्रमेयत्वादेः केवलान्वयित्वव्याप्तौ प्रमेयत्वादेरेवाधिकरणतया तस्य च स्वस्मिन्नपि वृत्त्या ऽन्यस्यात्यन्ताभावप्रतियोगिनो ग्रहापेक्षेति वाच्यं, केवलान्वयित्वप्रमेयत्वादिघटकपदार्थस्य विशेषणादेरेव व्यधिकरणस्य ग्रहणात्। अपि चास्तु प्रथमोपस्थितत्वम्। तथाप्युभयव्याप्त्युपस्थितिदशायामुक्त-लाघवेनात्यन्ताभावगर्भाया व्याप्तेर्ग्रहे प्रथमगृहीतस्यापि त्याज्यत्वात्। प्रथमोपस्थिति-लाघवापेक्षया वस्तुलाघवस्य बलवत्त्वात्। अत एव व्याप्यतावच्छेदकप्रकारकज्ञानस्य प्रथमोपस्थितत्वेऽप्युभयोपस्थितिदशायां लाघवेन व्याप्यत्वप्रकारकज्ञानस्यैव हेतुत्वग्रह इत्यग्रे वक्ष्यते। अत एव च प्रथमगृहीताऽपि कार्यान्वितशक्तिरग्रे लाघवानुरोधेन त्यज्यत इत्येषा दिक् ।

यदपि व्याप्त्योर्भेद एव न, साधनसमानाधिकरणधर्माप्रतियोगिसामानाधिकरण्यस्य व्याप्तित्वात्। तदप्रतियोगित्वञ्च तदविरोधित्वं तदधिकरणानधिकरणभिन्नत्वमिति यावत्। व्यभिचारिणि च हेतुसमानाधिकरणसाध्यात्यन्ताभावस्य तद्वदन्योन्याभावस्य चाधिकरणानधिकरणमेव साध्यं तद्द्वयस्यैकत्रावृत्तेः। तादृशश्च प्रतियोगि-व्यधिकरणात्यन्ताभावोऽन्योन्याभावश्चेति विशेषणद्वयगर्भा व्याप्तिरुक्ता, न तु तथाज्ञानं प्रयोजकमननुगमात्। तथाज्ञानेऽप्युक्तावच्छेदेनैव जनकत्वमनुगतत्वात्। तदपि चिन्त्यं, तादृशधर्माप्रतियोगित्वं यदि विवक्षितं तदा महानसजलह्रदान्यतरत्व-रूपसाधनसमानाधिकरणधर्माधिकरणजलह्रदानधिकरणतया वह्नेस्तद्भिन्नत्वाभावेनासम्भ-वापत्तेः। यत्किञ्चित्तादृशधर्मविवक्षायाञ्च व्यभिचारिसाधारण्यात्। तदधिकरणाधिकरण-भिन्नत्वस्याप्रतियोगित्वविवक्षायामप्यसम्भवः, वह्नेर्महानसत्वानधिकरणपर्वताव्यधि-करणतया तद्भिन्नत्वासिद्धेरिति ।

यत्तु व्यभिचारज्ञानविरहसहकृतसहचारज्ञानमनुमितिमात्रे हेतुः, अन्योन्या-भावगर्भादयस्त्वनुमितिविशेषहेतवः। ग्रन्थस्तु अन्योन्यश्चाभावश्चान्योन्याभावौ, तद्गर्भा व्याप्तिः, तद्गर्भसामानाधिकरण्यमित्यर्थः। यत एव यस्य ज्ञानं विरोधि तदभावगर्भं सामानाधिकरण्यं हेतुः, अत एवोपाधिज्ञानमविरोधीत्यनौपाधिकत्वमेव हेतुः। विरोधि

हेतुरित्युक्तम्। तथा च व्यभिचारज्ञानद्वारा स दूषकः। एवञ्च परमुखनिरीक्षकतया सिद्धसाधनवन्न पृथक्। न चैवमव्यभिचारस्य व्याप्तित्वे व्यभिचारस्तद-

च साध्यवदन्योन्याभावग्रहवत् साध्यात्यन्ताभावज्ञानमपि। तथा च तदुभयगर्भैव व्याप्तिरनुमितिहेतुः। अत एवाग्रेऽनौपाधिकत्वमेव व्यवच्छिन्नम्-**अनौपाधिकत्वं तु लक्षणमिति** ग्रन्थेन । यद्वाऽनयोरेवोच्यमानानुगतरूपेण सकलानुमितिजनकत्वम्। अनुगतञ्च रूपं साध्यविरोधिसामानाधिकरण्यधीविरोधिसामानाधिकरण्यत्वम्। इदमेव च ज्ञाने विषयतावच्छेदकीभूय हेतुतावच्छेदकमतो ना[न]नुगमः। साध्यविरोधित्वञ्च साध्याधिकरणानधिकरणत्वरूपम्। साध्यवदन्योन्याभावसाध्यात्यन्ताभावसाधारणम्। किञ्चोभयगर्भव्यभिचारज्ञानस्य प्रतिबन्धकत्वादुभयगर्भव्याप्तिज्ञानमेव हेतुः[१], जनकज्ञानविरोधिन एव प्रतिबन्धकत्वात्। न चोभयव्यभिचारस्यैकव्याप्तिग्रहप्रतिबन्धकत्वम्, एकस्या उभयसाक्षाद्विरोधित्वासिद्धेः। तदभावव्याप्यत्वरूपविरोधित्वेन तथात्व उपाधेरपि विरोधित्वाद्धेत्वाभासान्तरतापत्तेरित्याहुः। तदपि न सम्यक्, अनुमितौ वैजात्यस्यानुपलब्धिबाधितत्वेन व्याप्तीनां विशेषकारणत्वासिद्धेः। न चोक्तरूपेणानुगतीकृतानां हेतुत्वान्नैवमिति वाच्यम्, एवं हि सहचारज्ञानस्यानुमितिमात्रहेतुत्वे बीजाभावः, उक्तरूपेणानुगतीकृतानां व्याप्तीनामेवाव्यभिचारात्। किञ्चान्योन्याभाव-गर्भव्यभिचारज्ञानसत्त्वेऽप्यत्यन्ताभावगर्भव्याप्तिज्ञानादनुमित्यापत्तेः, कारणता-वच्छेदकावच्छिन्नयत्किञ्चित्सत्त्व एव कार्योत्पत्तेः, ग्राह्याभावानवगाहित्वेन तत्र तस्याप्रतिबन्धकत्वात्। न चेष्टापत्तिः, अनुभवविरोधात्। वैपरीत्यस्यापि सम्भवेनात्यन्ताभावगर्भव्यभिचारस्याप्यप्रतिबन्धकत्वे व्यभिचारस्य हेत्वाभासत्वानुपपत्तेः। न च तावद्व्यभिचारज्ञानानां प्रतिबन्धकतया तदभावकूटस्यानुमितौ हेतुत्वमिति वाच्यं, तथा सति व्याप्तिज्ञानहेतुत्व एव मानाभावात् तत्कूटसहकृतसहचारदर्शनस्यैव हेतुतापत्तेरिति।

यत्तु **यज्ञपत्युपाध्यायै**रुक्तं यो यो धूमवान् सोऽग्निमान् इत्युदाहरणावयवे सम्बन्धितालक्षणा व्याप्तिर्भासते, न त्वत्यन्ताभावादिगर्भा, तत्प्रत्यायकपदाभावात्। वीप्सया च सकलसाधनाधिकरणोपस्थितौ तत्र च साध्यसम्बन्धे प्रदर्शिते स्वरूपावच्छेदकस्य साध्यसम्बन्धितावच्छेदकत्वावगमात्। अन्यथोदाहरणानन्तरं धूमत्वं वह्निसम्बन्धितावच्छेदकं न वेति संशयापत्तेरिति सैव हेतुरिति, तन्न, निरुक्तावच्छेदकान्यत्वस्याप्युदाहरणावयवादप्रतीतेः। उदाहरणानन्तरं तादृशसंशयादर्शनेन वाक्यार्थतया सामग्रीविशेषेण यदि तद्भानं, तदोदाहरणानन्तरं धूमो वह्निव्याप्यो

---

१. 'हेतुरतः' इति पाठो मातृकायाम्

भावत्वेनासिद्धिः स्यादिति वाच्यं, साध्याभाववद्वृत्तित्वं हि व्यभिचारः, तदभावश्च नाव्यभिचारः, केवलान्वयिन्यभावात्। किन्तु स्वसमानाधि-

न वेति संशयादर्शनेनायोन्याभावगर्भादेरपि तथात्वस्य शक्याभ्युपगमत्वात्। अत एव निगमनेऽबाधितत्वादि वाक्यार्थतया भासते इत्यभ्युपेयते। अन्यथा तस्य तदर्थकत्वानुपपत्तेरिति।

अस्मदुपाध्यायास्तु– अत्यन्तान्योन्याभावगर्भव्यभिचारग्रहे सति नानुमितिरिति सर्वानुभवसिद्धम्। तथा च यज्ज्ञाने सति न तदुभयव्यभिचारज्ञानं सैव व्याप्तिरनुमितिहेतुः। तादृशी च साधनतावच्छेदकावच्छेदेन साध्यतावच्छेदकावच्छिन्न-सम्बन्धरूपैव। अस्ति चाव्यभिचारिणि धूमत्वावच्छेदेन वह्नित्वावच्छिन्नसम्बन्धः सकलधूमाधिकरणस्यैव वह्न्यधिकरणत्वात्। व्यभिचारिणि तु वह्नित्वावच्छेदेन न धूमत्वावच्छिन्नसम्बन्धः, अयोगोलके व्यभिचारात्। अवच्छेदकत्वं स्वरूपसम्बन्ध एव। इयमेव च व्याप्तिरनुमितिहेतुव्याप्तिज्ञाने[1] विषयीभूय भासते। अत्र चात्यन्ताभावान्योन्याभावगर्भव्यभिचारज्ञानं विरोधि, साधनतावच्छेदकावच्छिन्नधूमाधिकरणे साध्यतावच्छेदकावच्छिन्नवह्नेरत्यन्ताभावग्रहे वह्निमदन्योन्याभावग्रहे [च] तदग्रहात्। अत एव यो यो धूमवान् इत्युदाहरणस्य वीप्सया धूमत्वावच्छिन्नधूमाधिकरणे वह्निमानित्यनेन वह्नित्वावच्छिन्नवह्निसम्बन्धो बोध्यते। तादृशसम्बन्धबोधः पदार्थतया वाक्यार्थतया वेत्यन्यदेतत्। अत्यन्ताभावान्योन्याभावगर्भा च व्याप्तिरेतल्लक्षणम्, अनौपाधिकत्ववत्। न च निरुक्तैतद्व्याप्त्यज्ञाने शब्दादिनात्यन्ताभावादिगर्भव्याप्ति-ज्ञानेनानुमितिः स्यात्। न चेष्टापत्तिः, अनुभवविरोधादिति वाच्यम्, अत्यन्ता-भावान्योन्याभावगर्भव्याप्तेरेतद्व्याप्तिलक्षकतया व्युत्पन्नस्य तद्बोधाव्यवहितसमय एव तद्बोधोपपत्त्याऽनुमितिसम्भवात्। अव्युत्पन्नस्य चानुमित्यनुत्पत्तेरिष्टत्वात्। अन्योन्याभावादिगर्भव्याप्तिग्रहहेतुवादिनः शब्दादिनाऽनौपाधिकत्वव्याप्तिग्रहेऽप्यनुमित्य-भाववदिति संक्षेपः।

नरसिंहमिश्रास्तु अत्यन्ताभावगर्भनिरुक्तौ दैशिकव्याप्तौ साध्ये साधन-समानाधिकरणात्यन्ताभावाप्रतियोगित्वज्ञानमनुमितिहेतुः। कालिकव्याप्तौ तु साध्ये साधनसमानाधिकरणप्रागभावप्रध्वंसाप्रतियोगित्वज्ञानमनुमितिहेतुः। एवञ्चात्यन्ताभाव-प्रागभावप्रध्वंसेषु ग्राह्यसामानाधिकरण्यविरोध्यभावत्वं स्वरूपसदनुगमकं सदनुमितिहेतु-व्याप्तिज्ञाने कारणतावच्छेदकम्। तथा च[2] प्रतियोग्यसामानाधिकरण्यमभावे

१. 'अनुमितिहेतुः । व्याप्तिज्ञाने विषयीभूय..' इति पाठो मातृकायाम्

२. 'तथाऽप्रतियो....' इति पाठो मातृकायाम्

करणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यम्। न चानयोः परस्परविरहत्वमिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ व्याप्त्यनुगमप्रकरणं समाप्तम्

विशेषणं, विरोधार्थकनञा तथैवा (न?) वगमात्। तथा च गौरवम्। अन्योन्याभावगर्भनिरुक्तौ तु दैशिककालिकोभयसाधारण्येन साध्यवति साधनसमानाधिकरणान्योन्याभावाप्रतियोगित्वज्ञानमनुमितिकारणम्। तत्र चाभावेन ग्राह्यसामानाधिकरण्यविरोध्यभावत्वं स्वरूपसदनुगमकमवच्छेदकमपेक्षितमिति लाघवमित्यर्थः। एवञ्चात्यन्ताभावगर्भव्याप्तावत्यन्ताभावे यथा प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानत्वं स्वरूपसदवच्छेदकं तथाऽन्योन्याभावगर्भव्याप्तावपि प्रतियोगितावच्छेदकसामानाधिकरण्येनाज्ञायमानत्वमन्योन्याभावेऽपि स्वरूपसदवच्छेदकमिति क्व लाघवमिति यद्दूषणं, तच्छलम्, न ह्यन्योन्याभावगर्भव्याप्तावन्योन्याभावे तादात्म्यसामानाधिकरण्येनाज्ञायमानत्वं स्वरूपसन्नावच्छेदकमित्यन्योन्याभावगर्भव्याप्तौ लाघवमिति तदर्थः, किन्तूक्तक्रमेणेति संक्षेपः।

यो यो धूमवान् सोऽग्निमान् इत्यत्र धूमवत्यग्निसंयोगवदन्योन्याभावव्यावृत्तिः प्रतीयते, न तु वह्निमदत्यन्ताभावव्यावृत्तिः। तथा सति धूमे कदाचिद्वह्नेः प्रागभावप्रध्वंसान्यतरापत्तेः। तथा च सर्वत्रान्योन्याभावस्यैव प्रवेशादन्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुरित्युक्तम्। न त्वत्यन्ताभावगर्भव्याप्तिव्युदासः। ग्रन्थस्तु लक्षणपरः, अनौपाधिकत्वलक्षणव्याप्तेर्गुरुतया तदपेक्षया लाघवाभिधानम्। न चैवमननुगमो दोषस्तदवस्थ एवेति वाच्यम्, इष्टत्वात्, विशेषस्यैव विशेषहेतुत्वात्। न चानुमितिमात्रे को हेतुः? न कोऽपि, अनुगतहेत्वभावेनानुमितित्वस्यैकस्याभावात्। अनुगतमतेश्चोपाधिविषयत्वेनापि सिद्धेः। न च व्यभिचारज्ञानासहकृतं सहचारज्ञानं तत्रानुगतो हेतुरिति वाच्यं, तस्य व्याप्तिग्राहकत्वेनानुमितिं प्रत्यन्यथासिद्धत्वात्, मानाभावाच्च। एवञ्च यद्यत्कार्यं तत्सकर्तृकमित्यत्रापि कार्यत्ववति सकर्तृकत्ववदन्योन्याभावो व्यावर्त्यते, नात्यन्ताभावः। तथा सति कार्यत्ववति कदाचित् सकर्तृकत्वस्य प्रागभावप्रध्वंसान्यतरापत्तेरित्यपि **नवीनाः**।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां व्याप्त्यनुगमप्रकरणं समाप्तम्

।। सामान्यलक्षणाप्रकरणम् ।।

व्याप्तिग्रहश्च सामान्यलक्षणाप्रत्यासत्त्या सकलधूमादिविषयकः। कथमन्यथा पर्वतीयधूमे व्याप्त्यग्रहे तस्मादनुमितिः? सा चेन्द्रियसम्बद्धविशेषणता, अतिरिक्तैव वा। तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतुत्वेनानागतादौ संयोगादेरभावादिति वदन्ति। तदपरे न मन्यन्ते, तथाहि धूमत्वावच्छिन्ना व्याप्तिः सन्निकृष्टधूमविषये धूमत्वेन प्रत्यक्षेण ज्ञायते, ततः स्मृता सा तृतीयलिङ्गपरामर्शे पक्षनिष्ठधूमवृत्तितया ज्ञायते, ततोऽनुमितिः। तदनभ्युपगमेऽपि सन्निकृष्टधूमविषये धूमत्वेन धूमो वह्निव्याप्य इत्यनुभवः, तथैव स्मरणं, ततो धूमवानयमिति व्याप्तिस्मृतिप्रकारेण धूमत्वेन पक्षवृत्तिधूमज्ञानादनुमितिः, व्याप्त्यनुभवतत्स्मरणपक्षर्मताज्ञानानामेकप्रकारकत्वेनानुमितिहेतुत्वात्। गवादिपदेष्वपि शक्त्यनुभवतत्स्मरणवाक्यार्थानुभवानामेकप्रकारकत्वेन हेतुहेतुमद्भाव इत्यपूर्वे वक्ष्यते। तत्र योग्यतादिबलादपूर्वव्यक्तिलाभः, अनुमाने तु पक्षधर्मताबलाद् धूमो वह्निव्याप्य इत्यनुभवो न तु सर्वो धूमो वह्निव्याप्य इति, येन सर्वभानार्थं तत्स्वीकारः।

अथ वह्निमानित्यनुमितिर्विशेषणज्ञानसाध्या विशिष्टज्ञानत्वादिति पर्वतीयवह्निभानार्थं तत्कल्पने धूमेऽपि तथा क्वचिद्धूमस्यापि व्यापकत्वादिति चेत्? न, विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्यावश्यकत्वेन हेतुत्वात्, तच्च वृत्तमेव, न तु विशेषणज्ञानमपि तथा, गौरवात्। गौरयमिति विशिष्टज्ञाने युगपद्विशेष्ये विशेषणे सन्निकर्ष एव कारणं, न तु निर्विकल्पकं, मानाभावात्। विशिष्टज्ञानत्वमेव मानमिति चेत्? न, दृष्टान्ताभावात्, दण्डी पुरुष इत्यत्र विशेषणधीजन्यत्वानुपगमात्, विशिष्टवैशिष्ट्यज्ञानत्वात्। अपि च प्रमेयत्वेन व्याप्तिं परिच्छिन्दन् सर्वज्ञः स्यात्, तथा च परकीयज्ञानविषये घटत्वं न वेति संशयो न स्यात्, प्रमेयत्वेन तदन्यतरनिश्चयात्। प्रमेयत्वेन घटं जानात्येव, घटत्वं तस्य न जानातीति चेत्, न, तत्किं घटत्वं न प्रमेयं येन तन्न जानीयात्, सकलघटवृत्तिधर्मस्य प्रमेयत्वेन तदज्ञानासम्भवात्।

उच्यते– यदि सामान्यलक्षणा नास्ति तदाऽनुकूलतर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात्, प्रसिद्धधूमे वह्निसम्बन्धावगमात्, कालान्तरीयदेशान्तरीयधूमस्य मानाभावेनाज्ञानात्। सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते।

प्रसिद्धधूमे वह्निसम्बन्धावगमादिति। न च प्रसिद्धधूमेऽपि देशान्तरे व्यभिचारशङ्का स्यादिति वाच्यं, प्रसिद्धधूमे यावत्सत्त्वं देशान्तरेऽपि वह्निसम्बधावगमेऽप्यनुकूलतर्कादिविरहे धूमो वह्निव्यभिचारी न वेति संशयस्यानुभवसिद्धत्वादिति भावः।

यत्तु पाकादौ चिकीर्षा, सुखादाविच्छा न स्यात्, सिद्धे इच्छाविरहात्, असिद्धस्याज्ञानात्। तस्मात्सुखत्वादिना ज्ञातेषु सर्वेषु सिद्धं विहायासिद्धे इच्छा

ननु प्रसिद्धस्य ज्ञानं विना तद्धर्मिकसंशयानुपपत्त्या तज्ज्ञानार्थं सामान्यप्रत्यासत्तिरङ्गीक्रियते, संशयस्य धर्मिज्ञानसाध्यत्वात्। न चैतदस्ति। धर्मितावच्छेदकप्रकारकज्ञानस्यैव प्रसिद्धधर्मिविषयकस्याप्रसिद्धधर्मिविषयकसंशयहेतुत्वादिति तत्सिद्धान्तादिति चेत्?, न, तथापि धर्मीन्द्रियसन्निकर्षस्य प्रत्यक्षमात्रहेतुत्वेन संशयस्य च प्रत्यक्षतया विशेष्यसन्निकर्षस्यापेक्षणीयतया, अस्य चाभावेन सामान्यरूपस्यैव सम्बन्धस्य तथात्वाभ्युपगमात्, धर्मिज्ञानसंशयहेतुत्वस्य च व्यवस्थापितत्वाच्च।

अत्र **यज्ञपत्युपाध्यायाः**- यदि धूमत्वेन व्याप्तिग्रहस्तदा तादृशसंशयोऽसिद्ध एव, समानप्रकारकनिश्चयस्यैव संशयविरोधित्वात्। यदि च तत्तद्धूमत्वेन व्याप्तिग्रहस्तदा धूमत्वेन संशयो नानुपपन्नः, तत्प्रकारकविरोधिनिश्चयाभावात्। किञ्च यदि सामान्यप्रत्यासत्त्या प्रसिद्धाप्रसिद्धसकलधूमोपस्थितावेवाप्रसिद्धधूमे विशेषादर्शने धूमो वह्निव्यभिचारी न वेत्याकारः संशयस्तदा यदिन्धनखण्डप्रभवो धूमोऽप्रसिद्धो वस्तुगत्या नास्त्येव प्रसिद्धे च तत्प्रभवधूमे वह्निसम्बन्ध एवावगतस्तदिन्धनखण्डप्रभवधूमगोचर एतदिन्धनप्रभवो धूमो वह्निव्यभिचारी न वेति संशयो न स्यात्, प्रसिद्धे तत्र विशेषदर्शनात्, अप्रसिद्धस्य चासत्त्वेन तदिन्धनखण्डप्रभवधूमत्वरूपसामान्यप्रत्यासत्त्याप्यनुपस्थितेः। न चासावसिद्ध एव, अनुकूलतर्कादिविरहदशायां धूमो वह्निव्यभिचारी न वेति संशयवत्तस्यापि सर्वानुभवसिद्धत्वात्। अथ कथञ्चित्तत्रैव तदिन्धनप्रभवधूमत्वं वह्निव्यभिचारिवृत्ति न वेत्यादिसंशयाहितस्तादृशसंशय इति मतं,तर्हि धूमेऽपि धूमत्वं वह्निव्यभिचारिवृत्ति न वेत्यादिसंशयाहित एव तादृशः संशयोस्तु, किं तदर्थमक्लृप्तया सामान्यलक्षणया प्रत्यासत्त्या?। ननु सामान्यलक्षणां विना यथोक्तसंशयस्याप्यनुपपत्तिः। तथाहि वह्निव्यभिचारित्वेनोपस्थितासु घटादिव्यक्तिषु धूमत्वव्यतिरेकनिश्चयेन धूमत्वे तद्वृत्ति[त्व] संशयाभावात्। वह्निव्यभिचारित्वरूपसामान्यप्रत्यासत्त्यैव विशेषदर्शनग्रस्तव्यक्त्यतिरिक्तव्यक्त्युपस्थितिर्वाच्येति चेत्? न, वह्निव्यभिचारित्वेनोपस्थितेषु घटादिष्ववश्यं धूमत्वव्यतिरेकनिश्चय इत्यत्र मानाभावात्। किञ्च येन रूपेण घटादौ तद्बाधस्तेन रूपेण तत्र संशयो मास्तु, वह्निव्यभिचारित्वेन रूपेण तत्रैव घटादौ तत्सद्भावे बाधकाभावात्, उच्यमानानुमानेनान्यथासिद्धेश्च। न च तदिन्धनखण्डप्रभवधूमस्याप्रसिद्धस्य विषयस्यैवाभावात् तत्र संशयो न भवतीत्येव, प्रकृते चाप्रसिद्धधूमस्य सत्त्वात्

भवतीत्यभ्युपेयम्। तन्न, असिद्धस्याज्ञानेऽपि सिद्धगोचरज्ञानादेवेच्छाप्रवृत्ति-स्वाभाव्यादसिद्धे तयोरुत्पत्तेः। न चातिप्रसङ्गः, समानप्रकारकत्वेन ज्ञानेच्छाकृतीनां

संशयेन भाव्यमिति वाच्यम्, उक्तसंशयाहितस्यौचित्यावर्जितस्य संशयस्य प्रसिद्ध-विषयस्यापि सम्भवात्। तस्मादिदं चिन्त्यमित्याहुः।

नवीनास्तु सामान्यलक्षणास्वीकर्त्राऽप्यनुमानप्रामाण्यमवश्यमङ्गीकार्यम्। एवञ्चानुमानादेव कालान्तरदेशान्तरीयधूमोपस्थितिसम्भवे किमनया प्रत्यासत्त्या?। न च तदवतारस्य व्याप्त्यादिस्मृतिविलम्बेन विलम्बितत्वमिति वाच्यं, व्युत्पन्नस्य तदवतारे विलम्बाभावात्। अव्युत्पन्नस्य तदनवतारदशायामपि व्यभिचारसंशय इत्यत्र मानाभावात्। तथा च क्वचित् कोटिस्मरणादिविरहेणासम्भवेऽपि यत्र तत्सम्भवस्तत्र प्रसिद्धे विशेषदर्शनादप्रसिद्धज्ञानजनकं किञ्चित्कल्पनीयम्। तच्चावश्यकल्पनीयत्वेनानुमानमेव कल्प्यते, न तु सामान्यलक्षणाप्रत्यासत्तिः[१], अक्लृप्तत्वात्। न च तदकल्पने पक्षवृत्तिलिङ्गे व्याप्त्यग्रहात् परामर्शाभावेनानुमानमपि न स्यादिति वाच्यं, व्याप्यतावच्छेदकप्रकारकज्ञानस्यैवानुमितिहेतुत्वमिति परसिद्धान्तात्। अत एव तदकल्पने पक्षीयसाध्यज्ञानाभावेन विशेषणज्ञानाभावान्नानुमितिरिति परास्तम्। विशिष्टवैशिष्ट्यावगाहिज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्यैव हेतुत्वमिति परसिद्धान्तात्। नन्वेवमनागतधूमज्ञानार्थं तदनभ्युपगमेऽप्यनागतगोचरप्रत्यासत्त्यर्थं सामान्यप्रत्यासत्तिस्वीकार आवश्यकः, संशयेऽप्यनागतविशेष्यके विशेष्यप्रत्यासत्ति-जन्यत्वस्य स्वीकरणीयत्वादिति चेत्? न, संशयस्य मानसत्वेनाप्युपपत्तेः प्रत्यासत्त्यर्थं तदकल्पनात्। अतीन्द्रियविशेष्यकसंशयवत् चक्षुरन्वयाद्यनुविधानस्य सहचारादिसाधारणधर्मदर्शनोपक्षीणत्वात्। अन्यत्र बाधकाभावेन तस्य चाक्षुषत्वात्। अत एव व्यभिचारशङ्कोपपादकतयैवानुमान**माचार्यचरणैः कुसुमाञ्जलौ ''शङ्काचेदनुमास्त्येव''** इत्यनेन प्रसाधितमिति व्यभिचारसंशयानुरोधेन सामान्य-लक्षणासिद्धिरित्याहुः।

केचित्तु धूमत्वावच्छिन्ना व्याप्तिः सकलधूमनिष्ठैव न तु सन्निकृष्टधूममात्रनिष्ठा। अत एव यत्र क्वचन धूमदर्शनमात्रादेवानुमित्युत्पत्तिः। तथा च सम्बन्धविशेष-रूपायास्तस्याः सम्बन्धिभूतसकलधूमनिरूपित्वाद् विना ज्ञानमशक्यमिति तदर्थं सामान्यलक्षणाप्रत्यासत्तिस्वीकार इत्याहुः। तन्न, सकलसम्बन्ध्युपस्थितिं विनाप्येकत्रापि सम्बन्धिन्येकनिष्ठसम्बन्धस्य भानसम्भवात्। कथमन्यथैकस्मिन्नपि कपाले गृह्यमाणे

---

१. 'सत्तेरक्लृप्त...' इति पाठो मातृकायाम्

कार्यकारणभावात् न तु समानविषयकत्वेनापि क्वचिदप्यकल्पनात्, समानविषयकत्वे सत्यपि समानप्रकारकज्ञानाभावेनेच्छाकृत्योरभावात्, तस्यावश्यकत्वेन गौरवाच्चेति

घटसमवायग्रहः। सकलधूमनिष्ठसामान्यव्याप्तेरपि स्मृताया एकस्मिन्नेव पक्षधर्मधूमे तृतीयलिङ्गपरामर्शादिना ग्रहस्वीकाराच्च। ननु बाष्पधूमभ्रमानन्तरं धूमत्वेन व्याप्तिग्रहे कथं धूमत्वस्य प्रत्यासत्तित्वं, पुरोवर्तिनि तस्य [अ] सत्त्वादिति चेत्? न, वैज्ञानिकसम्बन्धेन पुरोवर्तिन्यपि तस्य सत्त्वादिति।

नवीनास्तु वह्निमानित्यनुमितेर्विशेषणज्ञानजन्यत्वानुमानादेव सामान्यप्रत्यासत्तिसिद्धिः। न च दृष्टान्तासिद्धिः, तथा सति तत एव गौरिति विशिष्टज्ञानेऽपि विशेषणज्ञानजन्यत्वानुमितिविरहे निर्विकल्पकासिद्धिप्रसङ्गात्। यदि च साध्यप्रसिद्धिपदार्थोपस्थित्यादेरनुमित्यादौ विशेषणज्ञानत्वेन हेतुत्वं यद्विशेषयोरिति न्यायेन विशिष्टज्ञानमात्रे विशेषणज्ञानत्वेन हेतुत्वे बाधकाभावादिति तत्सिद्धिरिति मन्यसे, तदा प्रकृतेऽपि तुल्यम्। यद्यपि परस्य निर्विकल्पकासिद्धिरिष्टैव, तथापि तत्साधकयुक्तिं परोऽप्यङ्गीकारयितव्य इति स्वमतावष्टम्भेनेदमुक्तम्। न चानुमानादेव विशेषणज्ञानमस्त्विति वाच्यम्, अनवस्थानात्। तस्मात् तत्र क्लृप्ता सामान्यप्रत्यासत्तिर्व्याप्त्यादिकमपि ग्राहयतीत्याहुः, तन्न, वह्निमानित्यनुमितेर्विशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन विशेषणतावच्छेदकप्रकारकज्ञानसाध्यत्वमिति तदभ्युपगमात्। तत्प्रकारकज्ञानस्य च प्रसिद्ध एव धर्मिणि सम्भवात्। विशेषणज्ञानस्य क्वचिदनुमानात् क्वचिच्छब्दाच्चोपपत्तेर्नानवस्थापीति दिक्।

यत्तु **उपाध्यायाः** पाकादाविच्छानुरोधेन सामान्यलक्षणा स्वीकरणीया सामानप्रकारकत्वमात्रेण ज्ञानेच्छयोः कार्यकारणभावेषु घटत्वप्रकारकज्ञानात् तत्प्रकारिकैवेच्छा भ्रमादावपि स्यादिति समानविषयकत्वस्यापि कारणत्वप्रयोजकत्वात्। न च जनकज्ञानप्रकारीभूतधर्माश्रये तत्र तत्प्रकारिकेच्छा, रजतभ्रमाद् रजतेच्छानुदयापत्तेः, तस्य तत्प्रकारानाश्रयत्वात्। न च परस्य तत्रेष्टापत्तिः, शुक्तौ रजतार्थिप्रवृत्त्यनुरोधेन तेनापि तदङ्गीकारात्। न च तत्रेदं ज्ञानमेव प्रवर्तकमन्वयव्यतिरेकाभ्यां तस्यापि तद्धेतुत्वोपगमात्। ननु समानविषयत्वेनापि तस्य तत्कारणत्वं परमते तत्र शुक्तौ सा न स्यात्। तज्ज्ञानस्य समानप्रकारकतया न जनकत्वमिति चेत्? तर्हि भ्रमोऽन्यथाख्यातिरूप एवानन्यगतितया तेन स्वीकरणीय इत्यभीष्टमेवास्माकम्। यदि चेदन्त्वेनाज्ञातायामेव शुक्तावुपस्थितरजतभेदाग्रहादेव सा तत्र भवतीति परेणान्यथाख्यातिः स्वीकरणीया, तदापि ज्ञात एव विषय इष्टभेदाग्रहादपीच्छेति तेनाभ्युपेयम्। अन्यथातिप्रसङ्गात्। तथा च भाविनि सुखादौ ज्ञात एवेच्छाद्यादि

परसिद्धान्तात्। न च सर्वज्ञत्वे संशयो न स्यादिति दोषः, घटः स इति घटत्वप्रकारकं हि ज्ञानं संशयविरोधि, तच्च न वृत्तं, स्वसामग्रीविरहात्। अतो घटत्वादिसकलविशेषज्ञानेऽपि स घटो न वेति संशय इति।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ सामान्यलक्षणाप्रकरणं समाप्तम्

तज्ज्ञानार्थं सामान्यप्रत्यासत्ति[स्ते]नाकामेनापि स्वीकरणीया। वस्तुतस्तु लाघवेनेष्टाभेद-ग्रहस्यैवेच्छाजनकत्वमित्यन्यथाख्यातिसाधनावसर एवोक्तप्रायम्। तस्मादन्यत्रापि ज्ञानस्य समानविषयत्वेनेच्छाजनकत्वादनागतसुखादिज्ञानार्थमवश्यं सामान्यलक्षणाप्रत्यासत्तिः कल्पनीयेत्याहुः। तदपि चिन्त्यम्। अस्तु तावत् ज्ञानस्य समानविषयत्वेनापीच्छाजनकत्वम्। तथाप्यनागतविषयकज्ञानस्यानुमानेनाप्युपपत्तेः। तदर्थं सामान्यप्रत्यासत्तेः कल्पयि-तुमनुचितत्वात्, क्लृप्तकारणादेवोपपत्तावक्लृप्तकारणानवकाशात्। न च लिङ्गप्रतिसन्धानं विनापि तद्दर्शनादिदमयुक्तमिति वाच्यम्, असिद्धेः। सिद्धौ वा पूर्वकालोत्पन्ना-नागतसुखादिगोचरानुमित्यादिजनितसंस्कारस्मृत्यैवोपपत्तेरिति संक्षेपः।

मिश्रास्तु - सामान्यलक्षणां विनाऽन्धकारप्रत्ययानुदयप्रसङ्गः, यावत्तेजोविरहरूपस्य तस्य यावत्तेजोग्रहाधीनग्रहत्वात्। न च सामान्यलक्षणां विना यावत्तेजोव्यक्तिभानम्। न च प्रतियोगिज्ञानं विनाऽभावधीरस्तीति सामान्यलक्षणया यावत्तेजोव्यक्ति-भानमित्याहुः। तदपि चिन्त्यं, न हि प्रतियोगिज्ञानमात्रमभावधीहेतुः। किन्तु प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानम्। तादृशञ्च ज्ञानं सामान्यलक्षणयापि दुर्लभमेव, तत्तत्तेजस्त्वस्य तयाप्यनुपस्थितेः।

वस्तुतस्तूद्भूतरूपयावत्तेजःसंसर्गाभावो नान्धकारः, उक्तबाधकेनान्ध-कारप्रतीत्यनापत्तेः। किन्तूद्भूतरूपतेजस्त्वावच्छिन्नसामान्याभावः। अत एव अन्धकार इत्येकत्वोल्लेखिनी धीः सङ्गच्छते। तद्ग्रहश्च सामान्येन यत्किञ्चित्प्रतियोग्युपस्थितावधिकरणे च तदवच्छिन्नप्रतियोग्यनुपलब्धौ सकलोपस्थितिं विनापि स्यादेव। न तु विशेषणग्रहवत्[१] प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानं तत्प्रकारकाभावधीकारणं, व्यभिचारात्। तथा हि घटप्रतियोगिको ध्वंसो यथा घटस्य तथा तत्प्रागभावस्यापि ध्वंसः। तेन यत्र घटध्वंसस्तेन गृह्यते तदा तत्प्रागप्रतियोगिकस्यैव तस्य ज्ञानं न तु तत्प्रागभावस्य तत्प्रतियोगितावच्छेदकस्य ज्ञानमिति। किन्त्वभाव-प्रतीतिविषयधर्मावच्छिन्नप्रतियोगिज्ञानम्। प्रकृते च तेजोऽभाव इति प्रतीतौ तेजस्त्वमेव तथेति नोक्त दोष इति चेत्? मैवं, तत्प्रकारकाभावप्रतीतौ तत्त्वेन ज्ञानं कारणम्। तत्प्रागभावध्वंसत्वेन तद्ध्वंसप्रतीतौ तदस्त्येव।

१. 'विशेषणग्रहणत्व...' इति पाठो मातृकायाम्

यत्तु किञ्चित्वमभावप्रतीतिविषय इति, तन्न, अन्योन्याश्रयात्। अभावप्रतीतौ सत्यामभावप्रतीतिविषयधर्मावच्छिन्नप्रतियोगिज्ञानं, तज्ज्ञाने च तत्प्रतीतिरिति। किञ्चैतावताऽपि न सामान्यलक्षणास्वीकारावश्यम्भावः। यतो हि[ह्य-] भावप्रतीतिविषयधर्मावच्छिन्नप्रतियोगिज्ञानस्य सामान्याभावादिग्राहकतया क्वचिदेव तेजोव्यक्तौ तथाज्ञानसम्भवात्। तच्च ज्ञानं सामान्यलक्षणां विनापि स्यादेवेत्युक्तमिति।

वयं तु पश्यामः - घटत्वं घटत्वत्ववत्, अत्र घटत्वमिति वा घटत्वविशेष्यकं घटत्वत्वविशेषणकं ज्ञानं तावज्जायते। तत्र च घट[त्व]त्वं घटेतरावृत्तित्वे सति सकलघटवृत्तित्वं, तच्च सकलघटाप्रतीतौ दुर्ग्रहमिति सामान्यलक्षणया घटोपस्थितिर्वाच्या। न च विशिष्टज्ञाने विशेषणज्ञानजन्यत्वस्य परैरनङ्गीकारात् कथं तन्मते तदुपस्थित्यर्थं सामान्यलक्षणेति वाच्यम्, अस्तु वा तावदेवम्। तथापि विशेषणतावच्छेदकप्रकारोपस्थित्यर्थमेव तदङ्गीकारात्। न ह्युपधेयाप्रतीतावुपाधेः प्रतीतिरिति दिक्॥

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां सामान्यलक्षणाप्रकरणं समाप्तम्

---

१. तथा च यत्किञ्चित्प्रतियोगिव्यक्तिरेवाभावप्रतीतिविषय इत्यर्थः। 'किन्त्वभाव' इति पाठो मातृकायाम्।

।। उपाधिप्रकरणम् ।।

उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्युपाधिर्निरूप्यते। तत्रोपाधिः - साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः। अनौपाधिकत्वज्ञानञ्च न व्याप्तिज्ञाने हेतुः, अतो व्यापकत्वादिज्ञाने नान्योन्याश्रयः।

यद्वा व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं, तत्प्रतियोगित्वञ्चाव्यापकत्वम्। प्रतियोगित्वञ्च तदधिकरणानधिकरणत्वमिति वदन्ति, तन्न साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः। न च तयोरनुपाधित्वं, दूषकताबीजसाम्यात्। मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य, प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्य उद्भूतरूपवत्त्वस्य च शास्त्रे प्रयोजकत्वेनोपाधित्वस्वीकाराच्चेति, पक्षेतरेऽतिव्याप्तिश्च। न च व्यतिरेके पर्वतेतरान्यत्वादित्यत्रेतरान्यत्वस्यासिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः, बाधोन्नीतस्याप्यनुपाधितापत्तेः। न चेष्टापत्तिः, इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्त्यग्रहेण तत्सार्थक्यात्। वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत्? अस्तु तथा, तथापि पक्षातिरिक्ते साध्यव्यापकताग्रहादुपाधेर्दूषकत्वं, तच्च तत्राप्यस्ति, अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत।

उपाधिज्ञानादिति। तथा चोपोद्घातसङ्गत्या निरूपणमिति ध्येयम्। सोपाधौ वास्तवतत्त्वाभावादभिमतपदम्। ननु व्यापकत्वं व्याप्तिनिरूपकत्वम्। तथा चान्योन्याश्रय इत्यत आह **अनौपाधिकत्वज्ञानञ्चेति।** यद्यपि भिन्नव्याप्तिसत्त्वान्नान्योन्याश्रयस्तथाप्यनवस्थायां तात्पर्यमिति भावः।

नन्वनौपाधिकत्वं लक्षणमुक्तम्। तथा चेतरभिन्नत्वेन तज्ज्ञानं तज्ज्ञानहेतुकमेव, अन्यथा लक्षणत्वासिद्धेरित्यस्वरसादाह **यद्वेति। तद्वदिति।** अत्राप्यन्ताभावे प्रतियोग्यसमानाधिकरणत्वं विशेषणम्, अन्यथा संयोगस्य द्रव्यव्यापकता न स्यादिति ध्येयम्। **पक्षेतरेति।** पक्ष इतरो यस्मादिति बहुव्रीहिणा पक्षेतरपदं तद्धर्मपरम्। पक्षमितरयतीति कृत्प्रत्ययान्तं वा तद्धर्मपरम्। बाधोन्नीतपक्षेतर इत्यर्थः। पक्षातिरिक्ते साध्यव्यापकत्वाभिप्रायेणेति बोद्धव्यम्।

साधनपक्षधर्मावच्छिन्नेति। ननु साधनमपि पक्षधर्म एवेति कथं द्वैविध्यमिति चेत्? न, प्रागभावो विनाशी जन्यत्वादित्यत्र भावत्वोपोधेः साधनावच्छिन्नसाध्यव्यापकत्वात्, तस्मिन् पक्षे भावत्वस्य पक्षधर्मावच्छिन्नसाध्यव्यापकत्वासम्भवात्। वायुः प्रत्यक्षः

विपक्षाव्यावर्तकविशेषणशून्यत्वं विशेषणं तेन बाधोन्नीतपक्षेतरस्य परिग्रहः, तत्र पक्षस्यैव विपक्षत्वात्, न तु पर्वतेतरत्वादेरिति चेत्? न, न हि वस्तु विपक्षाव्यावर्तकविशेषणशून्यं, सर्वत्र प्रमेयत्वादेः सत्त्वात्। तत्रोपात्तेति विशेषणे सिद्ध्यसिद्धिव्याघातः। तथापि च साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र स्त इति तद्व्यावृत्त्या पक्षे साध्यव्यावृत्तिरतो हेतोर्व्यभिचार एव, व्यभिचारे चावश्यमुपाधिरिति पक्षेतर एव तत्रोपाधिः स्यात् तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थं विशेषणम्। अत एवानुमानमात्रोच्छेदकतया जातित्वान्न पक्षेतर उपाधिरित्यपास्तं दूषणसमर्थत्वेन जातित्वाभावात्। एतेन पक्षेतरव्यावृत्त्यर्थं प्रकारान्तरमपि निरस्तम्, उपाधित्वाभावेऽपि दूषणसमर्थत्वात्।

अथोपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापकतया दूषणं पक्षेतरत्वव्यतिरेकश्च न साध्याभावसाधकोऽसाधारणत्वात्, न तु व्यभिचारोन्नायकतया दूषणम्। यथा हि साध्यव्यापकोपाध्यव्याप्यतया हेतोः साध्याव्याप्यत्वं तथा साध्यव्याप्यहेत्वव्यापकतयोपाधेर्न साध्यव्यापकत्वमपि सिध्येद् व्याप्तिग्राहकस्योभयत्रापि साम्येन विनिगमकविरहात्। तस्माद्यथा साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा साध्यव्यापकोपाधिव्यावृत्त्या साध्याभावोऽपि साधनीयो व्याप्तिग्रहतौल्यादिति दूषकताबीजम्। सोऽयं सत्प्रतिपक्ष एवेति चेत्? मैवम्, एवं हि सत्प्रतिपक्षे उपाध्युद्भावनं न स्यात् सत्प्रतिपक्षान्तरवत्। किञ्चैवं बाधोन्नीतोऽपि पक्षेतरो नोपाधिः स्यात् व्यतिरेकेऽसाधारण्यात्। ननु बाधे नोपाधिनियमः, धूमेन ह्रदे वह्निसाधने तदभावात्। न तु हेतुमति पक्षे बाधे पक्षेतरोपाधिनियमः, प्रत्यक्षे वह्नौ कृतकत्वेनानुष्णत्वे साध्येऽतेजस्त्वादेरूपाधित्वसम्भवादिति चेत्? न,

प्रमेयत्वादित्यत्र उद्भूतरूपवत्त्वादेः पक्षधर्मावच्छिन्नसाध्यव्यापकत्वात्। तस्य तत्साधनावच्छिन्नसाध्यव्यापकत्वासम्भवात्। उभयरूपज्ञानस्य प्रतिबन्धकत्वाद्द्वैविध्याभिधानं, न तु वास्तवं द्वैविध्यमित्यप्याहुः।

नन्वन्यतरबाधप्राप्तावनेकबाधकल्पने गौरवमेकबाधकल्पने लाघवम्। अत एव मरणकल्पने प्रमाणद्वयबाधा स्यादिति बहिःसत्त्वमेव कल्प्यत इत्यर्थापत्तौ वक्ष्यति। तथा च विनिगमकप्रवृत्त्यर्थं सत्प्रतिपक्षेऽपि सत्प्रतिपक्षोद्भावनमुचितमेवेत्यपरितोषादाह **किञ्चेति।**

तेजोमात्रपक्षत्वेऽतेजस्त्वं विनान्यस्योपाधेरभावात्। किञ्च पर्वतावयववृत्त्यन्यत्वं, पर्वतेतरद्रव्यत्वं, ह्रदपर्वतसंयोगानाधारत्वं, ह्रदपर्वतान्यत्वादिकमुपाधिः स्यादेव, व्यतिरेकेऽसाधारण्याभावाद् व्यतिरेकिणा सत्प्रतिपक्षसम्भवाच्च। न चासाधारण्यं, तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वात्। तस्मादुभयोरपि व्याप्तिग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चयः, किन्तूभयत्र व्यभिचारसंशयः, तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वं, तच्च पक्षेतरेऽप्यस्ति। तदुक्तमुपाधेरेव व्यभिचारशङ्केति। भवतु वोक्तन्यायेन सकलानुमानभङ्गभिया पक्षेतरोऽनुपाधिः, तथापि लक्षणमतिव्यापकम्। नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वं, दूषकताबीजस्य व्यभिचारोन्नयनस्य सत्प्रतिपक्षस्य वा साम्येन विषमव्याप्तस्याप्युपाधित्वात् तथा दूषकतायां साध्य-व्याप्यत्वस्याप्रयोजकत्वाच्च। अथ साध्यप्रयोजको धर्म उपाधिः। प्रयोजकत्वञ्च न न्यूनाधिकदेशवृत्तेः, तस्मिन् सत्यभवतस्तेन विनापि भवतस्तदप्रयोकजत्वात्, अन्यथा पक्षेतरस्याप्युपाधित्वप्रसङ्ग इति चेत्? न, दूषणौपयिकं हि प्रयोजकत्वमिह विवक्षितं, तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति तदेव प्रयोजकं न त्वधिकं, व्यर्थत्वात्। ननूपाधिः स उच्यते यद्धर्मोऽन्यत्र प्रतिबिम्बते, यथा जपाकुसुमं स्फटिकलौहित्य उपाधिः। तथा चोपाधिवृत्तिव्याप्यत्वं हेतुत्वाभिमते चकास्ति तेनासावुपाधिः। न च व्याप्यत्वमात्रेणादूषकत्वमिति साध्यव्यापकतापीष्यते। तथा च समव्याप्त एवोपाधिरिति चेत्? तत् किं विषमव्याप्तस्य दूषकताबीजाभावान्नोपाधिशब्दवाच्यत्वं? तथात्वेऽप्युपाधिपदप्रवृत्ति-निमित्ताभावाद्वा? नाद्यः, तस्यापि व्यभिचाराद्युन्नायकत्वात्। नापरः, न हि लोके समव्याप्त एवान्यत्र स्वधर्मप्रतिबिम्बजनक एवोपाधिपदप्रयोगः, लाभाद्युपाधिना कृतमित्यादौ लाभादावप्युपाधिपदप्रयोगात्। किञ्च न शास्त्रे लौकिकव्यवहारार्थ-मुपाधिपदव्युत्पादनं किन्त्वनुमानदूषणार्थम्। तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्रमिति शास्त्रे तथैवोपाधिपदप्रयोगः।

अन्ये तु यदभावो व्यभिचारविरोधी स उपाधिः। न च विषमव्याप्तस्याभावो व्यभिचारं विरुणद्धि, तस्याभावेऽपि व्यभिचारात्। अस्ति ह्यनित्यत्वव्यापकं प्रमेयत्वं

समव्याप्तस्योपाधित्वमुपपादयितुं कस्यचिन्मतमाह **अन्येत्विति। यदभाव इति।** यस्य साध्यव्यापकस्य साधनाव्यापकतयाऽभावः साधनव्यापकत्वमिति

तद्व्याप्यञ्च गुणत्वम्। न चानित्यत्वगुणत्वयोर्व्याप्तिरस्ति। समव्याप्तिकस्य च व्यतिरेकस्तथा, न हि साध्यव्यापकव्याप्यीभूतस्य व्याप्यं यत्तत् साध्यं व्यभिचरति। व्यभिचारे चान्ततः साध्यमेवोपाधिः, अभेदेऽपि व्याप्यव्यापकत्वात् साधनाव्यापकत्वाच्चेति स्वीचक्रुः। तन्न, तवापि ह्यव्यभिचारे साध्यव्याप्यव्याप्यत्वं तन्त्रम्, आवश्यकत्वाल्लाघवाच्च, न साध्यव्यापकव्याप्यत्वमपि भवतैव व्यभिचारस्य दर्शितत्वात्। न च साध्यव्याप्यव्याप्यत्वमेवानौपाधिकत्वं, साध्यव्याप्यमित्यत्रापि ह्यनौपाधिकत्वं तदेव वाच्यं, तथा चानवस्थेति। अनौपाधिकत्वे च व्याप्तिलक्षणे यावदितिपदं साध्यव्यापके विशेषणं दत्तमेव।

यावत्। तदपि प्रसञ्जितं बोद्धव्यं व्यधिकरणधर्मावच्छिन्नं वा। अन्यथाऽसम्भवात्, उपाधेः साधनाव्यापकत्वात्। तथा च यदीयेन प्रसञ्जितेन साधनव्यापकत्वेन हेतुसाध्ययोः व्यभिचाराभाव आपादयितुं शक्यते स साधनव्यापकस्तत्र हेतावुपाधिरित्यर्थः। एतादृशश्च समव्याप्त एव, तस्य साध्यव्यापकतया तद्व्याप्यत्वहेतोः साध्यव्यभिचाराभावनियमात्। व्याप्यव्याप्यस्य सुतरां व्याप्यत्वनियमात्। ननु ध्वंसो विनाशी जन्यत्वादित्यत्र विषमव्याप्ते भावत्वोपाधावतिव्याप्तिः। जन्यत्वं यदि भावत्वव्याप्यं स्याद् विनाशित्वव्यभिचारि न स्यादित्यापादनसम्भवात्। जन्यभावस्यैव नाश्यतावच्छेदकत्वादिति चेत्? न, यद्व्याप्यत्वं सर्वसाधने साध्यव्यभिचारा-भावमापादयति तत्त्वस्य विवक्षितत्वात्। भावत्वव्याप्यत्वञ्च प्रमेयत्वादौ प्रसञ्जितं न तमापादयति, प्रमेयत्वस्य भावत्वव्याप्यत्वेऽपि विनाशित्वव्यभिचारे विरोधाभावादिति।

ननु सर्वत्र समव्याप्तस्यासम्भवाद् व्यभिचारे चावश्यमुपाधिरित्यपि भग्नमित्यत आह **व्यभिचारे चान्ततः साध्यमेवेति।** वस्तुतः साध्यसमनियतमनेकं तथा भवतीति ध्येयम्। एवमपि साध्यव्यापकत्वस्योपाधौ व्यर्थत्वात्समव्याप्तस्यैवोपाधि-त्वमिति भग्नमेवेत्याह **तवापीति।** न चेष्टापत्तिरित्याह **न चेति। तथा चेति।** साध्यव्यापकत्वनिश्चयस्य व्याप्तिलक्षणीभूतानौपाधिकत्वज्ञानाधीनत्वादिति भावः। एतच्चानौपाधिकत्वज्ञानं व्याप्तिधीकारणमिति मतमालम्ब्योक्तमिति ध्येयम्। तत्किं साध्यव्यापकव्याप्यत्वमेवानौपाधिकत्वं? तथा च न तद्व्याप्तिलक्षणं स्यात्, व्यभिचारिसाधारण्यादित्यत आह **अनौपाधिके(कत्वे) चेति।** तथा च यावत्साध्यव्यापकव्याप्यत्वं तत्त्वम्। तच्च नातिव्याप्तमिति भावः।

किञ्च यस्मिन् सत्यनुमितिर्न भवति तदेव तत्र दूषणं न तु यद्व्यतिरेके भवत्येवेत्येतद्गर्भं, विरुद्धत्वादेरप्यदोषत्वापत्तेः। नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं, साधनावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात्। शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वस्योपाधित्वापत्तेश्च, शब्दधर्मगुणत्वावच्छिन्नाभिधेयत्वं यत्र रूपादौ तत्राश्रावणत्वं व्यापकं, पक्षे प्रमेयत्वस्य साधनस्याव्यापकं हि तत्। आर्द्रेन्धनवत्त्वादावुपाधौ पक्षनियततादृशधर्माभावाच्च।

अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः, तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः, श्यामत्वे शाकपाकजत्वमुपाधिरिति, तन्न, पक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात्, जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नसाध्यव्यापकपृथिवीत्वस्योपाधित्वप्रसङ्गात्, सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वे साधनावच्छिन्नेत्यस्य व्यर्थत्वप्रसङ्गाच्च। किञ्च पक्षद्वयेऽपि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा प्रसाध्य पश्चात् केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनीयः, तथा चार्थान्तरं, केवलसाध्ये हि विवादो न तु विशिष्टे।

अथ प्रकृतसाध्यव्यभिचारसिद्ध्यर्थं विशिष्टसाध्यव्यभिचारः साध्य इति चेत्? न, अप्राप्तकालत्वात्। प्रथमं साध्यव्यभिचार एवोद्भाव्यस्तत्रासद्धेतावुपाधिरिति चेत्? तर्हि प्रकृतानुमाने नोपाधिर्दूषणं स्यात्। किञ्च साध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचार एवोपन्यसनीयो नोपाधिः।

स्यादेतत्-पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। पर्यवसितं साध्यं पक्षधर्मताबललभ्यं, यथा शब्दोऽनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवान् मेयत्वादित्यत्र पर्यवसितं यत्साध्यमनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः। यदि च तथैव कृतकत्वमपि शब्दे साध्यते तदा अनित्यत्वमुपाधिः। तदुक्तं "वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः पर्यवसितं नियमयन्

साधनावच्छिन्नेति। प्रागभावो विनाशी जन्यत्वादित्यादौ भावत्वाद्युपाधावव्यापनादित्यर्थः। **पक्षधर्मेति**। वायुः प्रत्यक्षः प्रमेयत्वादित्यादावुद्भूतरूपवत्त्वाद्युपाधावव्यापनादित्यर्थः।

ननु व्यभिचारित्वस्याभावगर्भतयाऽखण्डाभावे न वैयर्थ्यमिति, अन्यथा साध्यसाधकव्यभिचारित्वादित्यत्रापि साध्यव्यभिचारित्वमात्रस्यैव व्याप्यतयोपाधिनाऽसाधकतासाधनं न स्यादित्यनुशयेनाह **किञ्चेति**।

दूषकताबीजसाम्राज्यात्'' इति।

अनेन पक्षधर्मसाधनावच्छिन्नसाध्यव्यापकोपाधिः सङ्गृह्यते तादृशसाध्यस्य पर्यवसितत्वादिति, तन्न, एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकमनित्यद्रव्यासमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र निःस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यात्, भवति हि नित्यद्रव्यसमवेतत्वं पर्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकञ्च। किञ्च पक्षधर्मताबललभ्यसाध्यसिद्धौ निष्फल उपाधिः। तदसिद्धौ च कस्य व्यापकः, न हि सोपाधौ पक्षधर्मताबलात् साध्यं सिध्यति यस्य व्यापक उपाधिः स्यादिति।।

।। इत्युपाधिपूर्वपक्षः ।।

जन्यमहत्त्वानधिकरणद्रव्यत्वादिति। घटे व्यभिचारवारणाय महत्त्वानधिकरणेति। तावन्मात्रञ्च घटरूपेऽनैकान्तिकमिति द्रव्यत्वेति। परमाण्वसिद्धिदशायां मनसोऽणुत्वासिद्धिदशायां, गगनादौ व्याप्तिग्रहार्थं जन्यपदम्। अखण्डाभावे च न वैयर्थ्यमिति ध्येयम्। व्यभिचारावारकस्यापि व्याप्तिग्रहौपयिकत्वादेव न वैयर्थ्यमित्यन्ये। जन्यमहत्त्वं महत्त्वान्तरजातिविशेष एवेति न वैयर्थ्यमित्यपरे। **निस्पर्शद्रव्येति।** अत्र द्रव्यपदं समव्याप्तिकोपाध्यभिप्रायेणेति बोध्यम्। न च यथाश्रुतसाध्ये स्पर्शवद्द्रव्यासमवेतत्वमुपाधिरिति वाच्यम्, अनुकूलतर्केण साधनस्य साध्यव्याप्यत्वग्रहे तदव्यापकतयोपाधेः साध्याव्यापकत्वादिति। अथवा इत एवास्वरसादाह **किञ्चेति।।**

।। इत्युपाधिपूर्वपक्षः ।।

।। उपाधिवादसिद्धान्तः ।।

अत्रोच्यते - यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः। लक्षणन्तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वम्।

कर्तव्योपाधिलक्षणस्य प्रथमं सङ्ग्राह्यमाह **[यद्व्यभिचारित्वेनेति।]** यद्व्यभिचारित्वेन लिङ्गेन यत्साधनस्य यत्साध्यव्यभिचारित्वं प्रमीयते तत्र साधने स उपाधिः। एवञ्च पक्षधर्माद्यवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारित्वेनापि विशेषणाव्यभिचारसहकारिवशात् शुद्धसाध्यव्यभिचारानुमितिजननात् शुद्धसाध्येऽपि स उपाधिः। इयानपरो भेदःविशिष्टव्यापको विशिष्टेऽविशिष्टे चोपाधिः, उभयव्यभिचारानुमापकव्यभिचारप्रतियोगित्वात्। शुद्धसाध्यव्यापकस्तु तत्रैव, तन्मात्र-व्यभिचारानुमापकत्वात्। एवञ्च यद्व्यभिचारित्वेन यत्रैव व्यभिचारप्रमितिस्तत्रैव स उपाधिरिति स्थिते व्यञ्जनवत्त्वं वह्नावुपाधिः स्यात्। गौः शुक्ला पशुत्वादित्यत्र सास्नावत्त्वं गोत्वावच्छिन्नशुक्लत्वव्यापकं शुक्लत्वमुपाधिः स्यादिति प्रसङ्गो नास्त्येव, तदुभयव्यभिचारेण तदुभयसाध्यव्यभिचाराननुमापनात्। गोत्वावच्छिन्न-शुक्लत्वमुपाधिः स्यादेव, तद्व्यभिचारानुमापकत्वात्। लक्षणं त्वित्यादिना वक्ष्यमाणस्य व्यभिचारप्रमापकतावच्छेदकरूपस्य व्यञ्जनवत्त्वादिष्वतिप्रसङ्गस्यादोषत्वात्। तस्यापि विशिष्टव्यभिचारप्रमापकव्यभिचारप्रतियोगित्वेन सामान्यतो व्यभिचार-प्रमापकतावच्छेदकरूपवत्त्वात्।

न चैवमनुमित्युपधानकाल एवोपाधित्वं स्यादिति वाच्यम्, अनुमिति-जनकतावच्छेदकावच्छिन्नस्यैव विवक्षितत्वात्। अवच्छेदकञ्च द्वयं तद्व्यापकव्यभिचारित्वं विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यापकव्यभिचारित्वम्। तच्चानुमित्यनु-पधानदशायामप्यस्तीत्यदोषात्। न चाकाशादिसाध्यके शब्दाश्रयत्वादिहेतौ घटादेरुपाधितापत्तिः, घटव्यभिचारित्वेनाकाशादिव्यभिचारित्वप्रमासम्भवादिति वाच्यं, घटव्यभिचारित्वं हि घटात्यन्ताभावसमानाधिकरणत्वम्। एवञ्च साधिकरणत्वमात्रस्यैव गमकत्वे शेषवैयर्थ्येनासमर्थविशेषणतयाऽतथात्वात्। यस्य साध्यसमानाधिकरणस्य व्यभिचारित्वेनेति विवक्षितत्वाद्वा।

यद्वा साध्यपदेन सिद्धियोग्यवचनेनातिप्रसङ्गवारणात्। न ह्यवृत्तित्वेन प्रमितस्याकाशस्य सिद्धियोग्यतास्ति, सिद्धिविरुद्धत्वेनोपस्थितेः। अवृत्तित्वाज्ञाने च घटव्यभिचारित्वादिना तद्व्यभिचाराननुमापनात्। यत्रैव तद्विशिष्टधीस्तन्निष्ठधर्म एव व्यभिचारस्फुरणात्। साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिव्यभिचारित्वेन यथा साध्यव्यभिचारित्वानुमितिस्तथाग्रे स्फुटमेवेति।

यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्यवसितं साध्यम्।

यद्धर्मेति। न तु पक्षधर्मताबललभ्यत्वं तत्। तथा च न पूर्वोक्तदोषावकाशः। ननु साध्यप्रसिद्ध्यवच्छेदकधर्मस्य यावत्त्वं विवक्षितं? यत्किञ्चित्त्वं वा? नाद्यः, वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वस्यानुपाधितापत्तेः, तस्य साध्यप्रसिद्ध्यवच्छेदकप्रमेयत्वावच्छिन्नप्रत्यक्षत्वाव्यापनात्। नान्त्यः, धूमेऽपि महानसत्वावच्छेदेन प्रसिद्धवह्निव्यापकव्यञ्जनवत्त्वादेरुपाधितापत्तेरिति चेत्?

अत्र **यज्ञपत्युपाध्यायाः** साध्यप्रसिद्ध्यवच्छेदको यत्किञ्चिद्धर्म एव विवक्षितः। न तु सर्वः, किन्तु साधनव्यापकीभूतः, विशेषणाव्यभिचारिणीत्याद्यग्रिमग्रन्थपर्यालोचनया तथैव लाभात्। व्यञ्जनवत्त्वञ्च न धूमव्यापकीभूतधर्मावच्छिन्नवह्निव्यापकमिति नोक्तदोषः। नन्वेवं प्रमेयत्वेन वायोर्बहिरिन्द्रियप्रत्यक्षत्वसाधने द्रव्यत्वावच्छिन्न-बहिरिन्द्रियप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वं, कोकिलादिसाधारणेन मित्रापुष्टत्वेन मित्रातनये श्यामत्वसाधने मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वञ्च नोपाधिः स्यात्। न च तयोः शुद्धसाध्यव्यभिचारानुन्नायकतयाऽनुपाधित्वमिष्टमेवेति वाच्यं, प्रमेयत्वं बहिरिन्द्रियप्रत्यक्षत्वव्यभिचारि द्रव्ये उद्भूतरूपव्यभिचारित्वात् द्रव्यत्ववत्, मित्रापुष्टत्वं श्यामत्वव्यभिचारि मित्रातनये नरे वा शाकपाकजत्वव्यभिचारित्वात्, अघटत्ववत्, इत्येवं तयोरपि शुद्धसाध्यव्यभिचारोन्नायकत्वादिति चेत्?, न, उक्तरीत्या तयोस्तत्र व्यभिचारोन्नायकत्वेऽप्यनुपाधित्वस्यैवेष्टत्वात्। अविशेषितेनैव यद्व्यभिचारित्वेन लिङ्गेन हेतोर्विशिष्टसाध्यव्यभिचारेऽपि साध्यमाने पक्षधर्मताबलात् केवलसाध्यव्यभिचारः सिध्यति, तस्यैव शुद्धसाध्यव्यापकस्योपाधित्वव्यवहारात्। न (स)च साधनव्यापकधर्मावच्छिन्नस्य साध्यव्यापक एव भवति। न चैवं तत्र व्यभिचारोऽपि न स्यात्, तस्योपाधिव्याप्यत्वादिति वाच्यं, न हि तत्रोपाधिरेव नास्तीति ब्रूमः। किन्त्वेतयोरनुपाधित्वं, प्रत्यक्षसामग्र्यादेः साधनव्यापकधर्मावच्छिन्न-साध्यव्यापकस्य तत्राप्युपाधित्वसम्भवादित्याहुः।

तच्चिन्त्यं, शुद्धसाध्यव्यभिचारोन्नयनस्य दूषकताबीजस्य सत्त्वे तयोरनुपाधित्वस्य ब्रह्मणापि वक्तुमशक्यत्वात्। निरुक्तलक्षणतावच्छेदकेन तयोः सङ्ग्रहाच्च। स्वयं लक्षणकरणासामर्थ्येनैतद्व्यावर्तनाय तत्र विशेषणान्तरप्रक्षेपस्यानुचितत्वात्। अन्यथा शुद्धसाध्यव्यापकमात्रसङ्ग्राहकं लक्ष्यतावच्छेदकमभिधाय साध्यव्यापकत्वे सति साधनाव्यापकत्वमित्युपाधिलक्षणकरणमतिसुकरमेव स्यात्। यदि च तदस्फुरणेऽपि पक्षधर्माद्यवच्छिन्नसाध्यव्यापकोपाधिस्फुरणे व्यभिचारोन्नयनेनानुमितिप्रतिबन्धात्त-स्योपाधित्वे तल्लक्षणाव्याप्तिरिति मन्यसे तदा साधनव्यापकधर्मावच्छिन्नप्रत्यक्ष-

सामग्र्याद्युपाध्यस्फुरण उक्तरीत्या व्यभिचारोन्नायकयोस्तयोः स्फुरणेऽप्यनुमिति-प्रतिबन्धात्तयोरप्युपाधित्व एतल्लक्षणाव्याप्तेरपि वज्रलेपत्वात्। विशेषणा-व्यभिचारिणीत्यादिकन्तु प्रकृताभिप्रायकम्। अन्यत्र तु प्रकारान्तरेणापि शुद्धसाध्य-व्यभिचारोन्नयनमिति ध्येयम्। ननूक्तरीत्यापि व्यभिचारोन्नायकस्योपाधित्वेन यदि सङ्ग्राह्यत्वं तदा तद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति तद्धर्मावच्छिन्नसाधनाव्यापकत्वं, यत्र साधनाव्यापकत्वं तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा, स्वानधिकरणी-भूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा लक्षणमस्तु।

अथैवं गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ तद्गन्ध-प्रागभावकालीनत्वावच्छिन्नसाध्यव्यापकं तद्गन्धप्रागभावकालीनत्वावच्छिन्नपृथिवी-त्ववति पक्षे साधनाव्यापकमेतत्कालीनरूपवत्त्वादिकमुपाधिः स्यात्। न चेष्टापत्तिः, अपसिद्धान्तादिति चेत्?, न, यद्धर्मवति साध्यव्यापकत्वं तद्धर्मवति साधना-व्यापकत्वमित्यर्थात्। उक्तोपाधिश्च न तथा, तद्धर्मवति पक्षे साध्याव्यापकत्वात्। न चैवं स श्यामः मित्रापुष्टत्वादित्यत्र नरत्वावच्छिन्नश्यामत्वव्यापकमित्रापुष्टत्वं (कं मित्रापुष्टे)हंसादौ साध्याव्यापकं (साधनाव्यापकं)शाकपाकजत्वमुपाधिर्न स्यात्, नरत्ववति साध्याव्यापकस्य (साध्यव्यापकस्य) तस्य तद्वति साधनाव्यापकत्वाभावात्, मित्रापुष्टस्य नरस्य सर्वस्यैव शाकपाकजत्वादिति वाच्यं, नरहंसान्यतरत्वादिकमादाय तत्राप्युक्तलक्षणसत्त्वात्। अत्र च वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ रूपत्वा-वच्छिन्नसाध्यव्यापकमुद्भूतत्वादिकमुपाधिः सङ्ग्राह्य एवेति न तत्रातिव्याप्तिः। प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि रूपे उद्भूतत्वव्यभिचारित्वाद् गुणत्ववदित्यादिक्रमेण तस्यापि शुद्धसाध्यव्यभिचारोन्नायकत्वात्। न चास्य स्वीकृतविविधोपाधिबहिर्भावापत्तिः, तस्योपलक्षणत्वात्, पक्षधर्मता(र्मा)वच्छिन्नसाध्यव्यापकमध्य एव वा प्रवेशात्, नापसिद्धान्तः, पक्षधर्मपदेन साधनसमानाधिकरणस्यैव धर्मस्य विवक्षिततत्वादिति चेत्?

अत्राहुः - घटः पृथिवी द्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नपृथिवीत्वव्यापकं पक्ष एव च साधनाव्यापकं घटावृत्तिगुणत्वमुपाधिः, तत्र चोक्तानि लक्षणानि न व्याप्तानि घटान्यत्ववति साध्यव्यापकस्य तस्य तद्वति साधनाव्यापकत्वाभावात्। पक्षे साधनाव्यापकस्य तस्य तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वाभावात्। स्वानधिकरणीभूत-साधनाधिकरणीभूतपक्षधर्मावच्छिन्नसाध्यव्यापकत्वाभावाच्च। न चायं शुद्धसाध्य-व्यभिचारानुन्नायकतया नोपाधिरिति वाच्यं, द्रव्यत्वं पृथिवीत्वव्यभिचारि द्रव्य-त्वभिन्नघटधर्मान्यत्वे सति घटावृत्तिगुणवत्त्वव्यभिचारित्वादित्यादिहेतोस्तत्सिद्धेः। अखण्डाभावे च न व्यर्थत्वशङ्केति ध्येयमिति।

स च धर्मः क्वचित् साधनमेव, क्वचिद् द्रव्यत्वादि, क्वचिन्महानसत्वादि। तथाहि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुट एव व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारनियमात्, साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव। यथा ध्वंसस्यानित्यत्वे साध्ये भावत्वस्य, वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च, विशेषणाव्यभिचारिणि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात्। अत एव नार्थान्तरं विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारः सिध्यन् विशेषसाध्याव्यभिचारमादायैव सिध्यति पक्षधर्मताबलात्। अन्यथा प्रतीतेरपर्यवसनात्। न च पक्षधर्मताबलात् प्रकृतसिद्धावर्थान्तरम्। यद्वा प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे

क्वचित्साधनमिति। ध्वंसो विनाशी जन्यत्वादित्यादौ भावत्वाद्युपाधावित्यर्थः। **क्वचिद् द्रव्यत्वादीति।** वायुः बहिरिन्द्रियप्रत्यक्षः प्रमेयत्वादित्यादौ रूपवत्त्वाद्युपाधावित्यर्थः। **क्वचिन्महानसत्वादीति।** अयं धूमवान् वह्निमत्त्वादित्यादौ व्यञ्जनवत्त्वाद्युपाधावित्यर्थः।

ननु विशेष्याभाव-विशिष्टाभावयोर्भेदेन, विशेष्यव्यभिचार-विशिष्टव्यभिचारयोरपि भेदात् पक्षधर्मताबलादपि विशिष्टव्यभिचार एव सिध्येत्, अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वनियमादित्याशयेनाह **यद्वेति।** साध्ये हेतौ च प्रत्यक्षपदं बहिरिन्द्रियप्रत्यक्षपरम्। तद्रूपत्वादौ व्यभिचारवारणाय सत्यन्तम्। द्रव्यत्वं [अ]व्यभिचारि व्यापकं यस्येत्यर्थः। न षष्ठीतत्पुरुषः। तथा सति सत्यन्तमात्रस्यैव व्याप्यत्वे शेषवैयर्थ्यापत्तेः। दृष्टान्तासिद्धिस्वरूपासिद्ध्योरापत्तेश्च। तद्घटत्वादौ व्यभिचारादाह - **द्रव्ये[त्यादि।]** अत्र यद्यपि प्रत्यक्षत्वव्यापकव्यभिचारित्वादित्यस्यैव गमकत्वे सत्यन्तं व्यर्थं स्यात् तथापि व्यभिचारस्याभावगर्भतया द्रव्यघटितप्रतियोगिकाखण्डाभावगर्भहेतौ न व्यर्थविशेषणत्वमिति भावः।

वस्तुतस्तु द्रव्यप्रत्यक्षत्वव्यापकपदमुद्भूतरूपवत्त्वाद्युपाधिपरमतो नोक्तदोषः। न चैवमप्यस्योपाधित्वेन साध्यव्यभिचारोन्नायकत्वं न सिध्येत्। तदाह (तदा हि तत्सिध्यति) यदि तस्य पर्यवसितसाध्यव्यापकत्वज्ञानं व्यभिचारानुमानप्रयोजकं भवतीति वाच्यं, विपक्षबाधकेन व्याप्तिग्रहौपयिकतया तत्प्रयोजनवत्त्वसम्भवात्।

सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वान्महत्त्ववत्, तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वाद् अघटत्ववत्। अव्यभिचारश्च तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वं, तच्चाभेदेऽपि।

यद्वा यः साधनव्यभिचारी साध्यव्यभिचारोन्नायकः स उपाधिः। तत्त्वञ्च साक्षात् परम्परया वेति नार्थान्तरम्। किञ्च अर्थान्तरस्य पुरुषदोषत्वादाभासान्तरस्य तत्राभावादुपाधिरेव भावत्वादिकं दोषः। न चैवं शब्दोऽभिधेयः

यद्यपि प्रमेयत्वादिहेतौ पृथिवीत्वव्यभिचारित्वानुमाने निरुक्तद्रव्यत्वाव्यभिचारित्वं स्वरूपासिद्धं, तथापि द्रव्यरूपव्यभिचारित्वादित्येव तदनुमानम्। तत्र न ह्येकेनैव रूपेण सर्वत्र व्यभिचारानुमानमिति नियम इति भावः।

उक्तप्रकारकं साधनावच्छिन्नसाध्यव्यापकोपाधिस्थलेऽप्याह **तथा मित्रातनयत्वमिति।** न चाघटत्वदृष्टान्ते साधनवैकल्यम्, अघटत्वान्यमित्रातनयत्वव्यभिचारित्वाभावादिति वाच्यं, मित्रातनयत्वावच्छिन्नघटान्योन्याभावत्वस्य दृष्टान्तत्वात् तदधिकरणविशिष्टस्य मित्रातनयत्वाव्यभिचारित्वात्। यद्वा यत्र गौरमित्रातनये केनाप्याप्तवाक्यादिना शाकपाकजत्वाभावो गृहीतस्तद्गतधर्मविशेषस्य वा दृष्टान्तत्वात्। तदवगमश्चावश्यक एव। अन्यथाऽस्य सन्दिग्धोपाधित्वेनोक्तव्यभिचाराननुमानप्रसङ्गात्।

अन्ये तु यस्य गौरमित्रातनयस्य 'अघट' इति नाम, मैत्रवत्, तद्वृत्तिधर्मस्यैवाघटत्वमित्याहुः।

वस्तुतस्तु यत्किञ्चित्तदधिकरणव्यक्तिवृत्त्यत्यन्ताभावाप्रतियोगित्वमेवाव्यभिचारित्वं प्रकृते विवक्षितम्। तच्च यद्यपि तत्सामानाधिकरण्यमात्रपर्यवसन्नं व्यभिचारिसाधरणं तथापि सतीतिपदमहिम्ना विशिष्टवैशिष्ट्यलाभाद्यदधिकरणावच्छेदेन मित्रातनयत्वसामानाधिकरण्यरूपतदव्यभिचारविशिष्टता, तदधिकरणतावच्छेदेन शाकपाकजत्वव्यभिचारवैशिष्ट्यं हेत्वर्थोऽभिमतः। तेन न व्यभिचारिसाधारण्यम्। इदञ्च रूपमश्यामं किञ्चिन्मित्रानयव्यक्तिवृत्तित्वाद् घटान्यत्वेऽप्यस्त्येवेति न तत्र साधनवैकल्यमपीति ध्येयम्।

पूर्वं साक्षात् शुद्धसाध्यव्यभिचारोन्नायकस्योपाधित्वमङ्गीकृत्य विशिष्टसाध्यव्यापकस्यापि साक्षादेव तथात्वमिति दर्शितम्। सम्प्रति साक्षाद्वा विशिष्टसाध्यव्यभिचारानुमानद्वारा वा तदुन्नायकस्य दोषत्वे विशेषाभावात् कथञ्चित्तदुन्नायक एवोपाधिरित्यभिप्रेत्याह **यद्वेति। साधनव्यभिचारीति।** साधनं व्यभिचारि यस्य, साधनाव्यापक इत्यर्थः।

प्रमेयत्वादित्यत्राश्रावणत्वं, जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात्, केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात्। न च पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः, तत्रानुकूलतर्काभावेन साध्यव्यापकत्वानिश्चयात्, सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तम्। बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति। एवं पर्वतावयवृत्त्यन्यत्वादेरपि नोपाधित्वं पक्षमात्रव्यावर्तकविशेषणवत्त्वात्।

अत एव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वं, द्रव्यबहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वं, मित्रातनयश्यामत्वे शाकपाकजत्वं, जन्यानित्यत्वे भावत्वमुपाधिः, तदुत्कर्षेण साध्योत्कर्षात्, अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारणतावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात्, तत् किं कार्यकारणयोरेव व्याप्तिः, तथा च बहुव्याकुली स्यादिति चेत्? न, तदुपजीव्यान्येषामप्यनुकूलतर्केण व्याप्तिग्रहात्। यत्र च साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वं व्यभिचारसंशयोपधायकत्वात्। यदा च तादृश्येकत्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितं पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वमतो न सन्दिग्धोपाधिरपि सः।

यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि, ग्राहकसाम्यात्। तथा चोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्तितव्यम्, न चैवं, तथा च पक्षेतरः साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति, तन्न, तथापि हि साध्यव्यापकतापक्षमालम्ब्य हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव।

ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा तदभावेनैव व्याप्तेरग्रहः। अथास्ति तदा साध्यव्याप्याव्यापकत्वेनोपाधिः साध्याव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषणम्। न च व्याप्ताभावव्याप्यमुभयमत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्यम्, उपाधेरात्मलाभार्थमनुकूतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेत्? न, सोपाधावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वादवच्छेदकभेदेन तदुभयसम्बन्धो वाच्यः, तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीव्यमन्तरेणोपाधिरावश्यकः। तथानुकूलतर्काभावोऽप्यावश्यक इत्युभयोरपि विनिगमकाभावाद् दूषकत्वात्।

अन्ये तु यद्व्यावृत्त्या यस्यं साधनस्य साध्यं निवर्तते स धर्मस्तत्र हेतावुपाधिः, स च धर्मो यस्याभावात् पक्षे साध्यसाधनसम्बन्धाभावः, यथा आर्द्रेन्धनवत्त्वं, व्यावर्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके। अत एव तत्र

साध्यसाधनसम्बन्धाभावः पक्षे। एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वयोः सम्बन्धो निवर्तमानः पक्षधर्मताबलादनित्यत्वाभावमादाय सिध्यति, तथा वायावुद्भूतरूपवत्त्वं निवर्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्तयत् प्रत्यक्षत्वाभावमादाय सिध्यति। तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति। अत एव बाधानुन्नीतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्तकत्वादिति।

यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्मत्वं, पक्षेतरोऽपि क्वचिदुपाधिः, तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वम्। न च धूम-वह्निसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम्, आपाद्याप्रसिद्धेरिति। तन्न, अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यं, तच्च न व्यतिरे-कित्वमतिप्रसङ्गात्, विशेषलक्षणत्वे वह्निधूमसम्बन्धे पक्षेतरस्योपाधित्वप्रसङ्गाच्च।

केचित्तु साधनव्यापकोऽप्युपाधिः क्वचिद्यत्र पक्षावृत्तिर्हेतुः, यथा करका पृथिवी कठिनसंयोगाद् इत्यत्रानुष्णाशीतस्पर्शवत्त्वम्। न च तत्र स्वरूपासिद्धिरेव दोषः, सर्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः। साध्यञ्च नोपाधिः, व्यभिचारसाधने साध्याविशिष्टत्वाद् अनुमितिमात्रोच्छेदप्रसङ्गाच्च।।

आपाद्याप्रसिद्धेरिति। वह्निधूमसम्बन्धोपाधित्वाप्रसिद्धेरित्यर्थः। **वह्निधूमसम्बन्ध इति।** न ह्यत्र वह्निधूमसम्बन्धोपाधित्वमापाद्यं किन्तु वह्निधूमसम्बन्धे पर्यवसिते पर्वतेतरत्वोपाधित्वम्। एतच्च बाधितसाध्यके पर्वतवृत्तिहेतौ प्रसिद्धमेवेति भावः। धूमाव्यापकत्वेन निश्चिते पक्षेतरत्वे वह्निव्यापकत्वमापाद्यमित्यत्र तात्पर्यमित्यन्ये। **साध्यञ्च नोपाधिरिति।** व्यभिचारोन्नयनपक्षे साध्याविशिष्टत्वादित्यर्थः। यद्यप्ययं साध्यव्यभिचारी साध्यव्यापकव्यभिचारित्वादित्यत्रोपाधिभेदान्न साध्यावैशिष्ट्यं, तथापि साध्यवद्धेतोरपि सन्दिग्धत्वेन साध्यावैशिष्ट्यम्। वस्तुतः साध्यव्यापकत्वज्ञानस्य विपक्षबाधकत्वेन व्यभिचारानुमानप्रयोजकत्वादुपाधिव्यभिचारित्वमेव तत्र हेतुरित्युक्तम्। एवञ्च साध्यावैशिष्ट्यमिति भावः। **अनुमानमात्रोच्छेदापत्तेरिति।** अत्रेदं चिन्त्यम् - सद्धेतौ साध्यस्य साधनाव्यापकत्वाभावादेवानुपाधित्वमिति कथमनुमितिमात्रोच्छेदापत्तिः। न चानन्तरोक्तसाधनव्यापकोपाधिवादिमतमिति वाच्यं, तन्मतेऽपि यत्र पक्षावृत्तिरहेतु-स्तत्रैव तस्य तथात्वेन पक्षवृत्तिहेतौ साध्यस्यानुपाधितयाऽनुमितिमात्रोच्छेदासम्भवादिति।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायाम् उपाधिप्रकरणं समाप्तम्

।। उपाधिविभागः ।।

स चायं द्विविधः-निश्चितः सन्दिग्धश्च। साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः। यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वं, यत्र साधनाव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः। यथा मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिजत्वम्। न च तेनैव हेतुना शाकपाकजत्वमपि साध्यं, तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधनेऽर्थान्तरं, श्यामत्वमात्रे हि विवादो न तूभयत्र। न चैवं धूमाद्वह्न्यनुमानेऽपि वह्निसामग्र्युपाधिः स्यात्, तत्र वह्निनेव तत्सामग्र्यापि समं धूमस्यानौपाधिकत्वनिश्चयात्, अत्र तु मित्रातनयत्वव्याप्यश्यामसामग्र्या स्थातव्यमित्यत्र कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावात्। अत एव साध्यसामग्र्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः। यत्र तु तन्नास्ति तत्र साप्युपाधिरित्यभिसन्धाय सामग्री च क्वचिन्नोपाधिर्न तु सर्वत्रेत्युक्तं, यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादिः, यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे।

यत्तूपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोग्यानुयोग इति, तन्न, सन्दिग्धानैकान्तिकवद्व्यभिचारसंशयाधायकत्वेन दूषकत्वादुपाधेरिव व्यभिचारनिश्चयाधायकतया।।

।। उपाधेर्दूषकताबीजपूर्वपक्षः ।।

इदानीमुपाधेर्दूषकताबीजं चिन्त्यते। नाप्यस्य स्वव्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वं, तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात्। न च प्रतिपक्षबाहुल्येनाधिकबलार्थमुद्भावनं, शतमप्यन्धानां न पश्यतीति न्यायाद एकेनापि बहूनां प्रतिबन्धाच्च, व्याप्तिपक्षधर्मते हि बलं, तच्च तुल्यमेव, न तु भूयस्त्वमपि, एकस्मादप्यनुमितेः, सन्दिग्धोपाधेरदूषकतापाताच्च तद्व्यतिरेकस्य सन्दिग्धत्वात्। अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात्, व्यतिरेकेऽसाधारण्यात्। पक्षवृत्तिश्चोपाधिर्न स्यात्, यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्यत्वम्, अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वं, तद्व्यतिरेकस्य पक्षावृत्तित्वात्। न च नायमुपाधिः, तल्लक्षणसत्त्वात्, अन्यथा दूषकत्वसम्भवाच्च।

किञ्च साध्यव्यापकव्याप्यत्वेनोपाधेः साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः, न ह्यव्यापकव्यतिरेकादव्याप्यव्यतिरेकः। नापि व्याप्तिविरहरूपतया, असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात्। नाप्यनौपाधित्वज्ञानस्य, व्याप्तिधी-हेतुत्वस्य तत्त्वेन व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धेरन्तर्भावः। न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यस्य व्याप्तिज्ञाने स्वतः प्रतिबन्धक-मित्युक्तम्। न च साध्यव्यापकाव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्याप्यत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यं, न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणं येन तत्प्रतिबन्धकं स्यात्, किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा। नापि व्यभिचारोन्नायकत्वेन, यथा हि साध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमनुमेयं, तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्व-मुपाधेरप्यनुमेयं, व्याप्तिग्राहकसाम्यात्। नापि साध्यव्यापकाव्याप्यत्वेन व्याप्ति-विरहोन्नायकतया, साध्यव्याप्याव्यापकत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात्। तस्मादुपाधिर्हेत्वाभासान्तरमिति।।

।। उपाधिदूषकताबीजसिद्धान्तः ।।

उच्यते-आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीजचिन्तनम्। यदि च साध्यसाधनसहचारदर्शिनोपाधौ साध्य-व्यापकतानिश्चय एव नास्ति तदोपाधित्वनिश्चयाभावाद्दूषकतैव नास्तीति क्व बहिर्भावान्तर्भावचिन्ता। किञ्च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्वथा साध्यव्यापकतानिश्चयो वक्तव्यः, तेन विना तेषामभावात्। तस्मादुपाधिनिश्चयाद्व्यभिचारनिश्चयः, तत्संशयात्तत्संशय इति व्यभिचार-ज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया वोपाधेर्दूषकत्वम्।

यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयम्। न च साधनाभाववद्वृत्तित्वमुपाधिरिति वाच्यम्, उपाधिमात्रोच्छेदप्रसङ्गात्, सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकवद् अवृत्तिगगनादौ साध्याव्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च।

।।उपाध्याभासनिरूपणम्।।

अथोपाध्याभासाः-असाधारणविपर्ययः, यथान्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम्। अप्रसिद्धसाध्यविपर्ययः, यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः। बाधितसाध्यविपर्ययः, यथा वह्निरुष्णस्तेजस्त्वादित्यत्राकृतकत्वम्।

पक्षाव्यापकविपर्ययः, यथा क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्राणुव्यतिरिक्तत्वम्। अत्राणुव्यतिरिक्तत्वव्यतिरेकस्य क्षित्यादेरेकदेशवृत्त्या भागासिद्धेः। पूर्वसाधनव्यतिरेकः, यथा शर्करारसोऽनित्यो ऽनित्यवृत्तिगुणत्वात्। स नित्यः, रसनेन्द्रियजन्यनिर्विकल्पकविषयत्वाद् रसत्ववदित्यादौ। पूर्वसाधनतायाः प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकित्वस्येति वस्तुव्यवस्था न स्यात्, उपाधेर्नित्यदोषत्वात्। न हि यद्येन सोपाधिसम्बद्धं तत्तेनानुपाधित्वसम्बद्धं सम्भवति। न तु सत्प्रतिपक्षोच्छेदः पूर्वसाधनव्यतिरेकस्यानुपाधित्वे बीजं, स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात्। न च पूर्वहेतोस्तत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्य तवेति वाच्यम्, अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात्। पूर्वसाधनव्याप्यव्यतिरेकः, यथा ऽकर्तृकत्वानुमाने नित्यत्वादिः। पक्षविपक्षान्यतरान्यः, यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम्। पक्षेतरसाध्याभावः, यथात्रैव पर्वतेतराग्निमत्त्वम्। न चात्र व्यर्थविशेषणत्वं दूषणं, तत्त्वेऽप्युपाधेराभासत्वात्। तत्तुल्यश्च, यथात्रैव पर्वतेतरेन्धनवत्त्वम्। एवं वह्निसामग्र्यादिकमूह्यम्।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ उपाधिप्रकरणं समाप्तम्

।। पक्षताप्रकरणम् ।।

व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते। तत्र न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वम्। सन्देहो हि न विशेषणं परामर्शपूर्वं लिङ्गदर्शन-व्याप्तिस्मरणादिना तस्य नाशात्। नोपलक्षणम्, अव्यावर्तकतापत्तेः। नापि साधक-बाधक-प्रमाणाभावः, उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात्। नाप्यभावद्वयं तथा, बाधकप्रमाणाभावस्य व्यर्थत्वात्, ह्रदादेः पक्षत्वेऽपि बाध-हेत्वसिद्ध्या-देरावश्यकत्वेनानुमित्यनुत्पादात्। नापि साधकप्रमाणाभावः, श्रोतव्यो मन्तव्य इति श्रुत्या समानविषयकश्रवणानन्तरं मननबोधनात्, प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात्, एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च, मन्तव्यश्चोपपत्तिभिरिति स्मरणात्।

अथ सिषाधयिषितसाध्यधर्माधर्मी पक्षः, तथा हि मुमुक्षोः शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविशेषानुमितीच्छयात्मानुमानम्, अत एव प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः, न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातार इति वाचस्पतिवचनयोरविरोधः, अनुमित्सात-द्विरहाभ्यां तदुपपत्तेरिति चेत्? न, सन्देहवत्परामर्शपूर्वं सिषाधयिषाया अप्यभावाद्, योग्यतायाश्चानिरूपणात्, सिषाधयिषाविरहेऽपि घनगर्जितेन मेघानुमानात्, स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेनानपेक्षितानुमानदर्शनाच्च।।

।।इति पक्षतापूर्वपक्षः।।

अवसरसङ्गत्याह-**व्याप्तीति**[१]। व्याप्तिनिरूपणानन्तरमित्यर्थः। पक्षत्वे निरूपिते तद्धर्मत्वं सुनिरूपणमिति (कथं?) पक्षमेव निरूपयति **तत्रेति। अव्यावर्तकतेति।** अतीतसाध्योपलक्षणत्वेन तादृशसंशयविषयत्वात् साध्यस्य सिद्धसाधनेऽपि पक्षतासत्त्वादित्यर्थः। व्यासज्यप्रतियोगिका[भावा]भिप्रायेणाह **उभयेति।** केवलान्वयेना-न्वयिनि बाधकाभावाप्रसिद्धिश्चेत्यपि ध्येयम्। **सन्देहवदिति।** न चेश्वरसिषाधयिषामादाय तद[ा]पि तत्सत्त्वमस्त्येवेति वाच्यं, व्यधिकरणसिषाधयिषामादाय सिद्धसाधनस्थलेऽपि पक्षतापत्त्या सिद्धिसमानाधिकरणसिषाधयिषाया एव विवक्षितत्वात्। न च तद्वारणाय स्वजनकत्वमेव विवक्ष्यतां, तच्चेश्वरसाधारणमिति वाच्यं, तदपि हि न सिषाधयिषात्वेन ग्राह्यम्, अतिप्रसङ्गात्। किन्तु सिद्धिसमानाधिकरणसिषाधयिषात्वेनैव। एवञ्चावश्यकत्वात् प्रथमोपस्थितत्वाच्च तदेवास्तु। किञ्चैवं सिद्धि(द्ध) साधनोच्छेदः, भगवदिच्छायास्तत्रापि

---

१. ''व्याप्तिरिति'' इति पाठो मातृकायाम्

।।पक्षतासिद्धान्तः।।

उच्यते-सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः, तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः, यत्र साधकप्रमाणे सत्यसति वा सिषाधयिषा यत्र वोभयाभावस्तत्र विशिष्टाभावात् पक्षत्वम्। यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वं तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम्।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ पक्षताप्रकरणं समाप्तम्

सत्त्वात्। न च तत्र तत्सत्त्वेऽपि न तस्याः सिषाधयिषात्वं तत्तत्सिद्धिसामग्रीसाहित्यमेव हि सिसृक्षादिवत् तस्यास्तथात्वमिति वाच्यम्, एवं हि तत्र तत्सामग्र्यभावे सिषाधयिषाविरहः, तदभावे च तत्सामग्रीविरह इत्यन्योन्याश्रयादिति।।

सिषाधयिषाविरहेति। यत्र सिषाधयिषा साधकमानञ्चोभयं तत्र मरणादिस्थले सिषाधयिषाविहरूपविशेषणाभावात्मकसिषाधयिषातः, यत्र सिषाधयिषामात्रं न मानं तत्र प्रसिद्धानुमानादौ विशेषणविशेष्योभयाभावात्, यत्र च पूर्वोक्तोभयाभावस्तत्र गर्जितेन मेघानुमानादौ सिषाधयिषाविरहरूपविशेषणसत्त्वेऽपि केवलमानरूपविशेष्याभावादुक्तविशिष्टाभावेन पक्षत्वं सर्वत्राव्याहतमित्यर्थः। ननु तथापि घनगर्जिताद्यव्याप्तिः, तत्रोक्तविशेषणविशिष्टस्यानुमानरूपसाधकमानस्यैव सत्त्वादिति चेत्?

अत्र **यज्ञपत्युपाध्यायाः**-सिषाधयिषाविरहसहकृतसिद्ध्यनुमानातिरिक्तसिद्धिकरणयोस्तदुभयान्यान्यत्वावच्छिन्नसामान्याभावस्य विवक्षितत्वाद् गर्जितादौ नाव्याप्तिः, तत्रानुमानरूपसाधकमानसत्त्वेऽपि तदतिरिक्तसाधकमानस्यासत्त्वात्। न च लक्षणस्थमेव साधकमानपदं सिद्ध्युपहितमानपरं विवक्ष्यतां, तावतैव न तत्राव्याप्तिरिति वाच्यं, प्रत्यक्षस्थले पक्षतापत्तेः, तत्र च तदङ्गीकारे विशेषदर्शनानन्तरं संशयोत्तरप्रत्यक्षानुदयापत्तेः, अनुमितिसामग्र्या बलवत्त्वात्। न च वैपरीत्यात्पक्षतासत्त्वेऽपि न तत्रानुमितिरिति वाच्यं, तर्ह्यनुमित्सायामपि तत्रानुमित्यनुदयापत्तेः। तदनन्तरमनुमिनोमीत्यनुभवबलेनेष्टापत्तेर्निरासात्। न च सामान्यत एवेच्छाघटितसामग्र्या आहार्यारोपबुभुत्सितशब्दग्रहादौ बलवत्त्वावधारणादनुमित्साघटितानुमितिसामग्र्या बलवत्त्वमिति वाच्यम्, अन्वयव्यतिरेकाभ्यामनन्यगत्या तत्र तथात्वाभ्युपगमात्। अन्यथा सामान्यत एव तथात्वे घटबुभुत्सायां घटप्रत्यक्षानुत्पत्तिप्रसङ्गात्। किञ्चानुमित्सायाः सामान्यतो न जनकत्वमवच्छेदकत्वं वा, तद्विरहेऽप्यनुमितिदर्शनात्। नापि विशेषे, जातिविशेषस्यानुमितावनुपलब्धिबाधितत्वाद् व्यञ्जकविरहाद् ब्राह्मणत्वादि-

वदापाततस्तथात्वेऽपि तत्रानुमितिसामान्यसामग्रीसत्त्वे तदापत्तेः, तस्याः कार्यत्व-व्याप्तत्वात्। तद्विरहे तु तत एवानुमित्यनुत्पादेऽनुमित्साविरहस्य तदप्रयोजकतया तस्या अहेतुत्वापत्तेः। अत एवोपाधिविशेषावच्छेदेन जनकत्वं निरस्तमित्याहुः। तच्चिन्त्यं, लघोः सिद्ध्यभावस्यैव पक्षतात्वे सर्वसामञ्जस्यात्। न चैवं संशयविपर्य-योत्तरप्रत्यक्षस्थलेऽपि पक्षतासत्त्वेऽनुमित्यापत्तिः, समानविषये सिषाधयिषाविरहसहकृत-प्रत्यक्षसामग्र्या अपि तत्प्रतिबन्धकत्वेन तत एव तदनुत्पत्तेरिष्टत्वादित्युक्तमनुमानलक्षण-व्याख्यानावसरे तत्रैवानुसन्धेयम्। किञ्च सिषाधयिषाविरहविशिष्टायाः सिद्धि-तत्करणविशेषयोरनुमितिप्रतिबन्धकत्वदर्शनादुभयोः कारणत्वेऽपि सिद्ध्यभावमात्रं पक्षता लाघवेन तस्या एवानुमितिलक्षणप्रवेश-प्रवृत्तिनिमित्तत्वयोः सम्भवात्। न तूक्तविशेषणविशिष्टतदुभयान्यान्यत्वावच्छिन्नतदुभयसामान्याभावः, तदपेक्षया गुरुत्वात्। यथोक्ततदुभयान्यान्यत्वावच्छिन्नत्वेनाप्रतिबन्धकत्वं, न तदभावत्वेन कारणतापि। किन्तु यथोक्तसिद्धित्वेन साधकमानत्वेन च प्रतिबन्धकत्वात्तदभावत्वेनैव प्रत्येकरूपेण। अपि च तत्त्वेन कारणत्वे मणिमन्त्रादीनामप्युक्तप्रकारावच्छिन्नसामान्याभावस्यैव जनकत्वापत्तिः। न चेष्टापत्तिः, अपसिद्धान्तात्, तेन रूपेणाप्रतिबन्धकतया तथा-जनकत्वाभावाच्च। न चोभययोः कारणत्वे पक्षतायां विनिगमकाभावः, लाघवस्य पक्षपदप्रवृत्तिनिमित्तत्वलाघवस्य च विनिगमकत्वात्। किञ्च सिद्ध्यभावस्य पक्षतात्वे तज्जन्यत्वस्य[1] तद्विषयप्रत्यक्ष एवातिव्याप्तिरित्यन्यविशेषणस्य सार्थकत्वम्। मानाभावस्य च तथात्वे तस्यातीन्द्रियतयाऽतिप्रसङ्गाभावादन्यविशेषणवैयर्थ्यापत्तेः। अपि च तथा सति तृणाद्यन्यान्यत्वेन जनकत्वापत्तौ शक्तिवैजात्याद्यन्यतरकल्पनाबाधः स्यात्। तत्र हि व्यभिचारिणामप्यन्यान्यत्वेन जनकत्वे रासभमन्तर्भाव्यापि तथा जनकत्वापत्तेः। को हि तदा वह्निं प्रति तृणरासभयोः विशेषः। न च रासभत्वे यद्व्यतिरेकाग्रहो बाधकः, निर्मन्थनादेरिव रासभस्यापि देशविशेषसहकारित्वकल्पनात्। तथा च व्यभिचारिणामपि तथाजनकत्वे वारणीयाभावात्। नियतपदाप्रयोगे पूर्ववृत्तित्वमात्रस्यैव जनक[त्व]तया किमव्यभिचारार्थमवच्छेदकेऽन्यान्यत्वेन[2]। तस्मात् यथोक्तसिद्ध्यभाव एव पक्षता न तु विशिष्टाभावो गौरवादिति **जयदेवमिश्राः।**

वाचस्पतिमिश्रास्तु सिषाधयिषाविरहसहकृतसिद्ध्युपहितप्रमाणाभावः पक्षता। अतो न घनगर्जितादावतिव्याप्तिः, तत्र सिद्ध्युपहितप्रमाणाभावात्। न चैवं

---

१. 'अतज्जन्यत्वस्य' इति पाठो मातृकायाम्

२. '...दकेनान्यत्वं न' इति पाठो मातृकायाम्

संशयस्थले पक्षतापत्तावनुमित्यापत्तिः, परामर्शाभावादित्याहुः। तच्चिन्त्यं, गौरवापत्तेः, संशयस्थलेऽनुमित्यभावस्यान्यत एवोपपत्तेरित्यन्यत्र विस्तरः।

ननु भवतु या काचित् पक्षता तथापि विशिष्टाभावरूपायां पक्षतायां यत्र विशेषणाभावाधीनो विशिष्टाभावस्तत्र सन्देहवदनुमित्यव्यवहितप्राक्काले सिषाधयिषाया अभावात् कथं तदानीं तत्प्रयुक्ता पक्षता? लिङ्गदर्शनव्याप्तिस्मरणाभ्यां परामर्शपूर्वं तन्नाशस्य स्वयमेवोपगमादिति चेत्?

अत्र **यज्ञपत्युपाध्यायाः** परामर्शोत्पादानन्तरं स्वकारणादनुमित्सा तदुत्तरक्षण एव पुनः स्मरणलक्षणः परामर्शः, तदुत्तरक्षण एव चानुमितिरिति विनश्यदवस्थानुमित्साप्रयुक्ता पक्षता तत्र तदानीमप्रत्यूहैव। यद्वा प्रथमं तत्रानुमितीष्टसाधनतायाः प्रकृतव्याप्त्यादेश्च समूहालम्बनरूपमेकमेव स्मरणं, तदुत्तरक्षणे अनुमित्सा, तदुत्तरक्षणे विनश्यदवस्थव्याप्त्यादिस्मरणसाचिव्यात् मानसः परामर्शः, तदुत्तरक्षणे चानुमितिरित्यतोऽपि सा तदा तत्र सुलभेति। यदा तु कथञ्चित् स्मरणादिरूपपरामर्शरूपानुमित्सोत्पद्यते ततो विनश्यदवस्थपरामर्शादनुमितिस्तदा विनश्यदवस्थायाः पूर्वं सत्त्वात्तदनुमित्यनन्तरं तदनुमित्यात्मकपरामर्शात्पुनरनुमित्यन्तरं मा भूदतः स्वविषयानुपहिता सिषाधयिषा सिषाधयिषापदेन विवक्षणीयेति द्रष्टव्यमित्याहुः। तच्चिन्त्यम्, एवं प्रणालीकल्पने मानाभावात्। न च कार्यस्यान्यथानुपपत्तिरेव मानं, तस्यान्यथैवोपपाद्यत्वात्। अन्यथा सन्दिग्धेत्यत्रापि सन्देहान्तरोत्पत्त्या सन्देहस्यापि विशेषणत्वमिति तत्खण्डनानौचित्यात्। द्वित्रिक्षणान्तरितायाः सिषाधयिषायाः अप्यनुमितिजनकत्वदर्शनाच्चेति।

जयदेवमिश्रास्तु - द्वित्रिक्षणान्तरितायामपि सिषाधयिषायामनुमितेरनुभूयमानत्वात् सिषाधयिषापदेनात्र सिषाधयिषोत्पत्त्युत्तरकालीनतद्विषयसिद्ध्यनुत्पादकाल एव विवक्षितः। स च तस्या अभावेऽप्यनुमितिपूर्वकाले विद्यत एव। यद्वा सिषाधयिषाविषयसिद्ध्यनुत्पादकाल एव तदर्थः। सिद्ध्युत्पत्त्यनन्तरं तत्सिषाधयिषायास्तदजन्यसिद्ध्यगोचरत्वेन तदुत्पत्त्युत्तरकालीनत्वस्याप्यविशेषणात्। न चैवमद्य सिषाधयिषायां व्यासङ्गादिनाऽनुमित्यनुत्पादे श्वः प्रत्यक्षीकृतेऽपि तद्विषये प्रत्यक्षता(पक्षता)सत्त्वेनानुमित्यापत्तिः। इदं जानीयामिति क्षणकतिपयान्तर्भावेणैव सिषाधयिषोत्पद्यते, न तु कदाचिज्जानीयामिति। तथा च तादृशसिषाधयिषयाऽनुमित्यनुत्पादे श्वस्तनसिद्धेस्तदविषयतया न तामादाय श्वः पक्षतासत्त्वेनानुमित्यापत्तिः। यदि वाद्यतनसिषाधयिषायाः श्वस्तनी सिद्धिरपि विषयस्तदा तदननुगुणानन्तरित्वेनाप्यनुत्पादकालो विशेषणीय इति। तदपि न, सिषाधयिषोत्पत्त्युत्तरकालीनत्वस्य

सिद्धिविशेषणत्वे सिषाधयिषापूर्वकालेऽपि सिद्धिप्रागभावसत्त्वेन पक्षतापत्तेः। अनुत्पादविशेषणत्वेऽनन्वयापत्तेः। न हि सिषाधयिषोत्पत्त्युत्तरकालीनोऽनुत्पादः, तस्याजन्यत्वात्। किञ्च पक्षताजन्यज्ञानमनुमितिरिति लक्षणे सिद्धिविरहरूपयोग्य-पक्षताजन्यप्रत्यक्षातिव्याप्तेः। स्वोक्ताया अलग्नकत्वापत्तेः, सिषाधयिषापदार्थस्योक्त-कालगर्भत्वेन प्रत्यक्षाजनकत्वात्। किञ्चैवं यत्रानुमित्सानन्तरं सिद्ध्यननुगुण-विषयान्तरसञ्चारस्तदव्यवहितोत्तरक्षण एव स्मरणलक्षणः परामर्शस्तत्रानुमितिर्न स्यात्। न चेष्टापत्तिः, परामर्शाव्यवहितपूर्वसमये विनश्यदवस्थानुमित्सासत्त्वेनै-कक्षणान्तरितायां तस्यामनुमित्यनुत्पादो लिङ्गदर्शनादिना द्वित्रिक्षणानन्तरितायां तस्यामनुमित्युत्पाद इत्यत्र मानाभावात्। स्वव्यापारीभूतेन व्यवधानस्योभयत्रापि तुल्यत्वादिति।

अस्मदुपाध्यायमिश्रास्तु सिषाधयिषापदेनात्र सिषाधयिषायोग्यता विवक्षिता। सा च सिषाधयिषाप्रागभावानवच्छिन्नः सिषाधयिषाविषयसिद्ध्यनुत्पाद एव। न तूत्पादकालः, उक्तदोषात्। सिषाधयिषाविषयसिद्ध्यनुत्पादमात्रस्य तथात्वे सिषाधयिषापूर्वकालेऽपि सिषाधयिषाविषयसिद्ध्यनुत्पादसत्त्वेन पक्षतापत्त्या सिषाधयिषाप्रागभावानवच्छिन्नत्वं विशेषणम्। न चाद्यतनसिषाधयिषायां व्यासङ्गादिना सिद्ध्यनुत्पादे श्वःप्रत्यक्षीकृतेऽपि तद्विषये पक्षतासत्त्वेऽनुमित्यापत्तिः, सन्निहित-बुद्धेरन्तरङ्गत्वेन श्वस्तनसिद्धेस्तदविषयत्वात्। यदि वा श्वस्तन्यपि सिद्धिस्तद्विषयस्तदा यावत्क्षणानन्तरमनुमित्यभाव उभयसिद्धस्तावत्क्षणानवच्छिन्नत्वेनापि विशेष्यताम्। न चैवमनुमित्सानन्तरं दैवात् प्रत्यक्षीकृतविषये तदग्रिमक्षणोत्पन्नपरामर्शेणानुमितिजननापत्तिः, इष्टापत्तेः, प्रत्यक्षानन्तरोत्पन्नायां द्वित्रिक्षणव्यवहितायां तस्यामनुमित्या भाव्यं, न तु प्रत्यक्षाव्यवहितपूर्वक्षणोत्पन्नायां तस्यामित्यत्र नियामकाभावादित्यालोचयामः।

सिषाधयिषा चात्र न सिद्धित्वप्रकारिका सिद्धीच्छा। किन्तु सिद्धिविशेषेच्छैव। तेन श्रवणानन्तरमननस्थले सिद्धिसामान्यस्यचातत्वात् तत्प्रकारकतदिच्छाविरहे-ऽप्यात्मानुमितीष्टसाधनताज्ञानादिजनितानुमित्सालक्षणसिद्धिविशेषेच्छासत्त्वात् पक्षता निर्वहति। ननु तथापि यद्यनुमितिमात्रसिद्धिविषया सा तदैकानुमित्यनन्तरं यत्रानुमित्यन्तरेच्छासत्त्वादनुमित्यन्तरं तत्र सा न स्यादिति चेत्? न, श्वनिवर्तक-भूतप्रत्यक्षादिसिद्धिसामग्रीसमवहितसिषाधयिषाभिन्नायाः सिद्धीच्छायाः सिषाधयिषापदेनात्र विवक्षितत्वादि**त्युपाध्यायाः।**

अनन्यथासिद्धसिद्धीच्छैवाभिमता, अतो न विकल्पादिदोष इत्यन्ये।

उद्देश्यानुमितीच्छैवाभिमता। तथा च यत्र यानुमितिरुद्देश्या तत्र तद्विषयेच्छानुमित्सेति **जयदेवमिश्राः।**

न चैवं तत्तत्पुरुषीयतत्तत्साध्यीयतत्तल्लिङ्गीयेच्छैव सिषाधयिषा वाच्या। तथा च पुरुषान्तर-साध्यान्तर-लिङ्गान्तरमादाय नातिव्याप्तिशङ्कापत्तिरतोऽननुगम इति वाच्यं, पुरुषभदेन, साध्यभेदेन लिङ्गभेदेन च भिन्नभिन्नाया एव पक्षताया लक्ष्यत्वात्। कञ्चित्प्रति कस्यापि पक्षत्वात्। कस्य का व्याप्तिरितिवत् कस्य का पक्षता? इत्यननुगताया एव लक्ष्यत्वादिति। ननु यदि सिषाधयिषा तत्पुरुषीया, तत्साध्यीया तत्कालीना च विवक्षिता तदैतादृशसिषाधयिषाया घनगर्जितानुमित्सितगन्धानुमित्यादाव-प्रसिद्धेस्तद्घटिता पक्षताऽपि तत्राप्रसिद्धैवेति चेत्?

अत्र वदन्ति - अनुमितिकर्तृसमानाधिकरणतत्तल्लिङ्गकतत्तत्पक्षीयतत्तत्साध्यी-यतत्तत्कालीनानुमितिगोचरेच्छैव सा विवक्षिता। तादृशे च घनगर्जितादिस्थलेऽपीश्वरेच्छैवेति न क्वाप्यप्रसिद्धिशङ्केति ध्येयम्।

अस्मदुपाध्यायास्तु सिषाधयिषाविरहसहकृतसिद्धिविरहः पक्षता। सिषाधयिषा चानन्यथासिद्धीच्छा। सापि सिषाधयिषाप्रागभावानवच्छिन्नसिषाधयिषाविषय-सिद्ध्यनुत्पादरूपा। तथा चायं निर्गलितार्थः-तत्तत्पक्षीयतत्तसाध्यीयतत्तत्कालीनानुमिति-कर्तृसमानाधिकरणानन्यथासिद्धसिद्धीच्छाप्रागभावानवच्छिन्नानन्यथासिद्ध-सिद्ध्यनुत्पादविरहसहकृतसिद्धिविषयत्वाभावः पक्षता, अतो न क्वाप्यव्याप्तिः। घनगर्जितादावनुमितिकर्त्रीश्वरेच्छासत्त्वान्नाप्रसिद्धिशङ्केति ध्येयम्।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां पक्षताप्रकरणं समाप्तम्

।। परामर्शप्रकरणम् ।।

पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः। ननु व्याप्यत्वावच्छेदकप्रकारेण व्याप्तिस्मरणं पक्षधर्मताज्ञानं तथा, लाघवात्, परामर्शहेतुत्वेनावश्यकत्वाच्च। एवञ्च धूमो वह्निव्याप्यो धूमवांश्चायमिति ज्ञानद्वयादेवानुमितिरस्तु। न चानुमितिं प्रति व्याप्यत्वज्ञानमेव हेतुर्लाघवाद् उपजीव्यत्वाच्चेति वाच्यं, तस्यानुमितेः पूर्वमसिद्धौ युगपदुपस्थित्यभावात्।

अथ यथा तत्ताविशिष्टस्मरणे सतीन्द्रियसन्निकृष्टे स एवायमित्यभेदप्रत्ययो भवति तथेन्द्रियसन्निकृष्टे धूमे वह्निव्याप्यधूमस्मरणे धूमत्वसाधारणधर्मदर्शनाद्व्याप्योऽयमित्यभेदप्रत्ययः स्यात्, सामग्र्या वृत्तत्वादिति स एवानुमितिहेतुरिति चेत्? न, प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वाद् अनुमितिरेवोत्पद्यते न तु व्याप्याभेदप्रत्ययः, अन्यथा तवापि परामर्शानन्तरं परामर्शान्तरं तदनुव्यवसायो वा भवेन्न त्वनुमितिः। अथ धूमो वह्निव्याप्य इति स्मरतः पर्वतीयधूमेन्द्रियसन्निकर्षे प्रथमत एव व्याप्ति-धूमत्वयोर्वैशिष्ट्यं यत्र भासते विशेषणज्ञानस्य पूर्वं वृत्तत्वात् तत्र, यत्र चाप्तवाक्याद्वह्निव्याप्यवानयमिति ज्ञानं तत्रोभयत्रापि लाघवात् पक्षधर्मव्याप्यत्वज्ञानस्य हेतुत्वकल्पनादन्यत्रापि तथेति चेत्? न, इन्द्रियासन्निकृष्टेऽतीन्द्रिये च लिङ्गे प्रत्यक्षविशिष्टज्ञानसामग्रीविरहात्तेन विनानुमित्यनुत्पादापत्तेः, अस्मदुक्तसामग्र्याश्च तत्रापि सत्त्वात्। न चानुमानात् तत्र परामर्शः, अनवस्थानात्।

अथ यथा स देवदत्तो गौरो न वा परमाणू रूपाधिकरणं न वेति संशयो बहिरस्वतन्त्रेणापि मनसा कोटिस्मरणविशेषादर्शनादिसहकारिवशाज्जन्यते, यथा वा निद्रासहकारेण बाह्यस्वप्नानुभवः, तथेहापि ज्ञानान्तरोपनीतविशेष्ये व्याप्तिस्मरणसहकृतेन मनसा परामर्शो जन्यते तदनन्तरमनुमितिदर्शनादिति चेत्? न, व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः, तदेव हि प्रमाणान्तरं यदसाधारणं सहकारि समासाद्य मनोबहिर्गोचरां प्रमां जनयति यथेन्द्रियादि,

उपोद्धातसङ्गत्याह **पक्षधर्मस्येति। लाघवादिति।** अतिरिक्तविशिष्टवैशिष्ट्यावगाहिकल्पनापेक्षया लाघवादित्यर्थः। **ज्ञानद्वयादिति।** अत्र ज्ञानद्वयत्वमविवक्षितं, वैशिष्ट्यानवगाहित्वमात्रे तात्पर्यम्। अन्यथोभयगोचरैकसमूहालम्बनादनुमित्यनापत्तेरिति ध्येयम्। **लाघवादिति।** व्याप्यतावच्छेदकप्रकारकज्ञानत्वापेक्षया व्याप्यत्वप्रकारकज्ञानत्वस्य कारणतावच्छेदकस्य लघुत्वादित्यर्थः। **उपजीव्यत्वादिति।** व्याप्यत्वग्रहं विना व्याप्यतावच्छेदकत्वज्ञानाभावादित्यर्थः। **प्रमाणन्तरतापत्तेरिति।** परिगणितप्रमाणबहिर्भावापत्तेरित्यर्थः। यथाश्रुतापादनस्य प्रमाकरणविशेष इष्टापादनपर्यवसानादिति

संशय-स्वप्नौ तु न प्रमे इति न निद्रादेः प्रमाणान्तरत्वम्। न च तवापि कथं स धूमो वह्निव्याप्य इति व्यवहारः, तदानीं तद्व्याप्यत्वानुभावकाभावादिति वाच्यं, तत्र स्मृतधूमे धूमत्वेन वह्निव्याप्यत्वानुमानात्। न च तन्मते धूमत्वेन व्याप्त्यनुभवः सम्भवति, अत एव यो वह्निव्याप्यवान् सोऽवश्यं वह्निमान् इति व्याप्तिज्ञानवतोऽनुमितिर्नान्यथा।

अथ पर्वतीयधूमे धूमत्वेन ज्ञाते वह्निव्याप्योऽयं न वेति संशयेऽप्यनुमितिः स्यादिति चेत्, न, धूमो वह्निव्याप्य इति स्मरणे विद्यमाने धूमत्वज्ञानस्य विशेषदर्शनत्वेन संशयाभावात्, अन्यथा परामर्शोऽपि कुतो न स्यात्। संशयेन प्रतिबन्धादिति चेत्? तुल्यम्। न च सामान्यनिश्चयस्य सामान्यसंशयनिवर्तकत्वाद् धूमसामान्य एव संशयो मा भूत्, विशेषसंशयश्च विशेषनिश्चयनिवर्तनीय इति धूमविशेषे संशयनिरासार्थं पृथग्व्याप्तिनिश्चयो वाच्य इति वाच्यं, यत्र हि यद्व्यावर्तकधर्मदर्शनं तत्र न तत्संशयः, तच्च सामान्ये विशेषे वेति। वस्तुतस्तु धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने चानुमितिर्भवत्येव। ननु भावोऽभावो वोभयथापि प्रमेयमित्यत्र भावत्वाभावत्वयोर्व्याप्यत्वावच्छेदकयोरग्रहादनुमानं

भावः। **न च तन्मत इति।** धूमे वह्निव्याप्यत्वपरामर्शवद् धूमेऽपि वह्निव्याप्तिव्याप्यत्वपरामर्शस्यासम्भवः, विशेष्यासन्निकर्षस्योभयत्रापि समानत्वात्। व्याप्ति-व्याप्तिस्मृतिः धूमत्वेन धूमत्वज्ञानमिति, मदुक्ता धूमे व्याप्यत्वानुमितिसामग्री तत्राप्यस्त्येवेति भावः। **अत एवेति।** यत एवोक्तव्याप्त्या व्याप्यतावच्छेदकप्रकारिका धीरनुमितिहेतुः, अत एव, यथा धूमादिप्रत्येकवृत्तिवह्निव्याप्त्यवच्छिन्नसकल-वह्निव्याप्यनिष्ठमहाव्याप्त्यन्तरविषयं यो वह्निव्याप्यवान् सोऽवश्यं वह्निमानिति ज्ञानं तदा परमनुमतिर्न तु तदभावेऽपीत्यर्थः। **यत्र हीति।** यदवच्छेदेन यद्धर्मनिश्चयस्तदवच्छेदेन तद्धर्मज्ञानं तद्धर्मिकसंशयविरोधि, लाघवात्, न तु तदवच्छिन्नतत्कोटिकसंशयविरोधि। ननु घटत्वेन भेदनिश्चये पृथिवीत्वेन तत्संशयस्याग्रे स्वीकृतत्वात् कथमेतदिति वाच्यम्, एतदनुशयादेव तत्र मतान्तरस्वीकारादिति भावः। यद्वा न केवलं व्यावर्तकधर्मदर्शनादेव संशयाभावः, किन्तु भिन्नविषये प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वादपि न संशय इत्याह **वस्तुतस्त्विति।** एवकारो भिन्नक्रमः, अनुमितिरेव भवति न तु संशय इत्यर्थः। **नन्विति।** इह पर्वते भावोऽभावो वोभयथापि प्रमेयमस्तीति भावाभावान्यतरेण प्रमेयानुमितौ भावत्वाभावत्वयोर्व्याप्यतावच्छेदक-योरनिश्चयेऽनन्यगत्या व्याप्यत्वधीर्हेतुरित्यर्थः।

न स्यात् तदन्यान्यत्वरूपस्यान्यतरत्वस्य लिङ्गात्वाभावादिति चेत्? न, भावत्वाभावत्वान्यान्यधर्मवत्त्वस्य तत्र लिङ्गत्वात्, एवं धूमालोकान्यतरत्वमपि लिङ्गम्।

अथ यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकं तत्तन्निश्चयसाध्यं, तथा च पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम्। अतो व्याप्याभेदज्ञानं तद्धेतुः सिध्यतीति चेत्? न, धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने च सति विशेषदर्शनान्न धूमे व्याप्याभेदज्ञानं किन्तु अनुमितेरेवोत्पत्तिः, तत्सामग्रीसत्त्वात्, अतो व्याप्यभेदज्ञानं नानुमितिप्रतिबन्धकं येन व्याप्याभेदज्ञानं तद्धेतुः स्यात्। न च धूमत्वप्रकारेण व्याप्तिस्मरणपक्षधर्मताग्रहे इयं धूमव्यक्तिर्वह्निव्याप्या नेति भ्राम्यतोऽनुमित्यापत्तिरतो विशिष्टज्ञानं हेतुरिति वाच्यं, धूमत्वस्य विशेषस्य दर्शनेन तादृशभ्रमानुत्पत्तेः, तत्रानुमितिसद्भावादेव। अन्यथा निश्चयसामग्र्यां सत्यां भ्रमानन्तरं परामर्श एव कुतो न भवति। अस्तु वा व्याप्यतया

केचित्तु भावत्वाभावत्वयोरित्यत्र भावत्ववृत्तिरभावत्ववृत्तिश्च धर्मो विवक्षितः। तथा च यत्र भावत्वाभावत्वान्यतरत्वेन निश्चिते विशेषतः सन्दिग्धे पक्षधर्मे प्रमेयत्वव्याप्यत्वनिश्चयादस्मन्मते यत्प्रमेयत्वादनुमानं तन्मते तन्न स्यात्, तत्र पक्षधर्मे प्रमेयत्वव्याप्यतावच्छेदकस्य भावत्ववृत्तिधर्मस्याभावत्ववृत्तिधर्मस्य चानिश्चयादित्यर्थ इत्याहुः। तन्न, तथा सत्युभयथापि प्रमेय इति पुल्लिङ्गनिर्देशापत्तेरिति।

लिङ्गत्वाभावादिति। लिङ्गत्वावच्छेदकत्वाभावादित्यर्थः। भावाभावान्याप्रसिद्ध्या तदन्यरूपस्य तस्याप्रसिद्धत्वादिति भावः। **लिङ्गत्वादिति।** लिङ्गतावच्छेदकत्वादित्यर्थः। **लिङ्गमिति।** अयमालोको धूमो वा उभयथापि वह्निव्याप्य इत्यत्रेति शेषः। तत्राप्रसिद्ध्यभावादिति भावः। **यद्व्यतिरेकज्ञानमिति।** ग्राह्यातिरिक्तयद्व्यतिरेकज्ञानमित्यर्थः। अन्यथा ग्राह्याभावज्ञानप्रतिबध्ये ग्राह्यनिश्चये व्यभिचारापत्तेः।

अन्ये तु यद्व्यतिरेकज्ञानत्वावच्छिन्नं यत्प्रतिबन्धकमित्यर्थः। न च ग्राह्यविरहज्ञानत्वावच्छिन्नं तथा, ग्राह्यसंशयस्याप्रतिबन्धकत्वादित्याहुः। तन्न, एवमप्यव्यभिचारव्यतिरेकज्ञानत्वावच्छिन्नमव्यभिचारनिश्चयप्रतिबन्धकं, न च तन्निश्चयस्तद्धेतुरिति व्यभिचारवारणाय तद्विशेषस्यावश्यकत्वादिति। **न च धूमत्वेति।** न चाथेत्यादिना पौनरुक्त्यं, पूर्वमथेत्यादिना पक्षधर्मविषयस्य धूमो न वह्निव्याप्य इत्यस्य सामान्याकारस्यैव व्याप्यभेदज्ञानस्य प्रतिबन्धकत्वमुक्तम्, अधुना पक्षधर्मधूममात्रविषयस्य तथात्वमुक्तमित्यपौनरुक्त्यमित्येके। तन्न, न चेत्यत्रेदंपदवत्तत्रापि पक्षपदश्रवणादुभयत्रापि विशेषविषयत्वात्। न च तत्र पक्षधर्मपदं सामान्यपरं बाधकाभावादिति।

पक्षधर्मतया चावगतस्य भेदाग्रह एवानुमितिहेतुः, परामर्शहेतुतया तस्यावश्यकत्वात्। अत एवासन्निकृष्टधूमज्ञानादप्यनुमितिः। न चैवं गौरवं, तदा विशिष्टज्ञानानुपस्थितेः। न च जनकज्ञानाविरोधिनो ज्ञानस्याप्रतिबन्धकत्वाद् भेदग्रहो न प्रतिबन्धक इति वाच्यम्, अभेदज्ञानस्याजनकत्वात्, त्वयापि लिङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीकाराच्च। अथ गोत्वं मधुरत्वावान्तरजातिर्वा लिङ्गं न स्यात्, तद्गतधर्मान्तरस्याभावात्। अत एव तस्य विलक्षणत्वादिति चेत्? न, व्यक्तेरेव तत्र प्रकारत्वात्, न हि गौर्गोत्वमिति ज्ञानयोरविशेषः, अन्यथा गोत्वमिति ज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शे चानुपयोगात्, गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमित्यनुभवाच्च। न चैवमनवस्था, तदितरावृत्तित्वे सति तद्वृत्तित्वस्यानुभवेनापलापासम्भवात्।।

केचित्तु न चेत्यादेर्व्याप्त्यभावभ्रमपरत्वम्, अथेत्यादेर्व्याप्त्य(प्य)भेदभ्रमपरत्वमित्यपौनरुक्त्यमित्याहुः। तदपि न, इयं धूमव्यक्तिः वह्निव्याप्या नेति तदपर्यालोचनयाऽस्यापि व्याप्यभेदभ्रमपरत्वावसायात्। अत एवास्तु वेत्यादिना भेदाग्रहस्यैव हेतुत्वमुक्तदोषनिरासाय वक्ष्यति, न तु व्याप्त्यभावाग्रहस्येति। वस्तुतस्तु अथेत्यादिना संशयसाधारणं भेदज्ञानं प्रतिबन्धकमुक्तं, न चेत्यादिना तु निश्चयमात्रं तथोक्तमित्यपौनरुक्त्यमिति ध्येयम्।

अभेद[ज्ञान]स्येति। त्वयापि तादृशस्य जनकज्ञानाविरोधिनो भेदज्ञानस्य लिङ्गपरामर्शे प्रतिबन्धकत्वस्वीकारात्। तस्य कथं जनकज्ञानाविरोधित्वमत उक्त**मभेद[ज्ञान]स्येति**। न ह्यभेदज्ञानं परामर्शेऽपि जनकमिति कश्चिदभ्युपैति। तथा च व्यभिचारान्नायं विषय इत्यर्थः। न च ग्राह्यभिन्नत्वविशेषितेयं व्याप्तिरिति वाच्यम्, अप्रयोजकत्वादित्यत्र तात्पर्यम्। गोत्वे गोपदप्रवृत्तिनिमित्तत्वं धर्मान्तरमस्तीत्यत उक्तं **मधुरत्वेति**। तस्य मधुरत्वावान्तरजातेः पदविशेषप्रवृत्तिनिमित्तत्वमपि नास्तीति भावः। **व्यक्तेरिति**। व्यक्तिघटितधर्मस्येत्यर्थः। **न हीति**। न ह्यनयोः ज्ञानयोर्गोत्वविषयतायामविशेष इत्यर्थः। निर्विकल्पकत्वे गोरिति ज्ञानं यथा गोत्वांशे निर्विकल्पकम्, एवमस्यापि निर्विकल्पकत्वापत्त्येत्यर्थः। तथा चात्र व्यक्तिरेव प्रकार इति नाविशेष इति भावः। **अनुपयोगादिति**। व्याप्यतावच्छेदकाप्रतीतेरिति भावः।।

।। इति परामर्शपूर्वपक्षः ।।

।। अथ परामर्शसिद्धान्तः ।।

अत्रोच्यते-अयमालोको धूमो वोभयथापि वह्निव्याप्य इति ज्ञानं ततोऽनुमितिः। न च धूमत्वेनालोकत्वेन वा तत्र निश्चयः। अथ तदन्यान्यत्वमेव तत्र लिङ्गम्। न च तदज्ञानदशायामनुमितिदर्शनात् न तथेति वाच्यं, धूमालोकान्यान्यत्वज्ञानं विना तवापि तत्र व्याप्यत्वानिश्चयेन तदर्थं तद्बोधावश्यकत्वादिति चेत्? न, न हि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा व्याप्यतावच्छेदकं, गौरवात्, व्यभिचारावारकविशेषणवत्त्वाच्च, किन्तु धूमत्वादिकं, तच्च तत्र सन्दिग्धमेव।

ननु तदन्यान्यद्वह्निव्याप्यमेव, व्यभिचाराभावेन व्याप्तिविरहसाधनस्य बाधितत्वात्, पुरुषस्तु तत्र नीलधूमवत्त्वादित्यत्रेवाधिकेन निगृह्यते, न तु व्याप्यत्वासिद्ध्येति चेत्? न, तदन्यान्यद्धूमालोकस्वरूपमेव, तच्च व्याप्यमिति समम्। न च वस्तुगत्या व्याप्यज्ञानादनुमितिः, अतिप्रसङ्गात्। किन्तु व्याप्यतावच्छेदकप्रकारकज्ञानात्। न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकमित्युक्तम्। न चैवं तदन्यान्यत्वाद्वह्निव्याप्यत्वमपि तत्र नानुमेयं, व्यर्थविशेषणत्वादिति वाच्यं, प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनाद्व्याप्यत्वज्ञानं जनयति विशेषणज्ञान-विशेषण-विशेष्यसम्बन्ध-विशेषणविशेष्येन्द्रियसन्निकर्ष-तदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात्। न चैवं न प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम्, अन्वयव्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्ष-

लिङ्गमिति। लिङ्गतावच्छेदकमित्यर्थः। **व्यभिचारेति।** व्याप्तिग्रहानुपयुक्तविशेषण-वत्त्वादित्यर्थः। यद्वा मतभेदेनाह व्यभिचारेति। यथाश्रुतमेव **तदन्यान्यदिति।** क्वचित्तदन्यान्यमिति पाठः, तदा तदन्यदन्यद् यत इति बहुव्रीहिराश्रयणीयः। **तदन्यान्यत्वादिति।** धूमत्वालोकत्वान्यान्यधर्मवत्त्वादित्यर्थः। न तु धूमालोकान्यान्यत्वादित्यर्थः। तथा सति व्यर्थविशेषणत्वशङ्कानवकाशात्। प्रत्यक्षं हीत्यादिना व्यर्थविशेषणत्वमभ्युपेत्य परिहारासम्भवाच्च। न हि धूमालोकान्यान्यत्वे वह्निव्याप्तिव्याप्त्यवच्छेदकं धूमालोकान्यान्यत्वातिरिक्तमवच्छेदकं लघुधर्मान्तरमस्ति, येन व्यर्थविशेषणत्वं स्यात्। धूमालोकादौ वह्निव्याप्तिव्याप्यतावच्छेदकं धूमत्वादिकमेवास्तीति तत्र व्यर्थविशेषणत्वं गृह्यते। व्याप्यत्वाभिमते लघुनावच्छेदेन व्याप्तिग्रहे सम्भवति गुरुणा तदग्रहणात्। निरुक्ते च धूमत्वादेरेवावच्छेदकत्वात्, तदन्यान्यत्वं नावच्छेदकं, गौरवादित्यर्थः। **प्रत्यक्षं हीति।** तथा च प्रत्यक्ष-सामग्रीबलवत्त्वात्, अनुमितिसामग्रीसत्त्वेऽपि तज्ज्ञानस्यापि विशेषदर्शनत्वेनैवोपयोग इति भावः।

सहकारित्वात्। तस्मात्तदन्यान्यत्वज्ञानं तत्र व्याप्यताज्ञानोपक्षीणं न तु साक्षादनुमितिहेतुरिति। किञ्च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणमित्यन्यत्रापि तथा।

अथ वह्निव्याप्यत्वमपि वह्निव्याप्यतावच्छेदकं, तथाहि वह्निनिरूपिता धूमादिप्रत्येकवृत्तिरेव व्याप्तिर्व्याप्तित्वेन सकलधूमादिवृत्तिव्याप्त्यवच्छेदिका, आश्रयभेदेनावच्छेदकभेदेन च व्याप्तिभेदादिति चेत्? न, सकलधूमादिवृत्तिव्याप्तौ मानाभावात्। यत्र वह्निव्याप्यस्तत्र वह्निरिति व्याप्तिबुद्धौ शाब्दव्याप्यत्वबुद्धौ च प्रत्येकवृत्तिव्याप्त्याश्रयत्वस्यैव विषयत्वात्, प्रत्येकवृत्तिव्याप्तिज्ञानं विना तद्बोधाभावात्। अपि च यत्र धूमत्व-व्याप्त्योर्वैशिष्ट्यं प्रथममेव प्रत्यक्षेण युगपत्पक्षधर्मे भासते तत्र लाघवात् व्याप्यत्वज्ञानत्वमेव कारणतावच्छेदकम्। न चैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं दोषाय, सप्रमाणकत्वात्, कारणताग्रहदशायां फलमुखगौरवस्य सिद्ध्यसिद्धिभ्यामदोषत्वात्। न चासन्निकृष्टे धूमे तदभावः, भवन्मतानुमितिहेतुव्याप्तिस्मरणधूमत्वज्ञानसहितेन मनसा तदुत्पादात्, यथा परमाणुर्निरवयवद्रव्यं नित्यपरिमाणवत्त्वाद् आकाशवदित्यादौ प्रत्येकानुमानोपनीतातीन्द्रियसाध्यसाधनयोराकाशवृत्तितयास्मरणे व्यभिचाराज्ञाने

अथ वह्नीति[1]। तथा च यो वह्निव्याप्यवान् सोऽवश्यं वह्निमान् इति वह्निव्याप्यत्वावच्छिन्नसकलधूमादिवृत्तिमहाव्याप्तिज्ञानमत एवानुमितिरिति मदुक्तानुमितिसामग्री तत्राप्यस्त्येवेति भावः। ननु यो धूमवान् सोऽवश्यं वह्निमान् इति वत्, यो वह्निव्याप्यवान् स वह्निमानित्यनुभवाद् धूमत्वस्येव वह्निव्याप्तेरप्यवच्छेदकत्वमनुभूयत इत्युभयसिद्धम्। तत्रावच्छेद्यावच्छेदकभावप्रतीतेः व्याप्त्योर्भेद इति मयेष्यते। संसर्गतया प्रकारतया चैकैव व्याप्तिर्भासत इति त्वयोच्यत इत्यन्यदेतत्। तथा च व्याप्तिव्याप्यत्वेन ज्ञायमानधर्मप्रकारकपक्षधर्मताज्ञानस्य लाघवात् कारणत्वे सिद्धे शाब्दपरामर्शस्थलेऽपि तादृशव्याप्तिधीकल्पनान्नोक्तसामग्रीव्यभिचार इति पूर्वास्वरसादाह— **अपि चेति।** तथा च तत्र तादृशमहाव्याप्तिप्रतिसन्धानं विनाऽप्यनुमितिदर्शनेन यथोक्तपक्षधर्मताज्ञानस्य गौरवेणाहेतुतया व्यभिचार एवेति शाब्दपरामर्शस्थलेऽपि तत्कल्पनमप्रामाणिकमिति भावः। **फलमुखगौरवस्येति।** फलं विशिष्टज्ञानकारणताग्रहः, तन्मुरवमुपस्थितिबीजं यस्य तत्फलमुखं, तथा च विशिष्टज्ञानस्यासिद्धौ

१. "वह्निरिति" इति पाठो मातृकायाम्

मनसा व्याप्त्यनुभवः, अनुमानयोः प्रत्येकतदुभयसहचाराविषयत्वेन व्याप्त्यग्राहकत्वात्। न चातीन्द्रियव्याप्यत्वमतीन्द्रियेऽनुमेयं, तत्रापि व्याप्तिग्राहकाभावात्। न च तदुपनयसहितस्य मनसो बहिरर्थप्रमाहेतुत्वे उपनयस्य प्रमाणान्तरत्वम्, इन्द्रियादेः सन्निकर्षवदुपनयस्य नियतव्यापाराभावेन प्रमायामकरणत्वात्। सहकारिता च तदभावेऽपि बहिरिन्द्रियलिङ्गसादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थानां बाधकानवतारे मनसा संसर्गानुभवस्य सकलजनसिद्धत्वात्, कथमन्यथा कविकाव्यादिकमिति।

स्यादेतत्, पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेण, वह्नेरसन्निकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्वस्यायोग्यत्वात्। न च धूमत्वेन सकलधूमव्याप्यतावगमाद् धूमविशेषे संस्कारात् स्मरणाद्वोपनीतव्याप्याभेदग्रहः प्रत्यभिज्ञाने तत्ताविशिष्टस्येवेति वाच्यम्, एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानाद् धूमवद्विशेषे पर्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षेण वह्निमदभेदग्रहो वह्निमत्त्वग्रहो वास्तु किमनुमानेन। पृथक् वह्निमत्त्वस्मरणं तत्र नास्ति किन्तु व्याप्यवच्छेदकतयेति चेत्? न, वह्निमान्न वेति संशयानुरोधेन स्वतन्त्रवह्निमत्त्वस्मरणात्।

न च विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानत्वेन हेतुत्वं, गौरवात्। अथ यो यत्र विशिष्य पूर्वमगवतः स तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासते, यथा तत्ता प्रत्यभिज्ञाने। न च पर्वते विशिष्य पुरा वह्निरवगतः। यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशाच्चक्षुषा सुरभि चन्दनमिति ज्ञानम्, अन्यथानुमितिरिति चेत्? तर्हि पक्षधर्मधूमेऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात्तद्गतव्याप्तिबोधः प्रत्यक्षेण।

गौरवज्ञानस्यासत्त्वादेव न तत्कारणताग्रह(:?) परिपन्थित्वं, तत्सिद्धौ च तद्ग्रहैकमानकविशिष्टज्ञानमूलकस्य गौरवज्ञानस्य न तद्ग्रहपरिपन्थित्वम्, उपजीव्यविरोधादिति भावः। नन्वस्तु तर्कितं तथाविधगौरवज्ञानं प्रमाणप्रवृत्तिप्रतिबन्धकमिति चेत्? न, तर्कितगौरवज्ञानस्य प्रमाणप्रवृत्त्यप्रतिबन्धकत्वात्। अत एव लाघवेन कर्मधारयप्रवृत्त्या निषादस्थपत्यधिकरणे शूद्रस्य विद्याप्रयुक्तिरपूर्वा कल्प्यत इति तवापि सिद्धान्तः। अन्यथा तर्कितत‍थाविधगौरवज्ञानात्तत्कल्पना न स्यादित्यूह्यमिति। ननु सामान्यस्यौत्सर्गिकतया गुरोरप्युक्तधर्मस्यावच्छेदकत्वव्याप्यत्वापेक्षया सामान्यरूपत्वात्, सामान्ये बाधके सत्येव कल्पकप्रमाणस्य विशेषविषयत्वाभ्युपगमात्। अत एव सकर्तृकत्व उपाधिरूपतया गुरु कार्यत्वमेवावच्छेदकं न तु जातिरूपमपि घटत्वादिकमिति चेत्?, न, तत्र घटत्वादीनां

न च सहचारदर्शनजन्यसंस्कारसहितेनेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूमवत् पर्वतीयधूमे व्याप्त्यवगमो वह्नेस्तु न प्रत्यक्षसामग्री-सन्निकर्षाभावादिति वाच्यं, हेतुसाध्यसाक्षात्कारं विना प्रत्यक्षेण व्याप्त्यग्रहात्। न च पर्वते वह्निसाक्षात्कारः, न च पक्षधर्मस्य साध्यसामानाधिकरण्यविशेषो व्याप्तिः पक्षे साध्यग्रहं विना, इत्युक्तम्।

उच्यते-विशेषणज्ञानं तस्य विशेष्ये सम्बन्धस्तयोरसंसर्गाग्रहो विशेषदर्शने विशेषणविशेष्येन्द्रियसन्निकर्षो गौरयमित्यादियथार्थविशिष्टप्रत्यक्षकारणम्। अस्ति चात्रापि व्याप्तिस्मरणं स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वम्। एकैव हि सा व्याप्तिः तयोरसंसर्गाग्रहो धूमत्वविशेषदर्शनं व्याप्तिविशिष्टधूमेन्द्रियसन्निकर्षश्च व्याप्तिविशिष्टज्ञानकारणम्। न च वह्निविशिष्टज्ञानसामग्री, वह्नेरसन्निकर्षात्।

जातिरूपतया लघुत्वेऽप्यानन्त्यात् सामान्ये लाघवात् प्रमाणप्रवृत्तिः, तस्यैकत्वात्। अन्यथा व्यापारत्वस्यौत्सर्गिकतया तदपेक्षया यत्नत्वस्य जातिरूपतया लघुत्वेऽपि विशेषतया नाख्यातपदवाच्यत्वं स्यात्, व्यापारत्वस्यैव सामान्यतया तत्रैव प्रमाणप्रवृत्तेः। एवञ्च द्वयोः साम्ये विशेषणानां बहुत्वे वा सामान्यस्य बाधकं विना प्रमाणप्रवृत्तिविषयत्वं, न तु सर्वत्र, धूमालोकान्यतरत्वादेरप्यवच्छेदकत्वापत्तेः, धूमत्वापेक्षया तेषां सामान्यरूपत्वात्। न च घटत्वादिवद् धूमत्वादीनां बहुत्वात्कथमवच्छेदकत्वमिति वाच्यं, कार्यत्वस्य विशेषाघटितत्वात्, अन्यतरत्वादेश्च तद्घटितत्वादिति तत्रैव लाघवप्रवृत्तेरिति दिक्।

वह्नेरसन्निकर्षादिति। संयोगलक्षणसन्निकर्षाभावादित्यर्थः। ननु यथा व्याप्तौ ज्ञानमेव प्रत्यासत्तिस्तथा वह्नावपि ज्ञानमेव प्रत्यासत्तिरस्तु। तथा च पर्वते वह्निप्रत्यक्षापत्तिः। न च द्रव्येण समं संयोग एव बहिरिन्द्रियप्रत्यासत्तिरिति नैवमिति वाच्यं, गुणादिनापि समं संयुक्तसमवायप्रत्यासत्तिनियमे तत्रापि ज्ञानप्रत्यासत्त्यभावापत्तेः। प्रत्यभिज्ञाने च संयुक्तसमवायव्यभिचारवत् संयोगव्यभिचारोऽपि, पूर्वानुभूतधर्ममात्रस्य तथात्वेन द्रव्यस्यापि तथात्वादिति चेत्? मैवं, ज्ञानरूपया हि प्रत्यासत्त्या पर्वते वह्निप्रत्यक्षमापाद्यमानमलौकिकमेव स्यात्। न चालौकिकप्रत्यक्षसामग्री मानान्तरप्रतिबन्धिका, तस्याः समानेऽपि विषयेऽनुमित्यादिसामग्रीतो दुर्बलत्वात्। अन्यथा ज्ञानरूप-प्रत्यासत्तिघटितालौकिकप्रत्यक्षसामग्र्याः सर्वत्र सत्त्वेन मानान्तरमात्रविलयापत्तेः। शब्दादिस्थलेऽपि पदादिस्मारितपदार्थानां कविकाव्यमूलभूतज्ञानवत् मानैव प्रत्यक्षसंसर्गप्रत्ययसम्भवात्, बलवत्त्वस्य च फलबलकल्प्यत्वात्। तस्मात् समाने विषये लौकिकप्रत्यक्षसामग्र्याः बलवत्त्वात्, तत्सत्त्वे वह्निप्रत्यक्षमेव स्यान्नानुमितिरित्येव पराभिमतम्। तत्रेदमुत्तरम्- न लौकिकप्रत्यक्षसामग्री वह्नेरसन्निकर्षादिति।

कश्चित्तु धूमत्वे परम्परासम्बन्धेन वह्निव्याप्यत्वं पूर्वगृहीतं, तथा च संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पक्षवृत्तिधूमत्वे प्रत्यभिज्ञायते, तद्वृत्तित्वेन, पूर्वमनुभवात्। एवञ्च धूमत्वव्याप्यत्वपरामर्शादेवानुमितिरिति प्राह। भवतु तावदेवं, तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः। तथा च सर्वोपसंहारेण व्यक्तौ व्याप्तिग्रहार्थं सामान्यलक्षणाप्रत्यासत्त्युपादानमफलं स्यात्। दृश्यते च परम्परासम्बन्धज्ञानं विना जातिव्याप्तिमविदुषोऽपि धूमाद्वह्न्यनुमानम्, न हि व्याप्यतावच्छेदकतया भासमानस्यावश्यं व्याप्यताग्रहः, मानाभावात्। तस्मात् पक्षधर्मे व्याप्तिविशिष्टज्ञानं तदनन्तरं विशिष्टवैशिष्ट्यज्ञानं पक्षे वा तृतीयलिङ्गपरामर्शः।

अन्ये तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वं, तत्सामानाधिकरण्यञ्च व्याप्यत्वम्। तथा च लाघवाद् व्यापकताज्ञानमनुमितिहेतुः। साध्यस्य पक्षधर्मव्यापकताज्ञानञ्च परामर्शः। न तु साध्यव्याप्तस्य पक्षधर्मताज्ञानं साध्यव्याप्यवत्पक्षज्ञानं वा, गौरवात्।

अत एव यो यो धूमवान् सोऽग्निमानित्युदाहरणवाक्ये साध्यायोगव्यवच्छेदेन धूमव्यापकता वह्नेरुपदर्श्यते, अन्यथा वह्निमानेव धूमवानित्यन्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात्। दोषोऽपि व्यभिचारादिर्न पक्षधर्मव्यापकं साध्यमित्येवोद्भाव्यः।

जयदेवमिश्रास्तु — विशेष्यस्य विषयविशेषतया तत्सन्निकर्षत्वापेक्षया विषयसन्निकर्षत्वेन हेतुत्वे लाघवाद् विशेषणसन्निकर्षोऽपि हेतुः। न चैवं विशेषणविशेष्यसन्निकर्षद्वयकारणत्वे गौरवमिति वाच्यम्, अवच्छेदकलाघवे व्यक्तिगौरवस्यादोषत्वात्, अन्यथा सामान्यकल्पनोच्छेदापत्तेरित्याहुः। तच्चिन्त्यम्, एवं हि पर्वते वह्निप्रत्यक्षं स्यादेव, पर्वतरूपविषयसन्निकर्षसत्त्वात्, कारणतावच्छेदकावच्छिन्नयत्किञ्चित्सत्त्व एव कार्योत्पत्तेः। विशेषणसन्निकर्षेऽपि विशेष्यासन्निकर्षेऽपि तद्विशिष्टप्रत्यक्षापत्तेश्च। न च यावद्विषयसन्निकर्षत्वेन हेतुत्वमिति वाच्यम्, एतदपेक्षया विशेष्यसन्निकर्षत्वस्यैव लघुत्वात्। संसर्गस्य पूर्वाज्ञातस्यैव भानाभ्युपगमेन भ्रमस्थले तत्सन्निकर्षासम्भवेन व्यभिचाराच्चेति।

पक्षधर्म इति। पर्वतवृत्तिर्धूमो वह्निव्याप्य इत्याकारकं ज्ञानमित्यर्थः। **तदनन्तरमिति।** अनुमितेः पक्षविशेष्यकत्वनियमपक्षे तज्जनकपरामर्शस्यापि तथात्वात्। विशिष्टवैशिष्ट्यज्ञानं, वह्निव्याप्यधूमवानयम् इत्याकारकज्ञानमित्यर्थः। **अत एवेति।** यो यो धूमवानित्यनेन धूमवति वह्नेरत्यन्ताभावो व्यवच्छिद्यते। तेन तादृशात्यन्ता-

अथ पर्वतवृत्तिधूमव्यापको वह्निरिति परामर्शो यदि तदा पर्वतीयधूमं प्रति व्यापकतायाः पर्वतधूमसामानाधिकरण्यनैयत्यात् पर्वतवह्निः परामर्शविषय एवेति किमनुमेयमिति चेत्? तर्हि पर्वतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्यसामानाधिकरण्यभाननियतमिति व्याप्यत्वभानेऽपि तुल्यम्। यदि च स्मृता व्याप्तिर्धूमेऽवगम्यते तदा व्यापकत्वेऽपि समानम्। वस्तुतस्तु व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं, न तु धूमसामानाधिकण्यं, व्याप्यत्वन्तु सामानाधिकरण्यविशेष इति तवैवानुमितिरफला स्यात्। न चैवं परामर्शस्य चाक्षुषत्वं न स्यात्, व्यापकस्य विशेष्यस्येन्द्रियासन्निकर्षादिति वाच्यम्, इष्टत्वात्। असन्निकृष्टधूमादाविव मानस एव हि सर्वत्र परामर्शः। चक्षुरन्वयव्यतिरेकानुविधानञ्च पक्षवृत्तिधूमोपनयोपक्षीणम्।

अथ जनकज्ञाने उपसर्जनतया भातस्य पक्षस्य पर्वतादेरनुमितौ प्राधान्येन भानं न स्यात्। न हि जनकज्ञाने उपसर्जनतयावगतं जन्यज्ञाने प्राधान्येन भासते, तथादर्शनात्। न चानुमितेस्तथात्वमसिद्धं, पर्वतोऽयं वह्निमानित्यनुमितेर्लोक-सिद्धत्वादिति चेत्? न, पुरुषस्य दण्ड इति ज्ञानानन्तरं दण्डी पुरुष इति ज्ञानजन्यज्ञानदर्शनात्। अन्यथा तवापि कथं पक्षविशेष्यकत्वनियमः, न हि कारणीभूतज्ञाने यद्विशेष्यतया भासते तत्कार्यीभूतेऽपि तथा, इह भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमिति ज्ञाने तत्र च व्यभिचारात्। तस्मात् पक्षवृत्तिलिङ्गपरामर्शस्यायं स्वभावो यत्स्वाश्रयविशेष्यिकामनुमितिं जनयति नातथाभूताम्। एवं ममापि तुल्यमिति।

भावाप्रतियोगित्वं साध्यस्य प्रतिपाद्यते। वह्निमानेव धूमवानित्यनेन वह्न्यभाववान्न धूमवानिति वह्निविरहवद्व्यावृत्तत्वं धूमनिष्ठं प्रतिपाद्यते। तदेव च व्याप्यत्वमिति तद्बोधस्यानुमितिहेतुत्वेऽन्ययोगव्यवच्छेदेनैवोदाहरणं स्यादित्यर्थः। अत्रेदमनभिमतिबीजं, जनकज्ञानस्य यावद्विषयतया जनकत्वं तावन्मध्ये यत्तत्र प्राधान्येन भासते तदेव जन्यज्ञानेऽपि तावन्मध्ये प्राधान्येन स्फुरतीति नियमः। पुरुषस्य दण्ड इति ज्ञानस्य च दण्डी पुरुष इति ज्ञाने दण्डमात्रविषयतयैव जनकत्वमतो न व्यभिचार इत्याहुः। तच्चिन्त्यं, भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमिति ज्ञाने तथापि व्यभिचारात्, तज्ज्ञानस्य भूतलविषयतयापि जनकत्वात्। लाघवेनाभावप्रत्यक्षत्वावच्छिन्न एवाधिकरणज्ञानस्य हेतुत्वादिति।

एवं लिङ्गपरामर्श एव कारणं न तु परामृष्यमाणं लिङ्गम्। अथ परामर्शमात्रं न हेतुरपितु लिङ्गपरामर्शः। तथा च लिङ्गमपि हेतुः, विशिष्टकारणताग्राहकमानेन बाधकं विना विशेषणस्यापि हेतुत्वग्रहात्। न च लिङ्गं परामर्शपरिचायकत्वेनान्यथासिद्धं, परिचेये विशेषणान्तराभावेन लिङ्गमेव विशेषकं, तथा चानन्यथासिद्धत्वात् तदपि हेतुः। अन्यथा परिचायकतया संयोगेनान्यथासिद्धमिन्द्रियमपि कारणं न स्यात्। अपि च धूमवान् वह्निमानिति धूमसमानकालवह्निविषया धूमविशेषणिकानुमितिः ज्ञायमानविशेषणजन्या विशेषणसमानकालतया विशेष्यविषये शाब्दविशिष्टज्ञानत्वाद् दण्डी पुरुष इति प्रत्ययवत्। अत एव ज्ञायमानविशेषणजन्यत्वेन विशेषणकालवृत्तितया विशेष्यभाननैयत्यं, यथा दण्डी पुरुष इति प्रत्यक्षे। तेन धूमसमानकालीनवह्निसिद्धिः। अन्यथा तद्धूमकालवृत्तिवह्न्यनुमानं न स्यात्, समयविशेषमन्तर्भाव्य व्याप्त्यग्रहात्। किञ्च लिङ्गकरणत्वपक्षे परामर्श एव तद्व्यापारः परामर्शस्य तु न व्यापारान्तरमस्ति चरमकारणत्वादिति न तत् करणम्।

अत्रोच्यते–अतीतानागतधूमादिज्ञानेऽप्यनुमितिदर्शनान्न लिङ्गं तद्धेतुः, व्यापारपूर्ववर्तितयोरभावात्। न च विद्यमानं लिङ्गान्तरमेव तद्धेतुः, तदा तस्यापरामर्शात् परामर्शाविषयस्य कारणताग्राहकाभावात्, भाविनि पक्षे व्यक्त्यैक्यमेव वा यत्र लिङ्गं तत्र लिङ्गान्तराभावाच्च। यदि च वर्तमानमेव तत्र लिङ्गं तदा वर्तमानवह्न्यनुमानोपपत्तिः। अथ भाविभूतं वा धूमादि न लिङ्गं, किन्तु तत्प्रागभावस्तद्ध्वंसश्च वर्तमान एव, तयोरपि वह्निसमानदेशत्वनियमादिति चेत्? न, अतीतभाविदिनवृत्तितया निश्चिताद् वर्तमानतया सन्दिग्धाद् धूमादनुमितौ हि न प्रागभावध्वंसौ लिङ्गे, तयोः सन्दिग्धत्वात्। नापि धूमः, तस्यावर्तमानत्वात्। किञ्च भूत-भावि-वर्तमानत्वाविषयात् पर्वते धूम इति ज्ञानाद्यत्रानुमानं तत्र का गतिः। सर्वत्र प्रागभावाद्यन्यतमवत्त्वं धूमाद्यत्यन्ताभावाभाववत्त्वं वा लिङ्गमिति चेत्? न, व्यर्थविशेषणत्वेन तेषामलिङ्गत्वात्, अन्यतमत्वाद्यज्ञानेऽपि धूमज्ञानादनुमितिसत्त्वाच्च। अपि च न धूमप्रागभावादि लिङ्गं, न वा तद्धीरनुमितिकारणं, प्रागभावादीनां व्यर्थत्वात्, आवश्यकधूमज्ञानादेवानुमिति-

वस्तुतस्त्वनुमितौ पक्षविशेष्यकतानियम एव नास्ति। तथा चानियतविशेष्यकात् परामर्शादनुमितिर्भवन्त्यनियतविशेषितैव। परामर्शानुमित्योः समानविशेष्यकतायां हि नियमः, न तु पक्षविशेष्यकत्वे। तथा सति ह्यनुमितिस्वाभाव्यं पक्षविशेष्यकत्वपर्यन्तं जनकतावच्छेदकतया कल्प्यमुभयथापि गौरवमेव। तस्मादनियतपरामर्श एव हेतुः। व्याप्तिपक्षधर्मतासामानाधिकरण्यज्ञानत्वेन हेतुत्वादिति संक्षेपः।

सम्भवाच्च। किञ्च लिङ्गं नानुमितिमात्रे हेतुः, लिङ्गं विनापि धूलीपटलात् लिङ्ग-भ्रमेणानुमित्युत्पत्तेः। नापि लिङ्गं प्रमानुमितौ, परामर्शोऽनुमितिमात्रे हेतुः, तद्विशेषप्रमात्वाप्रमात्वाभ्यामेवानुमितितथात्वात्, यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वात्।

अथ परामर्शस्य प्रमात्वं विद्यमानलिङ्गविषयत्वं, तथा चायातं लिङ्गस्य प्रमानुमितिहेतुत्वमिति चेत्? न, भाविना भूतेन वा यदा कदाचिद्विद्यमानेनापि लिङ्गेन परामर्शप्रमात्वसम्भवान्नानुमितिपूर्वसमये तत्प्रमात्वानुरोधेन। लिङ्गस्य सत्त्वं कारणत्वं वा, धूमकालीनवह्न्यनुमानञ्च यदा यत्र धूमस्तदा तत्र वह्निरिति व्याप्तिज्ञानादेव। अथवा धूमकालः पक्षतावच्छेदकः, पक्षतावच्छेदकधर्म-समानाधिकरणञ्च पक्षधर्मताबलात् साध्यं सिध्यतीति धूमकालीनवह्निसिद्धिः।

यत्तु व्यापाराभावान्न परामर्शः करणमिति, तत्तथैव, किन्तु व्याप्तिज्ञानं करणं परामर्शो व्यापारः। न च परामर्शस्य संस्कारो व्यापारः, परामर्शस्य च चरमकारणत्वेन संस्कारोत्पादनसमयेऽनुमित्युत्पादनात्।

किन्तु व्याप्तिज्ञानमिति। यत्र व्याप्यज्ञाने सति व्याप्यविशिष्टपक्ष-ज्ञानात्मकपरामर्शस्तत्र व्याप्यज्ञानस्यापि व्याप्तिविषयतया परामर्शद्वारा कारण-त्वसम्भवादिति भावः।

अत्र वदन्ति - यत्र पर्वतवृत्तिधूमे वह्निव्याप्तिरित्याकारकाद् व्याप्तिविशेष्यकात् व्याप्तिज्ञानाजन्यपरामर्शादनुमितिस्तत्रोक्तकरणालाभः, विनिगमनाविरहात्, तथाविधपरामर्शस्याप्यनुमितिजनकत्वात्, परामर्शानुमित्योरेव समानविशेष्यकत्वनियमात्। सामग्रीवैचित्र्येण नियतरूपतानुपपत्तेश्च। किञ्च यत्र विशकलितानां व्याप्तिशरीरप्रविष्टसहचारादिपदार्थानां स्मरणे सति, विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेन विशिष्टवैशिष्ट्यावगाहिपरामर्शोत्पादादनुमितिस्तत्र परामर्शद्वारा व्याप्तिज्ञानस्य करणत्वं न सम्भवति, तत्पूर्वं व्याप्तिज्ञानस्यासत्त्वात्। अपि च यत्र स्मृतिरूपपरामर्शादनुमितिस्तत्रापि तदसम्भवः। न च तत्र पूर्वानुभवरूपमेव व्याप्तिज्ञानं करणमिति वाच्यं, तस्यानुमित्यजनकीभूतसंस्कारेणैव व्यवहितत्वात्, व्यापारमात्रस्यैव कारणाव्यवधायकत्वोपगमात्। अन्यथा यागादेः स्वर्गादिहेतुतारक्षार्थं तज्जन्यापूर्वस्य तद्व्यापारत्वसिद्धये स्वर्गजनकत्वकल्पनानापत्तेः। अत एवाहुः स्वाङ्गमव्यवधायकमिति। न च तत्रानुमितौ संस्कारोऽपि जनकः, स्मृतित्वापत्तेः। अनुमित्यन्तरे व्यभिचाराच्च। न च व्यभिचारज्ञानविरहसहकृतं सहचारज्ञानमेव करणं, परामर्शो व्यापार इति वाच्यं, स्मृत्यात्मकपरामर्शाद्यत्रानुमितिस्तत्र व्यभिचारात्। वस्तुतस्तु स्मृतिरूपपरामर्शे तज्जनकपूर्वानुभवस्य प्रत्यक्षरूपपरामर्शे च

व्याप्तिज्ञानस्योपक्षीणत्वादन्यथासिद्धत्वमेव, कुतः कारणत्वं, कुतस्तरां तद्विशेषकरणत्वम्। अन्यथा स्मृतिजन्ये प्रत्यभिज्ञादौ पूर्वानुभवस्य विशिष्टज्ञानजन्ये विशिष्टवैशिष्ट्यप्रत्यक्षादौ च विशिष्टज्ञानजनकविशेषणज्ञानस्यापि करणत्वापत्त्या बहुव्याकुलं स्यात्। अनुमितौ व्याप्तिज्ञानवत् परामर्शजनकं पक्षतावच्छेदकधर्मादिरूपविशेषणज्ञानमपि करणं स्यात्। न चानुमितौ करणानुपपत्त्या सर्वत्रानुमितिपूर्वं व्याप्तिज्ञानं तत्करणं कल्पनीयमिति वाच्यं, परामर्शरूपासाधारणव्यापारद्वारा मनस एवासाधारणीभूततत्करणत्वसम्भवात्। तदुक्तं **प्रमेयभाष्ये** मनोलक्षणावसरे स्मृत्यनुमित्यादिकरणत्वेन मनस्साधितमिति। तस्मान्मनः करणं, तृतीयलिङ्गपरामर्शो व्यापार इति **यज्ञपत्युपाध्यायाः।**

जयदेवमिश्रास्तु-अनुमितौ मनसः करणत्वे तस्या औत्प्रेक्षिकज्ञानवत् मानसाध्यक्षतापत्तेः। करणान्तरासहकृतमनोजन्यत्वस्यैव मानसत्वनियामकत्वात्। न च तथा परामर्श एव करणान्तरमव्यापारकत्वात्। तस्मात्परामर्शजनकज्ञानत्वेन व्याप्त्यादिज्ञानानां सर्वेषां करणता, परामर्शश्च व्याप्तिपक्षधर्मतासामानाधिकरण्यावगाहिज्ञानमिति न क्वाप्यव्याप्तिः। मननव्यापारे किं श्रवणत्वादिनेव श्रवणादिप्रतिपत्तीनामुक्तकरणत्वम्। न च विशेषणविशेषणज्ञानस्य विशिष्टवैशिष्ट्यावगाहिज्ञान इव हेतुहेतुतया व्याप्तिज्ञानादीनामन्यथासिद्धिरिति वाच्यं, येन रूपेणान्यथासिद्धिस्तदन्येन हेतुत्वाविरोधात्। कुलालपितृत्वेनान्यथासिद्धस्यापि कुलालपितुः कुलालत्वेन जनकत्वाभ्युपगमात्। तदिहापि रूपान्तरेणान्यथासिद्धस्यापि रूपान्तरेण जनकत्वाविरोधात्। न चात्र कारणताग्राहकाभावः, अत्राप्यन्वयव्यतिरेकयोः सत्त्वात्। तदभावेऽपि क्रियायाः करणजन्यत्वानुमानस्यैव परिशेषपर्यवसितस्य तद्ग्राहकस्य विद्यमानत्वात्। न चैवं पक्षतावच्छेदकज्ञानादेरपि करणत्वं स्यात्, इष्टापत्तेः। स्मृत्यात्मकपरामर्शस्थले च पूर्वानुभवस्यैव तथात्वेन करणत्वात्। परामर्शे संस्कारद्वारा, अनुमितौ च परामर्शद्वारा जनकत्वाविरोधात्। न च संस्कारजन्यत्वेऽनुमितेः स्मृतित्वापत्तिः, संस्कारस्याजनकत्वात्। न च व्यापारजनकव्यापारस्याप्यनुमितिजनकत्वापत्तिरिति वाच्यं, संयोगजनकचक्षुःकर्मणा प्रत्यक्षाजनकेन व्यभिचारात्। (नतदपि।?) न च तदपि घटकर्मणा चक्षुःसयोगेन प्रत्यक्षोत्पत्तौ व्यभिचारात्। न च संयोगजनककर्मत्वेन जनकत्वान्न व्यभिचार इति वाच्यं, प्रमाणाभावेन तथाजनकत्वासिद्धेः। अस्तु वा परामर्शजनकत्वेनैव करणता, न तु ज्ञानत्वं तत्र प्रविष्टम्। तथा चास्तु संस्कार एव तत्र करणम्। न चानुमितेः स्मृतित्वापत्तिः, संस्कारत्वेनैव जनकत्वे तथात्वात्। अन्यथा लिङ्गकरणतापक्षः (क्षे) संस्कारलिङ्गकानुमितौ का गतिः। संस्कारध्वंसे वा का गतिः। वस्तुतः

समानविषयसंस्कारजन्यत्वेन स्मृतित्वम्, अत एव परामर्शः करणं, संस्कारो व्यापार इत्यत्र समसमयोत्पत्तिकत्वं बाधकं वक्ष्यति, न तु फलस्य स्मृतित्वापत्तिमित्याहुः। तच्चिन्त्यं, न हि करणान्तरासहकृतमनोजन्यत्वेनैव मानसाध्यक्षत्वं, स्मृतेरपि मानसाध्यक्षत्वापत्तेः तत्रापि करणान्तरासहकृतस्यैव संस्काररूपसहकारिसहकृतस्य मनसो जन्यत्वम्। संस्कारस्य च न करणत्वं, व्यापाराभावात्। किन्तु मानसाध्यक्षसामग्रीजन्यत्वेन मानसाध्यक्षत्वं प्रत्यक्षसामग्रीजन्यत्वेन प्रत्यक्षत्वमिव प्रकृते सा सामग्री प्रतिबन्धि(न्ध)काभावघटिता वाच्या। प्रतिबन्धिका च मित्यन्तरसामग्री फलबलात्। अन्यथा सर्वत्र मानसाध्यक्षतैव स्यात्। तथा च मानान्तरोच्छेदः। तेन मानान्तरासहकृतमनोजन्यत्वेन मानसाध्यक्षत्वे मित्यन्तरसामग्रीविरहः प्रतिबन्धकः। स च मित्यन्तरसामग्रीविरहो मनःकरणकत्वेऽन्यकरणकत्वे वा नास्त्येवेति, सर्वत्र तृतीयलिङ्गपरामर्शरूपाया मित्यन्तरसामग्र्याः सत्त्वात्। अत एव सुखादिसाक्षात्कारे न मानसाध्यक्षं, कविकाव्यादिवत्। किन्तु तद्विजातीयमेव प्रत्यक्षं, मित्यन्तरसामग्रीसत्त्वात्। अन्यथा तत्रापि मानान्तरासहकृतमनोजन्यत्वेनौत्प्रेक्षिक-कविकाव्यादिमूलभूतमानसाध्यक्षवत् मानसाध्यक्षत्वं स्यात्। तदुक्तं **शशिधरे** न हि मनोजन्यत्वेन मानसत्वं, किन्त्वसाधारणकारणनिरपेक्षमनोजन्यत्वेन। न चानुमित्यादौ तथा, परामर्शादेरसाधारणस्य कारणस्यापेक्षणादिति। औत्प्रेक्षिकस्य च कविकाव्यादिमूलभूतज्ञानस्य तथाभावात् मानसत्वमेव। अत एव च **प्रमाणटीका**-न हि मनोनिमित्तमेतावतैव मानसं प्रत्यक्षं भवति। तथा सति न किञ्चिदमानसं स्यात्। प्रत्ययमात्रस्यैव मनोनिमित्तत्वात्। यद्वा प्रमित्यन्तरप्रागभावासहकृतमनोजन्यत्वं मानसत्वप्रयोजकं, लाघवात्। इन्द्रियत्वेन मनोजन्यत्वं वा तथा। यथा तवैव संस्कारत्वेन संस्कारजन्यत्वं स्मृतित्वप्रयोजकमिति कथमनुमितेर्मानसाध्यक्षत्वमिति। यदपि परामर्शजनकत्वेन करणत्वमित्यादि, तदपि न, यदि परामर्शजनकज्ञानत्वेन करणत्वं तदा शाब्दपरामर्शजनकाकांक्षासत्त्वे योग्यताज्ञानानां व्याप्तिविशिष्ट-पक्षधर्मस्मृतिहेतोः सदृशदर्शनादेरप्यनुमितिजनकत्वापत्तेः। न चेष्टापत्तिः, आकांक्षादिज्ञानानां तथाव्यवहाराभावात्। व्यवहारसिद्धे हि लक्षणं, न तु लक्षणानुरोधेन व्यवहारसिद्धिरिति प्रसङ्गादिति सिद्धान्तात्। किञ्च व्यापारजनकत्वस्य फलजनकतावच्छेदकत्वे विषयेन्द्रियसंयोगजनकत्वेन लाघवाज्जनकत्वापत्तौ विषयत्वेन्द्रियत्वादिना जनकत्वाभावापत्तेः, गौरवात्। अपि च गङ्गास्नानयागयोरप्येवं धर्मजनकत्वेन स्वर्गजनकत्वापत्तौ तत्र वैजात्यकल्पनापत्तेः। बहुवित्तव्ययायाससाध्ययोः प्रवृत्त्यन्यथानुपपत्त्या फलवैजात्यकल्पनेऽपि समानवित्तव्ययायाससाध्ययोस्तत्कल्पना-नुपपत्तेरबाधनात्। यदपि परामर्शजनकत्वेनैवास्तु करणत्वं, तदपि न, परामर्श-प्रागभावादेरप्यनुमितिकरणत्वापत्तौ ज्ञानाकरणकज्ञानत्वेनानुमितेः प्रत्यक्षत्वापत्तेः।

नापि तर्कः, व्याप्तिग्राहकस्य विषयपरिशोधकस्य वा तस्य तदजन्यत्वादिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ परामर्शप्रकरणं समाप्तम्

वस्तुतस्तु परामर्शप्रागभावस्य नानुमितिकरणत्वं, परामर्शेणान्यथासिद्धतया तद्धेतुत्व एव मानाभावात्। किञ्चैवं लाघवात् परामर्शपूर्ववर्तित्वेनैवानुमितिहेतुत्वमस्तु, न तु परामर्शजनकत्वेन, नियमानन्यथासिद्धिघटितत्वेन तस्य गुरुत्वात्। तथा चाकाशादीनामपि तत्कारणत्वापत्तिः, अवच्छेदकलाघवेन व्यक्तिगौरवस्यादोषत्वात्। तथा च सुतरामतिप्रसङ्गः। अपि च विशेषणविशेषणज्ञानवत् परामर्शोपक्षीणानां पूर्वानुभवव्याप्तिस्मरणादीनां परामर्शजनकत्वेनानुमितिहेतुत्वमन्वयव्यतिरेकाभ्यां, कल्पनीयानुमितौ करणान्तरानुपपत्त्या वा? नाद्यः, तदभावात्, परामर्शे सति तद्व्यतिरेकेणानुमितिव्यतिरेकासिद्धेः। नान्त्यः, मनस एव तत्करणत्वसम्भवात्। तथापि किं विनिगमकमिति चेत्? मनसोऽनुमितिहेतुत्वस्य क्लृप्तत्वात्। परामर्शप्रागभावादीनां तद्धेतुत्वेनाक्लृप्तत्वात् प्रागभावत्वापेक्षया मनस्त्वस्य जातितया लघुत्वाच्च। तस्मान्मनः करणं तृतीयलिङ्गपरामर्शो व्यापारः। न च मनःकरणकत्वेऽनुमितेः ज्ञानाकरणकत्वेन प्रत्यक्षत्वापत्तिरिति वाच्यं, मन्मते तस्य प्रत्यक्षलक्षणत्वासिद्धेरित्युक्तत्वादित्यु**पाध्यायोक्त**मेवेति संक्षेपः।

अत्रास्मदुपाध्यायाः व्याप्तिज्ञानं करणमिति यथाश्रुतग्रन्थ एव सम्यक्। तथा हि यत्र परामर्शे पूर्वव्याप्तिज्ञानं तत्र तत्करणमित्यर्थात्। न चैवं सर्वत्र तन्न करणमित्यायातम्। किमेतावता, न हि सर्वत्र तदेव करणमिति मूलग्रन्थार्थः। किन्तु तत्करणमिति, स च क्वचित्तत्करणत्वेऽपि निर्वहत्येव। न च तथा सति करणाननुगमः, क्षत्यभावात्। न हि दात्रेण धान्यं लुनातीत्यत्र धान्यलवने दात्रस्यैव करण[त्व]नियमः, खड्गादेरपि तत्करणत्वात्। न च कार्याननुगमक्षतिः, व्याप्तिज्ञानरूपकारणानुगमेनैव तद्विधूननात्। अत एव व्यतिरेकिग्रन्थेऽनुमितिमात्रे व्याप्तिज्ञानस्य प्रयोजकत्वादिति ग्रन्थकारो वक्ष्यति। व्याप्तिश्च हेत्वधिकरणवृत्त्यन्यसामानाधिकरण्यमिति न क्वाप्यनुपपत्तिः। अत एव चान्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुरित्युक्तम्। हेत्वधिकरणवृत्त्यन्यत्वस्यान्योन्याभावघटितत्वात्। किञ्चास्तु या काचन करणगतैकरूपनिरुक्तिः, न हि सात्र प्रयोजिका, तेन रूपेण व्याप्तिज्ञानादीनामजनकत्वात्। व्याप्तिज्ञानत्वादिरूपेण व्याप्तिज्ञानादीनां जनकत्वाभ्युपगमादिति यथाश्रुतग्रन्थेनैव सर्वसामञ्जस्ये कथमपदार्थव्याख्यानाय मान्यानां निर्बन्ध इति चिन्त्यम्।

तदजन्यत्वादिति। यद्यपि यदि निर्वह्निः स्यान्निर्धूमः स्यादिति निर्धूमत्वापादने धूमवत्त्वोपलम्भः कारणमेव, अन्वयव्यतिरेकाभ्यां तथावधारणात्। अन्यथा

धूमाभावोपलम्भे धूमानुपलम्भस्याप्यहेतुत्वापत्तेः, अन्वयव्यतिरेकयोस्तुल्यत्वात्। निर्धूमोऽयं निर्धूमः स्यादित्यनयोः प्रतीत्योः वैलक्षण्येन विचित्रहेतुत्वकल्पनाच्च। निर्धूमत्वेन ज्ञाते निर्धूमः स्यादित्यापादनासम्भवाच्च। न च धूमोपलम्भे सत्यपि नियमेन तत एव निर्धूमत्वापादनसम्भवेन धूमोपलम्भस्यान्यथासिद्धत्वादहेतुत्वं, धूमानुपलम्भस्य च धूमाभावोपलम्भे पृथगन्वयव्यतिरेकानुविधानाद्धेतुत्वमिति वाच्यम्, आपाद्यविपरीतनिश्चयं विनाऽऽपादनानुपपत्तेस्तस्यापि पृथगन्वयाद्यनुविधानकत्वात्। निर्वह्नावपि यदि निर्वह्निः स्यात्तदा निर्धूमः स्यादिति पराभ्युपगमेन तर्कप्रवृत्तौ व्याप्यारोपाभावेन तस्यासार्वत्रिकत्वेनानियामकत्वात्। व्यापकाभाववत्तया निश्चिते व्याप्याभ्युपगम एव यद्यारोपस्तदा धूमवत्त्वज्ञानस्यानन्यथासिद्धतया हेतुत्वमेव। व्यापकाभाववत्तया निश्चयस्य तर्कप्रवृत्तावुपयोगादिति विषयपरिशोधकतर्कस्य परामर्शजन्यत्वमेव। तथापि तर्कस्य विषयपरिशोधकत्वं विरोधिशङ्कानिवर्तकत्वं, तादृशशङ्काविरहश्च यत्र स्वतःसिद्धस्तत्र तर्कावतारं विनैवानुमितिरिति व्यभिचारेण तस्याहेतुत्वम्। यत्र तादृशशङ्कावतारस्तत्र तदपनायकतया, विघ्नध्वंसफलकमङ्गलवदन्यथासिद्धत्वमित्यत्र तात्पर्यमिति भावः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां परामर्शप्रकरणं समाप्तम्

।। केवलान्वय्यनुमानप्रकरणम् ।।

तच्चानुमानं त्रिविधं केवलान्वयि-केवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्। तत्रासद्विपक्षं केवलान्वयि, तथाहि केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः, अभिधानेऽनभिधाने च विपक्षत्वव्याघातात्। अथ यथा आकाशशब्दाच्छब्दाश्रयत्व-मनभिधेयमप्युपतिष्ठते, तथाभिधेयत्वविपक्षस्याभिधेयत्वेऽपि पदादुपस्थितिः स्यात्। एवञ्चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्मत्वाद् गोत्ववदिति चेत्? न, व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्वयि, व्यावृत्तत्वे यत एव व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्वयीति धर्मत्वस्यानैकान्तिकत्वात्। एवमत्यन्ताभाव-प्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वेऽत्यन्ताभावप्रतियोगित्वमेव केवलान्वयि, अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि। न चात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वञ्च नानेति वाच्यम्, अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः। तत्र न तावदव्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी, तस्य प्रतियोग्यवच्छिन्नेऽप्यत्यन्ताभावात्, अत्यन्ताभावाप्रतियोगिनश्च केवलान्वयित्वात्। नाप्याश्रयनाशजन्यगुणनाशात्यन्ताभावः, तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यं, यत्र हि प्रतियोगिप्रागभावो वर्तते तत्र न तदत्यन्ताभावो वर्तते, तथा च नाशस्य प्रागभावो यत्र नाशप्रतियोगिसमानदेशे वर्तते तत्र कथं नाशात्यन्ताभावो वर्तताम्। तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेत्? न, पूर्वं तत्र नाशप्रागभावस्यैव सत्त्वादुत्तरकाले आश्रयस्यैवाभावात्। नाप्याकाशात्यन्ताभावः केवलान्वयी, तस्यापि प्रतियोगिरूपात्यन्ताभावप्रतियोगित्वात्, अभावात्यन्ताभावस्य भावत्वात्।

अथाभावात्यन्ताभावो न प्रतियोगिरूपः, तथासत्यन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगिसमानदेशोऽन्योन्याभावो न स्यादिति चेत्? न, अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव। अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्ति-रसाधारणो धर्म इति।।

तच्चानुमानमिति। अनुमानविषयीभूतं लिङ्गमित्यर्थः। विषयत्रैविध्येनैव विषयित्रैविध्य- (ध्यादिति?) मिति भावः। **प्रतियोग्येवेति।** न च प्रतियोगिप्रागभावादिरपि तथेति कथमवधारणमिति वाच्यं, तस्यापि प्रतियोगित्वात्, घटात्यन्ताभावस्यैव तत्प्रागभावाद्यत्यन्ताभावरूपत्वादिति भावः।।

।। केवलान्वय्यनुमानपूर्वपक्षः ।।

।। अथ केवलान्वय्यनुमानसिद्धान्तः ।।

उच्यते–वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्, आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी तथापि स न वृत्तिमानित्याकाशात्यन्ताभाव एव केवलान्वयी। तथा प्रमेयत्वाभिधेयत्वादि केवलान्वयि, वृत्तिमतोऽत्यन्ताभावस्याप्रतियोगित्वात्। न च प्रमेयत्वं प्रमाविषयत्वं, तच्च न केवलान्वयि, प्रमाया विषयत्वस्य चाननुगमादिति वाच्यं, प्रमात्वमेव हि परम्परासम्बन्धाद् घटादौ प्रमेयत्वमनुगतं प्रमाजातीयविषयत्वं वा। तथापि केवलान्वयिनि सन्देहाभावात् कथमनुमितिः, प्रमेयत्वमत्र वर्तते न वेति संशयश्च

वृत्तिमदिति। वृत्तिमान् योऽप्यन्ताभावस्तदप्रतियोगिसाध्यकत्वमित्यर्थः। अन्यथा अयं प्रमेयो घटत्वादित्यादिहेतोरव्याप्त्यापत्तेः। न चैवं दशाविशेषान्वयिधूमाद्यव्याप्तिः, सर्वसाधारणान्वयिनो लक्ष्यत्वात्तस्य पुरुषविशेषनियतान्वयित्वात्। न च व्यक्ति-(वृत्ति)मत्पदाधिक्यम्, आकाशात्यन्ताभावसाध्यकस्य तुर्यतापत्त्या केवलान्वयित्वेन सङ्ग्राह्यत्वात्। सङ्ग्राहकोपाधौ परिभाषाकर्तुरिच्छाया एव तन्त्रत्वेन तत्र गौरवाद्यनवकाशात्। न च व्यर्थविशेणता, व्याप्तिग्रहौपयिकविशेषणस्यैव हेतौ सार्थक्कत्वादिति चेत्? न, विशिष्टाभावरूपहेतौ प्रतियोगिविशेषणे तस्य विशिष्टाभावोपस्थापकत्वेन व्याप्तिग्रहौपयिकतया सार्थकत्वात्। यद्वा व्यवहारे साध्ये तस्य सार्थकत्वात्। तथाहि, केवलान्वयिपदवाच्यत्वं, केवलान्वयित्वान्यूनानतिरिक्तव्यक्तिवृत्त्यत्यन्ताभावाप्रतियोगि, अन्यूनानतिरिक्तवृत्तिधर्मत्वादित्यत्राकाशाद्यत्यन्ताभावान्यकेवलान्वयित्वे व्यभिचारः स्यादिति वृत्तिमत्पदमुपात्तमिति।

जयदेवमिश्रास्तु विकासकविशेषणतया व्यर्थत्वाभावात्। तथाहि-द्विविधं विशेषणम्। एकं सङ्कोचकं, यथा धूमादौ नीलत्वं, स्वल्पविशेष्यसङ्ग्राहकत्वात्। अपरञ्च विकासकं, यथा अभिधेयत्वे साध्ये प्रमेयत्वस्य विशेष्यस्य स्वल्पतया तद्विषयत्वविशेषितं तदेव विशेष्यमात्रापेक्षयाऽधिकसङ्ग्राहकत्वात्। तद्विकासकं न व्यर्थं, सामान्यस्यावच्छेदकत्वे सम्भवति विशेषे प्रमाणाप्रवृत्तेः। तत्स्वाभाव्यात्, सङ्कोचकं व्यर्थं, तदुपादाने सामान्यावच्छिन्नस्यैव कियतः परिहारेण गौरवात्। एवञ्चाव्याप्तिवारकमपि विशेषणमधिकसङ्ग्राहकतया सार्थकमित्याहुः। तच्चिन्त्यं, धूमालोकान्यान्यत्वेनापि व्याप्तिग्रहे विशेषणत्वाभावापत्तेः। न च तत्र तदन्यान्यत्वेन सङ्ग्राह्ययोर्धूमालोकयोस्तदुभयान्यान्यत्वविशिष्टधूमत्वालोकत्वाभ्यामेव व्याप्तिग्रहाद् व्यर्थं विशेषणमिति वाच्यं, भवेदप्येवं यद्युक्तविशेषणं विना धूमालोकयोर्धूमत्वेनालोकत्वेन वोभयत्र व्याप्तिर्गृह्येत। न चैवं, किन्तु ताभ्यामेकैकमात्रव्याप्तिग्रहे तदपेक्षयाऽधिक-सङ्ग्राहकस्य विकासकविशेषणस्यान्यत्वस्य सार्थकत्वापत्तेरवारणात्। व्याप्तिग्रहानुपयोगित्वेन च सङ्कोचकविकासकयोरविशेषे विकासकस्य सार्थकत्वे सङ्कोचकस्य वैयर्थ्ये बीजाभावाच्चेति।

न प्रमेयपक्षकः, किन्तु प्रमेयत्वपक्षको भिन्नविषयकः, प्रमेयत्वपक्षके चास्तित्वसाध्यस्यान्वयव्यतिरेकित्वं, तथा च घटः प्रमेयो न वेति संशयो मृग्यते स च नास्त्येव।

अथ पक्षः साध्यवान्न वा पक्षे साध्यमस्ति न वेति संशयौ समान-विषयकावेव तदस्यास्त्यस्मिन्निति मतुपो विधानादिति चेत्? न, विशेषण-विशेष्यभावभेदेनार्थभेदात्। मैवं, य एव हि संशयः पक्षे साध्यसिद्धिविरोधी स एवानुमानाङ्गम्, आवश्यकत्वात्, लाघवाच्च। न तु समानविषयकत्वमपि तत्र तन्त्रं, गौरवात्। प्रमेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्यसिद्धिविरोधी भवत्येव। यद्वा संशययोग्यतैवानुमानाङ्गं,

नन्वाकाशात्यन्ताभावसङ्ग्रहार्थं वृत्तिमत्पदम्। तच्चानुपपन्नम्, इदानीमाकाशमिति प्रत्ययादाकाशस्यापि वृत्तिमत्त्वात्। न च वृत्तिः संयोगः समवायो वा विवक्षितेति वाच्यं, घटादेरपि केवलान्वयित्वापत्तेः, अव्याप्यवृत्त्यत्यन्ताभावाव्याप्तेश्चेति चेत्? न, वृत्तिपदेन स्ववृत्तिविरोधिवृत्तेर्विवक्षितत्वात्। स्ववृत्तिविरोधित्वञ्च स्वसामानाधिकरण्यधीविरोधित्वम्। संयोगादिवृत्तिश्च न तदत्यन्ताभावविरोधिनीति न तत्राव्याप्तिः। न चैवं संयोगस्यापि केवलान्वयित्वापत्तिः, तदत्यन्ताभाववृत्तेरपि तद्वृत्तिविरोधित्वाभावादिति चेत्? न, कर्मादावधिकरणे तदत्यन्ताभाववृत्तेरपि तद्वृत्तिविरोधित्वात्। यद्यपि संयोगवृत्तिरपि स्वावच्छेदेन स्वात्यन्ताभाववृत्तिविरोधिनी भवत्येव, तथापि स्वसामानाधिकरण्यधीविरोधित्वं नास्ति, संयोगावच्छेदेन तदत्यन्ताभावासत्त्वेऽपि तत्सामानाधिकरण्यबुद्धेरप्रत्यूहत्वात्। न चैवं मेयत्वादिवृत्ति-विरोधिवृत्तेरप्रसिद्धेस्तत्राव्याप्तिरिति वाच्यं, स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावप्रतियोगिनो घटादयः प्रसिद्धास्तदन्यत्वस्य तत्रापि सत्त्वात्। न चाकाशादावतिव्याप्तिः, वृत्तिमत्त्वे सति तादृशात्यन्ताभावाप्रतियोगित्वस्य विवक्षितत्वात्। न चाकाशादि संयोगेन वर्तत इति वक्ष्यमाणत्वात्। ननु तथाप्याकाशात्यन्ताभावः कथं केवलान्वयी, कालादौ तस्य सत्त्वेन तदत्यन्ताभावासत्त्वात्। न च संयोगित्वेन तदत्यन्ताभावस्तथा, भूतलादौ संयोगित्वेनापि घटादिवत्तस्य सत्त्वेन तदत्यन्ताभावासत्त्वात्। न चाकाशसंयोगस्य भूतलादिवृत्तित्वेऽप्याकाशं न तत्र वर्तत इति वाच्यम्, एवं घटादेरपि भूतलादिवृत्तित्वं न स्यात्। नापि समवेतत्वेन तदत्यन्ताभावस्तथा, व्यधिकरणधर्मावच्छिन्न-प्रतियोगिकाभावाभ्युपगमापत्तेरिति चेत्? न, इदानीं भूतले घट इतिवद् इदानीं भूतल आकाशमित्याधेयभावप्रतीतेन तत्र संयोगित्वेन तस्य सत्त्वमिति।

संशयस्य तदानीं विनाशात्। न च सापि साधक-बाधकप्राणाभावः प्रमेयत्वाभावासिद्धौ तत्प्रमाणासिद्धेस्तदभावासिद्धिरिति वाच्यं, पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव योग्यतात्वात्। प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः सन्देह इत्यन्ये। नन्वेकरूपविकलमिदं कथं गमकं, तत्त्वे वा व्यतिरेकविकलवद् रूपान्तरविकलमपि गमकं स्यादिति चेत्? न, अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानुमित्यनुभवात्। युगपदुभयव्याप्त्युस्थितौ विनिगमकाभावेनोभयोरपि प्रयोजकत्वे व्यतिरेकोपासना, व्यतिरेकश्च विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते। अत्र तु विपक्षाभावेन शङ्कैव नोदेति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ केवलान्वय्यनुमानप्रकरणं समाप्तम्

जयदेवमिश्रास्तु वृत्तिमत्त्वविशेषणमप्रसिद्धिवारकमेव। तथाहि-मेयत्वादेरपि समवायावच्छिन्नप्रतियोगिकात्यन्ताभावप्रसिद्धावपि यत्र वाच्यत्वं तत्र मेयत्वमिति व्याप्तिशरीरप्रविष्टस्वरूपसम्बन्धावच्छिन्नसाध्याभावाप्रसिद्ध्या तत्राव्याप्तिसम्भवात्। एवञ्च मेयत्वेऽप्यत्यन्ताभावप्रतियोगित्वस्य तदप्रतियोगित्वमप्रसिद्धमिति वृत्तिमत्पदमप्रसिद्धिवारकतया न व्यर्थमिति। न च वृत्तिमत्पदे दत्तेऽपि साव्याप्तिः, तस्यापि वृत्तिमत्त्वात्, आकाशस्यापि संयोगेन वृत्तिमत्त्वाच्च। वृत्तिमत्पदस्य समवेतपरत्वे घटादेरपि केवलान्वयित्वापत्तिरिति चेत्? न, सामानाधिकरण्यधीविरोधिवृत्तेरेव वृत्तिपदेन विवक्षितत्वात्। अस्ति च समवायावच्छिन्नाकाशाभावत्वज्ञानस्य स्वरूपसम्बन्धेन मेयत्वज्ञानस्य चाकाशसंयोगग्रहः समवायावच्छिन्नमेयत्वाभाववत्त्वग्रहो न विरोधी, तादृशवृत्तिमदत्यन्ताभावाप्रतियोगित्वरूपो विशिष्टाभावः सर्वसङ्ग्राहकः। नन्वेवं घटे तत्र संयोगग्रहस्य संयोगावच्छिन्नघटाभावधीविरोधितया तादृशवृत्तिमदभावप्रतियोगित्वात्। अत एव प्रतियोग्यवच्छिन्नेऽत्यन्ताभावाभावेऽपि संयोगात्यन्ताभावः केवलान्वयी संयोगात्यन्ताभाववत्त्वग्रहेऽपि संयोगवत्त्वग्रहात्। तादृशवृत्तिमदत्यन्ताभावाप्रतियोगित्वसत्त्वादव्याप्यवृत्तावेकत्रोभयग्रहेण प्रतियोगिवृत्तेरभावग्रहाविरोधित्वादित्याहुः।

नन्वन्वयव्यतिरेकिण्यन्वयव्याप्तिप्रतीतौ विपक्षव्यावृत्तत्वस्यापि प्रयोजकत्वदर्शनात्तेन विनाऽन्वयव्याप्तिनिश्चय एवात्र न स्यादित्यत आह-**व्यतिरेकश्चेति।** अन्वयव्याप्तिप्रतीताविति शेषः। व्यतिरेकव्याप्ताविति सप्तमी, तथा च तस्यां सत्यां विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारान्वयव्याप्तावुपयुज्यते। न तु साक्षात्। तथा चान्वयव्यतिरेकिण्येव तदर्थं तदपेक्षणात्। अत्र तु व्यतिरेकव्याप्तेरसत्त्वाद् विपक्षाभावे तद्वृत्तित्वशङ्कैव नोदेतीति न तत्रान्वयव्याप्तिग्रहे तदपेक्षति भावः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां केवलान्वय्यनुमानप्रकरणं समाप्तम्

।। केवलव्यतिरेक्यनुमानप्रकरणम् ।।

केवलव्यतिरेकी त्वसत्सपक्षो यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः। ननु व्यतिरेकी नानुमानं व्याप्तिपक्षधर्मताज्ञानस्य तत्कारणत्वाद् अत्र व्यतिरेक-सहचारात् तत्र व्याप्तिरन्वयस्य पक्षधर्मता। न च व्याप्तपक्षधर्मत्वं साध्याभाव-व्यापकाभावप्रतियोगित्वमुभयमप्यनुमितिप्रयोजकमिति वाच्यम्, अननुगमात्। न चान्यतरवत्त्वं तथा, एकप्रमाणपरिशेषापत्तेः। न च तृणारणि-मणिन्यायेनानुमितिविशेषे तद्धेतुत्वमिति वाच्यं, व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः, उभयसिद्धक्लृप्ततत्कारणस्याभावात्। न च साध्याभावव्यापकाभावप्रतियोगित्व-मेवानुमितिप्रयोजकमिति वाच्यं, गौरवात्, केवलान्वयिन्यभावाच्च।

अथ साध्याभावव्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयम्। एवं व्यतिरेकव्याप्त्यान्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते, तत्र अन्वयव्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः, अन्वयव्याप्त्य-नुकूलतया च तदुपन्यासेऽन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वमिति। उच्यते-निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते, प्रतियोग्यनुयोगिभावस्य नियमाकत्वाद् अन्वयव्यतिरेकिवत्। नन्वेवं व्याप्तिग्रह एव पृथिवीतरभिन्नेति भासितं नियतसामानाधिकरण्यरूपत्वाद्व्याप्तेरिति, सत्यं, गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात्। अत एवाचार्यः पक्षतावच्छेदकस्य न हेतुत्वमनुमेने, पृथिवीत्व-मितरभेदव्याप्यमिति प्रतीतावपि सर्वा पृथिवीतरभिन्नेति पृथिवीविशेष्यक-बुद्धेर्व्यतिरेकिसाध्यत्वाच्च।

यद्वा व्यतिरेकव्याप्तेरेवान्वयेन गम्यगमकभावः, साध्याभाव-व्यापकसाधनाभावाभावेन साधनेन साध्याभावाभावस्य साध्यस्य साधनाद् व्यापकाभावेन व्याप्याभावस्यावश्यम्भावात्। नन्वेवं न सानुमितिः, क्लृप्तहेतुलिङ्गपरामर्शाभावात्, अन्यथाननुगम इति चेत्? न, अनुमितिमात्रे

असत्सपक्ष इति। सिद्ध्यसिद्धिपराहत इति तदर्थमाह **यत्रेति।** अन्वय-व्याप्तिग्रहे सर्वत्र पक्षतावच्छेदकान्तरप्रतीत्यनियमात्। प्रकारान्तरमाह-**पृथिवीत्वमिति।**

यद्वेति। व्यतिरेकव्याप्तेरिति पञ्चम्यन्तम्। **अनुमितिमात्र इति।** यद्यपि व्यतिरेकिणि व्यापकताज्ञानमात्रं हेतुः, न तु व्याप्तिज्ञानं, तथापि तस्य व्यतिरेकव्याप्तिविषय-तयैव हेतुत्वम्, अन्वयव्याप्तिज्ञानेन तुल्यत्वादिति तुल्ययोगक्षेमत्वात्। अन्यथाऽन्वयिन्यपि व्यापकताज्ञानमेव हेतुः स्यात्। यथा चात्र नेष्टापत्तिस्तथोक्तम्।

व्याप्तिज्ञानस्य प्रयोजकत्वात्। न चैवमतिप्रसङ्गः, अनुमितिसामान्यसामग्र्यां सत्यामप्यनुमितिविशेषसामग्रीविरहादनुमित्यनुत्पत्तेः, विशेषसामग्रीसापेक्षाया एव सामान्यसामग्र्या जनकत्वात्। अन्वयि-व्यतिरेकिविशेषद्वयसामग्री च नास्त्येव।

ननु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादिति व्यतिरेकिणि साध्यमसिद्धम्। तथा च न व्यतिरेकिनिरूपणं, न वा पक्षत्वं, न वा लिङ्गजन्यसाध्यविशिष्टतज्ज्ञानं, तेषां साध्यज्ञानजन्यत्वात्।

अथ साध्यं प्रसिद्धं तदा यत्र प्रसिद्धं तत्र हेतोरवगमेऽन्वयित्वम्, अनवगमेऽसाधारण्यम्। किञ्चेतरभेदो न स्वरूपम्, अधिकरणप्रतियोगिनोः पृथिवी-जलाद्योरनुमानात् प्रागेव सिद्धेः। नापि वैधर्म्यं जलादिनिष्ठात्यन्ताभावप्रतियोगित्वं, तद्धि पृथिवीत्वादिकं तच्च सिद्धमेव। न च जलादिनिष्ठात्यन्ताभावप्रतियोगित्वेन पृथिवीत्वं न सिद्धमिति वाच्यं, जलादौ पृथिवीत्वात्यन्ताभावग्रहदशायां पृथिवीत्वेऽपि तत्प्रतियोगित्वग्रहात्। अन्योन्याभावस्तु भेदो यद्यपि साध्यं सम्भवति वैधर्म्यज्ञानसाध्यत्वादन्योन्याभावग्रहस्य, तथापि जलादिप्रतियोगिकान्यो-भावस्याप्रसिद्धिः। न च जलादिप्रत्येकान्योन्याभावः साध्यः, असाधारण्यप्रसङ्गात्। अथ पृथिवी तेजोभिन्ना न वेति संशयेन तेजोभिन्नत्वेऽवगते पृथिवी तेजोभिन्ना सती जलादिद्वादशभिन्ना न वेति संशये तेजोभिन्नत्वे सति जलादिद्वादशभिन्नत्वं प्रसिद्धं, तदेव साध्यम्, एकविशेषणविशिष्टविशेषणान्तरबुद्धेरेव विशिष्टवैशिष्ट्य-ज्ञानत्वात्। एवञ्च संशयप्रसिद्धं साध्यमादाय व्यतिरेकादिनिरूपणम्। यद्वा पृथिवी जलभिन्ना न वेत्यादि प्रत्येकं त्रयोदशसंशयविषयाणां त्रयोदशान्योन्याभावानां समुदायः पृथिव्यामवगतो व्यतिरेकादिनिरूपकः।

ननु व्याप्तिज्ञानत्वमतिप्रसक्तमिति स्वव्याप्तिज्ञानत्वं वाच्यम्। तच्च न स्वव्यतिरेकव्याप्तिसाधारणमिति चेत्? न, स्वव्यभिचारधीविरोधिधीविषयव्याप्तिज्ञानत्वेन हेतुत्वात्। एवञ्च यद्यपि परामर्शद्वयस्याप्यनुगमयितुं शक्यत्वात्, तस्यानुमितिमात्र एव हेतुत्वसम्भवाद् विशेषसामग्रीद्वयाभिधानं व्यर्थं, तथापि व्यतिरेक्यनुमितौ व्याप्यतावच्छेदकावच्छिन्नाभावविषयत्वम्, अन्वयानुमितौ व्यापकतावच्छेदका-वच्छिन्नविषयत्वमनुभूयत इति फलभेद आवश्यकफलसामग्रीभेदोऽप्यावश्यक इत्यभिप्रायेणैतदुक्तम्। अत एव **टीकादौ** नेदं निरात्मकं जीवच्छरीरम्, इत्येवाकार-प्रदर्शनमिति भावः।

नन्वनवगममात्रेण नासाधारण्यं, किन्तु तद्व्यावृत्तत्वज्ञानेनेत्यपरितोषादाह-**किञ्चेति**। वैधर्म्यमित्यस्यैव विवरणं **जलादीति**। **तथापीति**। मिलिताप्रसिद्धिरित्यर्थः।

न चैवं पृथिव्यामेव साध्यप्रसिद्धेर्व्यतिरेकिवैयर्थ्यं, साध्यनिश्चयार्थं व्यतिरेकिप्रवृत्तेः। न चासाधारण्यं, समुदितान्योन्याभावानां साध्यत्वे सपक्षाभावादिति चेत्? न, साध्यनिश्चये हि साध्यव्यतिरेकनिश्चयो भवत्येव साध्यसन्देहे तद्व्यतिरेकसंशयस्य वज्रलेपत्वात्। तथा च संशयरूपा साध्यसिद्धिरिति शिष्यबन्धनम्। एतेन पृथिवी जलादिभ्यो भिन्नेति विप्रतिपत्तिरूपवादिवाक्यादाकाङ्क्षादिमतोऽपूर्वार्थप्रतिपादकात् साध्यप्रसिद्धिरिति परास्तम्। वाक्यादेव पृथिव्यां साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यात्। न च तद्बुद्धौ वादिवाक्यजन्यत्वेनाप्रामाण्यसंशयात् निश्चयेऽपि संशय इति तन्निश्चयार्थं व्यतिरेकीति वाच्यं, तर्हि संशयप्रसिद्धं साध्यं तस्य च न व्यतिरेकनिश्चायकत्वमित्युक्तत्वात् स्वार्थानुमाने तदभावाच्च।।

।। इति केवलव्यतिरेकिपूर्वपक्षः ।।

मिलितानामिति[1]। अनुमितिविषयतावच्छेदकावच्छिन्नसाध्यवतः सपक्षत्वेन विवक्षितत्वादिति भावः। **साध्यनिश्चय इति।**

तत्र **यज्ञपत्युपाध्यायाः** पृथिव्यां जलादित्रयोदशभेदसंशये सत्यपि जले न तदभावसंशयः, तत्र जलभेदाभावस्यैव निश्चयात्, एकदेशविरहनिश्चयस्यापि समुदायसंशयविरोधित्वात्। न च प्रतियोगिनिश्चयस्याभावधीहेतुत्वेन तत्संशये कथं तद्व्यतिरेकनिश्चय इति वाच्यं, प्रतियोगिज्ञानत्वेनैव संशयनिश्चयसाधारणेनाभावनिश्चयं प्रति जनकत्वात्, लाघवात्। न तु तन्निश्चयत्वेन, गौरवात्। किञ्चोक्तसंशयानन्तरं त्रयोदशभिन्नत्वस्य तदभावस्य च निश्चयविषयत्वमपि न दुर्लभं, तदनुव्यवसायरूपेणैव निश्चयेन तत्प्रकारकत्वेनोभयोरपि विषयीकरणादित्यसङ्गतोऽयं ग्रन्थ इत्याहुः।

तत्र **जयदेवमिश्राः** निश्चायकाभावान्न तद्व्यतिरेकनिश्चयः क्वचिदपि निश्चायकाभावेन निश्चायकाप्रसिद्ध्या तद्गर्भयोग्यानुपलब्ध्यभावात्। न च यावत्तदुपलम्भकसत्त्वगर्भा मास्तु, प्रतियोगिसत्त्वविरोधिगर्भा ऽस्त्येवेति वाच्यं, तस्याप्यत्र प्रतियोगिसत्त्वविरोधित्वं प्रतियोगिसत्त्वप्रसञ्जितत्वमित्यग्रे वक्ष्यमाणत्वात्। न च निश्चयाप्रसिद्ध्या निश्चयापादनं सम्भवतीति। तच्चिन्त्यं, योग्यानुपलब्धेरेव निश्चायिकायाः सत्त्वात्। न च तन्निश्चयस्य क्वचिदप्यनुत्पत्त्या तन्निश्चायकसमवधानासिद्ध्या तद्गर्भानुपलब्धेरसिद्धिरिति वाच्यं, वस्तुभूतस्य तस्य प्रागनिश्चयेऽपि भाविनिश्चयसामग्र्याः सम्भवात्। न हि जनितप्रतियोगिनिश्चयस्यैव सामग्री तदभावनिश्चायिका, मानाभावात्, गौरवाच्च। अस्तु वा प्रतियोगिसत्त्वविरोधिन्येवानुपलब्धिः परत्राभावग्राहिणी। न च विरोधित्वस्य प्रतियोगिसत्त्वप्रसञ्जकोपलम्भप्रतियोगित्वरूपत्वात् प्रतियोग्यनिश्चये च तत्सत्त्व-

---

१. समुदितेत्यादेः प्रतीकमिदं स्यात्।

प्रसञ्जनासम्भवादिति वाच्यं, त्रयोदशभेदानां विशकलितानां निश्चये यद्येते जलत्वावच्छिन्नाः स्युस्तदा तथोपलब्धिविषया स्युरिति प्रसञ्जनसम्भवेनोक्तानुमानसम्भवात्। तथा च जलत्वावच्छिन्नतावदभावानुपलब्ध्या तदवच्छिन्नतावदभावाभावो गृह्यत एवेत्यनुपपत्त्यभावात्।

यत्त्वनुव्यवसाये न निश्चयरूपा प्रसिद्धिरिति, तन्न, यादृशो निश्चयो व्याप्ते-र्ग्राहकोऽनुव्यवसायस्य तथात्वाभावात्। विषयविशेषणीभूतधर्मग्रहस्य व्याप्तिधीहेतुत्वात्। अनुव्यवसायेन च तज्ज्ञानविशेषणत्वेन तदवगाहनात्। किञ्च साध्यतावच्छेदकप्रकारकस्य साध्यज्ञानस्य व्याप्तिधीहेतुत्वेनानुव्यवसायस्यातत्प्रकारकत्वप्रकारकत्वेन व्याप्त्य-ग्राहकत्वात्। प्रतियोगितावच्छेदकाप्रकारत्वेनाभावानिरूपकत्वाच्च।

यत्तु संशयरूपायामेव समुदितत्रयोदशभेदाभावप्रसिद्धौ सत्यां जलं जलादित्रयोदशभेदसमुदायाभाववत्, तदेकदेशीभूतजलभेदाभाववत्त्वात्। यत्समूदायैक-भेदाभाववद् यत् तत् तत्समुदायाभाववद्, इति सामान्यव्याप्तिमूलकस्यैव सम्भवात्। न हि सामान्यव्याप्तिमूलकेऽप्यनुमाने प्रकृतसाध्यहेत्वोः सङ्ग्रहेण निश्चय उत्प्रेक्ष्यते। यथा तद्गेहं तदा मैत्राभाववद् इत्यत्रेति। तन्न, तन्निश्चयं विना तत्समुदायैकदेशविरहस्य निश्चेतुमशक्यत्वात्, विशेषणस्य तत्समुदायस्य सन्देहेन तद्विशिष्टनिश्चयाभावात्, लिङ्गस्य निश्चितस्यैव गमकत्वात्।

केचित्तु पक्षदृष्टान्तसाधारणैकरूपाभावेन सामान्यव्याप्त्यनवगमात् कथं तन्मूलक-मनुमानं? तद्गेहं तदा मैत्राभाववद् इति प्राङ्नास्तिकानुमानन्तु तद्वत्तयाऽस्मर्यमाणत्वे सति स्मर्यमाणत्वादित्यस्यान्वयाप्रतीतौ व्यतिरेकस्यैव तदसिद्धौ प्राङ्नास्तीतिबुद्धेर-सिद्धेरिति संशयप्रसिद्धसाध्यव्यतिरेकनिश्चयस्योक्तानुमानसाध्यत्वे दूषणमित्याहुः। तच्चिन्त्यं, पाकादौ कृतिसाध्यतानुमित्यन्यथानुपपत्त्या प्रमादिपदसङ्केतग्रहान्यथानुपपत्त्या सत्त्वादेरनुगतस्य वाच्यतया व्याप्तिग्रहसम्भवात्। न चैवमपि सदर्थस्यापि संशयोपस्थितस्य सिद्ध्यापत्तिरिति वाच्यं, तदसिद्धावनिष्टप्रसङ्गाभावेनाप्रयोजकत्वादिति।

उच्यते-दण्डत्वादिसन्देहविषयवस्तुवैशिष्ट्यनिश्चयेऽपि दण्डित्वनिश्चयाभावेन सन्दिग्धप्रतियोगिकवैशिष्ट्यनिश्चयानुपपत्त्या संशयमात्रप्रसिद्धस्य व्यतिरेकनि-रूपणासम्भवात्। प्रतियोग्यनुयोगिभावस्यापि वैशिष्ट्यत्वेन तत्प्रतियोगिसन्देहेन तस्यापि सन्देहात्। तत्सन्देहे तद्वैशिष्ट्यसन्देहस्य सर्वमतसिद्धत्वाच्चेति।

वस्तुतस्तु भेदसमुदायाभाववत्त्वरूपस्यापि साध्यस्याप्रसिद्धिरेवेति नोक्तानुमानं सम्भवति। न च संशयरूपैव तत्प्रसिद्धिरिति वाच्यं, भेदसमुदायस्य तदभावस्य चा-

प्रसिद्धत्वेन संशयकोटित्वासम्भवात्। प्रसिद्धत्वे वा तत एव व्यतिरेकव्याप्तिनिश्चयसम्भवादुक्तानुमानवैयर्थ्यापत्तेः। तस्मादन्वये संशये वा संशयरूपा साध्यप्रसिद्धिर्नाङ्गं, कोटिप्रसिद्धौ निश्चयरूपाया एव तस्याः सम्भवात्, तदप्रसिद्धौ संशयस्याप्यभावात्। न चैकाधिकरण्येन तद्भेदोपस्थितये संशयानुसरणमिति वाच्यं, संसर्गविधयैकाधिकरणोपस्थितावपि व्यापकतावच्छेदकप्रकारेण संशयादप्यनुपस्थितेरिति संक्षेपः।।

।। इति केवलव्यतिरेकिपूर्वपक्षः ।।

117

॥ अथ केवलव्यतिरेक्यनुमानसिद्धान्तः ॥

उच्यते-घटादावेवेतरसकलभेदस्य प्रत्यक्षतः प्रसिद्धिः, घटो न जलादिरिति प्रतीतेः। नन्वयमन्योन्याभावो न प्रत्यक्षः, अतीन्द्रियप्रतियोगिकाभावत्वात्, परमाणुसंसर्गाभाववत्, योग्यानुपलब्धेरभावग्राहकत्वात् नयनोन्मीलनानन्तरं स्तम्भः पिशाचो न भवतीति प्रतीतेर्बाधकबलेन वायुर्वातीति वल्लिङ्गग्रहो-पक्षीणत्वादिति चेत्? न, यो ह्यनुपलम्भोऽधिकरणे प्रतियोगिमत्त्वविरोधी सोऽभावं ग्राहयति, न तु योग्यानुपलब्धिमात्रम्। अन्यथा वायौ रूपाभावप्रतीतिवत् जलपरमाणौ पृथिवीत्वाभावग्रहप्रसङ्गात्। अधिकरणे प्रतियोगिसत्त्वञ्च तर्कितं यदि हि स्तम्भः पिशाचः स्यात् स्तम्भवदुपलभ्येत न पिशाचानुपलब्धिः स्यात्। न च पृथिवी जलादिभिद्यते जलावृत्तिधर्मवत्त्वात् तेजोवत्, एवमन्येभ्योऽपि भेदसिद्धौ द्वादशभिन्नेति विशेषणं दत्त्वा समवायभेदसाधनादन्वयिन एव पृथिव्यां त्रयोदशभेदसिद्धिरिति किं व्यतिरेकिणेति वाच्यं, जलादिभिन्ना सती समवायभिन्नेति बुद्धावपि त्रयोदशभिन्नेति बुद्धेर्व्यतिरेकिसाध्यत्वात्।

न च घटस्यापि पक्षत्वादंशतः सिद्धसाधनं, सर्वा पृथिवीतरभिन्नेत्यु-द्देश्यप्रतीरेभावात्। पक्षतावच्छेदकनानात्वे हि तत्। अत एवानित्ये वाङ्मनसी इत्यत्रानित्या वागिति बुद्धेरुद्देश्यायाः सिद्धत्वादंशतः सिद्धसाधनम्, अन्यथानुमानमात्रोच्छेदात् पक्षस्य सिद्धस्यैव साध्यत्वात्। न च घटः कथं पक्षः, साध्यनिश्चयेन संशयसिषाधयिषयोरभावादिति वाच्यं, सर्वा पृथिवीतरभिन्ना न वेति संशस्य तत्प्रकारकसिषाधयिषायाश्च सामान्यतो घटविषयत्वात्। घटत्वेन विशेषदर्शनं सिद्धिर्वा, अतस्तेन रूपेण संशयसिषाधयिषे न स्तः, पृथिवीत्वेन

यो ह्यनुपलभत(लम्भ) इति। एवञ्च मनो[न्यो]न्याभाववत् मनस्त्वात्यन्ताभावोऽपि घटे प्रत्यक्ष एव, तत्रापि प्रतियोगिसत्त्वविरोध्यनुपलम्भसम्भवात्। तद्विषयत्वेनैवाभावस्य योग्यत्वादिति केचित्।

अन्ये तु न हि तादृशोऽनुपलम्भोऽवश्यमभावं ग्राहयतीति नियमः, प्रतियोगिज्ञानादिविरहेऽभावग्रहानुदयात्। किन्त्वभावग्रहणकारणप्रतियोगिज्ञानादिसम्भवे सति योग्यमभावं ग्राहयतीति। मनस्त्वात्यन्ताभावस्तु न योग्यः, योग्यप्रतियोगिकस्यैव संसर्गाभावस्य योग्यत्वात्। अतो घटे स न गृह्यते। रूपवदन्योन्याभावस्तु योग्योऽपि वायावधिकरणयोग्याताविरहान्न गृह्यते, अन्योन्याभावग्रहे तस्याः प्रयोजकत्वात्। अत एव संसर्गाभावान्योन्याभावयोर्ग्रहे प्रतियोग्यधिकरणयोर्योग्यता तन्त्रमिति सिद्धान्त इत्याहुः।

ते भवत एव, धूमवान् वह्निमानिति धूमत्वेन वह्निनिश्चयेऽपि पर्वते वह्निसंशयवत्। यद्वा सर्वत्वेन रूपेण न पक्षता, सर्वत्राविप्रतिपत्तेः, घटाद्येकदेशे इतरभेदस्य प्रत्यक्षसिद्धत्वात्। तथा चैकदेशे विप्रतिपत्तौ सामान्ये इतरभेदसाधने ऽर्थान्तरम्। किन्तु सामान्येन पृथिवीत्वेन यावदेव विप्रतिपत्तिविषयस्तावतामेव पक्षता विशेष्याननुगमात्। तर्हि पृथिवीतरभिन्ना पृथिवीत्वाद्घटवदित्यन्वयिनैवेतर-भेदस्य सिद्धत्वात् किं व्यतिरेकिणा, घटसाधारणपक्षत्वेऽप्यभेदानुमानवत् पक्षस्यापि दृष्टान्तत्वाविरोधात्। पक्षान्यत्वं हि तत्रातन्त्रं, किन्तु साध्यवत्तया निश्चितत्वं प्रयोजकम्। न च पृथित्वाग्रहे पूर्वं गृहीतं यत्र साध्यं पश्चात् स्मर्यते तत्र हेतुसाध्यसामानाधिकरण्याग्रहाद्व्यतिरेक्यवतार इति वाच्यं, हेतोरेव पक्षता-वच्छेदकत्वेन घटे पृथिवीत्वग्रहदशायामितरभेदसामानाधिकरण्यग्रहावश्यम्भावादिति चेत्? सत्यम्, अन्वयितुल्यतया व्यतिरेकिणोऽपि सामर्थ्यादन्वयाप्रतिसन्धानदशायां व्यतिरेक्युपन्यासस्य पर्यनुयोज्यत्वात्। तदुक्तम्, आस्तां तावदयं सुहृदुपदेशः, केवलव्यतिरेकिलक्षणं तावन्निर्व्यूढम्। अथवा जलादीनां त्रयोदशान्योन्या-भावास्त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते। अत एवाकाशे व्यतिरेकिणा जलादिमिलितप्रतियोगिकान्योन्याभावाप्रतीतावपि त्रयोदशान्योन्याभावाः साध्या इति नान्वयित्वासाधारण्ये।

यद्वा जलं तेजःप्रभृतिद्वादशभिन्नाप्रतियोगिकान्योन्याभाववद् द्रव्यत्वात्ते-जोवदित्यनुमानात्त्रयोदशभिन्नस्य सामान्यतः सिद्धौ पृथिव्यां त्रयोदशभिन्नत्वं साध्यम्। न चान्वयित्वमसाधारण्यं वा, पक्षादन्यत्र साध्याप्रसिद्धेः। वस्तुगत्या पृथिव्यामेव साध्यसिद्धेः किं व्यतिरेकिणेति चेत्? न, पृथिवी त्रयोदशाभिन्नेति व्यतिरेकिणं विनाऽप्रतीतेः। नन्वेवं पृथिवी जलादित्रयोदशभिन्न-प्रतियोगिकान्योन्याभाववती द्रव्यत्वादिति पृथिवीभिन्नतद्भिन्नादिसिद्धिः स्यादिति

अनयोश्च कल्पयोरनुभव एव विनिगमकः। अनुपलब्धिस्तूभयत्रापि। ननु यद्युपलम्भसामान्याभावोऽनुपलब्धिरभिमता, तदा शङ्खे श्वैत्यानुमितिदशायां प्रत्यक्षेण तदभावप्रत्ययानुपपत्तिः, उपलम्भसामान्यस्य तत्र सत्त्वात्। न चेष्टापत्तिः, पीतोऽयं न श्वेत इत्यनुभवात्। यदि च प्रत्यक्षरूपोपलम्भाभावः सा, तदा स्तम्भेऽपि पिशाचान्योन्याभावो न प्रत्यक्षः स्यात्, पिशाचरूपप्रतियोगिप्रत्यक्षस्यासत्त्वेन तदभावाभावात्। न चाभावप्रमायां प्रतियोग्युपलम्भसामान्याभावो भ्रमे च तत्प्रत्यक्षाभावः कारणमिति वाच्यम्, अननुगमापत्तेः। मण्डूकवसाक्तनेत्रस्य चक्षुषा वंशोरगभ्रमदशायामेव त्वचा तदभावप्रमोत्पत्तेः, गुञ्जापुञ्जे वह्निभ्रमे वह्नित्वेनोष्णस्पर्शानुमानदशायां त्वचो-

चेत्? न, अप्रयोजकत्वात्, प्रकृते चानुभूयमानजलादिवैधर्म्यस्य पृथिवीत्व-शब्दाश्रयत्वादेरतिरिक्तं विनानुपपत्तेः।

नन्वितरभेदो यद्यन्योन्याभावस्तदा भावाद्भेदो न सिद्ध्येत्, अभावस्याभावान्तराभावात्। यदि च तेन समं स्वरूपभेद एव साध्यस्तदाननुगमादनुमानाप्रवृत्तिः। भावोऽभावो न भवतीत्यबाधितप्रतीतिबलादभावस्याप्यन्योन्याभावोऽस्तीति केचित्, तन्न, अपसिद्धान्तात्, अनतिप्रसक्ताधिकरणस्वरूपमात्रेणैवाभावप्रतीत्युपपत्तौ चाधिकाभावे मानाभावाच्चेति चेत्? न, इतरभावान्योन्याभावस्य साध्यत्वात्। न चैवमभावादविवेकतादवस्थ्यं, तेन समं स्वरूपभेदस्यान्वयिना व्यतिकिरेकिणा वा साध्यत्वात्।

अन्ये तु पृथिवीत्वभिन्नधर्मात्यन्ताभाव एव साध्यः जलत्वादि-प्रतियोगिकास्तावन्तोऽत्यन्ताभावा वा तत्तदसाधारणतत्तद्धर्मात्यन्ताभावयोगो वा। एते चाभावा जलत्वं न घटादौ घटादि जलत्वात्यन्ताभाववदिति प्रत्यक्षादेः क्वचित्तत्तद्वैधर्म्यादेव प्रसिद्धा इति नाप्रसिद्धिः। तावतामभावानां वैशिष्ट्यं न प्रसिद्धमिति चेत्? किमेतावता, न हि तावद्वैशिष्ट्यमत्र साध्यते, किन्तु जलत्वादीनां यावन्तोऽभावा इह साध्यास्ते च तत्र तत्र प्रसिद्धा एव। तावद्वैशिष्ट्यधीस्तु फलम्। अन्यथा सिद्धसाधनात्। मिलितानामपि साध्यत्वे नाप्रसिद्धिः। किञ्चिदेकधर्मावच्छेदो हि बलादिवन्मेलकार्थः, स च नासिद्धः। न च हेतोरसाधारण्यं, तावदभावयोगो ह्यत्र सपक्षो भवति न तु तदकेदेशकतिपयाभाववान्, साध्यतायास्तावत्यपर्याप्तेः। यद्वा

ष्णत्वाभावप्रमोत्पत्तेश्च। न चाधिकरणगोचरतादात्म्यप्रयुक्तसत्त्वप्रत्यक्षविषयत्वाभावः प्रतियोगिनि तादात्म्याभावग्रहे प्रतियोगिगोचरसंसर्गित्वप्रयुक्तसत्त्वप्रत्यक्षविषयत्वाभावोऽधिकरणे संसर्गाभावग्रहे हेतुरिति वाच्यम्, अननुगमात्। न चाधिकरणगोचरसत्त्वप्रत्यक्षविषयत्वाभावः प्रतियोगिन्यभावमात्रधीहेतुरिति वाच्यं, वायौ रूपाभावप्रत्यक्षानुत्पत्त्यापत्तेः, तत्राधिकरणस्य वायोरप्रत्यक्षत्वात्। न चोपनीतमानसप्रत्यक्षविषयत्वेन वायोर्न प्रतियोग्यप्रसिद्धिरिति वाच्यं, शङ्खे तादृशमानसश्वैत्यप्रत्यक्षदशायामपि चक्षुषा तदभावग्रहे तादृशप्रत्यक्षरूपोपलम्भाभावस्य व्यभिचारेण तदग्राहकत्वात्।

अत एव पिशाचस्य तादृशप्रत्यक्षविषयत्वात्, प्रतियोगिगोचरसत्त्व-प्रत्यक्षविषयत्वाभावोऽधिकरणेऽनुगतोऽभावप्रत्यक्षमात्रे हेतुरित्यपास्तं, शङ्खे तादृशप्रत्यक्षदशायामपि चक्षुषा तदभावग्रहेण व्यभिचारात्।

जलत्वात्यन्ताभावस्तेजत्वात्यन्ताभावाधिकरणवृत्तिः, अत्यन्ताभावत्वाद् घटत्वात्यन्ताभाववत्। एवमत्यन्ताभावान्तरसामानाधिकरण्यमपि तत्र साध्यमिति क्वाप्रसिद्धिः।

किञ्चेतरे तावत् प्रसिद्धा एव, ते च भेदप्रतियोगिनो मेयत्वादितीतरभेदोऽपि सुग्रह एव। ननु प्रथिवी नेतरभेदवती गुरुत्वादिभ्यो जलवदिति प्रतिरोध इति चेत्? न, इतरभेदनिषेधो हीतराभेदः, न तु तेजःप्रभृत्यभेदः जल इति दृष्टान्तस्य साध्यवैकल्यात्, चतुर्दशभेदानां चैकत्र विरोधेनासम्भवात्, चतुर्दशभेदानां चैकत्र वृत्तौ न विरोधः। यत्तु साध्यप्रसिद्धौ पृथिवीतरभिन्ना तत्साध्याधिकरणपृथिव्यन्यतरत्वात्तदधिकरणवत्, पृथिव्यां तत् साध्यमन्वयिन एव सेत्स्यतीति, तन्न, अन्यतरत्वस्यालिङ्गत्वादित्युक्तत्वात्, लिङ्गत्वे वा जलादावपि तत्सिद्धिप्रसङ्गात्। एवं तर्हि पृथिवी जलं पृथिवीत्वात्, यन्न जलं तन्न पृथिवी यथा तेज इति सत्प्रतिपक्षोऽस्त्विति चेत्? न, अजलस्य घटादेः प्रत्यक्षत एव पृथिवीत्वनिश्चये व्यतिरेकव्यभिचारादस्य न्यूनत्वात् तदनवधारणे तु सत्प्रतिपक्षत्वमिष्टमेव।

ननु जीवच्छरीरं सात्मकं प्राणादिमत्त्वाद् इच्छादिकार्यत्वाद्वेति व्यतिरेकिणि साध्याप्रसिद्धौ कथं व्यतिरेकादिनिरूपणं, नैरात्म्यञ्च घटस्य न प्रत्यक्षवेद्यं, तस्य तत्रासामर्थ्यात्, नानुमानगम्यं, नैरात्म्याप्रतीतावन्वयिनोऽभावात् सात्मकत्वप्रतीतिं विना व्यतिरेकिणोऽनुपपत्तिः। अथेच्छा समवायिकारणजन्या कार्यत्वात्, तच्च समवायिकारणं पृथिव्याद्यष्टद्रव्यभिन्नं पृथिव्यादित्वे बाधकसत्त्वादिति पृथिव्यादिभिन्नात्मसिद्धौ तद्वत्त्वं जीवच्छरीरे साध्यत इति चेत्? यदि सात्मकत्वमात्मसंयोगवत्त्वं तदा घटादौ तदस्तीति ततो हेतुव्यावृत्तावसाधारण्यं,

केचित्तु प्रतियोगिसत्त्वप्रसञ्जितोपलम्भाभाव एवानुपलब्धिरिह विवक्षिता। तथा चोपलम्भोप्यासञ्जित एव विवक्षितः। न चैवमनवकीर्णतर्कस्य नाभावधीः स्यादिति वाच्यम्, इष्टत्वात्। आसञ्जनञ्च क्वचित् प्रत्यक्षरूपमेव, यथा शङ्खो यदि श्वेतः स्यात्तदोपलभ्येत, तदानीं तादृशप्रत्यक्षमात्रस्यैवानभ्युपगमात्, श्वैत्यानुमितेस्तत्राभ्युपगमात्, अनभ्युपगतस्यैवापादनात्। अभ्युपगतापादने चेष्टापत्तेः। स्तम्भादौ च पिशाचोपलम्भसामान्यमापाद्यं, तन्मात्रस्यैव तदानीं तत्रानभ्युपगमात्। न चैवं सामान्यविशेषयोरासञ्जनासत्त्वेऽननुगम इति वाच्यं, प्रतियोगिसत्त्वप्रसञ्जितोपलम्भत्वेन प्रतियोग्यनुगमेनाभावानुगमादित्याहुः।

ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं सात्मकत्वं शरीरात्मसंयोगस्य ज्ञानकारणत्वात्, आत्ममनसोस्तथात्वेऽप्यकार्यत्वादिति चेत्? न, शरीरादन्यत्रासिद्धेः, तत्र प्रसिद्धौ सिद्धसाधनात्। इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्याभावो घटादाविष्टः, तद्व्यतिरेकः शरीरे साध्यत इति चेत्? न, इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्य शरीर एव प्रसिद्धेः सिद्धसाधनात्, अन्यथाऽसिद्धिव्यतिरेकानिरूपणात्।

अप्रसिद्धसाध्यसंसर्गमिव साध्यमप्रसिद्धं साधयति व्यतिरेकीति चेत्? न, व्यतिरेकाद्यनिरूपणात्। असाधारणधर्मेणाप्रतीतपदार्थानुमाने घटत्वादिनापि स्वेच्छाकल्पितडित्थाद्यनुमानप्रसङ्गः इति।

उच्यते- इच्छाऽसमवायिकारणसिद्धाविच्छात्वं संयोगासमवायिकारणवृत्ति नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वात् शब्दत्ववत्, स चासममवायिकारणं संयोगः किञ्चिवच्छिन्नसंयोगत्वात्। आत्मसंयोगमात्रस्येच्छाजनकत्वेऽतिप्रसङ्गादितीच्छाऽसमवायिकारणम्। संयोगावच्छेदकत्वं सात्मकत्वं शरीरे साध्यते। यद्वाऽऽत्मनीच्छाधारता महत्संयोगावच्छेद्या जन्यविभुविशेषगुणाधारतात्वाद् वाय्वादिसंयोगाद्यवच्छेद्याशब्दाधारत्ववदिति सामान्यतः सिद्धमिच्छाधारताघटकेच्छासमवायिकारणद्रव्यसंयोगवत्त्वं सात्मकत्वम्। अत एव समानाधिकरणज्ञानकरणीभूतसंयोगाश्रयकार्यत्वं वा सात्मकत्वं, स्वशरीरे प्राणादिमत्त्वस्येच्छादिमत्त्वस्य च चेष्टावयवोपचयादिव्याप्यत्वग्रहाद् घटादौ चेष्टादिविरहेण प्राणादिमत्त्वेच्छादिमत्त्वविरहानुमानमिच्छादिविरहाद् इच्छादिप्रयोजकेच्छाद्याधारताघटकेच्छाद्यसमवायिकारणसंयोगविरहानुमानं कार्याभाववति कारणाभावनियमात्। न च सात्मकत्वं शरीरवृत्ति शरीरे बाधकाभावात्, शरीत्ववदित्यन्वयिनैव साध्यसिद्धे किं व्यतिरेकिणेति वाच्यं, शरीरं सात्मकमिति शरीरविशेष्यकबुद्धेर्व्यतिरेकिणं विनानुपपत्तेः, उपायान्तरस्योपायान्तरादूषकत्वाच्च।

नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वादिति। अत्र स्नेहत्वे व्यभिचारवारणाय नित्येन्द्रियग्राह्य इति। मानसप्रत्यक्षविषयीभूतात्मवृत्त्येकत्वसंख्यावृत्तिसंख्यात्वजातौ व्यभिचारवारणाय विशेषेति। शब्दासमवायिकारणकशब्दवृत्तिशब्दत्वावान्तरजातौ व्यभिचारवारणाय साक्षादिति। **आत्मसंयोगेति**। दिग्देशाद्यवच्छिन्नात्मनः संयोगमात्रस्येच्छाजनकत्वे शरीरानवच्छिन्नात्मप्रदेशेऽपीच्छोत्पत्तिप्रसङ्गादित्यर्थः।

यद्वा चेष्टा संयोगासमवायिकारणिका संस्काराजन्यक्रियात्वादिति चेष्टाया असमवायिकारणसंयोगसिद्धौ प्रयत्नवदात्मसंयोग एव पर्यवस्यति प्रयत्नान्वयव्यतिरेकानुविधायित्वात्। एवं चेष्टाया असमवायिकारणसंयोगाश्रयत्वे सति शरीरत्वं सात्मकत्वं जीवच्छरीरे साध्यं चेष्टावत्त्वादिति हेतुः। चेष्टाविरहश्च घटादौ प्रत्यक्षसिद्धः, चेष्टाविरहात्तदसमवायिकारणसंयोगविरहोऽपि सुग्रहः। यद्वा जीवच्छरीरं तदवयवो वा आत्मभिन्नत्वे सत्यात्मविशेषगुणकारणभोगानधिकरणावृत्तिसंयोगवत्प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वाद् यन्नैवं तन्नैवं यथा घटः, आत्मप्राणसंयोगः प्राणमनःसंयोगो वा शरीरप्राणसंयोगेनैवान्यथासिद्धो न कारणं, भोगाधारत्वं भोगसमवायिकारणातिरिक्तवृत्तिसकलभोगाधिकरणवृत्तित्वात् प्रमेयत्वादिवदिति तार्किकी रीतिः। अथेच्छाष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति गुणत्वाद् यन्नैवं तन्नैवं यथानाश्रितमष्टद्रव्याश्रितं वेति कथं व्यतिरेकी, अष्टद्रव्यातिरिक्तद्रव्यस्य तद्वृत्तित्वस्य चाप्रतीतेर्व्यतिरेकाद्यनिरूपणात्। स्यादेतत्, इच्छाया द्रव्याश्रितत्वेऽनुमिते पृथिव्यादौ बाधानवतारदशायां विप्रतिपत्तिवाक्यादाश्रितत्वादिसाधारणधर्मदर्शनाद्वा तद्द्रव्यमष्टद्रव्यातिरिक्तं न वेति सन्देहेनाष्टद्रव्यातिरिक्तद्रव्योपस्थितिः। यद्वेच्छाष्टद्रव्यातिरिक्ताश्रिता न वेति संशयाद् इच्छाया अष्टद्रव्यातिरिक्ताश्रयोपस्थितौ पश्चादिच्छाश्रयोऽष्टद्रव्यातिरिक्तद्रव्यं न वेति संशयादष्टद्रव्यातिरिक्तद्रव्योपस्थितिः। अथ वा द्रव्याश्रितेच्छा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्न

भोगाधारत्वमिति। तथा च भोगसमवायिकारणान्यत्वे सति भोगाधारत्वमेव सात्मकत्वं सामान्यतः सिद्धम्। व्यतिरेकिणा शरीरे साधनीयमिति भावः। न च हेतौ भोगाधारेत्यस्यासिद्धिवारकत्वाद्वैयर्थ्यमिति वाच्यं, तदुपादानं विना सकलपदस्य विशेषणीभूतार्थतया यत्किञ्चिद्विशेष्यपदार्थान्वितस्वार्थपरत्वे प्रसक्ते सकलात्मवृत्तेरात्मत्वादेरपि सकलवृत्तितया लाभसम्भवेन तत्र व्यभिचारप्रसङ्गात्। न हि सकलात्मवृत्तिः न सकलवृत्तिरिति। नन्वेवमेतदनुमानप्रवृत्तिपूर्वं संसार्यात्मादौ व्यभिचारसंशयात्कथमेतदनुमानप्रवृत्तिः स्यादित्यत आह-**इति तार्किकरीतिरिति।** इति तर्कोपजीवकरीतिरित्यर्थः। तर्कविरहदशायामेव व्यभिचारसंशयस्य व्याप्तिग्रहपरिपन्थित्वात्। प्रकृते च तर्केणैव व्याप्तिग्रहादेतदनुमानप्रवृत्तिः स्यादेवेति भावः॥

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां केवलव्यतिरेक्यनुमानप्रकरणं समाप्तम्

वेति पूर्ववत् संशयादष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं प्रसिद्धमिच्छायाः साध्यते, संशयप्रसिद्धमपि साध्यं व्यतिरेकादिनिरूपकं साध्यज्ञानमात्रस्य कारणत्वात्। न चैवं संशयादेव पक्षे साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यं, निश्चयार्थं तत्प्रवृत्तेरिति। मैवं, संशयेन साध्यप्रसिद्धावपि तद्व्यतिरेकनिश्चयासम्भवात्, साध्यव्यतिरेक-तद्व्याप्तिनिश्चयस्य साध्यनिश्चयसाध्यत्वात् साध्यसन्देहे तद्व्यतिरेकादिसंशया-वश्यम्भावात्। किञ्च संशयोपस्थितसाध्यस्य व्यतिरेकिनिरूपणं न योग्यानुपलम्भात्, साध्यनिश्चयं विना योग्यानुपलम्भासम्भवात्। नापि व्यापकाभावात्, साध्यनिश्चयं विना तद्व्यापकत्वनिश्चयाभावात्। न च यदीच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता न स्यादष्टानाश्रिता सती द्रव्याश्रिता न स्याद् रूपवदिति साध्यविपर्ययकोटौ प्रतिकूलतर्कसहकृतः साध्यसंशय एव निश्चयकार्यं करोति। अत एवैतादृशसंशयोपस्थितकल्पितडित्थादिसाधनमप्यपास्तं, तद्विपर्यये प्रतिकूलतर्का-भावादिति वाच्यं, साध्यनिश्चयं विना साध्यव्यतिरेकनिश्चयतन्मूलतर्कानवतारात्, अन्यथा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वनिरूपणे तर्कोदयस्तर्कोदये तत्सहकृतसाध्य-संशयस्य साध्यव्यतिरेकनिश्चायकत्वमिति।

उच्यते- इच्छाश्रयद्रव्यसिद्धौ पृथिव्यादाविच्छाधारताऽभावे तद्द्रव्यं पृथिव्या-द्यष्टद्रव्यभिन्नम् अष्टद्रव्यावृत्तिधर्मवत्त्वात् पृथिव्यादित्वे बाधकसत्त्वाद्वेत्यष्टद्रव्याति-रिक्तद्रव्यसिद्धाविच्छायामष्टद्रव्यातिरिक्तद्रव्यवत्त्वमष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं वा साध्यते, साध्यप्रसिद्धिर्द्रव्यत्वे इच्छा विशेष्यकाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्व-प्रतीतेर्व्यतिरेकिसाध्यत्वात्, तथापीच्छाष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वाद् अष्टद्रव्यातिरिक्तद्रव्यत्ववदिति साध्यप्रसिद्ध्यैव दृष्टान्त-सिद्धेरन्वयी हेतुः स्यादिति चेत्? न, अन्वयव्याप्त्यप्रतिसन्धाने व्यतिरेकव्याप्ति-प्रतिसन्धानदशायां व्यतिरेकिसम्भवात्। न च द्रव्यत्वादेः सपक्षाद व्यावृत्तावसाधारण्यं, तद्धि साध्यतदभावोभयसाधकत्वेन सत्प्रतिपक्षोत्थापकतया दोषावहम्। प्रकृते च न हेतोः साध्याभावासाधकत्वं, विपक्षे बाधकाभावात्, साध्यसाधकत्वे तत्सत्त्वात्। अत एव यावदेकत्रानुकूलतर्को नावतरति तावदेव दशाविशेषेऽसाधारण्यं दोष इत्युक्तं, सुवर्णतैजसत्वसाधकव्यतिरेकिणि शब्दोऽनित्यः शब्दत्वादित्यादावपि तथा। अथाष्टद्रव्यबाधानन्तरमिच्छादौ गुणत्वादेवाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं सिध्यति, पक्षधर्मताबलात् प्रसिद्धविशेषबाधे सामान्यज्ञानस्य तदितरविशेषविषयत्वनियमात्। अत एवासर्वविषयानित्य-ज्ञानबाधानन्तरं क्षित्यादौ कार्यत्वेन ज्ञानजन्यत्वं सिध्यन्नित्यसर्वविषयत्वं

ज्ञानस्यादायैव सिध्यतीति चेत्? न, बाधानन्तरं ह्यष्टद्रव्यातिरिक्तद्रव्यविषयाप्यनुमिति-र्द्रव्याश्रितत्वप्रकारिका स्यात्, अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वनियमात्। न त्वष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारिका, तस्य पूर्वमप्रतीतत्वेन प्रकारत्वासम्भवादिति तत्प्रकारिकानुमितितिर्व्यतिरेकिण्येव। अनाद्यन्तद्व्यणुकादियावत्पक्षीकरणेऽनाद्यन्त-तावदुपादानगोचरापरोक्षज्ञानत्वमेव नित्यसर्वविषयत्वमेतदन्यनित्यसर्वविषयत्वं व्यतिरेकिण एव सिध्यति, पक्षधर्मताबलेनापि व्यापकतावच्छेदकप्रकारेण साध्यसिद्धिर्भवति न तु साध्यगतविशेषप्रकारिका, अतिप्रसङ्गात्। नन्वष्ट-द्रव्यानाश्रितेच्छा द्रव्याश्रितेति यदि साध्यते तदाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमन्तरेण प्रतिज्ञार्थ एव नोपपद्यते, सत्यम्, एवमप्यष्टद्रव्यानाश्रितेच्छायां द्रव्याश्रित्वं सिध्यतु तस्याष्टद्रव्यातिरेक्यं कुतः सिध्येत्। अथ सामान्याव्यभिचारमादाय मानान्तरोपनीतं तत्तदन्यत्वमुपजीव्याष्टद्रव्यान्यद्रव्यवृत्तितैवेच्छादेः परिच्छिद्यते ज्ञानान्तरोपस्थापितविशेषणविशिष्टज्ञानस्य सुरभि चन्दनमित्यादौ दर्शनादिति चेत्? न, मानान्तरान्नियमेनानुपस्थितेः।

ये चेच्छाश्रये पृथिव्यादिभिन्नत्वं न जानन्ति, इच्छायाश्च पृथिव्याद्यनाश्रितत्वं न जानन्ति तेषामप्यनुमानादित्यप्याहुः।

अथ व्यतिरेकी नानुमानं, सर्वत्र प्रमेयत्वादिना सत्प्रतिपक्षग्रस्तत्वादिति चेत्? न, विपक्षबाधकेन व्यतिरेकिणो बलवत्त्वात्।

अन्ये तु व्यतिरेकिण्यभाव एव साध्यः, स चाप्रसिद्ध एव सिध्यति यस्याभावस्य व्यापको हेत्वभावो गृहीतस्तस्याभावः पक्षे व्यापकाभावाभावरूपेण हेतुना सिध्यति व्यापकाभाववत्तया ज्ञाते व्याप्याभावज्ञानावश्यम्भावात्। तथा हि पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यत्रेतरस्य जलादेर्व्यापकः पृथिवीत्वाभावो गृहीत इति पृथिवीत्वाभावाभावरूपेण पृथिवीत्वेन पृथिव्यामितरान्योन्याभावोऽप्रसिद्ध एव सिध्यति प्रतियोगिज्ञानस्य वृत्तत्वात् प्रत्यक्षेण भूतले घटाभाववत्। एवमन्यत्राप्यव्याप्यवृत्तीच्छायाः स्वाश्रयत्वे सिद्धे स्वाश्रये योऽत्यन्ताभावस्तदवच्छेदकं घटादि सर्वं तदवच्छेदेनेच्छानुपलम्भात्। जीवच्छरीरन्तु न तथा, तदवच्छेदेन तदाश्रये इच्छोपलम्भात्। तथा चेच्छात्यन्ताभावाश्रयतावच्छेदकत्वरूपस्य नैरात्म्यस्य घटादौ प्राणादिमत्त्वाभावो व्यापको गृहीत इति जीवच्छरीरे प्राणादि-मत्त्वेनेच्छात्यन्ताभावाश्रयत्वावच्छेदकत्वस्याभावः सात्मकत्वं साध्यते। एवं प्रामाण्यसाधकव्यतिरेकिण्यपि व्यधिकरणप्रकारावच्छिन्नत्वस्य व्यापकः समर्थ-प्रवृत्तिजनकत्वाभावोऽप्रमायां गृहीतोऽतो विवादाध्यासितानुभवे समर्थप्रवृत्तिजनकत्वेन

व्यधिकरणप्रकारावच्छिन्नत्वस्याभावः सिध्यति व्यधिकरणप्रकारानवच्छिन्नत्वमेव प्रमात्वम्।

ननु साध्याप्रसिद्धौ कथं साध्यविशिष्टज्ञानं विशेषणज्ञानजन्यत्वाद्विशिष्टज्ञानस्येति चेत्? न, पक्षे साध्यानुमितिसामग्रीसत्त्वात्पक्षविशेषणकः साध्यविशेष्यक एव प्रत्ययो जायते भूतले घटो नास्तीत्यभावविशेष्यकप्रत्ययवत्, तथापि साध्याभावव्यापकाभावाभावरूपहेतुमत्तया पक्षज्ञानं व्यतिरेकिणि गमकतोपयिकम्। न च साध्यप्रसिद्धिं विनापि तादृशप्रतिसन्धानं सम्भवति। न च वस्तुगत्या यः साध्याभावस्तद्व्यापकाभावप्रतियोगिमत्तया ज्ञानं मृग्यत इति वाच्यं, व्यतिरेक्याभासानुपपत्तेरिति चेत्? न, योऽभावो यस्य भावस्य व्यापकत्वेन गृहीतस्तदभावाभावेन तस्य व्याप्यस्याभावः पक्षे साध्यत इत्यनुगतानतिप्रसक्तस्य गमकतौपयिकत्वात्। अयञ्च व्यतिरेकिप्रकारः स्वार्थ एव परं प्रति साध्याप्रसिद्ध्या प्रतिज्ञाद्यसम्भवादिति सर्वं समञ्जसम्।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ केवलव्यतिरेक्यनुमानप्रकरणं समाप्तम्

।। अर्थापत्तिप्रकरणम् ।।

व्यतिरेक्यनुमानसिद्धावर्थापत्तिर्न मानान्तरं, तेनैव तदर्थसिद्धेः। स्यादेतत्, ज्योतिःशास्त्रात्तत्कथितलिङ्गाद्वा देवदत्तस्य शतवर्षजीवित्वमवगतं चरमं शतवर्षजीवी गृह एवेति नियमे प्रत्यक्षेणावगते पश्चाद्योग्यानुपलब्ध्या निश्चितो गृहाभावो जीवननियमग्राहकप्रमाणयोर्बलाबलनिरूपणाद्बहिःसत्त्वकल्पनं विना नियमद्वय-विषयकसंशयं जनयित्वा जीवति न वेति संशयमापाद्य जीवनसंशयापनुत्तये जीवनोपपादकं बहिःसत्वं कल्पयतीति यथोक्तसामग्र्यनन्तरं बहिरस्तीति प्रतीतेः तत्रान्वयव्यतिरेकाभ्यां संशयद्वारा गृहाभावस्तदुत्पादितनियमद्वयविषयकसंशयो वा करणं जीवनसंशय एव वा, करणे सव्यापारकत्वानियमात्। प्रमाणयोर्विरोधज्ञानं तदाहितसंशयद्वारा करणमिति कश्चित्। जीवित्वस्य लिङ्गविशेषणस्य सन्दिग्धत्वेनानुमानासम्भवादर्थापत्तिर्मानान्तरम्।

ननु संशयस्य कल्पकत्वे स्थाणुपुरुषसंशयादपि तदेककोटिनिर्वाह-कल्पनापत्तिः। न च प्रमितसंशयः कल्पलाङ्गं, जीवनस्य तदानीं प्रमित्वे संशायाभावप्रसङ्गात्, जीवित्वनिश्चयेऽनुमानादेव बहिःसत्त्वनिश्चयाच्च, कदाचित् प्रमितत्वे च प्राक्प्रमितपुरुषत्वास्यान्तरा तत्संशये कल्पना स्यात्। किञ्च जीवनसंशयस्य भूतेऽपि दृष्टत्वान्न व्यभिचारेण बहिःसत्त्वगमकत्वमिति चेत्? न, यथोक्तसामग्रीप्रभवसंशयस्य कल्पनाङ्गत्वात्। अत एव मृतजनिष्यमाणयो-र्गृहाभावनिश्चयो न यथोक्तसंशयमापादयतीति न बहिःसत्त्वकल्पकः, गृहाभावश्च योग्यानुपलब्धिनिश्चितो न संशय इति।

अथ जीवननियमग्राहकप्रमाणयोर्यदि च तुल्यबलत्वमवगतं क्व तर्हि बहिःसत्त्वकल्पना विशेषदर्शनविरहात्, कल्पने वा प्रमितजीवननिर्वाहकबहिः-सत्त्ववदगृहनियमनिर्वाहकमरणस्याप्युचितत्वेन तत्कल्पनापि स्यात्, जीवनमरणयोः संशयाविशेषात्। अथ तयोरेकं बलीयोऽपरमबलं तदैकेनापरस्य बाध एवेति न संशयः। तस्माद्यत्र शतवर्षजीवित्वमवधारितं गृहाभावश्च निश्चितस्तत्र बहिःसत्त्वकल्पनं, न तु जीवनसंशये। एवञ्च देवदत्तो बहिः सन् जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वादिति व्यतिरेकिणा बहिःसत्त्वज्ञानेनार्थापत्त्या लिङ्गविशेषणजीवित्वसंशये बहिःसत्त्वकल्पना च नास्त्येव। किञ्च गृहाभावनिश्चयः प्रमाणद्वयविषयसंशयं जनयित्वा जीवनसंशयमापाद्य बहिःसत्त्वं कल्पयतीति न युक्तं, न हि यत एव यत्संशयः स एव तन्निश्चयाय प्रभवति, अतिप्रसङ्गात्। मैवम्, यथोक्तसामग्रीजनितसंशयवानेवं तर्कयति योग्यानुपलब्धिगृहीतो गृहाभाव

इति तन्निश्चयः सुदृढ इति जीवननियमग्राहकयोरेकं बाध्यं विरुद्धयोरप्रमाणत्वात्। तदिह मरणं कल्पयित्वा जीवनग्राहकं बाध्यतां नो वा बहिःसत्त्वं कल्पयित्वा गृहनियमग्राहकं, तत्र बहिःसत्त्वकल्पने गृहनियमग्राहकमात्रबाधा, मरणकल्पने तु शतवर्षजीवी देवदत्तः शतवर्षजीवी गृह एवेति नियमद्वयस्यापि बाधा स्यात्। तदाह जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति। किञ्च अद्य जीवति श्वो जीविष्यतीत्यादिबहुतरक्षणलवमुहूर्तादिसमयोपाधिनियतं जीवनमुपलब्धमिति तद्बाधे बहुतरव्याप्तिबाधः। देवदत्त-तदवयवगृहसत्त्वव्याप्तिश्चाल्पा, तथा अभावस्वरूपमरणापेक्षया बहिःसत्त्वस्य भावस्य लघुत्वं, यदि च गृहान्योन्याभावाश्रयबहिःपदार्थवृत्तिसंयोगाश्रयत्वं बहिःसत्त्वमिति तदपेक्षया मरणमेव लघु, तथापि मरणापेक्षया जीवनमात्रं लघ्विति तदेव कल्पयितुमर्हम्। ततोऽर्थापत्तिकल्पितं जीवित्वमुपजीव्यानुमानादपि बहिःसत्त्वज्ञानं भविष्यतीत्य-तो व्यावर्तकसहकृतो यथोक्तसामग्रीप्रभवः संशयो बहिःसत्त्वं कल्पयति। न च वाच्यं तर्काणां विपर्ययावसायित्वे आभासत्वं, तत्पर्यवसाने च तदेवानुमानमेतत्तर्कसहायं बहिःसत्त्वमनुमापयिष्यतीति। यतो लाघवगौरवतर्काणां विपर्ययापर्यवसायिनामेव प्रमाणसहकारित्वमत एव प्रत्यक्षशब्दादावपि सहकारी सः। न च तस्यां दशायामेव प्रमाणान्तरमस्ति, ततोऽर्थापत्तिसहकारित्वं तर्कस्य। ननु स्वकारणाधीनस्वभावविशेषात्तर्कानुगृहीतयथोक्तसंशयस्य यदि बहिःसत्त्वप्रमापकत्वं तदा मृते गृहस्थिते वा तादृशसंशाद्यत्र बहिःसत्त्वकल्पना सापि प्रमा स्यादिति चेत्? न, यथा हि प्रमापकस्येन्द्रियस्य दोषेण प्रमाशक्तितिरोधानादैन्द्रियकभ्रमस्तथा यथोक्तसंशयस्यापि दोषेण प्रमाशक्ति-तिरोधानादग्रहरूपभ्रमसम्भवात्। परोक्षज्ञानानां जनकज्ञानाविभ्रमत्वे यथार्थत्वनियम इति चेत्? सत्यं, प्रकृतेऽपि जीवनगृहाभावनियमग्राहकप्रमाणयोरन्यतराभास-त्वेनाभासत्वसम्भवात्। यद्वा दोषाभावसहकृतस्य यथोक्तसंशयस्य बहिःसत्त्व-प्रमापकत्वमिति।।

।। अथ संशयकारणकार्थापत्तिसिद्धान्तः ।।

उच्यते-अनयोरेकं बाध्यं विरुद्धार्थग्राहकत्वादिति सामान्यतो दृष्टादेव तर्कसहकृताद् गृहनियमग्राहकबाधे लिङ्गविशेषेण जीवित्वनिश्चयेऽनुमाना-द्बहिःसत्त्वसिद्धिः। तथाहि जीवनप्रमाणबाधे गृहनियमप्रमाणोत्थापितलिङ्गेन मरणानुमानात् प्रमाणत्वाभिमतयोर्द्वयोरपि बाधा स्यात्, गृहनियमग्राहकमानबाधे च निष्परिपन्थिजीवनप्रमाणाल्लिङ्गविशेषणजीवित्वनिश्चये बहिःसत्त्वानुमानादेक-

प्रमाणबाधैवेत्यादितर्कसहकृतात् सामान्यतो दृष्टादेवानयोरेकं बाध्यमिति जायमानानुमितिः परम्परामरणज्ञापकं विषयीकरोति, न तु बहिःसत्त्वपरम्परासाधकं जीवनप्रमाणम्। तथा च सामान्यतो दृष्टादेव गृहनियमग्राहकबाधे जीवनप्रमाणाल्लिङ्गविशेषणजीवित्वनिश्चयेऽनुमानादेव बहिःसत्त्वज्ञानमिति किमर्थापत्त्या।

ननु बहिःसत्त्वज्ञानं विना जीवी गृह एवेत्यस्य ब्रह्मणापि बाधितुमशक्यत्वात् प्रथमं बहिःसत्त्वज्ञानं न तु गृहनियमग्राहकबाधानन्तरं तत्, येन निष्परिपन्थिजीवनग्राहकाज्जीवित्वनिश्चयेऽनुमानं स्यात्, न प्राथमिकबहिःसत्त्वज्ञानमर्थापत्तिं विना। न च गृहनियमग्राहिणि तुल्यबले जागरूके कथमर्थापत्त्यापि बहिःस्वत्त्वज्ञानमिति वाच्यं, तर्कसहकारेणार्थापत्तेर्बलवत्त्वाद्बहिःसत्त्वज्ञानमुत्पाद्य गृहनियमग्राहकमानबाधादिति चेत्? न, तर्कसहकारेण सामान्यतोदृष्टस्य बलवत्त्वेन गृहनियमग्राहकबाधसम्भवात्। तस्माद्यथोक्तसंशयदशायां जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति तर्कानन्तरमेव बहिःसत्त्वज्ञानमित्यविवादं, तत्र कल्पनीयप्रमाणाभावे यथोक्तसंशये तर्कस्य न सहकारित्वं गौरवात्, किन्तु नियमग्राहकबाधद्वारा बहिःसत्त्वपरम्परासाधके सामान्यतोदृष्टे, लाघवात्। न च सामान्यतोदृष्टावतार एवात्र नास्तीति वाच्यम्, अनिर्द्धारितैकबाधप्राप्तौ ह्येकबाधानुकूलकल्पनायां विनिगमकस्तर्को भवति, न चैकबाधप्राप्तिः सामान्यतोदृष्टं विना। किञ्च विरोधज्ञानानन्तरमेकमप्रमाणमिति यदि धीर्नास्ति तदा प्रमाण्यसंशयो न स्यात्, न स्याच्च जीवनसंशयः, द्वयोरपि जीवनमरणनिश्चायकत्वात्।

अथैकमनयोरप्रमाणमिति ज्ञानं जनयित्वा सामान्यतो दृष्टस्य पर्यवसितत्वात्तज्जनितनियमद्वयसंशयाहितजीवनसंशयान्तरं तर्कावतारे बहिरस्तीति ज्ञानं जायमानं संशयस्य कारणत्वं व्यवस्थापयतीति चेत्? न, यदेव हि विरुद्धार्थग्राहकत्वं तर्कविनाकृतमनिर्धारितैकाप्रामाण्यानुमितिमजीजनत्तदेव तर्कसहकृतं पुनरनुसन्धीयमानं गृहनियमग्राहकप्रमाणमित्यनुमितिं बहिःसत्त्वज्ञानानुकूलां जनयति सहकारिवैचित्र्येणैकस्यापि विचित्रफलजनकत्वात्। न च जीवनसंशयानन्तरं तदनुसन्धानमसिद्धं गृहनियमग्राहकस्य जीवनग्राहकविरुद्धार्थग्राहकत्वं विना बहिःसत्त्वकल्पनेऽप्यबाधप्रसङ्गात्।

अथ यदि पर्यवसन्नमपि प्रमाणं पुनरनुसन्धीयमानं सहकारिविशेषात् फलान्तरजनकं तदेच्छा द्रव्याश्रिता कार्यत्वादिति सामान्यतोदृष्टद्रव्याश्रितत्वानुमितौ पश्चादष्टद्रव्यवृत्तित्वबाधे व्यतिरेकिणात्मसिद्धिरिति भज्येत, अष्टद्रव्यवृत्तित्व-

बाधसहकृतात् सामान्यतोदृष्टादेव पुनरनुसन्धीयमानात् तत्सिद्धेरिति चेत्? न, अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन तत्प्रकारकबुद्धेर्व्यतिरेकिसाध्यत्वात्, व्यतिरेकिणोऽप्यन्यत्र सामर्थ्यावधारणेनोपायान्तरस्यादोषाच्च। अपि च देवदत्तो जीवनमरणान्यतरप्रतियोगी प्राणित्वान्मद्वदिति सामान्यतोदृष्टं लाघवसहकारेण जीवनप्रतियोगित्वं विषयीकरोति, तथा च लिङ्गविशेषणनिश्चयादनुमानादेव बहिःसत्त्वसिद्धिः।

अथ लाघवसाचिव्यात् सामान्यतोदृष्टस्यापि विशेषविषयत्वात् नियमग्राहकप्रमाणोत्थापितलिङ्गकमरणानुमानेन जीवनग्राहकस्यैव सत्प्रतिपक्षत्वम्, एकेनापि भूयसामपि प्रतिबन्धसम्भवात्। न च तर्कात्सामान्यतोदृष्टस्य बलवत्त्वं, व्याप्तिपक्षधर्मते हि बलं, तच्च तुल्यमेव ज्ञातं लाघवाख्यतर्कस्य विशेषमात्रपर्यवसायकत्वेन व्याप्तिग्राहकत्वस्य तुल्यत्वादिति चेत्? तर्हि पक्षधर्मता बलाद्विशेषसिद्धिः क्वापि न स्यात्, सर्वत्र सामान्यमुखप्रवृत्तप्रमाणस्य विशेषपर्यवसानेऽन्यसाधर्म्येण सत्प्रतिपक्षसम्भवात्, अप्रयोजकत्वान्न विपरीतसाधनमिति तुल्यं नियमग्राहकस्याप्रयोजकत्वात्। जीवनग्राहकस्य तु सामान्यतोदृष्टस्य ज्योतिःशास्त्राद्ययथार्थत्वमेव विपक्षबाधकं व्याप्तिग्राहकमस्ति। तस्मात् सामान्यमुखप्रवृत्तस्य सहकारिविशेषाद् विशेषपरस्यानुमानस्य तद्विशेषविलक्षणग्राहकप्रमाणेन सत्प्रतिपक्षत्वम्। न च प्रमाणविरोधेनास्य तर्को न सहकारीति वाच्यं, तर्कानवतारे विशेषपरत्वाभावेनाविरोधात्, तदवतारे तदधिकबलत्वादेव, अन्यथा तर्कानवतारे सत्प्रतिपक्षस्य तदवतारेऽपि तत्त्वं न निवर्तते। किञ्चैवमर्थापत्तावपि तद्विरोधेन न सहकारी स्यात्। यदुक्तं मरणकल्पने शतवर्षावच्छिन्नजीवी गृह एवेत्यस्यापि बाध इति तत्र विशिष्टबाधो न विशेष्यबाधात् मरणेऽपि जीवी गृह एवेत्यस्य विशेष्यास्याबाधात्, किन्तु विशेषणबाधात्। स च शतवर्षाजीवित्वबाध एव। विशेषणभावायत्तो विशिष्टाभावोऽप्यस्तीति चेत्? न, विशेष्यवति विशिष्टाभावस्य केवल-विशेषणाभावात्मकत्वाद् विशिष्टस्यातिरिक्तस्यानभ्युपगमात्।

अन्ये तु शतवर्षजीवी देवदत्तो जीवी गृह एव, गृहे नास्तीति प्रमाणेषु द्वयोरविरोधेऽपि तृतीयमादाय विरोधज्ञानमस्ति तत्र जीवी गृह एवेत्यप्रमाणघटितप्रमाणद्वयविरोधज्ञानजनिताप्रामाण्यसंशयाहितजीवनसंशयात् प्रमाणयोरविरोधोपपादकप्रमाणविरोधि बहिःसत्त्वं कल्प्यते। यथोक्तसंशयस्यायमेव स्वभावो यद्वस्तुगत्या ऽप्रमाणं तद्विरोधि कल्पयति विरोधघटकस्य वस्तुगत्या-

ऽप्रमाणत्वमेव विनिगमकत्वमिति, तत्तुच्छम्, अप्रमाणस्यापि प्रमाणत्वेन ज्ञानात्, तर्कादिभिर्विशेषदर्शनं विना यथोक्तसंशयानन्तरं बहिरस्तीति ज्ञानमसिद्धमतो न फलबलेन तथार्थापत्तिकल्पनम्। किञ्च मृते गृहस्थिते बहिःस्थिते तादृशसंशयादेव बहिःसत्त्वं गृहसत्त्वं मरणञ्च कल्प्येत कस्यचित् क्वचिद्वस्तुगत्या ऽप्रमाणत्वाद् अर्थापत्त्याभासश्चैवं न स्यात्।।

।। अथानुपपत्तिकरणकार्थापत्तिः ।।

स्यादेतत्, माभूत् संशयः करणमर्थापत्तावनुपपत्तिस्तु स्यात्। तथाहि जीवी देवदत्तो गृहे नास्तीतिज्ञाने सति बहिःसत्त्वं विना जीवतो गृहासत्त्वमनुपपन्नमिति ज्ञानानन्तरं बहिरस्तीति धीरस्ति, तत्रान्वयव्यतिरेकाभ्यामनुपपत्तिज्ञानं करणम्। न च देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वाद् घटवदित्यनुमानाद्विद्यमानत्वे सति यत्र यन्नास्ति तदन्यदेशे तदस्ति, यथा गृह एव कोणेऽसन्नहं मध्ये तिष्ठामीतिव्याप्तिप्रभवानुमानाद्वा बहिःसत्त्वसिद्धेः किमर्थापत्त्येति वाच्यं, हेतुसाध्ययोः सहचाराज्ञानदशायामनुपपत्तिज्ञानेऽपि बहिःसत्त्वज्ञानात्, सामान्यतो व्याप्तिश्चानुमाने उपसंहर्तुमशक्येति तदन्यदेशसिद्धिरर्थापत्त्यैव।

ननु जीविनो गृहासत्त्वमनुपपन्नं किं देवदत्तबहिःसत्त्वं विना, उत बहिः-सत्त्वमात्रं विना, नाद्यः? प्रथमं देवदत्तबहिःसत्त्वाप्रतीतौ तेन विनेदमनुपपन्नमिति ज्ञानाभावात्। प्रतीतौ वा किमर्थापत्त्या। अर्थापत्तित एव तत्प्रतीतावन्योन्याश्रयः। तदुक्तं यतोऽन्यत्वं तत्सिद्धेरग्रे तदसिद्धेरिति। नान्त्यः, अन्यदीयबहिःसत्त्वज्ञानं विनाऽनुपपत्त्यभावाद् बहिःसत्त्वमात्रसिद्धावपि देवदत्तबहिःसत्त्वासिद्धेश्चेति चेत्? न, सामान्येन हि विनानुपपत्तिज्ञानं कारणं सामान्याकारेण विशेषज्ञानं फलं, तथाहि जीविनो बहिःसत्त्वं विना गृहासत्त्वमनुपपन्नमिति ज्ञानं यस्य गृहासत्त्वमनुपपन्नं तत्र बहिःसत्त्वं कल्पयति नान्यत्र, देवदत्तश्च तथेति सिद्धे देवदत्ते बहिःसत्त्वं कल्प्यत इति देवदत्तबहिःसत्त्वं पर्यवस्यति, न तु तेन रूपेण कल्पना न वा तेन विनानुपपत्तिज्ञानं कारणं, यथा वह्निमात्रव्याप्ताद्धूमात् पर्वते वह्निसिद्धिरेव पर्वतीयवह्निसिद्धिर्न तु पर्वतीयत्वेनैव धूमात्तत्सिद्धिः, तेन रूपेण व्यापकत्वाग्रहात्।

अथोपपादकाभाववत्युपपाद्याभावनियमोऽनुपपत्तिर्न त्वभावमात्रम्, अति-प्रसङ्गात्। एवञ्च व्यतिरेकव्याप्तिमत उपपाद्याद्व्यतिरेक्यनुमानमुद्रयैव साध्यसिद्धेः किमर्थापत्त्या। तथाहि देवदत्तो बहिः सन् जीवित्वे सति गृहासत्त्वाद् यन्नैवं तन्नैवं यथा मृतो गृहस्थितो वा। न चान्यव्याप्त्याऽन्यस्य गमकत्वेऽतिप्रसङ्गः,

साध्याभावव्यापकाभावप्रतियोगित्वस्य नियामकत्वात्। न चार्थापत्तौ स्वरूपसती व्याप्तिर्लिङ्गं नानुमान इति वाच्यम्, अनुपपत्तेज्ञानं विना कल्पनानुदयात्, अर्थापत्त्याभासानवकाशाच्च। मैवम्, अत्र हि व्यतिरेकव्याप्तिरन्वयस्य पक्षधर्मत्वमिति व्याप्तिधीजन्यमपि बहिःसत्त्वज्ञानं नानुमितिः, तस्या व्याप्तपक्षधर्मज्ञानजन्यतानियमात्। न च साध्याभावव्यापकाभावप्रतियोगित्वे पक्षधर्मस्य ज्ञानमनुमितिप्रयोजकं, तच्चेहाप्यस्तीति वाच्यं, केवलान्वयिनि तदसम्भवात्, तदपेक्षया साध्यव्याप्यत्वज्ञानस्य लघुत्वाच्च।

अथ व्यतिरेकसहचाराद्धेतोरेव व्याप्तिर्गृह्यते। एवञ्चान्वयस्य व्यतिरेकस्योभयस्य वा सहचाराद्व्याप्तिग्रहत्रैविध्येऽनुमानत्रैविध्यम्। अत एव धूमो दशाविशेषेऽन्वयी व्यतिरकी अन्वयव्यतिरेकी चेति चेत्? अस्तु तावदेवं, तथापि जीविदेवदत्ताभावो गृहे वर्तमानो न बहिःसत्त्वलिङ्गं देवदत्तावृतित्वात्, बहिःसत्त्वगृहनिष्ठाभावयोर्व्यधिकरणत्वेन नियतसामानाधिकरण्यरूपव्याप्त्यभावाच्च। उपरि सविता भूमेरालोकवत्त्वादित्यत्र भूमेरुपरि सन्निहितसवितृकत्वेनानुमानात्। नापि गृहनिष्ठाभावप्रतियोगित्वं, तत्प्रतियोगित्वस्य देवदत्तधर्मतया तदसन्निकर्षे प्रत्यक्षेण ज्ञातुमशक्यत्वात्। अत एव विशेष्यासन्निकर्षात्तृतीयलिङ्गपरामर्शोऽपि न प्रत्यक्षेण। न च व्यतिरेकव्याप्तिगृहनिष्ठाभावयोर्ज्ञानं सहकार्यासाद्य मनसैव जन्यत इति वाच्यं, सहकारिण एव मानान्तरत्वप्रसङ्गात्।

अथ व्याप्तिज्ञानान्तरं स्मर्यमाणधूमात् कथमनुमितिः, उक्तन्यायेन तत्रापि लिङ्गपरामर्शाभावादिति चेत्? न कथञ्चित्। कथं तर्हि वह्निज्ञानं? पक्षधर्मधूमस्मृतिसहिताद् धूमो वह्निं विना नास्तीत्यनुपपत्तिज्ञानादिति गृहाण। अत एव दृश्यमानो धूमो वह्निं विनानुपपन्न इति यदा ज्ञायते तदार्थापत्तिरेव, यदात्वनुपपत्तिज्ञानं विना व्याप्यत्वेन प्रतिसन्धीयते तदानुमानं, त्वयापि तत्र त्रिविधानुमानस्वीकारात्। तस्माद्व्यतिरेकव्याप्तिमुपजीव्य जीविदेवदत्ताभावो बहिःसत्त्वं कल्पयति। उच्यते–देवदत्तासन्निकर्षेऽपि तस्य गृहनिष्ठाभावप्रतियोगित्वं प्रत्यक्षेण गृह्यते। तथाहि गृहे देवदत्तस्याभाव इति प्रत्यक्षं देवदत्तं षष्ठ्यर्थञ्चाभावसम्बन्धं प्रतियोगित्वलक्षणं गोचरयति, सम्बन्धज्ञानस्य सम्बन्धिद्वयविषयत्वात्, प्रतियोगिना सममभावस्य सम्बन्धान्तराभावात्, गृहनिष्ठाभावप्रतियोगित्वे च प्रत्यक्षोपस्थिते स्मृतव्याप्तिवैशिष्ट्यमपि प्रत्यक्षेण सुग्रहम्। न च देवदत्तविशेष्यकं बहिःसत्त्वव्याप्यगृहनिष्ठाभावप्रतियोगित्वज्ञानं नास्तीति वाच्यं, पक्षवृत्ति-

लिङ्गपरामर्शमात्रस्यानुमितिजनकत्वात्, अधिकस्य गौरवपराहतत्वात्। अथवा अनतिप्रसक्तसहकारिवशान्मनसैव स्मृतदेवदत्तविशेष्यकस्तृतीयलिङ्गपरामर्शः। यथा च न सहकारिमानान्तरं तथोपपादितमधस्तात्।

ननु मयूरः पर्वतेतरे न नृत्यति नृत्यति चेति ज्ञानानन्तरं पर्वते नृत्यतीति ज्ञानमस्ति। न च व्यतिरेकिणस्तत्सम्भवति, पर्वतनृत्यस्य साध्यस्याप्रतीतौ व्यतिरेकव्याप्त्यनिरूपणात्। न च पर्वनृत्याप्रसिद्धौ तेन विनानुपपत्तिप्रतिसाधनमपि नेति कथमर्थापत्तिरपीति वाच्यम्, अधिकरणं विनानुपपद्यमानं नृत्यं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरमधिकरणं कल्पयतीत चेत्? न, मयूर-नृत्यं साधिकरणं नृत्यत्वादिति सामान्यतोदृष्टं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरं पर्वतमधिकरणमादाय नृत्यज्ञानं जनयति। यद्वा पर्वतेतरे न नृत्यतीति शब्देन नृत्याभावबोधानन्तरं मयूरो नृत्यतीतिशब्दाज्जायमानं ज्ञानं पर्वतनृत्यं गोचरयति प्रसिद्धविशेषबाधसहकृतसामान्यज्ञानजनकप्रमाणस्य प्रसिद्धेतरं पर्वतमधिकरणविशेषमादाय ज्ञानजनकत्वनियमात्। अत एवानित्यज्ञानबाधानन्तरं क्षित्यादौ ज्ञानजन्यत्वं सिद्धनित्यत्वमादाय सिध्यतीत्याचार्याः। यद्वा मयूरनृत्यं पर्वताधिकरणकं पर्वतेतरानधिकरणत्वे सति साधिकरणत्वात् पर्वतत्व-वदित्यन्वयव्यतिरेकी। अथवा यः सम्भाविततत्तदितरावृत्तिः सन् तदतिरिक्तवृत्तिर्न भवति स तदवृत्तिर्भवतीति सामान्येन यत्तदर्थान्तर्भाविन व्याप्त्या नृत्यस्य पर्वतवृत्तित्वं सिध्यति। एवं पीनो देवदत्तो दिवा न भुङ्क्त इत्यत्राप्यप्रसिद्धरात्रिभोजनसाध्यपीनत्वज्ञानं रात्रिभोजनमादाय सिध्यति। अथ यथा ऽभोजी पीन इत्यत्रायोग्यताज्ञानं तथा पीनो दिवा न भुङ्क्त इत्यत्रापि दिवाभोजनस्य बाधाद्योग्यताघटकरात्रिभोजनस्याप्रतीतेः। अतो योग्यताघटकोपस्थितिं विनाऽन्वयमलभमानमिदं वाक्यं योग्यताघटकरात्रिभोजनोपपादकं रात्रौ भुङ्क्त इति वाक्यं कल्पयित्वा तेन सहान्वयबोधं जनयति। न चैवं लाघवाद्रात्रिभोजनमेव कल्पयितुं युक्तं, शाब्दी ह्याकांक्षा शब्देनैव प्रपूर्यते इति न्यायेन शब्दोपस्थापितमादाय शब्दस्यान्वयबोधजनकत्वात्। एवञ्च श्रूयमाणशब्दस्यान्वयबोधकत्वं योग्यताघटको-पस्थापकेन शब्देन विनानुपपद्यमानं तं कल्पयित्वा यत्रान्वयबोधं जनयति तत्र श्रुतार्थापत्तिः। द्वारमित्यादौ पिधेहीतिशब्दकल्पनं श्रुतार्थापत्तिरेव। शब्दश्च यद्यपि श्रूयमाणो बाधितस्तथाप्यभिप्रायस्थः कल्प्यते। यथा गुरुमते स्वर्गकामो यजेतेत्यत्र साक्षात्साधनताबाधे परम्पराघटकस्यानुपस्थित्या परम्परासाधनता-ज्ञानविरहो योग्यताज्ञानाभावात् प्रसिद्धपदसामानाधिकरण्यानुपपत्तिरिति योग्यता-

ज्ञानाय परम्परासाधनताघटकमपूर्वं लिङादिवाच्यं कल्पयति, ततः स्वर्गसाधनं याग इति ज्ञानं जायते, अन्यथाऽपूर्वमपि वाच्यं न स्यादिति।

उच्यते–बाधकप्रमाणाभावोऽन्वयविरोधिरूपविरहो वा योग्यता। अतो दिवाऽभोजने रात्रिभोजनाप्रतीतावपि भोजनसाध्यपीनत्वाद्दिवा न भुङ्क्ते इति शब्दाद्धीरुत्पद्यते न प्रतीत्यनुपपत्तिः, किन्तु प्रतीतानुपपत्त्या रात्रिभोजनं कल्प्यते। अत एवापूर्वमपि न वाच्यमिति वक्ष्यते। तस्मान्नार्थापत्तिरनुमानादतिरिच्यत इति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणावर्थापत्तिप्रकरणं समाप्तम्

ततोऽर्थापत्तिकल्पकं जीवित्वमुपजीव्यानुमानादेव बहिःसत्त्वज्ञानं भविष्यतीति। अत्र तर्कविषयभागेऽर्थापत्त्युपदेशेन यद्यपि परस्य न प्रकृतरूपार्थापत्तिर्विवक्षिता, तत्र तस्य जीवित्वकल्पकत्वानभ्युपगमेन तथात्वसम्भावनाभ्युपगमस्यायुक्तत्वात्। नाप्यन्यरूपैवार्थापत्तिर्विवक्षिता, प्रकृतरूपार्थापत्तिवादिना तदनभ्युपगमात्। अन्यथा विरूपार्थापत्तिद्वयस्वीकारेण तस्यापसिद्धान्तात्। तथापि नैयायिकरीत्या तत्पदेन परस्यानुमानविशेष एव विवक्षितः। न चैवं तस्य तदनुमानविशेषाभ्युपगमे तदवतारोपजीविनोऽनुमानान्तरादेव बहिःसत्त्वकल्पने सम्भवति प्रकृतार्थापत्तिस्वीकारानवकाश एव दोषः, अनवकीर्ण एव तर्कितमात्रे तस्मिन् अनुमाने प्रकृतार्थापत्त्या बहिःसत्त्वकल्पनोत्पत्तिरित्यभिमानात्तेन तत्स्वीकारात्।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायाम् अर्थापत्तिप्रकरणं समाप्तम्

।। अवयवप्रकरणम् ।।

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञा-हेतूदाहरणोपनयनिगमनानि निरूप्यन्ते। तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः, अत्रैव वाक्येऽतिव्याप्तेः। किन्त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजक-शाब्दज्ञानजनकवाक्यं न्यायः। प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते, तेन च विशिष्टवैशिष्ट्यावगाहि मानान्तरमुत्थाप्यते, तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता।

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्य-त्वमवयवत्वम्। अत एव वह्निव्याप्यधूमवानयमितिवाक्ये तदवयवे च न न्यायत-दवयवलक्षणातिव्याप्तिः, तेन परामर्शस्य तदवयवेन परामर्शजनकस्य जननात्।

यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय एवेति, तन्न, कथायामाकांक्षाक्रमेणाभिधानमिति प्रथमं विशिष्टवैशिष्ट्य आकांक्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते, अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः, आकांक्षाविरहस्तुल्य एव।

अन्ये तु पञ्चावयववाक्याद् विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्धी-जनकवाक्यत्वं न्यायत्वम्। एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकवाक्यत्वमेव तत्तल्लक्षणमिति, तन्न, ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगतरूपमन्तरेण दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात्। अन्यथा जातिसङ्करप्रसङ्गः।

तत्र प्रतिज्ञा न साध्यनिर्देशः, साध्यपदेऽतिव्याप्तेः। किन्तूद्देश्यानुमिति-हेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्त-विषयकशाब्दज्ञानजनकं वाक्यम्। अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणं, तेनोदाहरणादिव्युदासः। निगमनञ्च न परामर्शहेतुः, अबाधितासत्प्रतिपक्षितत्वज्ञानजनकत्वात्।

किन्त्विति। न च न्यायसमानार्थके न्यायविसदृशाकारे वाक्यान्तरेऽतिव्याप्तिः, प्रतिपाद्याकांक्षानुरूपाभिधानजनकावान्तरवाक्यघटकत्वेन वाक्यस्य विवक्षितत्वात्। प्रतिज्ञादिपञ्चवाक्यघटित एव वाक्ये तत्सम्भवात्। अन्यथा प्रकारान्तरेणापि वादिनं प्रति न्यायार्थाभिधानप्रसङ्गस्य दुर्वारत्वादिति।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायाम् अवयवप्रकरणं समाप्तम्

हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा। लिङ्गाविषयकलिङ्गि-विषयकज्ञानजनकन्यायावयववाक्यत्वं वा, इतरावयवानां लिङ्गविषयकज्ञान-जनकत्वात्।

प्रतिज्ञात्वं जातिः, अनुगतानतिप्रसक्ततान्त्रिकव्यवहारादिति केचित्, तन्न, देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात्। प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात्। एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्य-जन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम्।

ननु प्रतिज्ञा न साधनाङ्गं, विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेत्? न, विप्रतिपत्त्यग्रे हि समयबन्धानन्तरं शब्दनित्यत्वं साधयेति मध्यस्थस्य वादिनोराकाङ्क्षायां शब्दानित्यत्वं साध्यं, न च साध्यनिर्देशं विना हेतुवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे। न च वादिवाक्येऽनुपस्थितमपि योग्यतया ऽन्वेति, अतिप्रसङ्गात्। न च विप्रतिपत्तितः साध्योपस्थितिः, तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरित्वात् परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावाद् विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्यवसितत्वेन निराकाङ्क्षत्वाच्च, आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तराद्धेत्वन्वययोग्या साध्योपस्थितिः, नाप्यवयवान्तरेणाक्षेपात्, साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात्। तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः।

अन्ये तु शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगस्तथापि प्रमाणमात्रे नाकाङ्क्षा, किन्तु विशिष्टे। विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानम्। न च वस्तुतो यत्साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः, वादिद्वयमध्ये तदसम्भवात्। तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा, न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति।

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्ति-मल्लिङ्गवचनमेवोचितम्, अन्यथानाकाङ्क्षिताभिधाने निग्रहापत्तेः, लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः।

हेतुत्वञ्चानुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्या-विषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम्। हेतुत्वप्रतिपादकविभक्तिमन्याया-

वयवत्वं वा। उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा। साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा। प्रतिज्ञावाक्यधीजन्य-कारणाकाङ्क्षानिवर्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा। पञ्चम्यन्तलाक्षणि-कपदवदनुमितिपरवाक्यत्वं वा। हेतुपदेन ज्ञाने लक्षणा, अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात् तथैवाकाङ्क्षानिवृत्तेः।

अनुमितिहेतुज्ञानकारणधूमवत्त्वादितिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्यज्ञानावृत्ति-जातियोगिज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये। जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यविशेषजन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे।

अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादक-विभक्तिमन्यायावयवत्वमन्वयिहेतुत्वम्, एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद् व्यतिरेकिहेतुत्वम्। अन्वयव्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्व-मन्वयव्यतिरेकिहेतुत्वम्।

यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि। अत्यन्ता-भावाप्रतियोगिसाध्यसमानाधिकरणपक्षसपक्षसद्धेतुवचनं केवलान्वयि।

यद्वा ऽनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयक-शाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम्। एतदेवाप्रतीतान्वयसाध्यसाधनेति विशेषणाद्व्यतिरेकिहेतुलक्षणम्। कथायां धूमादित्येव प्रयोक्तव्यं न तु धूमवत्त्वादिति, मतुपो व्यर्थत्वात्।

सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकं, विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति केचित्। तन्न, सतिसप्तमीबलात् सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः, न ह्ययमर्थोऽस्मान्नावगम्यत इति।

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणम्। तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्य-ज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्व-मुदाहरणत्वम्। सामान्यलक्षणे साध्यसाधनसम्बन्धबोधकत्वं साध्यसाधना-भावबोधकत्वञ्च विशेषलक्षणद्वयम्।

न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न, दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्वत्रिकत्वाद् यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः। नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः। अत उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्। एतदेवान्वयव्यतिरेकव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वयमित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा, केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वयम्। वीप्सा च यत्पदे न तु तत्पदेऽपि, विरूपोपस्थितयोरपि तत्पदेन परामर्शाद् बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः। यथा ''यद्यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे'' इत्यत्र। इदञ्च साध्यसाधनोभयाश्रयाविकलानुपदर्शितान्वयविपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदाभासरूपमिति।

उदाहरणानन्तरं भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनयः। तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयत्वमुपनयत्वमिति सामान्यलक्षणम्। साध्यव्याप्यविशिष्टपक्षबोधकावयत्वं, साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षणद्वयम्। उदाहरणान्त एव प्रयोग इति न वाच्यं, तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्मतावगाहिनोऽवयवान्तरादलाभात् तदनभ्युपगमेऽपि पक्षधर्मताया अलाभात्। न च हेतुवचनादेव तदवगमः, तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्। वादिवाक्यादेवाक्षेप इति चेत्? न, तदर्थस्यासिद्धत्वेनानाक्षेपकत्वात्, अन्यथा प्रतिज्ञावाक्यादेव सर्वाक्षेपेऽवयवान्तरविलयात्। प्रतिपाद्यानां स्वत एव तदवगम इति चेत्? न, तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात्, प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च। अन्यथावयवान्तरेऽप्येवं प्रसङ्गादिति।

उपनयानन्तरं निगमनम्। तच्चानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्। न च व्याप्तिपक्षधर्मतयोश्चतुर्भिरेवावयवैः पर्याप्तेः किं तेनेति वाच्यम्, अबाधितासत्प्रतिपक्षितत्वयोरलाभे चतुर्णामप्यपर्यवसानात्। अथाभिधानाभिधेययोर्व्याप्तिपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्यवसानेनावयवान्तराणां निराकाङ्क्षत्वं, विपरीतशङ्कानिवृत्तेरपि तत एव लाभात्। अन्यथा निगमनेनापि तदवारणात्। न हि तद्विशेषदर्शनमनादृत्यैव

तन्निवर्तकम्। सिद्धनिर्देशतया वारयतीति चेत्? न, स्वरूपमात्राभिधानात् साध्यत्वानुपस्थितौ तस्मादिति हेतुविभक्त्यनन्वयप्रसङ्गाच्चेति चेत्? न, व्याप्तिपक्षधर्मताज्ञानेऽपि बाधसत्प्रतिपक्षबुद्धेः साध्यज्ञानानुत्पत्तिदर्शनात् तदभावाबोधने समीहितानिर्वाहात्। अथ बाधादिविरहस्य प्रयोजकत्वं न तु तद्बोधस्य मानाभावादसिद्धेश्चेति किमर्थं बाधादिविरहो बोधनीय इति चेत्? न, यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। न चानन्वयः, तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात् प्राक्।

इह केचित्- यथा तस्मादिति सर्वनाम्ना हेतोः परामर्शः पूर्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथेति सर्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः। तन्न, तथेति स्वरूपे, प्रकारे, सादृश्ये वा? आद्ये तथा चायमिति प्रक्रमात् तथेति हेतुमानित्यर्थः स्यात्, तथा चानन्वयः। न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम्। न द्वितीयः, सामान्येन पक्षस्याप्यन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्। अत एव न तृतीयोऽपि, अभेदानुमाने चान्वयिनि तस्मात्तथेति सादृश्याभावात्, बहूनाञ्च प्रक्रमे विशेष्यानन्वयात्, वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात्। तस्मादित्यत्र तु विभक्त्यर्थान्वयादेव नियमः, तस्मादनित्य इत्यभिधाने विशिष्य सिद्धतावगम्यते पूर्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्तनात्, अन्यथा तद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः, किन्तु न्यायाङ्गतयोपयुज्यन्त इति नाधिक्यम्। कण्टकोद्धारस्य च न सार्वत्रिकत्वं, समयविशेषोपयोगित्वादिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ अवयवप्रकरणं समाप्तम्

।। सामान्यनिरुक्तिप्रकरणम् ।।

अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते।

तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वं, यद्विषयकत्वेन लिङ्ग-ज्ञानस्यानुमितिप्रतिबन्धकत्वं, ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा हेत्वाभासत्वम्।

इह खलु दुष्टे हेतौ हेतुदोषे व्यभिचारादौ च हेत्वाभासव्यवहार आकरग्रन्थेषु दृश्यते। यथार्थाभ्युपगमे, अभ्युपगम्यमानेऽर्थे च सिद्धान्तव्यवहारः। तथा यथा तस्य तयोः क्वाप्येकत्र मुख्यत्वेन विशेषो विशेषणविशेष्यभावमात्रे परं विशेषादित्यलं तद्विनिगमनेनेत्यभिप्रेत्य निबन्धकारेणार्थाभ्युपगमोऽभ्युपगम्यमानो वार्थः सिद्धान्त इति विकल्पतः सिद्धान्तलक्षणं दर्शितं, तथैतस्यापि दुष्टे हेतौ हेतुदोषे वा क्वचिदेकत्र मुख्यत्वेन विशेष इत्यलं तद्विनिगमनायासेन। तथा च यदि दुष्टे हेताववश्यमुख्यत्वं तदा प्रथममेव हेत्वाभासलक्षणं द्रष्टव्यम्। यदि च हेतुदोषे व्यभिचारादौ तदा द्वितीयादिकमेवेत्याशयवानाह **तत्रानुमितीति।** तत्रोक्तरूपव्यवस्थित-विकल्पार्थकः तत्त्वं वा हेत्वाभासत्वमित्यत्र वाशब्दो द्रष्टव्यः। एवञ्चोत्तरग्रन्थेषु बाधव्यभिचारासिद्ध्यादिषु हेतुदोषेषु ज्ञायमानत्वे सत्यनुमितिप्रतिबन्धकत्वेन हेत्वाभासत्वसमर्थनं हेत्वाभासपदप्रयोगश्च द्वितीयादिलक्षणानुसारेणैवेति मन्तव्यम्। वस्तुतस्त्वहेतुरेव हेतुत्वेनाभासमान इति योगाद्दुष्टो हेतुरेव धर्मी हेत्वाभासपदवाच्यः। तद्धेत्वाभासताप्रयोजकं तु व्यभिचाराद्युपाधिपञ्चकमिति तदपि तद्व्यवहारविषय इति मन्तव्यम्। तथा च तदुभयमत्रावश्यं लक्षणीयमित्यत्रोक्तिवैचित्र्येण प्रथमं हेत्वाभासलक्षणं, द्वितीयादिकञ्च हेत्वाभासताप्रयोजकोपाधिपञ्चकलक्षणं दर्शितमिति परमार्थः।

प्रथमलक्षणे हेतुत्वाभिमतत्वे सतीति पूरणीयम्। तेन व्यभिचारादौ धर्मे नातिव्याप्तिः। यथार्थपदं वह्निव्यभिचारित्वादिभ्रमविषये धूमादावतिव्याप्तिवारणार्थम्। न च समूहालम्बनीभूतैकहेत्वाभासविषयतोक्तरूपज्ञानविषयेऽन्यत्र सद्धेतौ तस्याति-व्याप्तिरिति वाच्यम्, उक्तरूपज्ञाने यद्विषयतयानुमितिप्रतिबन्धकत्वं तस्यैव विषयपदेन तत्र विवक्षितत्वात्। नन्वेवं बाधितस्यैव लिङ्गस्यासङ्ग्रहः। बाधस्थले न लिङ्गत्वाभिमतविषयतया ज्ञानस्यानुमितिप्रतिबन्धकत्वं, किन्तु बाधमात्रा(त्र)विषयतयैव, तन्मात्रविषयतयैव तत्र तस्यानुमितिविरोधित्वादिति चेत्? न, तत्र व्यभिचारित्वा-देरावश्यकत्वात्तेन रूपेण ज्ञानसम्भवेनोक्तलक्षणगमनात्। न च तथा सति बाधितत्वेन रूपेण कथं तस्य हेत्वाभासत्वं स्यादिति शङ्कनीयं, तेन रूपेण तस्य तत्त्वे ह्यनुमितिप्रतिबन्धकज्ञानविषयीभूतबाधरूपोपाधिसम्बन्धित्वमेव प्रयोजकम्। न तु बाधितत्वपुरस्कारेण तत्रोक्तहेत्वाभाससामान्यलक्षणगमनं, बीजाभावात्।

ननु यद्विषयतयेत्यादौ व्यभिचारादिधर्मपरे लक्षणेऽनैकान्तिकादिलिङ्गरूपधर्मिस्वरूपेऽतिव्याप्तिः। तद्विषयतयाप्यनैकान्तित्वादिविशिष्टज्ञानस्यानुमितिप्रतिबन्धकत्वमिति चेत्? न, यद्विषयतयेत्यत्र हि प्रयोजकत्वे तृतीया, प्रयोजकत्वं तु नियामकत्वम्। तच्च तत्र नास्तीति नोक्तातिव्याप्तिः। अनैकान्तिकादिलिङ्गस्वरूपविषयतायामपि तत्स्वरूपज्ञानस्य तत्त्वाज्ञानदशायामनुमित्युत्पादकत्वात्। अनैकान्तिकत्वबाधितत्वादिविषयतायां तु तज्ज्ञानस्यानुमितिप्रतिबन्धकत्वनियम एवेति नासिद्धिर्लक्षणस्य।

एवञ्च ज्ञायमानं सदित्यत्रापि लक्षणे लिङ्गान्यत्वे सतीति द्रष्टव्यं, तेनानैकान्तिकत्वादिविशिष्टज्ञानविषयलिङ्गस्वरूपे नातिव्याप्तिः। ननु यद्विषयतयेत्यादिलक्षणद्वयेनापि बाधस्य हेतुदोषास्यासङ्ग्रह एव, तस्य पक्षगोचरसाध्याभावज्ञानरूपस्याज्ञायमानस्यैवानुमितिप्रतिबन्धकत्वादिति चेत्? न, तद्गोचरप्रमात्वज्ञानस्यैव तत्प्रतिबन्धकताया वक्ष्यमाणत्वात्। तदनभ्युपगमे पक्षगोचरसाध्याभाववत्त्वस्यैव बाधत्वाभ्युपगमाच्च। ननु च सत्प्रतिपक्षिते हेत्वाभासतोपाधिः प्रतिपक्षरूपो दोषः। स च न प्रतिसाधनमात्रम्। किन्तु परामर्शविषयीभूतं तत्। अन्यथा तस्यानित्यदोषत्वं न स्यात्। तथा च तस्यासङ्ग्रह एव। न हि परामर्शसहितस्य तस्य बोधोऽनुमितिप्रतिबन्धकः। किन्तु तत्परामर्श एवेति चेत्? न, वस्तुगत्या परामर्शविषयतापन्नस्यैव तस्य परामर्शरूपमेव ज्ञानमनुमितिप्रतिबन्धकमित्येतावतैव तस्यानित्यदोषत्वाभ्युपगमादुक्तलक्षणेन सङ्ग्रहाच्च, यथा वस्तुगत्या साध्यवत्तया निश्चीयमानादेव सपक्षपदवाच्याद्धर्मिणो व्यावृत्तत्वस्यासाधारणत्वस्य ज्ञानमनुमितिप्रतिबन्धकमित्यत एव तस्य दशाविशेषदोषत्वम्, उक्तलक्षणेन सङ्ग्रहश्च। न हि तज्ज्ञाने सपक्षस्य साध्यवत्तया निश्चयविषयत्वरूपं सपक्षत्वमपि विषयः। नन्वेवं साधारणानैकान्तिकत्वादेरपि वस्तुगत्या ज्ञायमानस्यैव ज्ञानमनुमितिप्रतिबन्धकम्। अतस्तादृशस्यैव तस्य लिङ्गदोषत्वापत्तावनित्यदोषत्वं स्यादिति चेत्? न, तस्य स्वरूपमात्रज्ञानमनुमितिप्रतिबन्धकम्। अतो न ज्ञानविशेषविशिष्टत्वेन तस्य लिङ्गदोषत्वं प्रति साधनस्य व्योमैकगुणत्वादेः सपक्षत्वाभिमतधर्मिव्यावृत्तत्वस्य चासाधारणत्वस्य न स्वरूपमात्रज्ञानमनुमितिप्रतिबन्धकं, विरोधिव्याप्यत्वाद्यज्ञानदशायां व्योमैकगुणत्वादिस्वरूपज्ञानेऽपि, सपक्षत्वाभिमतधर्मिणः साध्यवत्त्वाज्ञानदशायां हेतोस्तद्धर्मिव्यावृत्तत्वज्ञानेऽप्यनुमित्यप्रतिबन्धकत्वात्। तथा च तयोर्ज्ञानविशेषोपहितयोरेव लिङ्गदोषत्वमित्यनित्यदोषत्वम्। अज्ञानरूपायाः पक्षताविरहरूपायाश्चासिद्धेरसङ्ग्रहो न दोषः, तयोरसिद्धत्वस्य ग्रन्थकारानभिमतत्वात्। अत एव परामर्शविषयाभावत्वमसिद्धिलक्षणं वक्ष्यति। न चाज्ञानं पक्षताविरहो वा परामर्शविषयस्याभावः। न च तस्य तदनभिमतत्वे बीजाभावः, ज्ञायमानस्यैव दोषस्य

दशाविशेषे हेत्वोरेवासाधारणसत्प्रतिपक्षयोराभासत्वात्तद्बुद्धेरप्यनुमितिप्रबन्धकत्वम्। यद्यपि बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वं तथापि ज्ञायमानस्याभासस्यात्र लक्षणम्।

यद्वा प्रत्यक्षादौ बाधेन न ज्ञानं प्रतिबध्यते किन्तूत्पन्नज्ञानेऽप्रामाण्यं ज्ञाप्यते। अनुमितौ तूत्पत्तिरेव प्रतिबध्यते।

ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ सामान्यनिरुक्तिप्रकरणं समाप्तम्

हेत्वाभासताप्रयोजकत्वौचित्यात्, अन्यथातिप्रसङ्गात्। न च ज्ञानविरहः पक्षताविरहो वा ज्ञायमानो दोषः। नन्वनुमित्यसाधारणदोष एव हेत्वाभासतोपाधिरस्तु। तथा च तयोरपि तथात्वं स्यादिति चेत्?, न, तथा सति बाधस्य तथात्वाभावप्रसङ्गात्, तस्य प्रत्यक्षादिसाधारणदोषत्वात्। न च ज्ञायमानस्य तस्य दोषत्वमनुमित्यसाधारणं, तादृशस्यैव तस्य शब्ददोषत्वात्, कामिन्यादिविरोधिजिज्ञासायास्तथात्वप्रसङ्गाच्च। न हि कामिन्यादिजिज्ञासा प्रत्यक्षसाधारणो दोषः, तस्यां सत्यामपि प्रत्यक्षज्ञानोदयात्। तदुक्तं "न हि घटायोन्मीलितं चक्षुः" इत्यादि।

नन्वेवं कथायां हेतोः सन्दिग्धासिद्धिर्नोद्भावनीया। सा हि हेतुनिश्चयाभावपर्यवसिता। तथा च सा हेत्वाभासो न निग्रहस्थानान्तरमिति चेत्?, न, हेत्वाभासाश्च यथोक्ता इति चरमसूत्रेऽनुक्तसमुच्चयार्थेन चकारेण तस्यापि निग्रहस्थानत्वप्रतिपादनात्। पक्षताविरहपर्यवसितस्य सिद्धसाधनस्य चोद्भावनं कथायामर्थान्तररूप[नि]ग्रहस्थानत्वेनैव स्यादिति सर्वं समञ्जसम्।

ननु दुष्टरूपधर्मिपरस्य प्रथमलक्षणस्यासाधारणे सत्प्रतिपक्षिते चासिद्ध्यादिसङ्कीर्णे यद्यपि नाव्याप्तिः, तत्रोभयत्रासिद्धत्वादिपुरस्कारेणैव तस्य गमनात्, तथापि सद्धेतावसाधारणे सत्प्रतिपक्षिते चाव्याप्तिरेव। असाधारणं हि सत्प्रतिपक्षरीत्यैव दूषणम्। तथा च सद्धेत्वसाधारणस्थले साध्याभावप्रतियोगिकव्यतिरेकव्याप्तिस(म)त्त्वेन यल्लिङ्गज्ञानमनुमितिप्रतिबन्धकं तन्न यथार्थम्। यच्च तत्र यथार्थं साध्यप्रतियोगिकव्यतिरेकव्याप्तिमत्त्वेन तज्ज्ञानं तन्नानुमितिप्रतिबन्धकम्। तद्धि तदनुकूलमेव। सत्प्रतिपक्षस्थले तु प्रतिसाधनज्ञानमेवानुमितिप्रतिबन्धकम्। न तु प्रकृतहेतुज्ञानम्। तद्धि तज्जनन एवोन्मुखम्। तथा च तत्रोभयत्र तस्य लक्षणस्यासम्भव एवेत्यत आह **दशाविशेष इति**। केवलस्य तदुभयविषययथार्थपरामर्शस्यानुमित्यनुकूलत्वेऽपि सद्धेत्वोरेव दशाविशेषत्वे प्रतिरुद्धकार्यत्वात्तद्गोचरप्रतिरुद्धत्वयथार्थज्ञानस्य व्याप्तिपक्षधर्मतान्यतरभङ्गज्ञानद्वाराऽनुमितिप्रतिबन्धकत्वम्। अतो न तयोरव्याप्तिः।

साक्षात्परम्परया वाऽनुमितिप्रतिबन्धकं यद्यथार्थज्ञानं तद्विषयत्वस्यैव प्रथमलक्षणार्थत्वादित्यर्थः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां सामान्यनिरुक्तिप्रकरणं समाप्तम्

।। सव्यभिचारप्रकरणम् ।।

सव्यभिचारोऽपि त्रिविधः साधारणासाधारणानुपसंहारिभेदात्। तत्र सव्यभिचारः-साध्यतदभावप्रसञ्जक इति न त्रितयसाधारणं लक्षणम्, एकस्योभयं प्रत्यसाधकत्वाद् अनापादकत्वाच्च। नाप्युभयपक्षवृत्तित्वम्, उभयव्यावृत्तत्वं वा तत्त्वम्, अननुगमात्।

अथ साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतः सः। विप्रतिपत्तिस्तु प्रत्येकं न तथा न वा पक्षवृत्तिः साधारणमन्वयेन, असाधारणं व्यतिरेकेण, अनुपसंहारी पक्ष एवोभयसाहचर्येण कोटिद्वयोपस्थापकः। केवलान्वयिसाध्यकानुपसंहारी अयं घट एतत्त्वादित्यसाधारणश्च सद्धेतुरेव, तदज्ञानं दोषः पुरुषस्य। अत एवासाधारणप्रकरणसमयोरनित्यदोषत्वम्, अन्यथा सद्धेतौ बाधादिज्ञाने हेत्वाभासाधिक्यापत्तिः। न च प्रमेयत्वेनाभेदानुमाने शब्दोऽनित्यः शब्दाकाशान्यतरत्वादित्यत्र च साधारणेऽव्याप्तिः, तयोः साध्यवदवृत्तित्वेन विरुद्धत्वादिति चेत्? न, एतदज्ञानेऽपि साधारण्यादिप्रत्येकस्य ज्ञानादुद्भावनाच्च स्व-परानुमितिप्रतिबन्धात्, उद्भावितैतन्निर्वाहार्थं साधारणादेरवश्योद्भाव्यत्वेन तस्यैव दोषत्वाच्च। एतेन पक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिरनैकान्तिकः, सपक्ष-विपक्षवृत्तित्वमुभयव्यावृत्तत्वमनुपसंहारित्वञ्चानुमितिविरोधि, तत्सम्बन्धः प्रत्येकमस्ति। विरुद्धोऽप्यनेन रूपेण सव्यभिचार एव, उपाधेश्च न सङ्कर इति वक्ष्यत इति निरस्तम्। एतदज्ञाने ज्ञाने वावश्यकप्रत्येकज्ञानस्य दोषत्वात्, असाधकतानुमितौ व्यर्थविशेषणत्वाच्च। अत एव साध्याव्याप्यत्वे सति साध्याभावाव्याप्यहेत्वाभासत्वं, साध्यववन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं वेति परास्तं, व्यर्थविशेषणत्वात्, प्रथमं हेत्वाभासत्वाज्ञानाच्च। गगनमनित्यं शब्दाश्रयत्वादित्यादिबाधविरुद्धसंकीर्णासाधारणाव्याप्तिरिति कश्चित्। नापि सपक्षविपक्षगतसर्वसपक्षविपक्षव्यावृत्तान्यतरत्वं, व्यर्थविशेषणत्वात्, अनुपसंहार्येऽव्याप्तेश्च।

किञ्च पक्षातिरिक्तसाध्यवतः सपक्षत्वे प्रयत्नेनाभेदसाधनेऽनुपसंहार्ये चाव्याप्तिः, पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः साध्यवतः सपक्षत्वे विवक्षितेऽप्रसिद्धिः, वृत्तिमतो धर्मस्य साध्यवद्विपक्षान्यतरवृत्तित्वनियमात्।

नापि पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वे सति पक्षातिरिक्तसाध्याभाववन्मात्रवृत्तिभिन्नत्वम्, अनुपसंहार्यव्याप्तेः, धूमादावतिव्याप्तेश्च, तस्य पक्ष एव साध्यवति वृत्तेः।

नापि पक्षवृत्तित्वे विरुद्धान्यत्वे सत्यनुमित्यौपयिकसम्बन्धशून्यत्वं, व्यर्थविशेषणत्वात्। एतेनानुगतं सर्वमेव लक्षणं प्रत्युक्तं, प्रत्येकमेव दूषणत्वात्, उद्भावने वादिनिवृत्तेश्च।

।।इति सव्यभिचारपूर्वपक्षः।।

।। अथ सव्यभिचारसिद्धान्तः ।।

उच्यते – उभयकोट्युपस्थापकतावच्छेदकरूपत्वं तत्त्वं, विरुद्धान्यपक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिर्वा। तच्च साधारणत्वादि, तेनैव रूपेण ज्ञातस्य प्रतिबन्धकत्वात्, परस्य तथैवोद्भावनाच्च। लक्षणानुरोधेन प्रत्येकमेव हेत्वाभासत्वम्। यद्वा साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं, तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषकत्वपक्षे नाव्याप्तिः।

न चैवमाधिक्ये विभागव्याघातः, स्वरूपसतानुगतरूपेण त्रयाणामेकीकृत्य महर्षिणा विभागकरणात्। न चैवं साध्याभावज्ञापकत्वेन बाधप्रकरणसमयोस्तदज्ञापकतयान्येषामुपसङ्ग्रहः कुतो न कृत इति वाच्यं, स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात्।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ सव्यभिचारप्रकरणं समाप्तम्

उभयेति। न च यदा पक्षे साध्यनिश्चयं विनैव सपक्षविपक्षव्यावृत्ते सद्धतौ शब्दादिना व्याप्तिग्रहस्तदा तत्रातिव्याप्तिरिति वाच्यं, तद्ग्रहविरहदशायामेव तस्य संशयानुकूलकोटिद्वयोपस्थितिजनकतया तद्ग्रहविरहदशाविशिष्टस्यैव सपक्षविपक्षव्यावृत्तत्वस्यैवोभयकोट्युपस्थापकतावच्छेदकरूपत्वेनात्र विवक्षितत्वादिति भावः।

तच्चेति। तच्च साधारणत्वमसाधारणत्वमनुपसंहारित्वञ्चेत्यर्थः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां सव्यभिचारप्रकरणं समाप्तम्

।। साधारणप्रकरणम् ।।

तत्र साधारणत्वं न साध्याभाववद्गामित्वं, सर्वमनित्यं मेयत्वादित्यनुपसंहार्ये, भूर्नित्या गन्धवत्त्वादित्यसाधारणे, संयोगादिसाध्यकद्रव्यत्वे चातिव्याप्तेः। अत एव न साध्यवत्तदन्यवृत्तित्वं, नापि निश्चितसाध्यवत्तदन्यवृत्तित्वं, साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात्।

अत एवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते तत एव वादिनिवृत्तेश्च, न तु सपक्षगत्वमपि। अनुपसंहार्यो व्यावर्त्योऽन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत्? त्यज तर्हि तमधिकं क्लृप्तेऽन्तर्भावात्। नापि सपक्षविपक्षगतत्वं, व्यर्थविशेषणत्वात्। विरुद्धो व्यावर्त्य इति चेत्? न, विपक्षगामित्वस्यैव दूषकत्वे तस्याप्येतदन्तर्भावात्।

अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वं, तेन सर्वमनित्यं मेयत्वादित्यनुपसंहार्ये नातिप्रसङ्गः। न च व्यर्थविशेषणता, घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यनुपसंहार्यस्य विरुद्धस्यानैकान्तिकभिन्नस्य व्यवच्छेद्यत्वादिति चेत्? न, दूषकताप्रयोजकरूपभेदमन्तरेण भेदस्यैवानुपपत्तेः। साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमित्यपि न, व्यर्थविशेषणत्वात्, एकव्यक्तिसाध्ये तदभावाच्च। एतेन हेत्वाभासान्तरव्यवच्छेदकं लक्षणान्तरेऽपि विशेषणं व्यर्थमिति।।

।।इति साधारणपूर्वपक्षः।।

।। अथ साधारणसिद्धान्तः ।।

उच्यते – विपक्षगामित्वं साधारणत्वं, तन्मात्रस्य दूषकत्वात्। विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम्, अन्यथा तस्य हेत्वाभासान्तरतापत्तेः। उपाधेश्च न सङ्कर एव। सर्वमनित्यं मेयत्वादित्यनुपसंहारी, शब्दोऽनित्यः शब्दत्वाद् भूर्नित्या गन्धवत्त्वादित्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायामुद्भावयितुं न शक्यत इत्युभयोर्भेदेनोपन्यासः।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ साधारणप्रकरणं समाप्तम्

॥ असाधारणप्रकरणम् ॥

सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः। ननु सपक्षत्वं न साध्यवन्मात्रत्वं, विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वनियमात्। नापि पक्षातिरिक्तसाध्यवत्त्वं, शब्दोऽनित्यः शब्दत्वादित्यादेर्व्याप्तिधीदशायामप्यसाधारणतापत्तेः। न चेष्टापत्तिः, बाधप्रतिरोधौ विना व्याप्तिपक्षधर्मतया ज्ञातादनुमितिनियमादिति चेत्? न, सर्वनिश्चितसाध्यवद्विपक्षव्यावृत्तत्वस्य तत्त्वात्। शब्दत्वानित्यत्वव्याप्तिग्रहे सति शब्दे साध्यनिश्चयान्नातिव्याप्तिः। न च घटोऽयमेतत्त्वादिति सद्धेतावतिव्याप्तिः, साध्यसन्देहदशायां तस्य हेत्वाभासत्वात्। यद्यपि भूर्नित्या गन्धवत्त्वादित्यादिर्वस्तुतः साधारणः, शब्दो नित्यः शब्दत्वादिति विरुद्धः, शब्दोऽनित्यः शब्दत्वादित्यादिः सद्धेतुरेव, व्याप्त्यज्ञानस्य पुरुषदोषत्वादित्युदाहरणाभावादसाधारणो न पृथक्, तथापि पक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वम्, अन्यथा पक्षत्वभङ्गप्रसङ्गात्।

अथ सर्वसपक्षव्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि, तस्या अनुगुणत्वात्। प्रत्युत विपक्षव्यावृत्तत्वेन व्यतिरेकितयापि साध्यसाधकमेवोपन्यस्तं स्यात्, न च संशायकतया दोषत्वं, तच्चोभयव्यावृत्तत्वज्ञानादिति वाच्यं, व्याप्तिग्राहकं सहचारज्ञानं तदभावद्वारा, सपक्षव्यावृत्तत्वमात्रस्य दोषत्वात्। किञ्च शब्दोऽनित्यः शब्दत्वादित्युक्त्वा निवृत्ते तावन्नेदमुद्भाव्यं, न्यूनत्वेनैव वादिनिग्रहात्, तदुद्भावने वादिनिवृत्तेश्च। न च न्यूनत्वे तदुपजीव्यम्, असाधारण्यव्यतिरेकेणापि तदुपन्यासात्।

न च व्यतिरेकिप्रयोगे तदुपन्यासः, व्याप्तिपक्षधर्मतयोरप्रतिक्षेपेऽकिञ्चित्करत्वात्। स्वार्थानुमाने च सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमिति।

॥इत्यसाधारणपूर्वपक्षः॥

॥ अथासाधारणसिद्धान्तः ॥

उच्यते – शब्दत्वं साध्यवतस्तदभाववतश्च निवृत्तत्वेन ज्ञातमर्थाद्व्यतिरेकितया वा पक्षे साध्यं तदभावञ्च साधयेत्, अविशेषात्। अन्यथा पक्षवृत्तित्वानुपपत्तिरिति साध्यतदभावोत्थापकतया स्वार्थानुमानेऽसाधारणो दोषः, सत्प्रतिपक्षे द्वौ हेतू तथा, अत्र त्वेक एवेति तयोर्भेदः। असाधारणेन व्यतिरेकिप्रयोगे परस्य सर्वसपक्षव्यावृत्तत्वमात्रमुद्भाव्यं, साध्याभावोत्थापकत्वात्। न तु विपक्षव्यावृत्तत्वमपि प्रतिकूलत्वात्, व्यर्थत्वाच्च। यद्वा विपक्षव्यावृत्ततया साध्यमिव सपक्षव्यावृत्ततया साध्याभावमपि साधयेदिति दृष्टान्ततया प्रतिबन्धितया वा तदुद्भावनमपि। लक्षणन्तु सर्वसपक्षव्यावृत्तत्वं, न तु विपक्षव्यावृत्तत्वमपि, व्यर्थविशेषणत्वात्। विरुद्ध-मप्यनेनोपाधिनाऽसाधारणमेव, अन्यथैतदवगमे विरुद्धत्वाज्ञाने हेत्वाभासान्तरतापत्तेः।

इति श्रीगङ्गेशोपाध्यायविरचितत्त्वचिन्तामणौ असाधारणप्रकरणं समाप्तम्

।। अनुपसंहारिप्रकरणम् ।।

अनुपसंहार्यो नासत्सपक्षविपक्षः, सिद्ध्यसिद्धिविरोधात्। नापि केवलान्वयिधर्मावच्छिन्नपक्षकः, केवलान्वयिसाध्यकस्य सद्धेतुत्वात्। व्यतिरेकिसाध्यकस्य तु साध्यतदभाववद्गामित्वेन साधारणत्वात्, अन्यथा संशयाहेतुत्वेनानैकान्तिकता न स्यात्। सर्वं क्षणिकं सत्त्वादिति साध्याप्रसिद्ध्या व्याप्यत्वासिद्धमपार्थकं वा, साध्यप्रसिद्धौ तु साधारणमेव। न च पक्षान्यसाध्यवत्तदन्यवृत्तित्वं, पक्षातिरिक्त-साध्याभाववद्वृत्तित्वं वा साधारणत्वं, व्यर्थविशेषणत्वात्। न च विरुद्धं विशेषणस्य व्यावर्त्यमित्युक्तम्। नाप्यत्यन्ताभावप्रतियोगिसाध्यकत्वे सति केवलान्वयिधर्मावच्छिन्नपक्षकत्वं, सर्वमभिधेयं मेत्वादित्यत्र विप्रतिपत्त्या पक्षतादशायां पक्षे साध्यानिश्चयेनानुपसंहारिण्यव्यापकत्वात्।

अथ पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारोऽनुपसंहार्यः। यदि च पक्षे व्याप्तिग्रहः कथञ्चित्तदा शब्दोपदर्शितव्याप्तिकानुमानवदभेदानुमानवच्चा-सद्धेतुरेवेति चेत्? न, तत्रैव सद्धेतावतिव्याप्तेः, सर्वस्य पक्षत्वे पक्षातिरिक्ताप्रसिद्धेः, असाधारणविरुद्धयोरतिव्याप्तेश्च, दूषकतायां व्यर्थविशेषणत्वाच्च। न च दूषकता-ऽनैकान्तिकत्वेन न प्रत्येकमिति वाच्यम्, अर्थगत्या व्यर्थविशेषणत्वात्। नापि विप्रतिपत्तिविषयमात्रवृत्तित्वं, केवलान्वयिसाध्यकेऽव्याप्तिः, सर्वस्य पक्षत्वे मात्रार्थाभावादिति।।

।।इति अनुपसंहारिपूर्वपक्षः।।

।। अथानुपसंहारिसिद्धान्तः ।।

उच्यते – व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी। स चान्वयेन व्यतिरेकेण वा सर्वस्य पक्षत्वे दृष्टान्ताभावात्। घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यादौ साध्यसाधनसाहचर्याज्ञानात्तस्य विरुद्धत्वा-ज्ञानदशायामनुपसंहारित्वेनेष्टत्वात्। केवलान्वयिधर्मावच्छिन्नपक्षको वा। सर्वमभिधेयं प्रमेयत्वादिति सद्धेतौ न केवलान्वयी पक्षतावच्छेदको निश्चितसाध्यवद्-वृत्तित्वात्। विप्रतिपत्त्या साध्यानिश्चयदशायां पक्षत्वे तदनुपसंहार्येव। व्यतिरेकिसाध्यके साध्याभाववद्वृत्तित्वाज्ञानदशायामिदं दूषणं, तदवगमेऽपि साधारणसङ्कर एव। एवं व्याप्यत्वासिद्धेर्ज्ञाने तदुद्भावनेन चायं व्यभिचारवदुपजीव्यत्वाददोषः। घटाकाशोभयवृत्तिद्वित्वाश्रयत्वञ्च विरुद्धमेव। एतेनानुपसंहारित्वप्रतिसन्धाने यदि व्याप्तिग्रहस्तदानुमितिरेव, तदभावे व्याप्यत्वासिद्धिरेवेति निरस्तम्, उपजीव्यत्वादिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ अनुपसंहारिप्रकरणं समाप्तम्

।। सत्प्रतिपक्षप्रकरणम् ।।

सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्ययलिङ्गत्वं, परस्परप्रतिबन्धेनोभयोरबोधकत्वात्। बलञ्च न सपक्षसत्त्वादि, व्यतिरेकिण्यभावात्। नापि समानव्याप्तिपक्षधर्मतावत्त्वं, विरोधेनैकत्र तद्भङ्गनियमात्। नापि व्याप्तिपक्षधर्मतया ज्ञातत्वं, विरोधिव्याप्तिपक्षधर्मताविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्यश्रावणत्वादिवैशिष्ट्याप्रसिद्ध्याऽऽरोपयितुमशक्यत्वात्। न च साध्यव्याप्यस्य पक्षधर्मता, पक्षधर्मस्य वा साध्यव्याप्यताऽऽरोप्येति वाच्यम्, एकत्र तदुभयाभावाद्विशिष्टस्याप्रसिद्ध्या तद्वैशिष्ट्यस्यारोपासम्भवात्। नाप्यनिर्धारितविशेषेण बोधितसाध्यविपर्यकत्वम्, उभयोरबोधकत्त्वात्। विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः एकत्र तद्भङ्गनियमात्।।

।।इति सत्प्रतिपक्षपूर्वपक्षः।।

।। अथ सत्प्रतिपक्षसिद्धान्तः ।।

उच्यते—साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वम्। बलञ्च व्याप्तिपक्षधर्मते। विरोधिबोधकान्यगमकतौपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यत्वं वा तत्त्वम्। स्थापनाया व्याप्तिपक्षधर्मत्वमुभयवादिसिद्धं, वादिना तदभावानुपन्यासात्। द्वितीयस्य तु तत्त्वमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधितमिति स्वार्थानुमान एवायं दोष इत्येके। तन्न, एकदा निरन्तरयोर्वोभयोर्व्याप्तिपक्षधर्मतया ज्ञातयोः प्रतिपक्षत्वाद् युगपदुपस्थितेश्च कारणवशेन स्वपरसाधारणत्वात्।

अथ वस्तुनोऽद्व्यात्मकत्वाद् व्याप्तिपक्षधर्मताभङ्ग एकत्रावश्यक इति स एव दोषः। न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्याप्त्यादिभङ्गनियम इति वाच्यम्, अविरोधेऽप्यनुमित्यविरोधात्। विरोधे तु व्याप्त्यादिभङ्गनियमादिति चेत्? न, प्रतिरुद्धत्वज्ञानानन्तरं व्याप्त्यादिभङ्गज्ञानमित्युपजीव्यत्वेन व्यभिचारवदस्यापि दोषत्वात्। ननु साध्यतदभावयोरिव तद्व्याप्यत्वेनावधारितयोर्विरोधादेकत्र न निश्चयः किन्तु संशयः, निर्णये वान्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेत्? न, उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इत्युपजीव्यत्वेनास्य भिन्नत्वात्। दूषकताबीजन्तु समबलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वं, न तु व्याप्तिपक्षधर्मताविरह एव सद्धेतोरपि सत्प्रतिपक्षत्वात्। एकत्र व्याप्तिभङ्गज्ञानद्वारा

साध्यव्यापकविरुद्धोपलम्भ इति न त्रैविध्यम्, एतदज्ञानेऽपि साध्याभावतद्-व्यापकाभावव्याप्यत्वेनापि ज्ञातस्य दोषत्वात्। न च धूमवानयं तदभावत्त्वादिति त्रयाधिकं, स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं हि व्यापकत्वं, तच्चाभेदेऽपि, धूमवानयं धूमाभाववत्तयोपलभ्यमानत्वात् तद्वत्तयानुपलभ्यमानत्वादित्यनैकान्तिकमेव।

निषेधसाधनेऽपि त्रिविधः - प्रतियोग्युपलम्भात्, साध्यव्यापकाभावोपलम्भात्, साध्यव्यापकविरुद्धोपलम्भात्। यथा निरग्निकोऽयमग्निमत्त्वात्, धूमाभावशून्यत्वात्, धूमवत्त्वात्। सर्वश्चायं विशेषणद्वारापि, यथा कृष्णागुरुप्रभववह्निमानयं कटु-कासुरभिपाण्डुरधूमवत्त्वात्। अयञ्च बाधाश्रयासिद्धस्वरूपासिद्धासाधारणसङ्कीर्णः क्वचित्।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ विरुद्धप्रकरणं समाप्तम्

।। सत्प्रतिपक्षप्रकरणम् ।।

सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्ययलिङ्गत्वं, परस्परप्रतिबन्धेनोभयोरबोधकत्वात्। बलञ्च न सपक्षसत्त्वादि, व्यतिरेकिण्यभावात्। नापि समानव्याप्तिपक्षधर्मतावत्त्वं, विरोधेनैकत्र तद्भङ्गनियमात्। नापि व्याप्तिपक्षधर्मतया ज्ञातत्वं, विरोधिव्याप्तिपक्षधर्मताविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्यश्रावणत्वादिवैशिष्ट्याप्रसिद्ध्याऽऽरोपयितुमशक्यत्वात्। न च साध्यव्याप्यस्य पक्षधर्मता, पक्षधर्मस्य वा साध्यव्याप्यताऽऽरोप्येति वाच्यम्, एकत्र तदुभयाभावाद्विशिष्टस्याप्रसिद्ध्या तद्वैशिष्ट्यस्यारोपासम्भवात्। नाप्यनिर्धारितविशेषेण बोधितसाध्यविपर्यकत्वम्, उभयोरबोधकत्त्वात्। विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः एकत्र तद्भङ्गनियमात्।।

।।इति सत्प्रतिपक्षपूर्वपक्षः।।

।। अथ सत्प्रतिपक्षसिद्धान्तः ।।

उच्यते—साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वम्। बलञ्च व्याप्तिपक्षधर्मते। विरोधिबोधकान्यगमकतौपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यत्वं वा तत्त्वम्। स्थापनाया व्याप्तिपक्षधर्मत्वमुभयवादिसिद्धं, वादिना तदभावानुपन्यासात्। द्वितीयस्य तु तत्त्वमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधितमिति स्वार्थानुमान एवायं दोष इत्येके। तन्न, एकदा निरन्तरयोर्वोभयोर्व्याप्तिपक्षधर्मतया ज्ञातयोः प्रतिपक्षत्वाद् युगपदुपस्थितेश्च कारणवशेन स्वपरसाधारणत्वात्।

अथ वस्तुनोऽद्वयात्मकत्वाद् व्याप्तिपक्षधर्मताभङ्ग एकत्रावश्यक इति स एव दोषः। न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्याप्त्यादिभङ्गनियम इति वाच्यम्, अविरोधेऽप्यनुमित्यविरोधात्। विरोधे तु व्याप्त्यादिभङ्गनियमादिति चेत्? न, प्रतिरुद्धत्वज्ञानानन्तरं व्याप्त्यादिभङ्गज्ञानमित्युपजीव्यत्वेन व्यभिचारवदस्यापि दोषत्वात्। ननु साध्यतदभावयोरिव तद्व्याप्यत्वेनावधारितयोर्विरोधादेकत्र न निश्चयः किन्तु संशयः, निर्णये वान्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेत्? न, उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इत्युपजीव्यत्वेनास्य भिन्नत्वात्। दूषकताबीजन्तु समबलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वं, न तु व्याप्तिपक्षधर्मताविरह एव सद्धेतोरपि सत्प्रतिपक्षत्वात्। एकत्र व्याप्तिभङ्गज्ञानद्वारा

वास्य दूषकत्वम्। चक्षुरादेश्च नानुमानेन प्रतिरोधः, तदुपस्थितावपि फलदर्शनेन तस्याधिकबलत्वात्। नन्वेवं वादिवाक्यमात्रस्य प्रतिरोधकत्वेनानुमानमात्रोच्छेदः। न च विरोधिवाक्यस्य न्यूनबलत्वे लक्षणायोगः। समबलत्वे प्रतिरोधः एव, अधिकबलत्वे नरशिरःशौचानुमानवत्तेन बाध एवेति वाच्यम्, अगृह्यमाणविशेषदशायां प्रतिवादिवाक्येन सर्वानुमानप्रतिरोधापत्तेः, अनुमानात् पूर्वं पश्चाद्वाऽनुमानान्तरेण तस्य न्यूनाधिकबलत्वानिरूपणात्। निरूपणे वानुमानवैयर्थ्यात्। मैवं, विरोधिवाक्यमात्रस्य समबलत्वाभावात्। उक्तं हि व्याप्तिपक्षधर्मते बलमिति। प्रत्यक्षादेर्लिङ्गभावेनैवानुमानप्रतिरोधः, कथायां तदुपन्यासानर्हत्वात्।

यत्तु विरोधिव्याप्यद्वयस्यासाधारणत्वात् संशयजनकत्वं दूषकताबीजमिति। तन्न, एकैकं हि सत्प्रतिपक्षं न तु विशिष्टम्। एकैकञ्च न संशायकमित्यनुमितिद्वयस्य प्रामाण्यग्राहकाप्रवृत्तिर्दूषकताबीजमित्यन्ये। तन्न, परस्परप्रतिबन्धेनानुमितेरेवानुत्पत्तेः।

रत्नकोषकारस्तु सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुमितिः संशयरूपा जन्यते, विरुद्धोभयज्ञानसामग्र्याः संशयजनकत्वात्संशयद्वाराऽस्य दूषकत्वम्। न च संशयरूपा नानुमितिः, बाधस्येव विरोध्युपस्थितेरनुमितिसामग्रीविघटकत्वेनावधारणात्। अन्यथा बाधेऽप्यनुमित्यापत्तेरिति वाच्यम्, अधिकबलतया बाधेन प्रतिबन्धात्, तुल्यबलत्वादनुमितिः स्यादेव, सामग्रीसत्त्वात्। साध्याभावबोधस्य च तत्र प्रतिबन्धकत्वं न तु तद्बोधकस्य चक्षुरादेः। प्रत्येकं निर्णायकत्वेनावधारितात् कथं संशय इति चेत्? न, प्रत्येकाद्धि ज्ञानमुत्पद्यमानमर्थात् संशयो न तु प्रत्येकं संशयजनकत्वमिति मेने, तन्न, साध्यतदभावयोर्विरोधेन यथैकज्ञानस्यापरधीप्रतिबन्धकत्वं तथा साध्याभावव्याप्यवत्त्वस्यापि साध्यविरोधित्वात्तद्बुद्धेरपि साध्यधीप्रतिबन्धकत्वाद् विरोधिज्ञानत्वस्य प्रतिबन्धकत्वे तन्त्रत्वात्।

निबन्धे तु हेत्वाभासानां फलद्वारकं लक्षणम्। अनैकान्तिकानामन्वयाद्व्यतिरेकाद्वा कोट्युपस्थापकतया संशयः फलम्। विरुद्धस्य साध्यविपरीतस्य ज्ञानम्। अपक्षधर्मोऽपि विरुद्धोऽन्यत्र विपरीतज्ञानसमर्थ एव। बाधेऽन्यतो विपरीतज्ञानं न तु हेत्वभिमतादेः। घटो नित्यः कार्यत्वादिति विरुद्धे बाधसङ्करेऽप्यदोषः। असिद्धेऽनैकान्तिकादिचतुष्टयज्ञानान्यमात्राधीनमलिङ्गत्वज्ञानम्। बाधे पक्षधर्महेतौ व्याप्तिबाधः। प्रकरणसमे तु न व्याप्तिपक्षधर्मताबाधः फलं, नाप्यलिङ्गत्वज्ञानं, व्याप्त्यादि- बुद्धिसत्त्वात्। नापि विपरीतबुद्धिः, स्वसाध्यविपरीतेनानियमात्। नापि संशयः, प्रत्येकं कोटिद्वयानुपनयात्। किन्तु कथमत्र तत्त्वनिर्णय इति जीज्ञासा फलम्। तथा च प्रकृतसाध्यहेत्वोः किं तत्त्वमिति जिज्ञासाजनिका

व्याप्तिपक्षधर्मतोपस्थितिः प्रकरणसमः। न ह्यनुपस्थिते प्रतिपक्ष एकस्माज्जिज्ञासा, किन्तु निर्णय एव। अथ ज्ञातुमिच्छा जिज्ञासा, सा चेष्टसाधनताज्ञानात् संशयाद्वेति कथं तेन विना विरोधिज्ञानमात्रादिति चेत्? न, असति प्रतिपक्षे न जिज्ञासा, सति तु सेत्यन्वयव्यतिरेकाभ्यां प्रकरणसमस्यापि जिज्ञासाजनकत्वात्। न चानैकान्तिकातिव्याप्तिः, तत्र हि संशयद्वारा साध्ये जिज्ञासा, अत्र तु हेतुसमीचीनत्व इति।

ननु परामर्शयोरेकदानुत्पादात् कथं प्रतिरोधः, क्रमोत्पन्नयोरेकदा सत्त्वादिति चेत्? न, एकानन्तरमपरहेतुव्याप्तिपक्षधर्मताज्ञानाभ्यामग्रिमव्याप्तिविशिष्टज्ञानोत्पत्ति-काले पूर्वपरामर्शनाशात्। न चोभयहेतुव्याप्तिपक्षधर्मताज्ञानानां परस्पराप्रतिबन्धात् परामर्शोत्पाद इति वाच्यं, व्याप्त्यादिज्ञानचतुष्टयस्य यौगपद्याभावात्।

यत्तु व्याप्तिद्वयसंस्कारोद्बोधकहेतुद्वयज्ञानयोः परस्परप्रतिबन्धात् नोभयव्याप्ति-स्मृतिरिति दूषकताबीजमिति। तन्न, व्याप्तिस्मृतिं विना सत्प्रतिपक्षाभावात्, वादिभ्यां व्याप्त्युद्भावनाच्चेति। मैवम्, हेतुद्वयसमूहालम्बनाद्युगपदुभयव्याप्ति-स्मृतावुभयपरामर्शरूपं ज्ञानमुत्पद्यते, अत एकदा विरुद्धकार्यद्वयकारणान्नैकमपि कार्यमुत्पद्यते। तादृशपरामर्शश्च स्वार्थानुमाने प्रत्यक्षादितः। परस्य तु वाद्युपन्यस्तन्यायोत्थापितप्रमाणावतारात्। अस्य च केवलान्वयिन्यपि सम्भवः, घटोऽभिधेयः प्रमेयत्वादित्यत्राभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि जात्यन्यत्वे सति घटमात्रवृत्त्यन्यधर्मत्वाद् घटान्योन्याभाववत् पटरूपवच्च। घटनिष्ठात्यन्ता-भावोऽभिधेयत्वप्रतियोगिको घटवृत्तिनित्याभावत्वाद् घटनिष्ठान्योन्याभाववदिति विशेषादर्शनदशायाम्। न च पक्षैक्यमपि तन्त्रं, विरोधस्यैव दूषकत्वेऽधिकस्य व्यर्थत्वादिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ सत्प्रतिपक्षप्रकरणं समाप्तम्

।। असिद्धिप्रकरणम् ।।

असिद्धिस्तु न व्याप्तिपक्षधर्मताविरहः, प्रत्येकमननुगमात्। अथ प्रत्येकाभावेऽनुगतो व्याप्तिपक्षधर्मताविशिष्टाभावोऽसिद्धिः। यद्यपि विशिष्टस्यान्यत्वे प्रत्येकाभावाव्याप्तिरपसिद्धान्तश्च, अनन्यत्वे प्रत्येकाभाव एव स इत्यननुगमः, तथापि विशेषणावच्छिन्नप्रतियोगिको विशेष्याभावो विशेषणविशेष्यसम्बन्धाभावो वा विशिष्टाभावोऽनुगत इति चेत्? न, विशिष्टाभावाज्ञानेऽपि व्याप्त्यादिप्रत्येकाभावज्ञान उद्भावने चानुमितिप्रतिबन्धो वादिनिवृत्तिश्चेति तत्प्रत्येकाभावाव्याप्तिः, अन्यथा तेषां हेत्वाभासान्तरतापत्तेः। न च विशिष्टाभावधीद्वारा प्रत्येकाभावो दोषो न तु स्वत इति वाच्यं, प्रत्येकाभावस्य स्वत एव दोषत्वसम्भवात्। वस्तुतो विशिष्टाभावो दोष एव न, प्रत्येकस्य समर्थत्वे तेनैवान्यथासिद्धेर्व्यर्थविशेषणत्वात्, प्रत्येकाभावमज्ञात्वा न विशिष्टाभावज्ञानमित्युपजीव्यत्वाद्विशिष्टाभावानुद्भावनेऽपि प्रत्येकोद्भावने वादिनिवृत्तेश्च। अत एव व्याप्तिपक्षधर्मताविशिष्टज्ञानविषयाभावत्वं प्रत्येकाभावानुगतमसिद्धत्वम्। व्यभिचारादावसिद्धत्वेऽप्युजीव्यत्वेन प्राथम्यात्तदुद्भावनेन वादिनिवृत्तेश्च। स स्वत एव दूषकः, तत्र व्याप्त्यसिद्ध्यर्थमुपाधौ तूद्भाविते विप्रतिपद्यतेऽपि, तस्य दुरूहत्वाद् व्यभिचारेणैव तदुन्नयनाच्च। यदि च व्यभिचारादिकमज्ञात्वाप्यसिद्धिबुद्धिस्तथाप्युपधेयसङ्करेऽप्युपाधेरसङ्कर एवेति निरस्तं, व्यर्थविशेषणत्वादेव। एतेन व्याप्तिपक्षधर्मतान्यतराभावोऽसिद्धिरिति प्रत्युक्तम्, अन्यतरत्वाज्ञानेऽपि प्रत्येकाभावस्य दोषत्वाद् व्यर्थविशेषणत्वाच्च।

यत्तु व्याप्तिपक्षधर्मताप्रमितिविरह आश्रयासिद्ध्याद्यनुगतोऽसिद्धिः, तत्प्रमितिसत्त्वे तत्रानुमितिप्रमित्यापत्तेरिति। तदपि व्यर्थविशेषणत्वात् तदज्ञानेऽपि प्रत्येकज्ञानस्य दोषत्वाच्च निरस्तम्।

वस्तुस्तु प्रकृतहेतुव्याप्तिपक्षधर्मतावैशिष्ट्यस्य तत्प्रमितेश्चाप्रसिद्ध्या तदभावो ज्ञातुमुद्भावयितुञ्चाशक्य एव। यत्किञ्चिद्व्याप्तिपक्षधर्मताविशिष्टप्रमितिविरहः सद्धेतुसाधारणः, स्वप्रमितिविरहो यत्किञ्चित्प्रमितिविरहो वा सद्धेतावपि सकलतत्प्रमितिविरहो दुर्निरूपो व्याप्त्यभावादेव तद्ग्रहे स एव दोषः, उपजीव्यत्वात्। यदि च प्रमितिविरहः स्वरूपसन्नेव दोषः कारणाभावत्वात् तदा व्याप्त्यादिभ्रमादनुमितिर्न स्यात्, न स्याच्च हेत्वाभासताज्ञानगर्भतल्लक्षणाभावात्। एतेन व्याप्तिप्रमितिपक्षधर्मताप्रमितिविरहान्यतरत्वमसिद्धिः, अन्यतरत्वञ्च तदन्यान्यत्वं, तेनोभयविरहेऽपि नाव्याप्तिरिति निरस्तं, व्यर्थविशेषणत्वादेव। स्यादेतत्, व्याप्तिपक्षधर्मताभ्यां निश्चयः सिद्धिः, तदभावोऽसिद्धिः। अत एवाव्याप्तेऽपक्षधर्मे

च तदारोपरूपासिद्धिरित्यनुमितिः, न तु व्याप्तपक्षधर्मादपि तदनिश्चये। न चैवं हेतोरप्याभासत्वं तदाभासस्यापि हेतुत्वं स्यात्, दशाविशेष इष्टत्वात्। सेयं स्वरूपसती दूषिका, कारणाभावत्वात्। न च व्याप्त्यादिप्रत्येकनिश्चयाभाव एव दूषकः, आवश्यकत्वादिति वाच्यं, विशिष्टनिश्चयस्य हेतुत्वे तदभावस्य कार्यानुत्पादकत्वादिति। मैवम्, एवं सव्यभिचारादेरप्यत्रैवान्तर्भावप्रसङ्गात्। असिद्धेः स्वरूपसत्त्या एव दोषत्वे स्वज्ञानार्थं व्यभिचाराद्यनुद्भावनात्। यदि च तस्मात् सिद्धिर्नोपपद्यत इति तस्योपजीव्यत्वं तदाश्रयासिद्ध्यादिज्ञानात् सिद्धिर्नेति स एव पृथग्दोषः स्यात्। असिद्धिश्च ज्ञाता परस्योद्भाव्येति स्वज्ञानार्थमुद्भावितासिद्धिनिर्वाहार्थञ्चाश्रयासिद्ध्यादिज्ञानमावश्यकं, कथञ्च हेतु-तदाभासविवेकः, सिद्धौ द्वयोरपि हेतुत्वाद् असिद्धौ तदाभासत्वात्, व्यभिचारादेः सद्धेतौ सिद्धिमखण्डयतश्च हेत्वाभासत्वाभावात्।

अथ सुप्तौ जागरेऽपि व्याप्तिपक्षधर्मतासत्त्वे तदनिश्चयेऽनुमित्यनुत्पादो हेत्वाभासप्रयोज्यः, सव्यभिचारादौ तथावधारणादित्यसिद्धिरज्ञातापि हेत्वाभासः। न चैवं हेत्वाभासाधिक्यं क्लृप्तान्तर्भावो वा, तेन रूपेण व्याप्त्यसिद्ध्यादेरेव सङ्ग्रहादिति चेत्? न, एवं सव्यभिचारादिरप्यसिद्धिः स्यादित्युक्तत्वात्। उपजीवनाद्भेदे आश्रयासिद्ध्यादिरपि पृथक् स्यात्। सुषुप्त्यादावनुमित्यभावः कारणाभावात्। कार्यानुत्पादो हि न प्रतिबन्धकमात्रात् किन्तु कारणाभावादपि, असत्यपि प्रतिबन्धके वह्न्यभावेन दाहानुत्पत्तेः। अथानुमित्यनुत्पादो हेत्वाभासप्रयुक्त एवेति चेत्? तर्ह्यनुमितौ मनोयोगादिरपि न हेतुः, हेत्वाभासादेवानुमित्यनुत्पादे तद्व्यतिरेकेणानुमित्यनुत्पादाभावात्। सिद्धेरेव तद्धेतुत्वे चरमकारणमेव हेतुः स्यात्।

अन्ये तु गमकतौपयपिकप्रतिद्वन्द्विव्याप्तिपक्षधर्मताविरहतन्नियतयोरन्यतरत्वं हेत्वाभासत्वम्। तत्राधिकबलसमानबलौ बाधप्रतिरोधौ प्रतिद्वन्द्विनौ, व्याप्तिपक्ष-धर्मताविहरश्चासिद्धिः, तन्नियतौ च सव्यभिचारविरुद्धौ। न चानयोरप्यसिद्ध्यन्त-र्भावः, व्याप्तिविरहनियतत्वेन ज्ञातयोः स्वातन्त्र्येणैव दूषकत्वाद् भ्रमे विशेष-दर्शनस्येवेति, तन्न, अत्रापि व्याप्तिपक्षधर्मताविरह एवासिद्धिः पर्यवस्यति। तत्र चोक्तमेवान्यतरत्वञ्च न लक्षणं, व्यर्थविशेषणत्वात्, हेत्वाभासान्तरबहिष्कृतस्य व्याप्तिपक्षधर्मतानिश्चयविरोधिनो रूपस्य विवक्षितत्वात्, तच्चाश्रयासिद्ध्यादिक-मेवेति।।

।।इत्यसिद्धिपूर्वपक्षः।।

।। अथासिद्धिसिद्धान्तः ।।

उच्यते–आश्रयासिद्धिः, स्वरूपासिद्धिः, व्याप्यत्वासिद्धिश्च प्रत्येकमेव दोषः, प्रत्येकस्य ज्ञानादुद्भावनाच्चानुमितिप्रतिबन्धात्। न तु विशिष्टाभावः परामर्शविषयाभावो वा, व्यर्थविशेषणत्वात्। तस्य ज्ञानमुद्भावनं विनाप्यनुमिति-प्रतिबन्धात्। अनुभवसिद्धे हि लक्षणं न तु लक्षणानुरोधेनानुभवकल्पना। परामर्शविषयाभावत्वेनानुगतेन त्रयाणामसिद्धत्वेन सङ्ग्रहो महर्षिणा कृत इति न विभागविरोधो हेत्वाभासाधिक्यं वा।

अत एव 'ये व्याप्तिविरहपक्षधर्मताविरहरूपास्तेऽसिद्धिभेदमध्यमध्यासते, तदन्ये च यथायथं व्यभिचारादयः' इति सिद्धान्तप्रवादोऽपि। न चैवं साक्षात् प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिविरहलिङ्गत्वेन सव्यभिचारविरुद्धयोरपि सङ्ग्रहे विभागव्याघातः, स्वतन्त्राभिप्रायस्य निषेद्धुमशक्यत्वात्। अन्यथा शास्त्रे परिभाषोच्छेदापत्तेः। सव्यभिचारादेरप्येवं रूपसत्त्वेऽप्युपजीव्यत्वेन पृथक्त्वम्, उपधेयसङ्करेऽप्युपाधेरसङ्करात्।

नन्वाश्रयाप्रसिद्ध्या कथमाश्रयासिद्धिरुद्भाव्या। न च शशीयतया गवि शृङ्गनिषेधवद् व्योमकमलमिति वाच्यं, शशशृङ्गनिषेधो न गवीत्युक्तत्वादिति चेत्? व्योमकमलमिति निश्चितानन्वयत्वेनापार्थकम्। आश्रयविशेषणासिद्ध्या चाश्रयासिद्धिरसङ्कीर्णा। व्याप्तिविरहस्तु व्यर्थविशेषणादौ, तदुक्तम्- एकामसिद्धिं परिहरतो द्वितीयापत्तेरिति।

व्याप्तिविरहस्त्विति। अत्रादिपदग्राह्यं व्यर्थविशेष्यम्। यद्यपि व्यर्थविशेषणे नीलत्वविशिष्टधूमस्वरूपे व्यभिचाराभावविशिष्टसाध्यसामानाधिकरण्यादिलक्षणा व्याप्तिरस्त्येव, तथापि स्वरूपावच्छेदकधर्मावच्छिन्नसाध्यसम्बन्धितालक्षणा व्याप्तिर्नास्ति। तत्र यद्धूमत्वं साध्यसम्बन्धितावच्छेदकं तन्न स्वरूपावच्छेदकम्, अनीलधूमेऽपि गतत्वात्। यच्च स्वरूपावच्छेदकं नीलधूमत्वं तन्न साध्यसम्बन्धितावच्छेककम्, अनन्तर्भूततदनतिरिक्तदेशवृत्तिधर्मान्तरस्यैव धर्मस्य तदवच्छेदकताया व्याप्तिनिरूपणावसरे प्रतिपादित्वादिति।

स्वोक्तार्थ एवाचार्यसम्मतिं दर्शयति **तदुक्तमिति।** क्षित्यादिकमकर्तृकमजन्यत्वादित्यत्र स्वरूपासिद्धिं शरीराजन्यत्वादित्यादिहेतुकरणेन परिहरतो मीमांसकस्य शरीराजन्यत्वे हेतौ व्यर्थविशेषणत्वाद्व्याप्यत्वासिद्ध्यापत्तेरित्याचार्यग्रन्थार्थः।

उपाधिस्तु न व्याप्तिविरहः, वह्निव्यापकधूमाव्यापकधर्मस्याप्रसिद्ध्या धूमे तद्विरहासिद्धेः। किन्तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वं व्याप्तिः, साध्यव्यापकसाधनाव्यापकश्च धर्मान्तरं न तु तद्विरहः, अपि तु तन्नियतः। न चैवमुपजीव्यत्वेनोपाधिर्हेत्वाभासान्तरम्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वेन तदर्थं परमुखवीक्षकत्वात्। न हि साध्यव्यापकाव्याप्यत्वमनुमितिविरोधि, किन्तु व्यभिचारोन्नयनेन स्वव्यतिरेकेण सत्प्रतिपक्षतया वा। तदाह उपाधाववश्यं व्यभिचार उपाधेरेव व्यभिचारशङ्केति। अप्रयोजकान्यथासिद्धौ च सोपाधी नासिद्धौ। प्रतिकूलतर्कानुकूलतर्काभावावुपजीव्यत्वे सति स्वतो दूषकावपि न हेत्वाभासौ, स्वरूपसतोरेव प्रतिबन्धकत्वादित्युक्तम्।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ असिद्धिप्रकरणं समाप्तम्

इह यथा व्याप्तिविरहज्ञानं पक्षधर्मताविरहज्ञानञ्च साक्षात्परामर्शविघटकं, तथा व्याप्तिविरहव्याप्यवत्त्वज्ञानं पक्षधर्मताविरहव्याप्यवत्त्वज्ञानञ्च विरोधिज्ञानत्वेनाविशेषात्। तथा च व्याप्तिविरहवत् पक्षधर्मताविरहवच्च व्याप्तिविरहव्याप्यवत्त्वं पक्षधर्मताविरहव्याप्यवत्त्वञ्च धर्मः कथं न हेत्वाभास इति।

अत्र **यज्ञपत्युपाध्यायाः**— बाधप्रतिपक्षातिरिक्तः परामर्शविषयाभाव एव हेत्वाभासः शास्त्रकाराभिसन्धानविषयः। तत्र पक्षविशेषणविरह आश्रयासिद्धिरुच्यते। पक्षधर्मताविरहः स्वरूपासिद्धिः। व्यभिचाराभावरूपविशेषणविशिष्टसहचाररूपस्य व्याप्यत्वस्याभावः व्याप्यत्वासिद्धिः। व्याप्तिशरीरनिविष्टस्य व्यभिचाराभावस्य विशेषणस्य विरहो व्यभिचारः। व्याप्तिशरीरनिविष्टस्यैव साध्यसहचारस्य विशेष्यस्य विरहो विरोधस्तेन पक्षधर्मताविरहव्याप्यवत्त्वं, व्याप्तिविरहव्याप्यवत्त्वमुपाधिमत्त्वादिकञ्च ज्ञायमानं साक्षात्प्रतिबन्धकमपि न हेत्वाभासः। न च शास्त्रकारस्य तथाभिसन्धाने मानाभावः, तेषु हेत्वाभासव्यवहाराभावस्यैव मानत्वादिति संक्षेपः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायाम् असिद्धिप्रकरणं समाप्तम्

॥ बाधप्रकरणम् ॥

बाधो न साध्याभाववत्पक्षकत्वं, पक्षवृत्त्यभावप्रतियोगिसाध्यकत्वं वा, पक्षे साध्याभावज्ञानमात्रस्य प्रमात्वज्ञानं विनाऽधिकबलवत्त्वाज्ञानेन बाधाभावादिति वक्ष्यते। अत एव साध्याभाववत्पक्षवृत्तित्वमपि न, असिद्धिसङ्कीर्णबाधाव्याप्तेश्च। किन्तु साध्याभाववत्त्वप्रमाविषयपक्षकत्वं, प्रमितसाध्याभाववत्पक्षकत्वं, पक्षनिष्ठ-प्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वं वेति। विवक्षितविवेकेन साध्याभावादि-प्रमैव दोषः। सा च प्रमात्वेन ज्ञाता न स्वरूपसती हेत्वाभासत्वात्, प्रमात्वज्ञानं विनाऽधिकबलत्वाभावेनादोषत्वात्, अप्रमायामपि प्रमात्वज्ञानेऽनुमितिप्रतिबन्धाच्च। अथ साध्याभाववति पक्षे हेतोः सत्त्वज्ञाने व्यभिचारः, तदज्ञानेऽसिद्धिः, संशययोग्यत्वाभावेन पक्षत्वाभावादाश्रयासिद्धिश्च। न च पक्षभिन्ने व्यभिचारो दोषः, व्यर्थविशेषणत्वात्, सर्वोपसंहारप्रवृत्तव्याप्तेः साध्याभाववति साधन-मित्यवगमादेव भङ्गात्। न चैवं सन्दिग्धसाध्यदृष्टान्ते सन्दिग्धानैकान्तिकवत्पक्षे व्यभिचारसंशयादनुमानमात्रोच्छेद इति पक्षे साध्यसन्देहोऽनुमानाङ्गमिति। व्याप्तस्य पक्षधर्मताज्ञानादनुमित्युत्पादेन संशयनिवृत्तेः, अन्यथा विशेषदर्शनस्य संशयविरोधिता भज्येत। न च पक्षे साध्याभावं प्रतीत्य व्यभिचारज्ञानमित्युपजीव्यत्वाद्बाधः पृथक्, पक्षे साध्याभावप्रतीतिरेव हि साध्याभावहेत्वोः सम्बन्धोल्लेखिनीत्येक-वित्तिवेद्यत्वेन नोपजीव्यत्वम्, अन्यथा बाधदशायां पक्षे हेतोरज्ञानादसिद्धिरेव। न चोद्भावितव्यभिचारनिर्वाहाय बाधोद्भावनमावश्यकमित्युपजीव्यत्वं, व्यभिचारोद्भावने परकथन्तानावश्यकत्वात्, तत्त्वे वा तन्निर्वाह्यमेव दूषणं क्लृप्तत्वात्।

वह्निरुष्णः कृतक इत्युद्भावनाद्वह्निरुष्ण इत्युद्भावने लाघवमिति बाधः पृथगिति कश्चित्, तन्न, पक्षे साध्याभावप्रमा स्वार्थानुमाने यदि न दोषस्तदा परं प्रत्यपि न स्यात्, अविशेषादिति तदुद्भावनस्य दूरनिरस्तत्वात्। अथोपनीतकाञ्चन-मयत्वविशिष्टवह्न्यनुमितेः सल्लिङ्गजन्याया आभासत्वं हेत्वाभासाधीनम्। न चानुमितेः पूर्वं तत्र व्यभिचारज्ञानं, विशिष्टस्याप्रसिद्ध्या तदभावस्याज्ञानात्। अत एव पक्षासिद्धिरपि न। अतः काञ्चनमयवह्न्यभावरूपाद्बाधात्तत्राभासत्वं, व्यधिकरणप्रकारावच्छिन्नप्रतियोगिकश्चात्राभाव इति चेत्? न, वस्तुतो व्यभिचारस्यापि तत्र सत्त्वात्, ज्ञानञ्च तस्य बाधस्येवानुमित्यनन्तरमेव।

किञ्च वह्नौ काञ्चनमयत्वस्यानुमितावेव भाने काञ्चनमयवह्निमानित्यनुमितिर्न स्यात्, विशिष्टस्य पूर्वमज्ञानाद्वह्नौ काञ्चनमयत्वांशेऽनुमितेराभासत्वं वह्नौ लिङ्गस्या-

सिद्धेर्व्यभिचाराच्च। न चानुमितेर्विषयाभावाधीनमप्रमात्वं किन्तु हेत्वाभासाधीनम्, यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः। न च साध्याभावो ज्ञातः प्रतिबन्धक इति न स हेत्वाभासः। वस्तुतस्तूपनीतस्यानुमितौ भाने मानाभावः, प्रत्यभिज्ञादौ च प्रतीतिबलेन तत्कल्पनम्। अन्यथा पूर्वोपस्थितसकलपदार्थभाने यथार्थानुमित्युच्छेदः। अपि चैवं परार्थानुमानेऽप्युपनीतभाने बाधितोऽर्थ उपनीतोऽयं मम भात इत्युद्भावनादेव विजयते वादी। उद्देश्यानुमितेरप्रतिबन्धान्न तत्र बाधो दोष इति चेत्? तुल्यं स्वार्थानुमानेऽपि। अत एव यत्र सामान्यतोदृष्टानुमानमेवेतरबाधसहायं विशेषानुमापकं तत्र बाधकानामाभासत्वे सिद्धे तत्प्रयुक्तं सामान्यतोदृष्टस्याप्याभासत्वमिति बाधस्यासाङ्कर्यात्। न च यदि विशेषविप्रतिपत्तौ सामान्यप्रतिज्ञा तदाऽर्थान्तरं, सामान्यविप्रतिपत्तौ तु नेतरबाधकापेक्षेति वाच्यं, स्वार्थानुमान एवैवं बाधासङ्करस्योक्तत्वादित्यपास्तम्, अनुमित्यप्रतिबन्धेन तत्र बाधस्यादोषत्वात्। ननु पक्षे साध्याभावग्रहवत्साध्याभावव्याप्यग्रहोऽपि दूषको विरोधित्वाविशेषात्। तथा च साध्याभावसम्बन्धो व्यभिचारः साध्याभावव्याप्यसामानाधिकरण्यं बाधः, साध्याभावव्याप्यञ्च वह्नित्वादिकमेवेति चेत्? न, पक्षे हि साध्याभावे ज्ञायमाने ज्ञाते वा यदि साध्याभावव्याप्यसामानाधिकरण्यबुद्धिस्तदा व्यभिचार एव। अथ पक्षे साध्याभावबुद्धिं विनैव सा, तर्हि हेतुसाध्याभावव्याप्ययोरगृह्यमाणविशेषयोः सत्प्रतिक्षत्वम्। अथ तुल्यबलेन सत्प्रतिपक्षोऽधिकबलेन बाध इति चेत्? न, गमकतौपयिकरूपसाकल्यं हि बलं, तच्च द्वयोर्ज्ञातमिति कथं न सत्प्रतिपक्षत्वं, गमकताबहिर्भूतञ्च न बलम्।

अथ साध्याभावव्याप्यबुद्धेरनन्यथासिद्धत्वं बलं, तदा ततः साधनवति पक्षे साध्याभावानुमितावनैकान्तिकत्वमेव पक्षे साध्याभावग्रहवदिति यदुक्तं तदप्यसिद्धं, तस्य दोषत्वानभ्युपगमात्, अन्यथा हेत्वाभासान्तरतापत्तिः।

अथ हेतुतः साध्यसिद्धिसम्भावनायां व्यभिचारासिद्धेः, बाधेन हेतोरसाधकत्वे सिद्धे व्यभिचारसिद्धिरित्युपजीव्यत्वाद् बाधः पृथक्, अन्यथा हेतोरसाधकत्वे सिद्धे साध्यसिद्धिसम्भावनाविरहाद् व्यभिचारबुद्धिः, तस्याञ्च सत्यां हेतोरसाधकत्वधीरित्यन्योन्याश्रय इति चेत्? न, साध्यसिद्ध्युन्मुखहेतुज्ञानस्य प्रमितसाध्याभावसहचरितहेतुविषयत्वेन व्यभिचारज्ञानतयादूषकत्वात्। तथापि व्यभिचारे साध्याभावप्रमा तन्त्रं, तां विना तदभावादिति सैव दोष इति चेत्? सत्यं, किन्तु साध्याभावप्रमा व्यभिचारज्ञानत्वेन दूषिका, क्लृप्तत्वात्, न तु स्वतन्त्रा। अत एव पक्षे साध्याभावज्ञानत्वेन प्रतिबन्धकत्वं, न तु साध्याभावसमानाधिकरणसाधनज्ञानत्वेनेति प्रत्युक्तं, तस्य लघुत्वेऽप्यक्लृप्तत्वात्।

अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधो दोषत्वेन क्लृप्त इत्यनुमितावपि स एव दोष इति चेत्? न तर्हि हेत्वाभासः, अनुमित्यसाधारणदोषस्य तत्त्वात्, मनोयोगाभाववत् स्वरूपसत एव प्रतिबन्धकत्वात्, हेतुत्वाभिमतावृत्तित्वेनासाधकतालिङ्गत्वाभावाच्च। बाधितपक्षकत्वं लिङ्गमिति चेत्? न, अन्यत्र तथादूषकत्वाकल्पनात्।।

।।इति बाधपूर्वपक्षः।।

।।अथ बाधसिद्धान्तः।।

उच्यते–पक्षे साध्याभावनिश्चयः साध्याभावज्ञानप्रमात्वनिश्चयात्, ज्ञानमात्रादर्थनिश्चये प्रामाण्यग्रहवैयर्थ्यं भ्रमत्वेन ज्ञातादर्थनिश्चयप्रसङ्गश्च। तथा चोपजीव्यत्वेनाधिकबलत्वेन वा पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चये सव्यभिचारो नान्यथेत्युभयथापि साध्याभावनिश्चयाधीनव्यभिचारज्ञानात् पूर्वं ज्ञातं साध्याभावज्ञानप्रमात्वमेव दोष उपजीव्यत्वात्। यदि च पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चयो नानुमितिविरोधी, तदा व्याप्तिपक्षधर्मतया हेतुज्ञानं विशेषदर्शनत्वेन पक्षे साध्याभावज्ञानं परिभूय साध्यं साधयेदेव पर्वते धूम इव वह्निम्। न च साध्याभावबुद्धिरेवागृह्यमाणविशेषा सत्प्रतिपक्षवत् प्रतिबन्धिकेति वाच्यं, रजतेनेदं रजतमिति ज्ञानेऽपि विशेषदर्शिनेन रजत्वस्य शङ्खे पीतत्वज्ञाने शुक्लत्वस्य चानुमानात्, वादिवाक्येन पक्षे साध्याभावज्ञानादनुमानोच्छेदप्रसङ्गाच्च।

अथ पक्षे साध्याभावप्रमैव साध्याभावहेतुविषया व्यभिचारज्ञानत्वेन दोषो न तु तस्याः प्रमात्वज्ञानमपीति चेत्? तर्हि प्रमाया अप्रमात्वज्ञाने भ्रान्तानुमितिर्न स्यात्, न स्याच्च पक्षे साध्याभावज्ञानप्रमात्वभ्रमादनुमितिप्रतिबन्धः। ननूपजीव्यत्वेऽप्यत्र साध्याभावप्रमेति ज्ञानं न स्वतो दूषकं, क्लृप्तत्वात्। पक्षे साध्याभावनिश्चयं कुर्वद् व्यभिचारज्ञानद्वारेति चेत्? न, अत्र साध्याभावप्रमेति ज्ञानान्नियमतः साध्यज्ञानानुदयात् तस्यैव प्रतिबन्धकत्वात्, शब्दादौ तथा दर्शनात्। साध्याभावप्रमाविषयवृत्तित्वस्य हेतुवृत्तित्वादसाधारणत्वेन साध्याभावप्रमाया हेत्वाभासत्वं साधारण्येऽपि ज्ञायमानं सद् यदनुमितिं प्रतिबध्नाति तस्यैव हेत्वाभासत्वम्। न च साध्याभावप्रमाऽत्रेति निश्चयदशायां पक्षे साध्याभावहेत्वोर्ज्ञानाद् व्यभिचार इति वाच्यं, प्रमात्वज्ञानस्य साध्याभावनिश्चयहेतुत्वेन

तद्दशायां तदभावात्। पक्षधर्मताबलेन प्रसिद्धं बाधान्न सिध्यतीति बाधः पृथक्। प्रसिद्धवह्न्यभाववति पक्षे व्यभिचारान्न तत्सिद्धिरिति चेत्? तर्ह्यप्रसिद्धवह्न्यभाववति सपक्षे व्यभिचारात् तमपि न साधयेत्, तदज्ञानात्तत्साधनेऽनुमितिरप्रमा स्यात्। अथ पक्षवृत्तेरन्य एव धूमादिः सपक्षे, तर्हि गोत्वपृथिवीत्वद्रव्यत्वादेरप्रसिद्धसास्नाद्यनुमानं न स्यात् सास्नादिप्रत्येक-व्यभिचारात्। यदि च साध्यतावच्छेदकसास्नात्वादिसामान्यावच्छिन्नप्रतियोगिताका-भाववति न गोत्वादिकमिति न व्यभिचारः, धूमेऽप्येवं व्यभिचाराभावात् साध्यताच्छेदकेन प्रकारेणाप्रसिद्धमिव प्रसिद्धमपि साध्यं धूमगोत्वादिकं साधयेद् यदि बाधो न दोष इति वयम्।

साध्याभाववन्मात्रसहचारो न व्यभिचारः साध्यप्रागभावध्वंसवद्वृत्तित्वेन व्यभिचारितया पृथिवीत्वादिना गन्धादेर्द्रव्यत्वादिना गुणस्यानुमानभङ्गप्रसङ्गात्। किन्तु साध्यात्यन्ताभाववद्गामित्वम्। एवञ्च स्वप्रागभावध्वंसावच्छिन्नतदाश्रये तत्प्रतियोगिसाधने पक्षे व्यभिचारो नेति बाधो दूषणम्।

पक्षधर्मताबलेन प्रसिद्धं बाधान्न सिध्यतीति बाधः पृथगिति। अत्र **यज्ञपत्युपाध्यायाः** प्रसिद्धस्य पक्षान्यवृत्तिसाध्यस्यासिद्धौ भ्रमरूपासिद्धिः स्यात्। तथा च यवाङ्कुरं प्रति कलमबीजस्येव भ्रमरूपानुमितिविशेषं प्रति सत्यपरामर्शस्याकारणत्वादेव न ततो प्रकृते प्रसिद्धसाध्यानुमितिर्न तु बाधात्। अथ प्रसिद्धसाध्यबाधसहकृतस्यैव सत्यपरामर्शस्य गुणत्वेन प्रमारूपानुमितिविशेषं प्रति कारणत्वाद् भ्रमरूपानुमितिं प्रत्यकारणत्वं, न तु केवलस्यैवेति चेत्? न, प्रसिद्धसाध्यबाधसहकृतस्य सत्यपरामर्शस्य गुणत्वे गौरवान्मानाभावाच्च। किञ्च पक्षान्यवृत्तिसाध्यं, साध्यं पक्षे नास्तीतिरूप एव प्रसिद्धसाध्यबाधो वाच्यः। स च सामान्येनापि रूपेण पक्षे प्रसिद्धसाध्यस्य सिद्धौ न परिपन्थी। अन्यथा तस्मिन् सति भ्रमानुमितेरनुदयप्रसङ्गात्। तत्र हि विशेषतो बाधितं पक्षान्यवृत्त्येव साध्यं साध्यतावच्छेदकेन सामान्येन रूपेण भासते। न त्वन्यत्, अन्यस्य तस्यासत्त्वात्। असत्ख्यातेश्च प्रतिषेधात्। तथा च प्रमारूपानुमितिस्थले यदि सत्यपरामर्शस्यैव महिम्ना प्रसिद्धस्य पक्षान्यवृत्तिसाध्यस्य न सिद्धिस्तदा तत्र विशेषतः प्रसिद्धसाध्यबाधेऽपि साध्यतावच्छेदकेन सामान्येन रूपेण तत्सिद्धिर्निराबाधैव। न च विशेषत एव तत्प्रसिद्धं बाधान्न सिध्यतीत्यत एव बाधः पृथगिति वाच्यं, विशेषतस्तत्र तत्सिद्धेः। विशेषव्याप्तिविरहादेवाप्रसङ्गात्।

अथावच्छेद्ये सिद्धसाधनम्, अवच्छेदके हेत्वसिद्धिः, विशिष्टञ्च नान्यदिति चेत्? तर्हि प्रागभावध्वंसप्रतियोगिनोरेकवृत्तित्वेनैकसमयतापि स्यात्। अथ यत्समयावच्छेदेन तत्र प्रागभावः प्रध्वंसो वा न तत्समयावच्छेदेन प्रतियोगीति चेत्? तर्हि तदवच्छेदेन प्रतियोगिसाधने न सिद्धसाधनं, किन्तु बाध एव। अन्यथा भावात्यन्ताभावयोरप्यव्याप्यवृत्तित्वभङ्गः, एकवृत्तित्वात्, अवच्छेदकभेदेन वृत्तिरिहापि तुल्या। तत्र देशभेदोऽवच्छेदकोऽत्र तु समयभेद इति। असिद्धेरपि बाध एवोपजीव्यः। न चैवमुपजीव्याद्बाधवत् सिद्धसाधनमपि पृथक्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वात्।

न हि साध्यज्ञानं तद्विरोधि, धारावाहिकज्ञानोदयात्। नाप्यनुमितिविरोधि, अनुमित्सया प्रत्यक्षसिद्धेऽप्यनुमानदर्शनात्। तदुक्तं प्रत्यक्षदृष्टमप्यनुमानेन बुभुत्सन्ते तर्करसिका इति, श्रवणानन्तरं मननदर्शनाच्च। तस्मात् सिद्धिमात्रार्थिनः सिद्धौ न तदिच्छा सिद्धिविशेषार्थिनः सास्तीति तस्यानुमितिरेव। एवञ्च सिषाधयिषितपक्षविघटनद्वारा सिद्धसाधनं दूषणं, न स्वतः। नन्वभावधीरपि न भावधीप्रतिबन्धिका नेदं रजतमिति भ्रमानन्तरं रजतनिश्चयात्। न चाभावप्रमा तथा, अपीतः शङ्ख इति प्रमापयत एव पीतोयमिति भ्रमदर्शनादिति चेत्? न, विरोधिज्ञानं हि प्रतिबन्धकं, प्रत्यक्षभ्रमस्य च प्रत्यक्षप्रमा विरोधिनी, सा च शङ्खादौ दोषात् नास्त्येव, अनुमितौ त्वभावप्रमामात्रमेव विरोधीति कथमभावप्रमायां भावानुमितिरिति। स चायं दशविधः धर्मिग्राहकमानबाधितं-घटो व्यापकः सत्त्वादिति प्रत्यक्षेण, परमाणवः सावयवा मूर्तत्वादित्यनुमानेन, मेरुः पाषाणमयः पर्वतत्वादिति सुवर्णमयत्वबोधकागमेन। साध्यप्रतियोगिग्राहकबाधितं-वह्निरनुष्णः कृतकत्वादिति प्रत्यक्षेण, शब्दोऽश्रावणो गुणत्वादित्यनुमानेन,

पक्षान्तरमाह **साध्याभाववन्मात्रसहचारो न व्यभिचार** इति। **एवञ्चेति।** एवञ्च रूपप्रागभावावच्छिन्नो घटो रूपवान् घटत्वादित्यादौ पक्षशरीरभूते घटादौ धर्मिणि स्वरूपाद्यन्ताभावान्न व्यभिचार इति प्रागभावरूपसाध्यविरहज्ञानमेव तत्रानुमितिप्रतिबन्धकमतो बाध एव तत्र दूषणमित्यर्थः। यच्च रूपप्रागभावादिविशिष्टो घटादिस्तत्र पक्षः, तत्र च रूपाद्यत्यन्ताभावो न तु तत्प्रागभावो, विशेषणांशे रूपादेः सदैवावृत्तेः। तथा च व्यभिचार एवेति, तदयुक्तं, न हि विशिष्टस्तत्र पक्षः। किन्तु पक्षतावच्छेदकेन हि विशिष्टपक्षसाध्यात्यन्ताभावो दोषाय, अन्यथा शब्दत्वविशिष्ट-शब्देऽनित्यत्वाभावादनित्यः शब्द इत्यत्रापि तज्ज्ञानदोषः स्यात्।

गवयत्वं गवयपदाप्रवृत्तिनिमित्तं जातित्वादित्युपमानेन। साध्यग्राहकबाधितं-शुचि नरशिरःकपालं प्राण्यङ्गत्वादित्यत्रागमेन। हेतुग्राहकबाधितं-जलानिलावुष्णौ पृथिवीतो विपरीतस्पर्शवत्त्वात् तेजोवदिति प्रत्यक्षेण, मनो विभु ज्ञानसमवाय्याधारत्वादित्यनुमानेन, राजसूयं ब्राह्मणकर्तव्यं स्वर्गसाधनत्वादग्निष्टोमवदिति राजसूयकर्तव्यताबोधकागमेनेति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ बाधप्रकरणं समाप्तम्

वस्तुतस्तु विशिष्टस्यापि पक्षत्वे न व्यभिचारः। किन्त्वसिद्धिरेव, विशिष्टे तत्र हेतोरवृत्तेः, विशेषणांशे तदसत्त्वात्। यदपि रूपप्रागभावावच्छिन्नस्य पक्षत्वे व्यभिचार एव, रूपप्रागभावकाले तत्रापि रूपात्यन्ताभावसत्त्वात्। अन्यथा स्वकीयरूपप्रागभावकालीनो घटो रूपवान्, इत्यादिवाक्यं योग्यं स्यादिति मतम्। तदप्यसङ्गतं, यत्र हि धर्मिणि यत्प्रागभावस्तत्र कदापि न तदत्यन्ताभावः, प्रतियोगिप्रागभावस्याप्यत्यन्ताभावविरोधित्वात्। उक्तवाक्ये यद्युक्तकालस्योपलक्षणत्वे तात्पर्यं तदा तद्योग्यमेव, तत्कालसम्बन्धिन्येव घटेऽग्रे रूपसत्त्वात्। यदि च विशेषणत्वे तात्पर्यं तदा तस्मिन् विशेषणांशे रूपात्यन्ताभावसत्त्वादयोग्यमेव। **अथावच्छेद्ये सिद्धसाधनमिति।** प्रागभावप्रतियोगिनोरेकवृत्तित्वादिति भावः।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां बाधप्रकरणं समाप्तम्

।। हेत्वाभासानामसाधकतासाधकत्वप्रकरणम् ।।

अथ हेत्वाभासानामसाधकतासाधकत्वेन सदुत्तरत्वं जात्यादीनाञ्चा-साधकतासाधारण्येन परासाधकतासाधकतया स्वव्याघातकत्वादसदुत्तरत्वम्। अथ विरुद्धत्वादिज्ञानादेव स्वार्थानुमितेरिव परार्थानुमितेरपि प्रतिबन्धे किमसाधकतानुमानेन, यद्वचसि वाद्युक्तदूषणावगतिः स निगृहीत इति समयबन्धेन कथाप्रवृत्तौ दूषणमात्रमुद्भाव्यमन्यथाऽर्थान्तरत्वादिति चेत्? न, द्वयं ह्युद्देश्यं परार्थानुमितिप्रतिबन्धः, स्थापनाया असाधकतासाधनत्वञ्च। तत्राद्यं दूषणमात्रज्ञानादेव, द्वितीयन्त्वलिङ्गत्वज्ञापनात्। प्रतिबन्धकत्ववदनेनापि रूपेण दूषकत्वसम्भव इत्यभिप्रायेण वाऽसाधकतासाधनम्।

नन्वेवं पञ्चावयवप्रयागापेक्षा स्यात्, अन्यथा न्यूनतापत्तिरिति चेत्? न, दूषणस्यासाधकताव्याप्यत्वमङ्गीकृत्य कथेति तत्पक्षधर्मताया एवोद्भाव्यत्वात्, अन्यथाऽधिकत्वापत्तेः। नन्वेवं कृतकत्वेनानित्यत्वानुमानेऽपि व्याप्तिर्नाभिधेया, उभयसिद्धत्वादिति चेत्? न, कथायां समयविषयतया दूषणे त्वसाधकता-व्याप्त्युपस्थितेरावश्यकत्वात्, अन्यथा कथकत्वविरोधात्। नन्वेवं कृतकत्वेनानुमाने तद्व्याप्तिमनङ्गीकृत्यापि कथासम्भवात्। यस्तु कथारम्भे बाधस्यासाधकत्वव्याप्ति नाङ्गीकरोति तं प्रति तद्दूषकत्वं प्रसाध्य पञ्चावयवप्रयोगः कर्तव्य एव। यत्तु दूषणे पक्षधर्मतामात्रमुद्भाव्यं तत्र यत्र वादिनोस्तथा समयोऽन्यत्र तु पञ्चावयवप्रयोग एवेति। तन्न, कथासम्प्रदायविरोधात्।

अथासाधकत्वं न पक्षे साध्यप्रत्ययाजनकत्वं, तेनापि तत्त्वेनाज्ञानदशायां पक्षे साध्यभ्रमजननात्। कदाचिदजनकत्वं सद्धेतावपि। नन्वेतत्काले साध्यविशिष्टपक्षज्ञानाजनकं तत्, न हि दूषणत्वज्ञानदशायां पक्षे भ्रमरूपाप्यनुमितिः। साध्यविशिष्टपक्षज्ञानञ्च हेतुत्वेन ज्ञानदशायां प्रसिद्धमिति चेत्? न, सद्धेतावसत्प्रतिपक्षतादशायामपि पूर्वकाले साध्यविशिष्टपक्षज्ञानाजनकत्व-मस्तीत्यसाधकताप्रसङ्गात्। अथ पक्षे साध्यभ्रमजनकत्वं तत्, बाधविरुद्धयोरपि तत्त्वाज्ञानदशायां भ्रमजनकत्वादिति चेत्? न, सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्त्वेन ज्ञानदशायां साध्यभ्रमजनकत्वात्, अज्ञाने साध्यभ्रमाजनकत्वात्। नापि व्याप्तिपक्षधर्मतान्यतरराहित्यं, सत्प्रतिपक्षासाधारणसद्धेतोरभावाद् दशाविशेषे तस्य दोषत्वात् साध्यासिद्धौ प्रकृतसाध्यव्याप्यप्रसिद्धेश्च।

नाप्यनैकान्तिकाद्यन्यतमत्वं, यत्किञ्चिदनैकान्तिकत्वस्यातिव्याप्तेः, प्रकृत-साध्यानैकान्तिकत्वस्याप्रसिद्धत्वेन केवलान्वयिसाधनेऽप्रसिद्धेरंशतः सिद्धसाधनात् साध्याविशेषाच्च। यत्तु एतत्कालीनैतत्पक्षीयत्वावच्छिन्नप्रतियोगिकैतत्साध्य-प्रमाकरणत्वाभावः, तत्तत्कालतत्तत्पक्षविषयसाध्यत्वाभिमतानित्यत्वादिप्रमा-जनकत्वाभावो वाऽसाधकत्वम्। न च प्रतियोग्यप्रसिद्धिः, एतत्कालीनैतत्पक्षीयत्व-तत्तत्कालतत्तत्पक्षविषयत्वयोर्व्यधिकरणयोरेव प्रतियोगितावच्छेदकत्वादिति। तन्न, सद्धेतोः सत्प्रतिपक्षत्वाज्ञानदशायामपि तादृशप्रमायामकरणभावेनासाधकतापत्तेः। नापि तृतीयलिङ्गपरामर्शस्याप्रमात्वं तत्, विरुद्धादौ परामर्शाभावात्, सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्प्रमात्वाच्च। नाप्यनुमितिहेतुभूताभावप्रतियोगिज्ञान-विषयत्वं तत्, सद्धेतावपि कदाचिद् व्यभिचारित्वसत्प्रतिपक्षत्वज्ञानस्यानुमिति-प्रतिबन्धकत्वात्।

अथानुमितिप्रतिबन्धकप्रमाविषयत्वमसाधकत्वम्। सद्धेतौ व्यभिचारादिभ्रमः प्रतिबन्धकः, अनुमितिप्रतिबन्धकत्वञ्च व्यभिचारादिप्रमायास्तृतीयलिङ्गपरामर्श-विघटनद्वारा तुल्यबलताविषयतया वेति चेत्? न, सत्प्रतिपक्षयोर्विरुद्धयो-र्वास्तवतुल्यबलत्वाभावेन तद्भ्रमस्य प्रतिबन्धकत्वात्। न च तुल्यबलतया ज्ञायमानेन बोधितसाध्यविपर्ययकत्वज्ञानं प्रतिबन्धकं, तच्च प्रमैवेति वाच्यं, तुल्यबलताज्ञानमेव हि प्रतिबन्धकं, न तु ज्ञायमानत्वज्ञानं, गौरवादसिद्धेश्च। न च सत्प्रतिपक्षेऽन्यतराङ्गवैकल्यप्रमैव प्रतिबन्धिकेति वाच्यम्, अन्यतरत्वं तदतद्-वृत्ति। न च तदवृत्तिसामानाधिकरण्येन ज्ञायमानस्य दोषत्वं, धर्ममात्रस्य व्यभिचारज्ञानादनुमित्युच्छेदापत्तेः, अन्यतराङ्गवैकल्यज्ञानोपजीव्यस्य तुल्यबलत्व-ज्ञानस्यैव प्रतिबन्धकत्वाच्च। अन्यथा व्याप्यत्वासिद्ध्यन्तर्भावापत्तेः। अथानैकान्तिकादिज्ञानस्य तत्तदनुमितिप्रतिबन्धकत्वमसाधकत्वम्। तथा हीदमनैकान्तिकादिज्ञानम्, एतत्साध्यवत्तयैतत्पुरुषस्यैतत्कालीनैतत्पक्षकानुमिति-प्रतिबन्धकम्, एतदनैकान्तिकादिज्ञानत्वाद्, एतदन्यतज्ज्ञानवदिति चेत्? न, एतत्साध्यवत्तयैतत्पक्षकानुमितेः कदाचिल्लिङ्गभ्रमात् प्रसिद्धावप्येत्कालीनैतत्पुरुषस्य तादृशानुमित्यप्रसिद्धेः। नापि समीचीनसाध्यपक्षविषयानुमित्यजनकत्वं, बाध-विरुद्धासिद्धेषु साध्यानधिकरणे पक्षे सत्यसाध्यप्रतीत्यप्रसिद्धेः, वह्निमति वाष्पे धूमभ्रमात् वह्न्यनुमितेः सत्यत्वाच्च। न चान्य एव वह्निस्तत्र भासते, मानाभावात्, तद्वह्नेः प्रत्यभिज्ञानात्, एकव्यक्तिके तदसम्भवाच्च। न च सानुमितिर्लिङ्गविषयत्वेन भ्रमः, अनुमितौ लिङ्गविषयत्वे मानाभावात्। किञ्च भावोऽभावो वोभयथापि प्रमेयमिति सत्यानुमितौ भावत्वाभावत्ववति प्रमेयत्वज्ञान

एकत्र तयोरभावादसत्यानुमितिः स्यात्। न चान्यतरत्वं लिङ्गं, तद्व्याप्तिमविदुषोऽप्यनुमितेर्व्यर्थविशेषणत्वाच्च।

अथ साध्यव्याप्यत्वमेव तत्र तन्त्रं तत्र च बाधो नास्तीति चेत्? तर्हि कूटलिङ्गादनुमितौ वह्निव्याप्यवत्त्वमेव तन्त्रं, वह्निव्याप्यञ्च किञ्चित्तत्रास्त्येव। अथ कूटलिङ्गे वह्निव्याप्याभेदः प्रतीयते, तथा च वह्नौ कूटलिङ्गव्यापकाभेदोऽपि, अन्यथा कूटस्यैव वह्निव्याप्यत्वाप्रतीतेः। एवञ्च कूटलिङ्गव्यापको वह्नित्वेन भासत इति वह्न्यनुमितिरसत्यैवेति चेत्? न, वह्निव्याप्यालोके धूमारोपाद यत्रानुमितिस्तत्रासिद्धिभेदेऽसत्यत्वाभावापत्तेः, आलोकव्यापके धूमव्यापकाभेदात्। अथ लिङ्गमनुमितिविषयो नियमतः पक्षधर्मताज्ञानविषयत्वात्, व्याप्तिज्ञानविषयत्वात्, नियमेनानुमितिहेतुविशेषणधीविषयत्वाच्च, पर्वतत्ववत्साध्यवच्च। किञ्चैकविशेषणवत्त्वेन ज्ञाने विशेषणान्तरधीसामग्री तत्रैव विशिष्टवैशिष्ट्यज्ञानमिति धूमविशिष्ट एव वह्निवैशिष्ट्यानुमितिरिति। ननु चानुमितौ व्यापकत्वभानेऽनुमित्यविच्छेदः। न च फलीभूतज्ञानन्यूनविषयस्यैव परामर्शस्यानुमितिहेतुत्वं, गौरवात् विषयान्तरसञ्चारात् नानुमितिरित्यपि न, परामर्शस्य चरमकारणत्वात् प्रत्यक्षादिसामग्रीतो बलवत्त्वाच्चेति चेत्? न, सिद्धसाधनेन विच्छेदात्। यद्यप्येवं लिङ्गांशेऽप्रमात्वेऽपि साध्यप्रमात्वात् कथं तस्यासाधकत्वं, तथाप्युक्तसाधकत्वमस्त्येवेति चेत्? अस्तु तावदेवं, तथापि दैवात्तत्र धूमसत्त्वे कथं तदंशेऽप्यसत्यता। अत एवान्द्रेन्धनप्रभवो वह्निर्धूमव्यापको नान्यः। न च वह्नित्वेन व्यापकत्वादन्योऽपि तथा, तेन विनापि धूमसत्त्वात्। एवं वाष्पे धूमभ्रमाद् धूमव्यापको वह्निर्भासते, स च तत्र नास्त्येवेति न सानुमितिः सत्येति निरस्तं, दैवाद् धूमसत्त्वे सत्यत्वादिति।

उच्यते–स्वज्ञानदशायां पक्षे साध्यप्रत्ययाजनकत्वमसाधकत्वम्। तथाहि विरुद्धत्वादिज्ञानदशावर्तीदं पक्षे साध्यप्रत्ययाजनकं विरुद्धादित्वात् पक्षविशेषणमहिम्ना तद्दशायां पक्षे साध्यप्रत्ययाजनकत्वं सिध्यति। बाधितादावपि लिङ्गत्वभ्रमात् पक्षे साध्यप्रत्ययजनकत्वमिति न प्रतियोग्यप्रसिद्ध्या साध्याप्रसिद्धिः।

यद्वा ऽनुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्वमसाधकत्वम्। तथा हीदानीमिदमनुमितिप्रतिबन्धकतावच्छेदकरूपवदनैकान्तिकादित्वाज्ज्ञानवत्। अनुमितिप्रतिबन्धकतावच्छेदकञ्च रूपं ज्ञाने विषयतयानैकान्तिकादित्वमेव। न च साध्याविशेषः, उपाधिविशेषस्यानुमेयत्वात् तोयत्वेन पिपासोपशमनसमर्थतावच्छेदकरूपपरत्वानुमानवत्।

अन्ये त्वनैकान्तिकबाधितविरुद्धेष्वव्याप्यत्वं व्याप्यत्वासिद्धेऽनैकान्तिकत्वं स्वरूपासिद्धसत्प्रतिपक्षासाधारणेषु दशाविशेषेऽनुमितिप्रतिबन्धकज्ञानविषयत्वमसाधकत्वम्। न चैवमनैकान्तिकोऽसाधक इति सहप्रयोगानुपपत्तिः, तत्राव्याप्यत्वस्यासाधकशब्दार्थत्वात्। असाधकताननुगमे हेत्वाभासत्वमनुगतमेव, यस्य ज्ञानमनुमितिप्रतिबन्धकं तस्य हेत्वाभासत्वादिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ हेत्वाभासानामसाधकतासाधकत्वप्रकरणं समाप्तम्

॥ ईश्वरवादः ॥

एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिः–क्षित्यादौ कार्यत्वेन घटवत् सकर्तृकत्वानुमानात्।

ननु क्षित्यादि प्रत्येकं न पक्षः, तस्य स्वशब्देनाभिधातुमशक्यत्वात्। नापि मिलितम्, एकरूपाभावात्। अत एव सकर्तृकत्वासकर्तृत्वविचारारम्भकसंशयविषयः तथाभूतविवादविषयो वा न पक्षः, एकरूपाभावेन तयोस्तावद्ग्रहीतुमशक्यत्वात्, वादिनोर्निश्चितत्वेन संशयाभावात्। न च वाद्यनुमानयोस्तुल्यबलत्वेन मध्यस्थस्य संशयः, अनुमानाभ्यां तस्य संशयो मध्यस्थप्रश्नानन्तरञ्चानुमानमिति परस्पराश्रयात् घटेऽपि कदाचित् तयोः सम्भवात्, प्रत्येकं संशये विवादास्पदत्वेनानुमानेऽर्थान्तरत्वापत्तेश्च। न च शरीरापेक्षेण कर्त्रा यन्न कृतं शरीराजन्यं जन्यं वा पक्षः, जन्यात्मविशेषगुणशब्दफूत्कारसर्गाद्यकालीनवेदघदादिलिप्यादिसम्प्रदायानामीश्वरमात्रकर्तृकाणामसङ्ग्रहात्, असिद्धेश्च अदृष्टद्वारा शरीरिणोऽपि क्षित्यादिकर्तृत्वात्। नापि जन्यकृत्यजन्यं जन्यम्, उभयसिद्धकृतिजन्यान्यजन्यं वा पक्षः, क्षित्यादीनामदृष्टद्वारा जन्यकृतिजन्यत्वात्। नाप्यदृष्टजनककृत्यजन्यं जन्यकृतिसाक्षादजन्यं वा पक्षः, ईश्वरकृतेरदृष्टजनकत्वेन क्षित्यादौ तदभावात्। घटादावप्येवं पक्षत्वेनांशतः सिद्धसाधनात्। न च क्षितिरेव पक्षः, अङ्कुरेण सन्दिग्धानैकान्तिकत्वात्। न च निश्चितविपक्षे हेतुसन्देहात् स इति वाच्यं, हेतौ साध्याभाववद्गामित्वसंशयस्य दूषकत्वात्। स च साध्याभाववति हेतुसन्देहात् हेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः। न चैवं पक्षेऽपि तत् स्यात्, अनुमानमात्रोच्छेदकत्वेन तदितरत्र तस्य दूषकत्वात्। अङ्कुरे हेतोरनिश्चयेन सन्दिग्धानैकान्तिकं, तन्निश्चये च साध्यसन्देहवति साध्यानुमितिरेव पक्षवत् सामग्रीसत्त्वात्। अत एवाङ्कुरः पक्षसम इति चेत्?न, तस्यापक्षत्वेन हेतोः पक्षधर्मताविरहेण स्थापनानुमानाविषयत्वात्। तदा तस्यापि पक्षत्वे प्रतिज्ञानुपपत्तिः। अनुमानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमितावितरेतराश्रयान्नैकमप्यनुमानं स्यात् तत्रापि क्षित्या सन्दिग्धानैकान्तात्, क्षितेर्विवादविषयत्वे अङ्कुरे प्रथमं साध्यमानेऽर्थान्तराच्च। किञ्चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः। नापि सर्गाद्यकालीनं द्व्यणुकं पक्षः, परं प्रति सर्गाद्यसिद्धेः।

किञ्च सकर्तृकत्वं? न तावत् कृतिमत्सहभावः कृतिमज्जन्यत्वं वा, अस्मदादिना सिद्धसाधनात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं

तदिति चेत्? न, उपादानगोचरत्वं यदि यत्किञ्चिदुपादानगोचरत्वं तदा अस्मदादिनाऽर्थान्तरत्वम्। ज्ञानादिजन्यत्वमपि विवक्षितम्। न च घटोपादानगोचरज्ञानादीनां क्षितिजनकत्वं सम्भवति, व्यभिचारादिति चेत्? न, क्षितिजनकादृष्टजनकज्ञानादीनामुपादानविषयनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात्। न च साक्षात्तज्जन्यत्वं विवक्षितं, तद्धि न कृतिजन्याजन्यत्वे सति कृतिजन्यत्वं, स्वजनककृत्यव्यवहितोत्तरक्षणवर्त्तित्वं वा, घटदृष्टान्तस्य साध्यविकलतापत्तेः, घटादौ कुलालादिकर्तृकत्वाभावप्रसङ्गाच्च। न च शरीरक्रिया दृष्टान्त इति वाच्यं, घटेनानैकान्तिकत्वात्, चेष्टात्वस्योपाधित्वाच्च। नापि क्षित्याद्युपादानगोचरत्वं विवक्षितम्, अप्रसिद्धेः। न चोपादानशब्दस्य सम्बन्धिशब्दत्वेन घटक्षित्यादिसमभिव्याहारे तत्तदुपादानगोचरत्वं चैत्रो मातृभक्तो मैत्रवदिति वाच्यं, शाब्दे हि बोधे तथा, न चात्र शब्दः प्रमाणं वादिनोऽनाप्तत्वात्। अनुमाने त्वनुगतेन व्यापकत्वग्रहे तेन रूपेण व्यापकसिद्धिः, तच्चोपादानत्वमेवेति कथं नार्थान्तरम्। किञ्चैवं घटादावपि तत्तदुपादानत्वेनैवोपस्थित्या सामान्येन रूपेण कुत्राप्यनुपस्थितेर्व्याप्तिरेव न गृह्येत। अपि च सामान्यलक्षणया ज्ञानलक्षणया योगजधर्मरूपया वा प्रत्यासत्त्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमताऽस्मदादिना सिद्धसाधनं, तेषां क्षित्यव्यवहितपूर्वसमयासत्त्वेऽपि तद्वतः सत्त्वाददृष्टद्वारा तेषामपि जनकत्वसम्भवात् ज्ञानादिसाक्षाज्जन्यत्वस्य च निरस्तत्वात्।

अथ योगजधर्माजन्यसविकल्पकाजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमदजन्यं जन्यं पक्षः, योगजधर्माजन्यसविकल्पकाजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम्। यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमदजन्यं जन्यम्, अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम्। ज्ञानाव्यवहितोत्तरसमयवर्तीच्छाऽव्यवहितोत्तरक्षणवर्त्तिकृतीनां जनकत्वं विवक्षितं न तु ज्ञानादीनां यौगपद्यं पौर्वापर्यं वाऽतो न साध्याप्रसिद्धिर्न वा क्षित्यादौ बाध इति।

मैवं, योगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्यप्रसिद्धत्वेन पक्षसाध्ययोर्विशेषणासिद्ध्या परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेश्च। तत्सिद्धौ वा

पक्षे तदजन्यत्वासिद्धेः क्षितिजनकादृष्टजनककृतिचिकीर्षासाक्षात्काराणां योगज-धर्माद्यजन्यानामदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात्। न च तादृशसाक्षाज्जन्यत्वं विवक्षितं, घटादिदृष्टान्ते तदसम्भवात्, दृष्टान्ते घटादौ जनकेष्टसाधनताज्ञान-स्यानुमितित्वेन जन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन साध्याप्रसिद्धेश्च।

ननु व्याप्तिबलेन साध्यं सिध्यति। व्याप्तिश्च यत्र यत्र कार्यत्वं तत्र तत्र तदुपादानाभिज्ञकर्तृजन्यत्वमितिरूपा। न तु यद्यत् कार्यं तत्तत् किञ्चिदुपादाना-भिज्ञजन्यमिति। एवञ्च यत्र यत्र कार्यत्वं तत्र तत्र तदुपादानाभिज्ञजन्यत्वमिति विशिष्य व्याप्त्या क्षित्यादौ कार्यत्वं क्षित्याद्युपादानाभिज्ञजन्यत्वमेव साधयत्यतो न सिद्धसाधनमिति चेत्? न, घटे पटे च कार्यत्वस्य व्याप्तिग्रहः किं प्रत्येकं घटोपादानाद्यभिज्ञजन्यत्वेन, तत्तदुपादानाभिज्ञजन्यत्वेन, उपादानाभिज्ञजन्यत्वेन वा? आद्ये घटोपादानाभिज्ञजन्यत्वादौ कार्यत्वस्य व्यभिचार एव। द्वितीये त्वननुगततत्तच्छब्दाभिधेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्यापकताग्रहः? तत्तच्छब्दस्य स्वभावात् समभिव्याहृतपरतया नायं दोष इति चेत्? न, अनुमाने शब्दस्वभावोपन्यासस्याप्रयोजकत्वात्। अत एवेदानीं देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात्, विद्यमानत्वे सति यो यदा यत्र नास्ति स तदा तदतिरिक्तदेशेऽस्ति, यथाऽहमेव बहिरसन् गृहे प्रतिष्ठामीत्यत्र पक्षदृष्टान्त-साधारणयत्त्वतत्त्वयोरनुगतयोरभावान्नान्वयि किन्तु व्यतिरेकीत्युक्तम्। तृतीये सिद्धसाधनमेव।

अथ सर्गाद्यकालीनं द्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसामग्रीजन्यं कार्यत्वात् घटवत्। अदृष्टसामग्रीजन्यत्वेऽदृष्टत्वापत्तिरिति चेत्? न, परं प्रति सर्गाद्यसिद्धेः। ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वाद् उदासीनसिद्धावप्रयोजकत्वाच्च। एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमकालीनकृतिजन्यमिति निरस्तम्। द्व्यणुकासमवायिकारणसमानकालीनकृतित्वेन गौरवाप्रयोजकाभ्यामजनकत्वात्।

किञ्च कार्यत्वं न तावद् योगोपस्थितकृत्यर्हत्वम्, असिद्धेः। नापि पूर्व-कालासत्त्वे सत्युत्तरकालसम्बन्धित्वं, तत्तत्पूर्वकालस्याननुगतत्वात् सकलपूर्व-कालस्याप्रसिद्धेः। नापि कादाचित्कत्वं, प्रागभावेनानैकान्तिकत्वात्। नापि प्रागभावप्रतियोगित्वं, ध्वंसेनानैकान्तिकत्वात्। नापि सत्त्वे सति तत्त्वं, सत्ताजातेः परं प्रत्यसिद्धेः, स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात्।

यत्तु अयं घटः एतद्घटजनकानित्यज्ञानचिकीर्षाकृत्यतिरिक्तज्ञानादिजन्यः कार्यत्वात् पटवदित्यादि, तन्न, विपक्षे बाधकाभावेनाप्रयोजकत्वात्, अन्यथाऽयं घटः एतद्घटजनकानित्यादृष्टातिरिक्तादृष्टजन्यः कार्यत्वात् अपरघटवत्। एतत्सुखदुःखसाक्षात्कारौ एतज्जनकानित्यसुखदुःखातिरिक्तसुखदुःखसाध्यौ सुखदुःखसाक्षात्कारत्वादित्यादिना नित्यधर्माधर्मसुखदुःखाश्रयस्यापि सिद्धिप्रसङ्गात्। अयं घटः स्वजनकानित्यज्ञानाद्यतिरिक्तज्ञानाद्यजन्यः घटत्वाद् अपरघटवदित्यादिना सत्प्रतिपक्षाच्च।

केचित्तु–दृश्यते तावदभिमतविषयग्राहिणीन्द्रिये मनो निवेशयतः पुंसो मनःक्रियानुकूलो यत्नः। तथा च सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसानाधारकालाधारज्ञानजनकात्ममनःसंयोगजनिका मनःक्रिया तन्मनोगोचरप्रयत्नानाधारतन्मनोगोचरप्रयत्नतद्व्याप्येतरसकलकारणाधारकालानन्तरकालानाधाराद्यसत्ताका तन्मनःक्रियात्वात् सम्मततन्मनःक्रियावत्, अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रिया सिध्यतीत्याहुः। तन्न, सर्गाद्यकाले ज्ञानजनकमनःसंयोगजनकक्रियायां मानाभावः, पूर्वक्रिययैव संयोगसम्भवात्। ईश्वरवादिनां तन्मनोगोचरप्रयत्नानाधारः कालोऽप्रसिद्ध एव। क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वञ्च। किञ्चैवं प्रयत्नानाधारकालानन्तरकालाधारत्वम्, अर्थात् तत्सिद्धौ मानान्तरादीश्वरासिद्धावर्थान्तरत्वमिति।

अत्रोच्यते- अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यानि समवेतानि जन्यानि अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा, अपरोक्ष-

ईश्वरवादे **अदृष्टाद्वारकेति।** अत्रोपादानपदं स्वोपादानपरम्। तेन संयोगाद्युपादानभूतमृदङ्गादिगोचरादृष्टाद्वारकजन्यकृतिजन्यानां शब्दफूत्कारादीनामपि पक्षतैवेत्यनेनैवाग्रिमग्रन्थेन विरोधः। न च तथा सति क्षित्यादावदृष्टाद्वारकस्वोपादानगोचरजन्यकृत्यप्रसिद्ध्या तथाभूतकृत्यजन्यत्वनिरूपणमशक्यमिति वाच्यं, न हि तथाभूतकृतिजन्यत्वात्यन्ताभाववत्त्वं तदिह विवक्षितम्। किन्तु तथाभूतकृतिजन्यान्यत्वम्। तथाभूतकृतिजन्यास्तु घटादय एव प्रसिद्धाः। अतो न क्षित्यादौ तत्प्रतियोगिकान्यत्वनिरूपणे काचिदनुपपत्तिः। अदृष्टद्वारा सामान्यलक्षणाप्रत्यासत्तिजन्यस्वोपादानगोचरजन्यकृतेर्जन्यत्वं क्षित्यादावपि सम्भावितम्। अत एव पूर्वं तादृशज्ञानतज्जन्यचिकीर्षाकृतिमतास्मदादिना सिद्धसाधनमुक्तम्।

ज्ञानचिकीर्षाप्रयत्नविषयीभूतोपादानानि वा, समवेतत्वे सति प्रागभावप्रतियोगित्वात्, यदेवं तदेवं यथा घटः, तथा चैतानि तस्मात्तथा। उक्तपक्षे कस्यचिदनन्तर्भावेऽपि तदादाय तथैव निरुक्तस्य पक्षत्वनिर्देशे समूहालम्बनरूपैवानुमितिरुत्पद्यते। न च जन्यकृत्यजन्यत्वं तावत् अननुगतेष्वेकरूपाभावेन ग्रहीतुमशक्यमिति वाच्यं, जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्यलक्षणया तावतामुपस्थितेः। न च जन्यत्वविशेषणव्यावर्त्याप्रसिद्धिः, प्रमेयो घट इतिवदव्यावर्तकत्वेऽपि तदुपरक्तबुद्धेरुद्देश्यत्वेन तस्योपरञ्जकत्वात्। उक्तान्यतमत्वमेव सकर्तृकत्वम्। अत एव घटभोक्ता न घटकर्ता इति व्यवह्रियते। एवञ्च शब्दफूत्कारादीनां पक्षतैव। ज्ञानेच्छादीनामपि पक्षत्वान्न सन्दिग्धानैकान्तिकता। उपादानस्य सिद्धत्वेऽप्युपादेयस्यासिद्धत्वात्तद्वत्त्वेन तत्रापि चिकीर्षा। यद्वा पक्षे हेतौ च समवेतत्वं न विशेषणं, तेन ध्वंसोऽपि पक्षः। साध्ये चोपादानपदं कारणमात्रपरमुपादेयमेव। जन्येच्छाकृत्यजन्यत्वञ्च पक्षे विवक्षितं, तेन कृतिध्वंसस्य कृतिजन्यत्वेऽपीच्छाजन्यत्वाभावात् पक्षत्वम्। क्षितिरेव वा पक्षः। न चाङ्कुरे सन्दिग्धानैकान्तिकत्वं, पक्षपक्षसमनैरपेक्ष्येण घटादौ निश्चितव्याप्तेर्लिङ्गस्य तयोर्दर्शनेनोभयत्रानुमित्यविरोधात्।

न त्वनुमित्योरन्योन्यापेक्षत्वं, येनान्योन्याश्रयः स्यात्, प्रतिज्ञाया अविषयत्वात्तत्र पक्षसमव्यपदेशः। न चाङ्कुरस्य पक्षत्वेनानिर्देशात्तत्र न पक्षधर्मताज्ञानमिति वाच्यं, सिषाधयिषाविरहसहकृतसाधकप्रमाणविरहवति लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात्। तच्च क्षितौ पञ्चावयवेनाङ्कुरे स्वत एवेति न कश्चिद्विशेषः। यदि च क्षितौ हेतुनिश्चयदशायां हेतुमत्तयाऽङ्कुरस्य न निश्चयस्तदा क्व सन्दिग्धानैकान्तिकम्?।

अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयाद्धेतौ व्याप्तिग्रह एव नोत्पद्यते, उत्पन्नोऽपि वा बाध्येत इति चेत्? तर्हि महानसेऽपि धूमव्याप्तिग्रहो

एवञ्च कांस्यादावौषधलेपजनितयावद्गोचरास्मदादिकृत्याऽदृष्टद्वारा यच्चलनं जन्यते तत्र तन्निश्चितमेव। तथा च क्षित्यादौ सन्दिग्धविशेषणासिद्धिवारणार्थं कांस्यचलनादौ निश्चिततद्वारणार्थमदृष्टाद्वारकेति कृतिविशेषणमुक्तम्। समवेतानीति ध्वंसवारणाय, जन्यानीति गगनादिवारणाय। **अदृष्टप्रागभावेति।** अत्रोपादानपदमुपादानसामान्यपरमेव। न तु स्वोपादानपरम्। अन्यथा पक्षे घटाद्युपादानगोचरापरोक्षज्ञानादिमज्जन्यत्वसिद्धिप्रसङ्गाभावेनाग्रेतनस्य साध्ये च ज्ञानेच्छाप्रयत्नेत्यादिग्रन्थस्य चानुत्थानात्। न च तथा सति पक्षान्तर्गते शब्दादौ गुणाद्युपादानभूतमृदङ्गादिगोचरास्मदादिप्रत्यक्ष-

न स्यात्, भूतोऽपि वा बाध्येत सन्दिग्धवह्निकपर्वतापर्वतधूमवतामेकधर्माभावेनायोग्यत्वात्। तस्मात्साध्यसन्देहवति हेतुनिश्चयो न दोषः किन्तु गुण एव, अन्यथाऽनुमानमात्रमुच्छिद्येत। पक्षादन्यत्र दूषणमिति यदुक्तं तत्र पक्षान्यत्वं सिषाधयिषितसाध्यान्यत्वं यदि, तदाऽनपेक्षितानुमितिर्न स्यात्। अथ सन्दिग्धसाध्यान्यत्वं साधकबाधकप्रमाणाभावविषयान्यत्वं वा विवक्षितं, तदाङ्कुरेऽपि तन्नास्ति। अथ प्रतिज्ञाविषयान्यत्वं, तदा स्वार्थानुमित्युच्छेदः। नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात् सर्वविषयज्ञानसिद्धिः। साध्ये च ज्ञानेच्छाप्रयत्नानां विशेषणत्वेन विशिष्टस्य साधनत्वं विवक्षितम्। तेन न तदुपलक्षितक्षेत्रज्ञेनाऽर्थान्तरं, सामान्यतोऽपि साध्यनिर्देशे पक्षधर्मताबलेनाभिमतविशेषसिद्धेः।

नन्वाद्यसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामेव जनकत्वमायात्वित्यर्थान्तरम्। न च तेषां व्यभिचारात् क्षित्यादावकारणत्वमिति वाच्यम्, अनादौ प्रवाहे कस्यचित् कदाचित् क्षितिद्व्यणुकादिपूर्वं घटाद्युपादानगोचरज्ञानादिसत्त्वात्। न च सर्गाद्यकालीनस्यापि पक्षत्वात्तत्रेश्वरसिद्धिः, परं प्रति तदसिद्धेरिति चेत्? न, ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तदविषयत्वात्। अत एवान्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम्। तृतीयसाध्ये तु नार्थान्तरं, क्षित्यादेर्घटाद्युपादानासमवेतत्वात्।

ननु सामान्यलक्षणादिप्रत्यासत्त्या क्षित्याद्युपादानगोचरं यत् प्रत्यक्षं तज्जन्यत्वमेवास्तु, तथा चेश्वरे न प्रत्यक्षं न वेच्छाप्रयत्नौ, तयोः समानाधिकरणज्ञानाविषयेऽसत्त्वात्। न च तादृशप्रत्यासत्त्यजन्यत्वं प्रत्यक्षे विशेषणं, परं प्रत्यसिद्धेरिति चेत्?, न, द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपि

ज्ञानादिजन्यत्वेनास्मदादिनैवांशतः सिद्धसाधनं स्यादिति वाच्यम्, उद्देश्यप्रतीतेरसिद्धत्वात्। मृदङ्गादिगोचरास्मदादिज्ञानेच्छयोः शब्दादिकं प्रत्यजनकत्वाच्च, तद्गोचरास्मदादिकृतिमात्रस्यैव तज्जनकत्वात्। अदृष्टाद्वारकानां मिलितानां ज्ञानादि(दीनां)त्रयाणां स्वस्वविषयसमवेतकार्यं प्रत्येव जनकत्वात्, ज्ञानादीनां त्रयाणामित्यग्रिमग्रन्थेन ग्रन्थकृतैव तथा वक्ष्यमाणत्वात्। एवञ्च सति क्षित्यादिजनकादृष्टजनककिञ्चदुपादानगोचरापरोक्षज्ञानादिमतास्मदादिना सिद्धसाधनं माभूदत उक्तम्-**अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोगीति**। अत्र च स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोग्यन्यत्वं

घटादावकर्तृत्वात् क्षित्यादौ सकर्तृत्वनिर्वाहकं ज्ञानं सिध्यत्तद्विलक्षणमेव सिध्यति। न चावयवविभागद्वारा क्षित्यादिषु जलक्षेपात् समुद्रादिषु हस्तक्षेपात् परमाणुद्वयसंयोगे च द्व्यणुकेष्वस्मदादिकर्तृकत्वादंशतः सिद्धसाधनमिति वाच्यं, तत्र हि क्षितिनाशेऽस्मदादीनां कर्तृत्वं न खण्डक्षितौ, अवस्थितसंयोगेभ्य एव तदुपपत्तेः सकलतदुपादानगोचरज्ञानेच्छाकृतीनामभावाच्च। अत एव द्व्यणुकेऽपि न कर्तृत्वं, जलक्षेपादधिकपरिमाणसमुद्रादेः सपक्षत्वमेव घटस्येव।

ननु घटे साध्यविकलत्वम्, अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात् न तु तदाश्रयस्य धर्मिग्राहकस्यान्वयव्यतिरेकस्य वा ग्राहकस्याभावात्। न च घट आत्मजन्य उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम्, आत्मसवेतत्वस्योपाधित्वात्, घट आकाशजन्य उत्पत्तिमत्त्वात् शब्दवदितिवद् अप्रयोजकत्वाच्चेति चेत्?

मैवं, प्रयत्नवदात्मसंयोगश्चेष्टाद्वारा घटहेतुरतः प्रयत्नवदात्मापि हेतुः। न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम्, असमवायिकारणं विना कार्यानुत्पत्तेः। न चात्मसंयोगस्य कारणत्वेऽपि संयोगपरिचायकमात्रमात्मेति वाच्यं, संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य हेतुत्वात्। आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकस्यासिद्धेर्नात्मसंयोगः कारणमिति चेत्?न, या क्रिया व्यधिकरणयदीयगुणजन्या सा तत्संयोगासमवायिकारणिका, यथा स्पर्शवद्द्रव्यसंयोगजक्रियेति तत्सिद्धेः। न च क्रियाया मूर्तमात्रसमवेतासमवायिकारणत्वनियम इति वाच्यं, कार्यमात्राभिप्रायेण ज्ञानादौ व्यभिचाराद विशिष्याऽप्रयोजकत्वाद् असमवायिकारणसंयोगाश्रयस्य तत्कार्यजनकत्वनियमाच्च।

ज्ञानादिविशेषणं विवक्षितम्। न तु यथाश्रुतमेव। अन्यथा घटोपादानगोचरकुलालादिज्ञानादेः किञ्चिददृष्टप्रागभावप्रतियोगित्वादीश्वरसिद्धिपूर्वं घटे साध्यानिश्चयेन दृष्टान्तस्यासम्भवात्। नन्वेवं पक्षानन्तर्भूतेऽस्मदादिकर्तृके गङ्गास्पर्शादावेव व्यभिचारः, तदुपादानगोचरास्मदादिज्ञानादेः स्वर्गजनकादृष्टजनकत्वेनास्मदादिकर्तारमादाय तत्रोक्तसाध्यासत्त्वादिति चेत्? न, ईश्वरस्यापि तत्र कर्तृत्वेन पक्षसमत्वात्, तमादायैवाभिमतानुमितेरुत्पादात्। तमेव निश्चितोक्तसाध्यकं पक्षानन्तर्भूतं चाभिसन्धाय वक्ष्यति-उक्तपक्षे कस्यचिदनन्तर्भावे इत्यादि। अस्मदाद्यकर्तृकस्यैवेश्वरकर्तृकस्य तत्राभिसंहितत्वे तद्ग्रन्थस्यासङ्गतत्वापातात्, तथाभूतस्य सर्वस्यैवोक्तपक्षान्तर्भूतत्वात्।

अन्ये तु अनुकूलकृतिसमवायितवं कर्तृत्वं न तु जनकत्वे सति, गौरवात्। कर्तरि कारकव्यवहारश्चाभियुक्तानां ''सविशेषण'' इति न्यायेन कृतिपर्यवसन्न एव। एवं ज्ञानेच्छाकृतिजन्यत्वमेव साध्यं, तदाश्रयत्वमेवेश्वरस्य कर्तृत्वम्।

अथ घटे कृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः, तच्च न प्रत्यक्षं चिकीर्षाविषयेऽनागते इन्द्रियासामर्थ्यात्, किन्तु अनुमितिरूपम्, तथा च साध्यविकलो दृष्टान्तः साध्याप्रसिद्धिर्वेति चेत्? न, सिद्धवृत्त्यसिद्धविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति सम्भवति। न हि मृदवयवानां संस्थानविशेषे कृतिसाध्येष्टसाधनतानुमितावप्यवयवस्य प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः। अत एव यागे शब्दात्तदुपजीविलिङ्गाद्वा कृतिसाध्येष्टसाधनत्वेऽवगतेऽपि हविरादीनां प्रत्यक्षेणानुपस्थितौ न प्रवृत्तिः। न चोपादानप्रत्यक्षं प्रवर्तकज्ञानोपक्षीणम्, अप्रत्यक्षपरमाणौ तत् क्रियायामिष्टसाधनताज्ञानेऽप्यप्रवृत्तेः। प्रवृत्तिविषयस्य मृदङ्गादेः प्रत्यक्षत्वान्न शब्दफूत्कारादिना व्यभिचारः। न चाभिमतग्राहकेन्द्रिय-संयोगान्मनसि प्रयत्नजन्यक्रियाप्रदर्शनाच्च व्यभिचारः, अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाडीनामुपलम्भेन तद्गोचरप्रयत्नान्नाडीक्रिया, ततः स्पर्शवद्वेगवन्नाड्या नोदनान्मनसि क्रिया न तु प्रयत्नात्। अत एव जलाद्यभ्यवहारमलोत्सर्ग-हेतुनाडीनामनाद्यभ्यासवासनावशाददृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरः प्रयत्नः।

नन्वेवं घटादावनुमितेर्जन्यत्वदर्शनादीश्वरेऽनुमितिरपि सिद्ध्येत्, यथा च प्रत्यक्षस्येन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे, तथानुमितेर्नित्यं जन्यत्वेऽपि सा तत्र नित्यैव, अनित्येनानादिद्व्यणुकाद्यजननादिति चेत्? न, सुखदुःखाभावादिसाधनानुमिते

अन्ये तु अदृष्टपदमत्र स्वजनकादृष्टपरम्। न चैवं क्वचित्पक्षः क्वचिद्दृष्टान्तः स्वपदार्थो वाच्यः। तथा च व्याप्तिग्रहे पूर्वोक्तस्वपदार्थाननुगमो दोषस्तदवस्थ एवेति वाच्यं, सामान्यव्याप्तेर्ग्रहे तस्यादोषत्वात्। तस्या एव च प्रकृतानुमानाङ्गत्वेनाभिमतत्वात्। द्वितीयसाध्ये स्वजनकादृष्टप्रागभावव्याप्यत्वं चात्र यदा व्याप्यत्वाभिमतः प्रागभावस्त-दावश्यं सः, इति कालिकमेव विवक्षितम्। न तु यत्रात्मनि स तत्रावश्यं स इति दैशिकमेव, तस्य घटोपादानगोचरकुलालज्ञानादिप्रागभावे सन्दिग्धत्वात्, कुलालादृष्टेनापि घटसम्भवेन तदात्मन्यपि पूर्वं तज्जनकादृष्टप्रागभावसम्भवात्। ततश्च घटे साध्यसन्देहापत्त्या दृष्टान्तत्वानुपत्तेरित्याहुः।

तर्हि घटादौ हेतुत्वं गृहीतं, न च तावता शरीरादृष्टाभावेन सुखमस्त्यतो न क्षित्यादौ तस्यानुमितिर्यथार्था सम्भवति। न च तादृशानुमितेरनुमित्यन्तरस्य वाऽनुमितित्वेन घटादौ प्रवृत्तिविषयप्रत्यक्षवद्धेतुत्वं गृहीतमतो नेश्वरेऽनुमितिः।

ननु द्वेषजन्यकृतिसाध्ये चिकीर्षाविरहाद्व्यभिचारः तद्दृष्टान्तेन क्षित्यादौ द्वेषसाध्यत्वादीश्वरे द्वेषोऽपि स्यात् द्वेषवतः संसारित्वेन भगवतोऽपि तथात्वापत्तिरिति चेत्? न, न हि सर्पादिद्वेषादेव तन्नाशानुकूलव्यापारे कृतिरुत्पत्तुमर्हति, प्रयोजनं विना दुःखैकफले प्रेक्षावतां कृतेरनुपपत्तेः, किन्तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं वा फलमुद्दिश्य तत्साधनताज्ञानात्। तथा चेष्टसाधनताज्ञानात्तत्रेच्छाऽस्त्येवेति सैव कृतिकारणं क्लृप्तत्वात्। द्वेषस्तु परम्परया तदुपक्षीणः। कुतस्तर्हि द्वेषसिद्धिः? शत्रुं द्वेष्मीत्यबाधितप्रत्ययात्। न चादृश्यस्य कर्तुरनुपलब्धिबाधः, अनुपलब्धिमात्रस्य बाधकत्वेऽतीन्द्रियोच्छेदात्। योग्यानुपलब्धेश्चासिद्धेः परात्मनोऽयोग्यत्वनियमात्, शशशृङ्गप्रतिबन्द्या च नादृश्यमात्रनिरासः, परमाण्वादिस्वीकारात्। नाप्ययोग्यकर्तृकनिरासः, चेष्टया ज्ञानादिमतः परात्मनोऽनुमानात् परं प्रति तस्यायोग्यत्वात्। नापि शृङ्गे पशुत्ववदप्रयोजकं, कर्तुः कार्यमात्रे कारणत्वावधारणात् प्रतिबन्दिमात्रस्यादूषणत्वात्। शशे पशुत्वेनायोग्यशृङ्गासिद्धिः कुतो नेति चेत्, न, अर्थान्तरत्वात्, विपक्षे बाधकाभावाद् व्याप्त्यसिद्धेः शृङ्गत्वस्य योग्यसंस्थानविशेषव्यङ्ग्यत्वेनायोग्यस्य विरोधेन शङ्कितुमशक्यत्वात्, शशे शृङ्गस्यात्यन्ताभाव इति सर्वेषामबाधितप्रत्यक्षबाधितत्वाच्च। अथ कृतिकार्यत्वयोर्नान्वयव्यतिरेकाभ्यां

उपादानगोचरत्वं ज्ञानादिविशेषणं चात्र तत्प्रकारकज्ञानाद्यनुमितिमात्रार्थमुपात्तं न तु प्रयोजनान्तरार्थम्। अत एव वक्ष्यति-उपादानपदमनुपादेयमेवेति। समवायिमात्रस्य व्यतिरेकानिरूपणेनेति। आकाशात्मादेरपि व्यापकस्य समवायित्वाभ्युपगमादिति भावः। ननु द्वेषयोनियत्नसाध्येन व्यभिचारः, तत्रापीश्वरचिकीर्षादिकमादाय सिद्धिसाधनसत्त्वादित्यपरितोषादाह **तद्दृष्टान्तेति**। द्वेषयोनियत्नदृष्टान्तेनेत्यर्थः। ननु द्वेषस्य कार्यं यत्नः। तथा च तल्लिङ्गतया तदेव तत्र मानम्। स चेन्न तत्कार्यं कुतः प्रमाणात्तत्सिद्धिरित्याहुः। कुत इति शत्रुमिति। शत्रुं द्वेष्मीत्यबाधितप्रत्यक्षानुभवबलादेव तत्सिद्धिरित्यत आह **शत्रुमिति।** यद्यपि द्वेष्यनाशसाधनगोचरो यत्नः परम्परयापि द्वेषजन्यो भवतीति तत्सिद्धौ तस्य तल्लिङ्गत्वमविरुद्धमेव, तथापि प्रत्यक्षमेव तत्र स्फुटप्रमाणमिति तदेव दर्शितम्।

व्याप्तिग्रहः, त्वन्मते व्यापककृतेः सत्त्वे तद्देशे समये वा कृतिमात्र-व्यतिरेकानिरूपणात्। नित्यकृतेरन्वयोऽपि न गृहीतो वह्निमात्रव्यतिरेकोऽसति गृह्यते च। न चैवमाकाशात्मनोरप्यसिद्धिः, समवायिमात्रस्य व्यतिरेकानिरूपणेन कार्यं समवायिकारणजन्यमिति व्याप्तेरसिद्धेरिति वाच्यं, समवायिकारणत्वग्रहे हि तत्संसर्गाभावोऽप्रयोजको निमित्तमात्रसाधारणत्वात्। किन्तु यत्समवायि तत्र कार्यं, यन्न समवायि तत्र नेत्यन्योन्याभावमादाय कार्यं समवायिजन्यमिति व्याप्तिग्रहसम्भवात्। समवायित्वेन तयोरन्योन्याभावोऽस्ति गृह्यते च।

यद्वा भावकार्यं समवेतमिति व्याप्त्या तयोः सिद्धिरिति, यथा हि यद्यद्व-ह्नेरन्वयो धूमे गृहीतस्तत्तद्व्यतिरेके धूममात्रव्यतिरेकग्रहाद् वह्निधूममात्रयोर्व्याप्तेर्ग्रहः, न तु पर्वतीयवह्नेरन्वयव्यतिरेकग्रहात्। न चान्यान्वयव्यतिरेकाभ्यामन्यव्याप्ति-ग्रहेऽतिप्रसङ्ग इति वाच्यं, यद्विशेषयोरन्वयव्यतिरेकग्रहस्तत्सामान्ययोर्बाधकं विना व्याप्तिग्रहात्। स च वह्निधूमव्याप्तिग्रहे उत्पद्यमानः सकलधूमगोचरो धूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव भवति, तथेहापि कृतिविशेषकार्य-विशेषयोरन्वयव्यतिरेकग्रहो बाधकं विना कृतिकार्यत्वमात्रयोर्व्याप्तिग्रहे उपायः, न तु पक्षधर्मताबललभ्यविशेषान्वयव्यतिरेकग्रहः, अनुमानमात्रोच्छेदप्रसङ्गात्। एतेन-

कार्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः
कर्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति।

दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्ता समाश्रीयते
तत्त्यागोपि तदा तृणादिकमिति व्यक्तं विपक्षेक्षणम्।।

इति निरस्तम्। ननु यदि कर्तृमात्रव्यतिरेकग्रहाददृश्यकर्तृसिद्धिस्तदा वह्निमात्रव्याप्तधूमाददृश्यजाठरीयवह्निसिद्धिरपि स्यात्। न स्यात्, अदृश्यवह्ने-र्धूमानुत्पत्तेः, दृश्यस्यैव तत्र हेतुत्वात्।

ननु ज्ञानेच्छाप्रयत्नत्रयव्यतिरेकान्न कार्यव्यतिरेकः। किन्तु एकैकव्यतिरेकात्, तथा च व्यर्थविशेषणत्वेन विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धिः। साध्याभावव्यापकाभावप्रतियोगिन एव साध्यगमकत्वादिति चेत्? न, यत एकैकव्यतिरेकात् कार्यव्यतिरेकोऽत एव कार्यत्वादेरेकैकं सिध्यत्त्रयमपि सिध्यति, आर्थस्तु समाजः।

यथाहि यद्यद्वह्नेरन्वयो गृहीतः इत्यादि।

अत्र **यज्ञपत्युपाध्यायाः** — पक्षधर्मताबललभ्यक्षितिजनककृतिव्यतिरेकग्रहाभावात् कृतिसामान्यकार्यसामान्ययोः व्याप्तिग्रहो न भवतीति न परस्याभिमतम्। किन्तु

स्यादेतत्, अशरीरसर्वज्ञनित्यज्ञानादिमान् कर्ता पक्षे विवक्षितः, घटादौ च कार्यत्वस्य तद्विपरीतकर्तृसहचारादिदर्शनाद्विशेषविरुद्धत्वमिति चेत्? न, हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रस्यादूषकत्वात्, अन्यथानुमानमात्रोच्छेद-प्रसङ्गात्। न चानित्यज्ञानासर्वज्ञशरीरिकर्तृत्वेन समं कार्यत्वस्य व्याप्तिरस्ति येन तद्विपरीतसाधने विरुद्धत्वं स्यात्। तादृशव्याप्तिश्च त्वया मया वा नाङ्गीक्रियते, अङ्कुरादौ योग्यानुपलम्भेन शरीरिकर्तृत्वाभावात्। अथ यथादर्शनबलप्रवृत्त-व्याप्त्याऽनित्यज्ञानादिमान् कर्तोपनेयः पक्षधर्मतया च नित्यज्ञानादिमान्, तथा चोपनेयविशेषयोर्विरोधेन व्याप्तिपक्षधर्मतयोर्विरोधात् परस्परसहकारिताविरहान्नानु-मानं विशेषविरोधादिति चेत्? न, अनित्यज्ञानादिकर्तृजन्यत्वेन व्याप्त्यभावाद् ज्ञानादिमत्कर्तृजन्यत्वव्याप्तेः पक्षधर्मताबलेभ्यः विशेषाविरोधात् केवलाया व्याप्तेश्च पक्षधर्मतायाश्च पृथगुपनायकत्वाभावाच्च, एकवैयर्थ्यप्रसङ्गाच्च। तथा च निरपेक्षतादशायां विशेषानुपस्थापनादेव न विरोधज्ञानं सापेक्षतादशायाञ्च सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्ध्यसिद्धिभ्यां विरोधभावज्ञानाभावाच्च। लिङ्गविशेषेण साध्यविशेषेण च विरोधे च विशेषविरोधः, यथा चन्दन-प्रभववह्निमानयं सुरभिधूमवत्त्वादिति। ननु ज्ञानत्वनित्यत्वयोः कर्तृत्वाशरीरित्वयोश्च परस्परविरुद्धत्वेनैकधर्मसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिरिति चेत्? न, उपसंहारस्थानस्याभावात्। तथाहीश्वरे तद्बुद्धौ च शरीरित्वकर्तृत्वे बुद्धित्वनित्यत्वे चोपसंह्रियमाणे विरुद्धे न तु स्वाश्रयस्थिते, उभयोच्छेदप्रसङ्गात्। न चेश्वरस्तद्बुद्धिर्वोपस्थिता, उपस्थितौ वा धर्मिग्राहकमानेन तयोर्विरोधापहारात्, अनुपस्थिते च तद्द्वये विरोधज्ञानमकिञ्चित्करमेव, अस्मदादिबुद्धौ व्योमादौ कुविन्दे मुक्तात्मनि च उपस्थिते विरोधोपसंहारात्। बुद्धित्वनित्यत्वयोः कर्तृत्वाशरीरित्वयोरनधिगमेऽपि ईश्वरेऽशरीरिकर्तृत्वनित्यज्ञानादिसिद्धिरप्रत्यूहैव। अत एव नित्यत्वावयवत्वयोर्विरोधज्ञानमकिञ्चित्करमेवेति परमाणुसिद्धिः। ईश्वरतद्बुद्ध्यादिकं तर्कितमिति चेत्? न, तर्कस्य प्रसञ्जनस्य संशयस्य चाऽज्ञातेऽसम्भवात्।

मदभिमतव्यापककृतेः सदातनत्वेन कृतित्वेन सामान्येन रूपेण प्रसिद्धकृतेरेव व्यतिरेकग्रहाभावान्न तयोस्तद्ग्रहो भवतीति तस्याभिमतम्। यथा च न तु पर्वतीयवह्नेरित्यादिग्रन्थो न तु पक्षधर्मताबलेत्यादिग्रन्थश्च तं प्रत्यनुपयुक्तोपालम्भः। न च व्यतिरेकग्रहस्य व्याप्तिग्रहहेतुत्वाङ्गीकारे तन्मतं निराकर्तुं शक्यम्।

स्यादेतत्, घटादौ कृतिसाध्यता हस्तादिव्यापारादिद्वारैव न तु साक्षात्। न च पितापुत्रयोरेकघटसाधनत्वमिव प्रयत्नहस्तादिव्यापारयोः साक्षात् साधकत्वं वाच्यमिति वाच्यं, घटादेर्हस्तव्यापारादिना व्याप्रियमाणकुलालसमीपदेशस्थस्य हस्तादिव्यापारशून्यस्य तद्घटकर्तृत्वापत्तेः। न च हस्तादिव्यापारवत्ताऽशरीरस्य सम्भवति। अन्यादृशी च कृतिसाध्यता न दृष्टा, शरीरतद्व्यापारौ चाङ्कुरे बाधिताविति कर्तुरपि बाध एव, अन्यथा तदनुमानात् क्षेत्रज्ञ एव कर्ताऽनुमीयेत बुद्ध्यादिमत्परात्मनो योग्यानुपलब्धिबाधाभावात्। शरीरव्यापारद्वारैव क्षेत्रज्ञस्य हेतुत्वात् शरीरव्यापारस्य चाङ्कुरे बाधाद् बाधित इति चेत्? तर्हि कर्तृमात्रस्यापि तद्द्वारैव चेष्टेतरकार्ये कर्तृत्वदर्शनात् तदबाधे कर्तृमात्रबाधोऽपि। एवञ्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकमिति स एवोपाधिः। एवं ज्ञानेच्छयोरपीच्छाकृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ जनकत्वमिति।

उच्यते–जन्यमात्रे हस्तादिव्यापारजनककृतित्वेन न जनकत्वं चेष्टायां क्षित्यादौ च व्यभिचारात्। किन्तु घटादौ तथा जनकत्वमिति जन्यमात्रे कृतिमात्रस्य जनकत्वविरोधिविशेषयोर्जन्यजनकभावे बाधकं विना सामान्ययोरपि तथाभावनियमात्। न हि विशेषे विशेषप्रयोजकत्वेन सामान्ये सामान्य-प्रयोजकत्वविरोधः। चेष्टेतरकार्ये शरीरव्यापारद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यत्वमिति चेत्? न, चेष्टेतरकार्यमात्रे शरीरव्यापारजनककृतित्वेन न जनकत्वं, क्षित्यादौ व्यभिचारात्। किन्तु तद्विशेषघटादावित्युक्तत्वात्। न चैवमामवातजडीकृतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात्, हस्तादिव्यापारं विनैव कृतेर्हेतुत्वादिति वाच्यं, घटे कृतिवत् हस्तादिव्यापारस्यापि हेतुत्वात्। यदुक्तं–'क्षेत्रज्ञ एव कुतो नानुमीयत' इति। तत्र हस्तादिव्यापारककृतिमान् यदि क्षेत्रज्ञोऽभिमतस्तदा हस्तादिव्यापारस्याङ्कुरे योग्यानुपलब्धिबाधात्। अथ हस्तादिव्यापाररहितकृतिमानभिमतस्तदोमित्युच्यते, स एव भगवानीश्वरः। अत एव 'सहभावनिरूपकत्वे नियतपूर्ववर्तित्वं कारणत्वं समवाय्यसमवायिनोस्तथात्वेन निमित्तेऽपि तथाभावात्। अन्यथा प्रतिबन्धकाभावानन्तरं प्रतिबन्धकसत्त्वकाले

यद्रूपपुरस्कारेण न हि तयोरन्वयव्यतिरेकग्रहस्तेनैव सामान्येन रूपेण तयोः कार्यकारणभावस्य व्याप्तेर्वा ग्रहो भवति सामान्येन रूपेण तयोर्व्याप्तिग्रहहेतुरिति वाच्यं, तथा सति सामान्येन रूपेण तयोस्तद्ग्रहे व्याप्तिग्रहो न स्यात्, क्वचित्सामान्येन, क्वचिद्विशेषेण रूपेण तयोस्तद्ग्रहात्। सामान्येन तयोस्तद्ग्रहे हेतुरित्यपि न, अननुगमात्।

कार्यं स्यात् प्रतिबन्धकाभावस्य पूर्वं सत्त्वात्। न च कृतेः सहभावनिरूपकत्वं स्वतः, कार्यसमयेऽभावात्। तथा च तत्परिचायितव्यापारद्वारा तस्याः सहभावनिरूपकत्वमतः शरीरव्यापारद्वारैव कृतेर्जनकत्वं न केवलायाः' इत्यपास्तम्। समवाय्यसमवायिप्रतिबन्धकाभावानामविनश्यदवस्थत्वेन कारणत्वात् तथैवान्वयव्यतिरेकात्। तेन तेषामभावे विनाशक्षणे च न कार्यम्, अन्यथा प्रतिव्यक्ति कार्यसहभावनिरूपणे कार्योत्पत्तेः प्राक् सहभावस्य निरूपयितुमशक्यत्वात् कारणत्वानिश्चयेन क्वापि प्रवृत्तिर्न स्यादिति। तज्जातीयत्वस्यावश्यवाच्यत्वे विनश्यदवस्थं कथं सह भावेनापि व्यवच्छेद्यम्, अतः स्वरूपयोग्यतारूपा कारणता तत्रापि। कार्याभावस्तु सहकारिविरहात्, अन्यथा निमित्तानां प्रत्येकं कार्यसहभावनिरूपकत्वेन जनकत्वे गौरवं, प्रागभावस्य प्रतियोग्यजनकत्वप्रसङ्गाच्च। अन्यथा उत्पन्नोपि पुनरुत्पद्येत, सामग्रीसत्त्वात्। न च स एव तत्र प्रतिबन्धकः, अभावान्तरस्य तत्राकारणत्वेन कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात्। न चैका सामग्री एकदैकमेव कार्यं जनयति स्वभावादिति वाच्यं, सामग्रीतद्विरहस्य कार्यतदभावप्रयोजकत्वेन सामग्र्यां सत्यां कार्यस्य, तदभावे कार्याभावस्य वज्रलेपायितत्वात्।

स्यादेतत्, कर्ता शरीरर्येव ज्ञानमनित्यमेव बुद्धिरिच्छाद्वारैव कृतिद्वारैवेच्छा हेतुरित्यादिप्राथमिकव्याप्तिप्रत्यक्षविरोधात् नाशरीरनित्यज्ञानादिकर्तृसिद्धिः। अत एव शरीरमनित्यमेवेति नियमान्न कर्तृत्वेन नित्यातीन्द्रियशरीरसिद्धिरीश्वरे। न चाप्रयोजकत्वं, निरुपाधित्वेन शङ्काकलङ्कानवतारात्। कार्यत्वसकर्तृकत्वयोर्यदि निरुपाधिकत्वमस्ति तदापि तुल्यबलत्वेन सत्प्रतिपक्षात् तत्प्रतिबन्धोऽस्तु। न च कार्यत्वं पक्षधर्मतासत्त्वाद्बलीयः कर्ता शरीरर्येवेत्यादौ तन्नास्तीति वाच्यं, ज्ञानमनित्यमेवेति व्याप्तेरेव क्षित्यादौ ज्ञानजन्यत्वविरोधित्वात्। एवं कार्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव, अविरोधे तु द्वयमपि स्यात्। तथा च क्षित्यादौ शरीर्यनित्यज्ञानपर्यवसाने विरोध एव स्यात्। किञ्च ज्ञानमनित्यमेवेत्यादौ

अत्रास्मदुपाध्यायमिश्राः-व्यतिरेकग्रहो न व्याप्तिग्रहहेतुः, केवलान्वयिनि तदसम्भवात्। किन्तु व्यभिचारादर्शनसहकृतं सहचारदर्शनमेव। तच्च प्रकृतेऽप्यस्ति। पक्षे व्यभिचारसंशयश्च न दोषः। लाघवेन जन्यत्वस्य कर्तृजन्यतावच्छेदकत्वप्रतिसन्धानेन तं परिभूय कृतिमात्रकार्यमात्रयोः व्याप्तिग्रहात्। विपक्षबाधकेन तर्केण व्याप्तिग्रहे व्यभिचारसंशयस्याप्रतिबन्धकत्वादिति।

नित्यज्ञानादेरप्रसिद्धेः तदव्यावर्तकतया नोपाधित्वनिश्चयस्तत्संशयो वा, कार्यत्व-सर्तृकत्वव्याप्तिग्रहदशायां शरीरव्यापाराव्यभिचारादुपाधेर्निश्चयः संशयो वास्तीति। तन्न, ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः, विपक्षबाधकाभावेनाप्रयोजकत्वात्। निरुपाधिसहचारदर्शनव्यभिचारादर्शनादेव व्याप्तिग्रहः। निरुपाधित्वमेव वा विपक्षे बाधकमिति चेत्? न, अवयवो महानेव, तेज उद्भूतरूपमेवेत्यादि-व्याप्तिग्रहात् परमाणुनेत्रादेरसिद्धिप्रसङ्गात्। अथ द्रव्यचाक्षुषत्वेऽनेकद्रव्यवत्त्वस्य, साक्षात्कारे विषयेन्द्रियसन्निकर्षस्य हेतुत्वात् तन्मूलकविपक्षबाधकेन परमाण्वादि-साधकस्य बलवत्त्वात् परमाण्वादिसिद्धौ विरोधिव्याप्तेर्बाधः, न तु वैपरीत्यं, विपक्षे बाधकाभावेन तस्याबलवत्त्वादिति मन्यसे, तर्हि ज्ञानादिकार्यकारण-भावावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्याप्तिग्रहात् पक्षधर्मताग्रहस-हितान्नित्यज्ञानादिसिद्धौ व्यभिचारान्न व्याप्तिः। अन्यथा साध्यं पक्षातिरिक्त एवेत्यादिनिरूपाधिसहचाराद्व्याप्तिग्रहे सकलानुमानोच्छेदः।

वयन्तु ब्रूमः-पक्षधर्मताबलान्नित्यं ज्ञानं सिध्यद् बुद्धिरनित्यैवेति व्याप्तिप्रत्यक्षेण न प्रतिबध्यतेऽस्मदादिबुद्धिविषयकत्वेन भिन्नविषयकत्वादेकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीये द्रव्येऽविरोधात्। बुद्धिमात्रेऽनित्यत्वा-वगमात् कथं तद्विशेषे नित्यत्वबुद्धिरिति चेत्? न, बुद्धिमात्रस्येश्वरानीश्वरबुद्धिपरत्वे विरोधात्, व्यभिचाराच्च। अस्मदादिबुद्धिपरत्वे च भिन्नविषयत्वेनाप्रतिबन्धकत्वात्। बुद्धित्वं नित्यावृत्त्येवेत्यवगतमतस्तत्र कथं नित्यवृत्तित्वावगम इति चेत्? न, उभयसिद्धनित्यावृत्तित्वावगमेऽप्यतिरिक्तनित्यवृत्तित्वावगतौ विरोधाभावात्। बुद्धित्व-

वयं तु ब्रूम इत्यादि। तत्रेदं **यज्ञपत्युपाध्यायाः**— यदि बुद्धिर्न नित्यैवेति प्रसिद्धास्मदादिबुद्धिविषयैव व्याप्तिरतो न तज्ज्ञानं प्रकृतानुमितिप्रतिबन्धकं, तदा कार्यं कर्तृजन्यमिति व्याप्तिरपि प्रसिद्धकर्तृकार्यविशेषविषयैवेति नाप्रसिद्धं क्षितौ कर्तारं साधयेत्, भिन्नविषयत्वात्। न च भिन्नविषयापि सामान्यप्रकारावच्छिन्नेति सा तं साधयेदेव। तदा ज्ञानमनित्यमेवेति सामान्यप्रकारिकेति तत्र ज्ञानत्वानित्यत्वानुमितिं तत्र विघटयेदेव। न ह्यनुकूले सामान्यप्रकारकत्वं तन्त्रम्। न तु प्रतिकूले यदि सामान्यप्रत्यासत्त्या कार्यत्व-सकर्तृकत्वव्याप्तिज्ञानं तदा ज्ञानमनित्यमेवेति व्याप्तिज्ञानमपि प्रसिद्धाप्रसिद्धविषयक(त्व?)मेवेति नाभिमतानुमितिविषयभिन्नविषयकम्। अतः कथन्न

मनित्यत्वव्याप्यमवगतं नाऽनित्यत्वाभाववति ज्ञातव्यमिति चेत्? न, अनित्यत्वव्याप्यमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव। एतेन 'कर्ता शरीर्येवेत्याद्यपि ज्ञानं प्रतिबन्धकमिति' निरस्तम्।

ननु कर्तृजन्यत्वे जन्यत्वं नावच्छेदकं, किन्तु घटत्वादिकमेव, तेनैव रूपेणान्वयव्यतिरेकग्रहात्, आवश्यकत्वाच्च, अननुगतमपि जन्यतावच्छेदकं वह्निजन्यतायां धूमत्वादिवत्। अथ घटत्वादिवज्जन्यत्वमवच्छेदकं न हि विशेषोऽस्तीति सामान्यमप्रयोजकम्। तथा च वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत्। तस्माद्यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि बाधकं विना तथात्वनियम इति चेत्? न, तत्र बाधकाभावात्, अत्र च ज्ञानमनित्यमेवेत्यादिप्राथमिकबहुव्याप्तौ बाधात्, तुल्यत्वे वा व्याप्तिसंशयाधायकत्वात्। न च कार्यकारणभावमूलकत्वेन कार्यत्वव्याप्तिर्बलीयसीति वाच्यं, विरोधिप्रत्यक्षेण कार्यकारणभावस्यैवासिद्धेः। एतेन 'धूमादौ वह्निजन्यतावच्छेदकमनुगतं न सम्भवति, इह तु जन्यत्वमनुगतमस्त्यतो बाधकं विना न मुच्यते इति निरस्तं, ज्ञानमनित्यमेवेत्यादिसहचारावसायस्य बाधकं विना पक्षधर्मव्याप्तिपर्यवसायितत्वेन बाधकत्वादिति।

मैवं, निरुपाधित्वेन सहचारावसायस्य साधकं बाधकं च विना साधारण्येन व्याप्तिसंशयाधायकत्वात्। अन्यथा साध्यं पक्षातिरिक्त एव, सुखं दुःखसम्भिन्नमेवेत्यादिव्याप्तिग्रहस्य कार्यकारणभावग्राहकबाधकत्वे तत्संशयाधायकत्वे वा कारणानुमानोच्छेदे निरीहं जगज्जायेत। तस्माद्यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोः कार्यकारणभावो बलवता बाधकेनापनीयते, न चात्र तदस्ति, विरोधिव्याप्तिसाधकस्य विपक्षबाधकस्याभावात्।

तत्प्रतिबन्धकम्। तत्किमप्रसिद्धं नित्यं ज्ञानं स्वीकृतं भवता। तथा च सिद्धन्नः समीहितमिति चेत्?न, न हि तत् स्वीकृत्य बाधोयममिधीयते। किन्तु यदि तदस्ति तदात्मापि विषयीकृत्योत्पन्नं भ्रमरूपमपि ज्ञानमनित्यमेवेति व्याप्तिज्ञानं तत्प्रतिबन्धकं स्यादित्युच्यते। भ्रमरूपस्यापि विरोधिज्ञानस्य ज्ञानप्रतिबन्धकत्वात्। तथापि वस्तुगत्या तदस्ति न वेति प्रश्ने दीयतामुत्तरमिति चेत्? यदि तदुक्तप्रकृतानुमानात् किञ्चिदस्ति तत्रान्यत्प्रमाणं तदास्त्येव तत्, न चेन्नास्त्येव प्रकृतानुमानस्य ज्ञानमनित्यमेवेति सर्वज्ञानविषयकव्याप्तिप्रमयैव प्रतिरुद्धत्वादिति दिक्।

नव्यास्तु कार्यं कर्तृजन्यमिति व्याप्तितोऽशरीरनित्यज्ञानकर्त्रुपस्थितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धानं न तु तां विना, प्रतियोग्यनुपस्थितौ विरोधानिरूपणात्। तथा चोपजीव्यबाधात् ज्ञानमनित्यमेवेति व्याप्तिज्ञानमकिञ्चित्करमेव। अत एव पक्षधर्मताविनाकृतं विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तं, विरोधप्रतियोगिसिद्ध्यसिद्धिपराहतत्वादिति।

स्यादेतत्, अस्तु शरीजन्यत्वमुपाधिः। न च पक्षेतरत्ववत्पक्षमात्रव्यावर्तकविशेषणवत्त्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्यव्यापकत्वानिश्चयाच्च नोपाधित्वं, चेष्टेतरकार्येषु शरीरव्यापारद्वारैव कर्तुः कारणत्वात् शरीरसहकृतस्यैव स्वकार्ये कारणत्वाच्च। न हि शरीरविनाकृतः कर्ता शरीरक्रियां घटादिकं वा जनयति। न च यत्सहकृतं यज्जनकं तेन विना तज्जनकम्, अतोऽर्थाच्छरीरजन्यमेव कर्तृजन्यमिति साध्यव्यापकत्वनिश्चयात्। पक्षेतरत्वादौ च विपक्षबाधकाभावान्न साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे बीजम्। अत एव बाधोन्नीतं वह्नीतरत्वं, वह्निमत्त्वेन धूमवत्त्वे साध्य आर्द्रेन्धनप्रभववह्निमत्त्वं, रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः, विपक्षबाधकैस्तेषां साध्यव्यापकत्वनिश्चयात्। न च साधनविशेषितत्वमपि, जन्यत्वं हि प्रागभावप्रतियोगित्वं, शरीरजन्यत्वञ्च शरीरकारणवत्त्वम्, अन्यानिरुक्तेः, इतरपदसमभिव्याहारेण जन्यपदादितरकारणकस्यैव प्रतीतेस्तदर्थकत्वकल्पनादिति विधौ वक्ष्यते। अत एव शरीरिकर्तृकत्वमुपाधिः, शरीरसहकृतस्यैव कर्तुः कारणत्वात्, व्याप्यं व्यापककोटावनिवेशयत एव प्रमाणस्य व्याप्तिग्राहकत्वात्। शरीरिकर्तृकत्वसकर्तृकत्वयोर्न व्याप्तिग्रह इति चेत्? न, विशिष्टाविशिष्टभेदेन व्याप्यव्यापकभावाविरोधात्। अत एव जन्यत्वेन कारणजन्यत्वमनुमीयत इति।

नव्यास्त्विति। अत्रेदं **यज्ञपत्युपाध्यायाः**-अशरीरनित्यज्ञानकर्त्रनुमितौ जातायां ज्ञानमनित्यमेवेति व्याप्त्या सह तद्विषयस्य विरोधप्रतिसन्धानं न तदनुमितौ प्रतिबन्धकं परेणोच्यते, येन प्रत्युक्तदोषावकाशः स्यात्। किन्तु तस्यमयात्प्रख्यामेव तद्विषयत्वानित्यतज्ञानत्वनित्यत्वसामानाधिकरण्याभावविषयतया ग्राह्यविरहज्ञानतया वा बाधज्ञानत्वेन तत्र प्रतिबन्धकं परस्याभिप्रेतम्। एतेनात एव पक्षधर्मताविनाकृतं विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तम् इति ग्रन्थोऽपि निरस्तो वेदितव्यः। प्रकृतविरोधिव्याप्तिज्ञानस्याभिमतानुमितिविषयाभावत्वेन बाध एव स्यादिति।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायाम् ईश्वरवादः समाप्तः

मैवं, कर्तुर्हि शरीरसहकारिता किं घटादौ कर्तव्ये कार्यमात्रे वा स्वकार्ये वा? आद्ये कर्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्तुः कार्यमात्रकरणे? द्वितीये च कार्यमात्रं कर्तृजन्यमिति न त्वया स्वीक्रियते, स्वीकारे वा शरीराजन्यमपि कार्यं कर्तृजन्यमिति साध्याव्यापकत्वम्। तृतीये तु स्वजन्यत्वं न स्वजन्यतावच्छेदकमात्माश्रयात्। तथापि यत्र कर्तृत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वं, तुल्ययोगक्षेमत्वेन हेतुव्याप्यतासंशयाधायकत्वेन सन्दिग्धोपाधित्वं चेति चेत्? न, लाघवेन बाधकं विना कर्तृजन्यत्वे सति जन्यत्वमवच्छेदकं न तु शरीजन्यत्वं गौरवात्। तथा च शरीरजन्यत्वं न सकर्तृकत्वव्यापकम्। घटादौ त्वार्थः समाजः, घटत्वेन शरीरजन्यत्वनियमात्, न तु व्यापकत्वाप्रयुक्तः, मानाभावात्। शरीरजन्यत्वं न सकर्तृकत्वव्यापकं तद्व्याप्यजलत्वाव्यापकत्वात् नित्यत्ववदिति बाधकात् हस्तादिनापि कर्तृत्वनिर्वाहेण शरीरस्याप्रयोजकत्वात्, साक्षात् प्रयत्नाधिष्ठेय-जन्यत्वस्य साधनव्यापकत्वाच्च। शरीरकर्तृकत्वमपि नोपाधिः, जन्यमात्रे कर्तुः शरीरसहकारिताविरहात्।

अथ यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वया निरटङ्कि, तथा च कर्तृविशेषशरीरजन्यविशेषयोः कार्यकारणभावनियमात् कर्तृमात्रशरीरजन्यमात्रयोरपि तथाभावः। तथा च शरीरजन्यत्वं कर्तृतावच्छेदकमिति भवत्युपाधिः। न चैवं घटवच्छरीरजन्यत्वं सकर्तृकत्वव्याप्यं न तु व्यापकमपीति वाच्यम्, उभयसिद्धसकलसकर्तृत्ववृत्तित्वेन साध्यव्यापकतानिर्णयात्। जन्यत्वेऽपि सकर्तृकत्वव्याप्यत्वग्राहकमस्तीति चेत्? तर्हि उभयत्र ग्राहकसाम्ये विनिगमकाभावात्, व्याप्तिसंशयाधायकत्वेन सन्दिग्धोपाधिर्व्याप्यत्वासिद्धिर्वा। हेतुव्याप्यतासंशयाधायक एव सन्दिग्धोपाधिः, स च साध्यव्यापकत्वे साधनाव्यापकत्वे वा, उभयत्र वा सन्देहात्। न च वाच्यं शरीरजन्यत्वसकर्तृकत्वयोरन्वयव्यतिरेकज्ञाने जन्यत्वसकर्तृकत्वयोस्तद्ग्रह आवश्यक इति लाघवात् तयोरेव व्याप्तिग्रहो न तूपाधिसाध्ययोः। हेतुसाध्ययोरन्वयव्यतिरेकाज्ञानञ्च शरीरजन्यत्वानवगमेऽपि भवतीति विनिग-मकमिति। यतो न कर्तृमात्रजन्यमात्रयोरन्वयव्यतिरेकाभ्यां व्याप्तिग्रहः, कर्तृमात्रस्य व्यतिरेकाभावात्। किन्तु विशेषयोरन्वयव्यतिरेकेण कार्यकारणभावेन वा सामान्ययोस्तथात्वग्रहस्तौ च तुल्यावेवेति चेत्?

उच्यते – अस्तु तावद् घटत्ववत् जन्यत्वशरीरजन्यत्वयोरपि कर्तृजन्यतावच्छेदकत्वेन सकर्तृकत्वव्याप्यत्वं ग्राहकसमानत्वात् विनिगमनाभावाद्विरोधाभावाच्च, सकर्तृकत्वव्यापकत्वन्तु शरीरजन्यत्वस्य कुतः? घटत्ववदव्यापकस्यापि जन्यतावच्छेदकत्वात्। उभयसिद्धसकर्तृकेऽन्वयव्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापकत्वग्रह इति चेत्? न, शरीरजन्यत्वविनिवेद्यत्वेन तुल्यन्यायेन च प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं क्लृप्तमिति तदविरोधेन शरीरजन्यत्वस्य सकर्तृकत्वव्यापकत्वानवगमात्। अत एव न सन्दिग्धोपाधित्वम्।

ननु घटादौ शरीरजन्यत्वे कर्तृजन्यत्वमनुगतमवच्छेदकं बाधकाभावात्। न च लाघवाद्धटत्वादिकमेव तथा, कर्तृजन्यत्वेऽपि जन्यत्वस्यातथात्वापत्तेः। एवं शरीरजन्यत्वस्य व्याप्यं सकर्तृकत्वं वह्नेर्धूम इवेति भवत्युपाधिः। किञ्च कर्तृजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्तृकत्वमवच्छेदकमिति संशयेऽपि न हेतोः साध्यव्याप्यतानिश्चय इति चेत्, तर्हि घटादौ कर्तृजन्यत्वे गृहीते तस्य शरीरजन्यतावच्छेदकत्वं ग्रहीतव्यम्। घटे च घटत्ववज्जन्यत्वमपि बाधकं विना कर्तृजन्यतावच्छेदकं गृहीतमतो जन्यमात्रे कर्तृजन्यत्वान्न शरीरजन्यत्वे तदवच्छेदकत्वं, प्रथमगृहीतोपजीव्यविरोधात्। अत एव न तस्य हेतौ व्याप्तिसंशयाधायकत्वमपि। एतेनानणुत्वक्षित्यवयववृत्त्यन्यत्वादय उपाधित्वेन निरस्ताः, जन्यत्वस्य साध्यव्याप्यत्वेन तेषां साध्याव्यापकत्वात्। तथापि क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वाद् गगनवदिति सत्प्रतिपक्षोस्त्वति चेत्? न, अस्य प्रसिद्धकर्तृजन्यत्वाभावविषयकत्वात्, अप्रतीतप्रतियोगिकस्याभावस्य निरूपयितुमशक्यत्वात्। स्थापनानुमानञ्च पक्षधर्मताबलात् प्रसिद्धकर्तृभिन्नकर्तृकत्वसाधकमतो भिन्नविषयकत्वान्न प्रतिबध्यप्रतिबन्धकभावः। अत एव तद्व्यापकरहितत्वादिकमभावसाधकं बाधकमपास्तं, तस्य प्रसिद्धाभावविषयकत्वेनाप्रसिद्धाभावाविषयकत्वात्। व्यक्तिसाधकस्य च विशेषेतोऽप्रसिद्धव्यक्तिसाधकत्वनियमात्, अन्यथानुमानवैयर्थ्यात्। कर्तृजन्यत्वमनुगतं घटादौ प्रसिद्धं यत् साध्यं तदभावो मया साध्यत इति चेत्? कर्तृजन्यत्वमनुगतमपि पक्षधर्मताबलेन प्रसिद्धं कर्तारमादाय पर्यवस्यति, तदभावस्तु प्रसिद्धस्य कर्तुरभावमादाय सिध्यति नाप्रसिद्धस्य, अनुगतस्यापि कर्तृजन्यत्वस्य तदभावस्य च कर्तृव्यक्तिघटित्वात्, अन्यथा व्यक्तितदभावासिद्धिप्रसङ्गात्। न चैवं सत्प्रतिपक्षोच्छेदः, तस्य गोत्वाद्येकभावाभावसाधकविषयत्वात्।

एतेन 'ज्ञानत्वं न नित्यवृत्ति ज्ञानमात्रवृत्तिधर्मत्वात् स्मृतित्ववत्, ज्ञानं न नित्यगुणवृत्ति गुणत्वव्याप्यजातियोगिचेतनविशेषगुणत्वात् सुखवत्, आत्मा न

नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् विभुत्वाद् गगनवदि'त्याद्यपास्तं, प्रसिद्धनित्ये व्योमादौ प्रसिद्धायाश्च रूपत्वजलत्वादिजातेर्व्यतिरेकविषयत्वात्, अप्रयोजकत्वाच्च। किञ्च क्षित्यादौ शरीराजन्यत्वमसिद्धम्, अदृष्टद्वारा तज्जन्यत्वात्। न चादृष्टाद्वारकजन्यज्ञानाजन्यत्वं हेतुः, ज्ञाने जन्यत्वविशेषणस्याव्यावर्तकतया व्यर्थत्वात्। न च स्थापनायां पक्षविशेषणेऽप्येष दोषः, प्रमेयो घट इतिवत्तदुपरक्तबुद्धेरुद्देश्यत्वात्। अपि च शरीराजन्यत्वे, व्यर्थविशेषणत्वं, लाघवेनाजन्यत्वस्यैव व्याप्यत्वात्। न च निष्प्रयोजनविशेषणमसिद्धं, व्याप्तिग्रहोपयुक्तविशेषणवत् पक्षधर्मतौपयिकविशेषणस्यापि सप्रयोजनत्वाद्व्यभिचारवारकस्यापि सार्थकत्वेऽनुमितिप्रयोजकत्वस्यैव बीजत्वात्। व्यभिचारवारकविशेषणवत्येव व्याप्तिग्रह इति चेत्? न, निर्विशेषणेऽपि गोत्वादौ व्याप्तिग्रहात्। तत्रापि व्यक्तिविशिष्टे व्याप्तिग्रह इति चेत्? न, स्वतो व्यावृत्तगोत्वस्य व्यभिचारात्, अन्यथाऽन्योन्याश्रयात्। अपि च व्यभिचारवारकविशेषणवत्येव व्याप्तिग्रह इत्यप्रयोजकं, सहचारदर्शनादिसत्त्वे तदभावेन व्याप्तिग्रहाविलम्बात्। व्यभिचारावारकविशेषणशून्य एव व्याप्तिग्रह इति चेत्? न, प्रमेयत्वेन ज्ञायमाने धूमे व्याप्तिग्रहात्।

अथ तत्रोपात्तव्यभिचारावारकविशेषणशून्यत्वं विवक्षितं, न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेत्? न, विरोधात्, न हि तत्रोपात्तं तेन शून्यञ्चेति सम्भवति। यद्विषयकत्वेन परामर्शः कारणमनुमितौ तल्लिङ्गं, प्रकृते च व्यभिचारादन्यथासिद्धेश्च न विशेषणविषयकत्वेन तत्त्वमिति चेत्? न, धूमस्याप्यतत्त्वापत्तेः, व्यभिचारात्तद्विषयत्वेनानुमित्यकारणत्वात्। अथैकमवच्छेदकमपरत्र व्याप्तिः। यद्वा लाघवेन व्यासज्यवृत्तिरेकैव व्याप्तिरिति विशिष्टव्याप्त्यर्थः, तत्र विशेष्यतावच्छेदकस्य व्याप्त्यनवच्छेदकत्वेन विशेषणस्य तदवच्छेदकत्वमिति नियमात्, एकवृत्तित्वबाधे सत्येव व्यासज्यवृत्तित्वमिति व्याप्तेश्च न शरीरजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेषमात्रे सा, तथा च स्वरूपासिद्धिः, तद्वारणार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेत्? न, अव्यभिचारस्यानौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ सत्त्वेन तद्व्यतिरेकसाधने बाधात्। न च विशेष्यत्वमुपाधिः, साधनव्यापकत्वात्। किञ्च सौरभविशेषवद्धूमरहितमिदं चन्दनप्रभववह्निरहितत्वात्, निर्धूमोऽयमार्द्रेन्धनप्रभववह्निरहितत्वादित्यादावपि कारणविशेषाभावेन कार्यविशेषाभावानुमानं न स्यात्, वह्निरहितत्वादिकञ्चोपाधिर्भवेत्, व्यतिरेकिण्यष्टद्रव्यातिरिक्तद्रव्यानाश्रितत्वञ्च हेत्वभावव्याप्यं न स्यात्, द्रव्यानाश्रितत्वस्यैव व्याप्यत्वात्, रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वादित्यादौ त्वयाऽप्यसिद्धिवारकन्विशेषण-

स्वीकाराच्च। अपि च गौरवेण विशिष्टस्य व्यापकतापि न स्यात्। तथा च स्थापनानुमान उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यता, धूमेनार्द्रेन्धनप्रभव-वह्निर्घटत्वेन शरीरजन्यत्वमपि नानुमीयेत।

यत्तु जन्यान्योन्याभावापेक्षया शरीरजन्यान्योन्याभावस्याल्पत्वात्तेषामेव व्याप्यत्वमिति विपरीतमेव लाघवमिति, तन्न, विरोधाभावेन बहूनामल्पस्य च व्याप्यत्वात्स्नेहे शीतस्पर्शवत्त्वजलत्वयोर्गन्धाभावेऽपृथिवीत्वपृथिवीत्वाभावयोरिव। अन्यथा नीलधूमस्यैव व्याप्यत्वे धूममात्रस्याव्याप्यत्वप्रसङ्गः। किञ्च त्वन्नये बह्वन्योन्याभावापेक्षया जन्यत्वात्यन्ताभावस्यैव व्याप्यता स्यात्, एकत्वात्। प्रमेयत्वाद्यनन्तधर्मविशिष्टस्य व्याप्तावपि प्रयोजनाभावान्नानुमाने तदुपन्यासः। अथ लाघवेन जन्यत्वस्य शीघ्रोपस्थितिकतया जन्यत्वाभावत्वेन शीघ्रं व्याप्तिग्रहः, न तु शरीरजन्यभावत्वेन, विलम्बितप्रतीतिकत्वात्। यत्र विशेषण-विशेष्यान्यतराभाववति साध्यं तत्र विशिष्टाभावस्यापि व्याप्तिरिति चेत्? न, एवं सत्युत्पत्तिमत्त्वे सति सत्त्वादिकमनित्यत्वसकर्तृकत्वव्याप्यतया न गृह्येत, शीघ्रोपस्थितिकतया घटत्वादेरेव तथात्वात्। यदि च सामान्यविशेषभावाद्विरोधा-भावेनोभयस्यापि व्याप्यत्वं तदा शरीराजन्यत्वजन्यत्वाभावयोरपि तुल्यम्। किञ्च शरीरजन्यत्वं विशिष्टं तदभावमपि विशिनष्टि न तु साक्षात्, तथा च शरीरजन्यत्वाभावोऽखण्ड एव हेतुरतो न व्यर्थविशेषणता। न चात्र विशिष्टाभावो विशेष्याभाव एव, क्षित्यादावजन्यतापत्तेः। अत एव स्थापनायां शरीरजन्यत्वमुपाधिः साध्याभावव्याप्याभावप्रतियोगित्वेन साध्यव्यापकत्वनियमात्। व्यर्थविशेषणेऽधिकं निग्रहस्थानमिति चेत्? न, हेतुद्वयोपन्यासे ह्यधिकम्। अत्र तु विशिष्टमेव हेतुरिति विरुद्धस्थल उक्तमिति।

उच्यते–नीलधूमादौ व्याप्तिरस्त्येव, अन्यथा विशेषाणामव्याप्यत्वे निराश्रया व्याप्तिः स्यात्। नीलत्वमपि न व्याप्यतावच्छेदकं, गौरवात्। किन्तु धूमत्वमेव दण्डत्वेन कारणत्वे रूपमिव, धूमत्वञ्च न नीलिम्नि किन्तु तदाश्रये धूम इति न नीलधूमस्य हेतुत्वम्। नीलधूमे नीलस्य विशेषणत्वे तद्विशिष्टे न धूमत्वम्, उपलक्षणत्वे च धूमादेवानुमितिः। किञ्च व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधूमत्वं तथा। न चैवं धूमत्वस्यावच्छेदकत्वेऽपि सामग्रीसत्त्वात् नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात्, अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यं, तदभावेऽपि नीलधूमप्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभासत्वसम्भवादिति दिक्।

एवञ्च शरीराजन्यत्वेऽपि न शरीरमवच्छेदकं गौरवात्, येन विशेषणेन विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यतावच्छेदकत्वनियमात्। अत एव गन्धस्यैव व्यञ्जकत्वादित्यत्राप्रसिद्धत्वेन रूपादिषु मध्ये इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यते इत्यसिद्धिवारकमपि विशेषणं सार्थकमेव। सुरभिधूमविशेषादौ च चन्दनप्रभवाग्न्यादेः कारणत्वात् कारणाभावस्य कार्याभावप्रयोजकतया व्याप्यत्वनिश्चयः। व्यापके च न व्यर्थविशेषणता, विशिष्टस्य कारणत्वेन व्यापकत्वात्, विशेषव्यतिरेकिस्थले विपक्षबाधकेनानन्यगतिकतया विशिष्टस्य व्यापकत्वाद् विशिष्टाभावस्य हेत्वभावव्याप्यत्वम्। यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न, यथा कार्यस्य द्विकर्तृकत्वेनापि शरीरजन्यत्वाभावोऽखण्डो हेतुः। यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात् तदा तदभावप्रयुक्तः सकर्तृत्वाभाव इति तस्य साध्यव्याप्यता स्यात्, न चैवं, किन्तु जन्यत्वं लाघवात्तथा। तथा चाजन्यत्वमेवोपाधिः, साध्यव्याप्याभावः साध्याभावव्यापक इति नियमेन तस्य साध्यव्यापकतानिश्चयात् सकर्तृकत्वशरीरजन्यत्वयोर्व्याप्त्यभावेन तदभावयोरपि व्याप्त्यभाव इति व्याप्यत्वासिद्धत्वाच्च। अत एव शरीरजन्यत्वाभावस्याकर्तृकत्वाव्याप्यत्वात्तद-भावयोरपि व्याप्यव्यापकभाव इति निरस्तं, शरीरजन्यत्वस्य सकर्तृकत्वा-प्रयोजकत्वात्। न चाजन्यत्वं पूर्वसाधनव्यतिरेकत्वेन नोपाधिः, सत्प्रतिपक्षोच्छेदक-प्रसङ्गादिति वाच्यं, स्थापनायां यत्राभासत्वं तत्र विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधिकत्वात्, यथा शब्दोऽनित्यो गुणत्वादित्यत्र शब्दो नित्यो व्योमैकगुणत्वादित्यादिना सत्प्रतिपक्षे गुणत्वाभावो नोपाधिः, जलपरमाणुरूपे साध्याव्यापकत्वात्। न चैवमनैकान्तिकत्वमेव तत्रोद्भाव्यं, सत्प्रतिपक्षमुपेक्ष्य तस्योद्भावनानर्हत्वात्। किञ्च प्रागभावप्रतियोगित्वे सति समवेतत्वस्य तत्प्रतियोगित्वे सति सत्त्वस्य, सत्त्वे सत्युत्पत्तिमत्त्वस्य वा हेतुत्वे, एषामन्यतमव्यतिरेक उपाधिरिति न पूर्वसाधनव्यतिरेकः। अत एवाजन्यत्वस्य नोपाधित्वं, ध्वंसे साध्याव्यापकत्वादिति न दोषः।

अन्ये तु यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना न गृह्यते तत्र विशिष्टं व्याप्यतावच्छेदकम्। अकर्तृकत्वनिरूपिताभावनिष्ठव्याप्तौ च शरीरं विनैव प्रतियोगितया जन्यत्वमवच्छेदकं क्लृप्तमिति न शरीरजन्यत्वमवच्छेदकं धूमे नीलधूमत्वमिव, अतिगौरवेण शरीरजन्यत्वमप्रतियोगितया च जन्यत्वं नावच्छेदकमिति व्याप्यतावच्छेदकाभावान्न शरीरजन्यत्वाभावोऽकर्तृकत्वव्याप्यः।

व्यभिचाराभावात्तथेति चेत्? न, क्षित्यादावेव व्यभिचारात्, अन्यथा क्षित्यादिकं नादृष्टहेतुकं शरीरजन्यत्वाभावादित्यपि स्यात्। नन्वस्तु तावदशरीरनित्यज्ञानादि-कर्त्रनुमितिस्तथापि सानुमितिरयथार्थैवाशरीरे कर्तृत्वज्ञानत्वात् ज्ञानेच्छाप्रयत्नेषु नित्यज्ञानत्वात् शरीराजन्ये सकर्तृकत्वज्ञानत्वात्, घटः कर्ता घटज्ञानादिकं नित्यं व्योम सकर्तृकमिति ज्ञानवदिति साध्यम्। न चोपजीव्यबाधः, अनुमितिर्ह्युपजीव्या, नन्वस्तु तद्याथार्थ्यमपीति चेत्? न, कर्तृकार्ययोर्निरुपाधिकार्यकारणाभावेनैतस्या-प्रयोजकत्वात्, अन्यथा पर्वते वह्न्यनुमितिरयथार्था उभयसिद्धवह्निमद्भिन्ने वह्निज्ञानत्वादित्यादिना सकलान्वयव्यतिरेक्युच्छेदः। किञ्चानुमितेरयाथार्थ्यमनेन ज्ञाप्यं, न तु कार्ये, तथा च दोषादुत्पन्नस्यानेन ज्ञापने तत्रायमेव दोषो दोषान्तरं वा? नाद्यः, अन्योन्याश्रयात्, उत्पन्ने तस्मिन् ज्ञापनं ज्ञापकादेव च तस्माद्दोषात्तदुत्पत्तिरिति। नान्त्यः, असिद्धेः। तर्कापरिशुद्धिस्तु न दूषणम्। यदीश्वरः कर्ता स्यात्, शरीरी स्यात्, इष्टसाधनताज्ञानवान् स्यात् प्रयोजनवान् स्याद् अनित्यज्ञानवान् स्यात्, क्षित्यादि यदि सकर्तृकं स्यात् शरीरिकर्तृकं स्यादिति तर्काणां विपर्यये आश्रयासिद्धिव्यर्थविशेषणतादिना विपर्ययापर्यवसानेना-भासत्वात्।

ननु क्षित्यादावेककर्तृसिद्धिः कुतः? एककर्तृकत्वेन व्याप्त्यभावात्। न च लाघवात्, तस्याप्रमाणत्वात्। सकर्तृकत्वप्रमाणादेव लाघवसहकृतात् तत्सिद्धिरिति चेत्? न तावदनुमितिमात्रे लाघवं सहकारि, व्यभिचारात् मानाभावाच्च। न हि लिङ्गपरामर्शे सति तद्विलम्बेनानुमितेर्विलम्बो येन तत् सहकारि स्यात्। नापि लघ्वनुमितौ, अन्योन्याश्रयात्। नापि व्यक्त्यनुमितौ, धूमेन वह्न्यनुमितावेकद्विहस्ता-दिसंशयाभावापत्तेः। साधकाभावेन नानात्वासिद्धौ कर्तृसिद्धेरेवैककर्तृसिद्धिरिति चेत्? न, एकत्वसाधकाभावेनैकत्वासिद्धौ कर्तृसिद्धिरेव नानासिद्धिरित्यस्यापि सुवचत्वात्। अथ यमर्थमनालम्बमानाऽनुमितिः पक्षे न साध्यसंसर्गं विषयीकरोति स पक्षधर्मताबलात् सिध्यति न त्वधिकमपि। तथा च द्वितीयं कर्तारं न विषयी कुर्वत्यपि कर्तारं विषयीकरोत्येवेति न द्वितीयमवगाहते। एकस्तु कर्ता सिध्येदिति तदविषयत्वे कर्तृविषयतैव न स्यात्, एकविषयत्वाभावे नानाविषयत्वस्याप्यभावात्, तदघटितत्वात्तस्येति चेत्? एवं तर्हि कर्त्रेकत्वमपि न विषयः स्यात्, एकत्वविषयत्वं विनापि कर्तृविषयत्वसम्भवात्। वस्तुगत्यैकः सिध्यति न त्वेकत्वेनेति चेत्? न, एकत्वासिद्ध्या वस्तुगत्यैक इति ज्ञातुमशक्यत्वात्, तथा चेश्वरे एकत्वानेकत्वयोर्नित्यसंशय इति।

उच्यते-यत्र प्रमाणे लघुगुरुविषयता सम्भवति तत्र लाघवसहकारिता, कारणताकार्यताव्याप्यतादिग्राहके प्रत्यक्षे प्रवृत्तिनिमित्तग्राहके उपमाने शब्दशक्तिग्राहकेऽनुमाने तथाविधप्रमाणमात्रे च सकलतान्त्रिकैः सहकारित्वकल्पनात्। एवं लाघवमेव गौरवमिति ज्ञानानन्तरं बाधकं विना लघूनामेव कारणत्वकार्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्यत्वानां ज्ञानदर्शनात्। तत्रापि लाघवानादरे शब्दशक्यत्वादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात्। सोऽयं विचारमारभते लाघवञ्च तदङ्गं नाङ्गीकुरुत इति महासाहसम्। नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकानवतारदशायां लाघवादेककर्तृसिद्धिः स्यात्। न चेष्टापत्तिः, अनुमित्यनन्तरं नानात्वैकत्वे संशयादिति चेत्? न, तत्रापि लाघवेन कर्त्रैक्यमेव सिध्यति, तत्सन्देहस्तु ज्ञानप्रमाण्यसंशयादिति पश्चान्नानाकर्तृकत्वसाधकप्रमाणादेवैककर्तृकतानुमानं तत्र बाध्यते। न चैवं क्षित्यादिकर्तर्यपि प्रामाण्यसंशयादेकत्वानेकत्वसंशयो दुरुच्छेदः, एकत्वे बाधकस्याभावेन प्रामाण्यनिश्चयात्। न चैकत्वसाधकाभाव एव बाधकः, अनुमितेरेव लाघवसहकारेणैकत्वसाधकत्वात्।

अन्ये तु क्षितिकर्ता अङ्कुरकर्त्रभिन्नः अशरीरकर्तृत्वाद् अङ्कुरकर्तृवदित्यभेदानुमानादेककर्तृसिद्धिः। न च क्षितिकर्ता अङ्कुरकर्तृभिन्नः अङ्कुराकर्तृत्वात् कुलालवदिति सत्प्रतिपक्षः, अनित्यज्ञानानामाश्रयत्वस्योपाधित्वादित्याहुः। अत्राप्यप्रयोजकत्वे भेदाभेदयोर्गौरवलाघवे एव शरणम्।

तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः? पक्षधर्मताबलादिति चेत्? व्यापकतयाऽवगतस्य पक्षसम्बन्धमात्रं पक्षधर्माद्धेतोः सिध्यति, तथा च पक्षे तदुपादानगोचरज्ञानमात्रं सिध्येत् न तु नित्यसर्वविषयज्ञानं, तेन रूपेण व्यापकत्वाग्रहात्। न च येन विनानुपपत्तिः सोऽपि विषयः, व्यतिरेकविलयापत्तेः।

अत्र प्राञ्चः-यमर्थमनालम्बमानाऽनुमितिः पक्षे साध्यसम्बन्धं न विषयीकरोति स पक्षधर्मताबलात् सिध्यतीत्यनुपपत्तिमूलकोऽन्वयी, प्रतीत्यनुपपत्त्या च व्यतिरेकी। तदिहानादिद्व्यणुकादिकार्यप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विना नोपादानगोचरज्ञानजन्यत्वमनादिकार्यप्रवाहस्यानुमितिरालम्बते। अनादितैव च नित्यता, सर्वमुक्तावपि तत्सत्त्वमनादिभावत्वात्। पक्षतदुपादानविषयतैव च सर्वविषयता, लाघवात्तु तावद्विषयकमनाद्येकमेव ज्ञानं सिध्यति, न तु नित्यानित्यज्ञानानीति।

नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यत् नित्यमेव सिध्यति, अनित्ये बाधात्।

वाचस्पतिमिश्रास्तु-लाघवादेकज्ञानसिद्धावुत्पत्तिमतोऽनादिकार्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः। नियतविषयता च ज्ञानस्य कारणाधीना, कारणञ्च नित्यज्ञानान्निवर्तमानं नियतविषयतामादाय निवर्तत इति सर्वविषयत्वसिद्धिरिति।

षट्पदार्थीप्रतिपादकवेदकर्तृत्वेनेश्वरस्य षट्पदार्थीगोचरसाक्षात्कारवत्त्वेन वा सार्वज्ञ्यम्। घटाकाशसंयोगं प्रतीश्वरस्य कर्तृत्वाद् घटादिगोचरमपि ज्ञानं सिद्धमिति केचित्।

ननु घटादीनां कथमीश्वरकर्तृत्वं भवति? घट ईश्वरकर्तृकः कार्यत्वात् क्षितिवदिति चेत्? न, घटस्य द्विकर्तृकतया तद्दृष्टान्तेन क्षित्यादेरपि द्विकर्तृकतापत्तेः।। तथा च घटवत् क्षितिः क्षितिवद् घट इतीश्वरानन्त्यम्। कार्ये कर्तृत्वेन कारणता न तु द्विकर्तृकत्वेनेति चेत्? तर्हि नेश्वरकर्तृकत्वेन कारणता किन्तु कर्तृत्वेनेति।

मैवं, ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वमपीति कथं न तेषां घटादिकारणत्वं, कुलालादिज्ञानतुल्यत्वात्। तदाहुराचार्याः "परमाण्वदृष्टाधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् न तु तदधिष्ठानार्थमेवेश्वरसिद्धिरिति।" "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते" इत्यागमाच्चायमर्थोऽध्यवसेयः।

अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तः स्यात् भ्रमस्येव तस्यापि भ्रमविषयविषयकत्वादिति चेत्? न, रजतत्वप्रकारकज्ञानवानयमिति ज्ञानं न भ्रमः, अभ्रान्तस्य तथात्वात्। इदं रजतमितिज्ञाने रजतत्वं प्रकारः तेन स भ्रमः, ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति स न भ्रमः। अत एवास्मदादिरपि भ्रान्तिज्ञो न भ्रान्त इति।

स्यादेतत्, प्रयोजनं विना कथमीश्वरः प्रवर्तते? सुखस्याभावात्, अधर्माभावेन निर्दुःखत्वात्। करुणया प्रवर्तते इति चेत्? तर्हि परसुखदुःखप्रहाणे प्रयोजने, तथा च सुखिनमेव सृजेन्न नारकिणम्। धर्माधर्मपरतन्त्रत्वात् तदनुरूपं फलं प्रापयतीति चेत्? तर्ह्यावश्यकत्वात् कर्मनिर्मितमेव जगद्वैचित्र्यमस्तु, किमीश्वरेणानपेक्षितकीटादिज्ञानवता। कर्मनिरपेक्षत्वे चैकदैव सदा च सर्गप्रलयौ

स्यातां, ज्ञानादीनां नित्यत्वात्। किञ्च तत्प्रयत्नस्य करुणाजन्यत्वे शरीरादिजन्यतापत्तौ संसारितापत्तिरिति। न, ईश्वरानभ्युपगमे विचारस्याश्रयासिद्धत्वात्। तमभ्युपगम्य पृच्छसि चेत्? आकर्णय, जगत एव तदिच्छाविषयत्वेन स्वेष्टसाधनताज्ञानसत्त्वात्।

वस्तुतस्तु क्षित्यादितत्तदसाधारणक्रमिकादृष्टादिसामग्रीसमवहिता ईश्वरज्ञानादयो यदा भवन्ति तदा क्षित्यादिकं करोतीति व्यवहारः। सर्गप्रलयासाधारण-क्रमिकादृष्टादिसामग्रीसमवहितत्वमेव तदिच्छायाश्चिकीर्षासञ्जिहीर्षात्वे। न चैवं किं तज्ज्ञानादिनेति वाच्यं, क्षित्यादीनां कार्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वात्, सुखादिशब्दयोरात्माकाशादिवत्।

नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसम्प्रदायः?

उच्यते–सर्गादावदृष्टोपगृहीतभूतभेदान्मीनशरीरोत्पत्तावदृष्टवदात्मसंयोगा-ददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षासहितान्मीन-कलेवरकण्ठताल्वादिक्रियातज्जन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीराव-च्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्धीच्छासहितचेष्टोत्पतौ सकलघटानुकूल-व्यापाराद् घटोत्पत्तिः। एवं प्रयोज्यप्रयोजकज्ञानाय व्यापारभिमतशरीरावच्छे-देनाप्यदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारः, ततस्तत्सुशीलो बालो व्युत्पद्यते, सोऽयं भूतावेशन्यायः।

यत्तु–यथा लिप्यादिना मौनिश्लोकोऽनुमाय पठ्यते तथा सर्गान्तरोत्पन्नत्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेश्वराभिप्रायस्थवेदः साक्षात्कृत्यानूद्यते, ततोऽग्रिमसम्प्रदायः, स एव च कायव्यूहं कृत्वा वाग्व्यवहारं करोतीति मतम्। तन्न, प्रतिसर्गाद्यनन्तसर्वज्ञकल्पनायां गौरवात्, तेषामेव क्षित्यादिकर्तृत्वसम्भ-वेनेश्वराननुमानाच्च। एतेन सर्गादौ सर्गान्तरसिद्धयोगिन एव क्षितिकर्तारः सन्त्विति निरस्तम्। सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात्? क्षित्यादिकर्तृग्राहकाद्वा। नाद्यः, तदभावात्। नान्त्यः, अनादिद्व्यणुकादिकार्यप्रवाहस्य सकर्तृकत्वानुमानाल्लाघवसहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः।

अथेश्वरज्ञानमूलकशब्दशक्तिग्रहे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणताग्रहो भ्रमः स्यात्, तदीयज्ञानस्य नित्यत्वात्। तथा च तज्जन्य-घटशब्दशक्तिग्रहस्य भ्रमत्वे सकलशब्दज्ञानं भ्रमः स्यात्, भ्रमपरम्परामूलकत्वात्। अनित्यसर्वज्ञमूलकशब्दत्वग्रहे च नायं दोष इति चेत्? न, व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रमत्वेऽपि घटपदं

घटशक्तमिति ज्ञानस्य यथार्थत्वाद् विषयाबाधात्। न च भ्रममूलकत्वेन तस्य भ्रमत्वमनुमेयं, तदंशे व्यधिकरणप्रकाराभावेन बाधात्, बाधितविषयत्व-स्योपाधित्वाच्च।

अत एव घटमानयेति शब्दानन्तरं सूत्रसञ्चाराधिष्ठितदारुपुत्रकस्य घटानयनव्यवहारदर्शनाद्बालो घटपदे व्युत्पद्यते। तन्मूलकशाब्दज्ञानमपि न ब्रूमः, तस्यापि भ्रमत्वे प्रयोज्यव्यवहारादिदानीं व्युत्पत्तिर्न स्यात्, किमयं प्रयोज्यश्चेतनव्यवहाराद् व्युत्पन्नोऽचेतनव्यवहाराद्वेति संशयस्य वज्रलेपायमानत्वात्। 'विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः' इत्यादि श्रुतयः-

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।।

इत्यादयः स्मृतयश्च बह्व्यो मानत्वेनानुसन्धेया इति।।

इति श्रीगङ्गेशोपाध्यायविरचितत्त्वचिन्तामणौ ईश्वरवादः समाप्तः

॥ शक्तिवादः ॥

स्यादेतत्, ईश्वरवत् कार्येणैव शक्तिरप्यनुमीयते। तथाहि यादृशादेव करतलानलसंयोगाद्दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते। अतो यदभावात् कार्याभावस्तद्वह्न्यादावभ्युपेयं तेन विना तदभावायत्तदाहाभावानुपपत्तेर्व्यतिरेकमुखेन शक्तिसिद्धिः। न चादृष्टवैगुण्यं, दृष्टसाद्गुण्ये तदभावात्, तस्य तदर्थत्वात्। अन्यथा दृढदण्डनुन्नमपि चक्रं न भ्राम्येत्। अथादृष्टविलम्बादपि विलम्बो यथा वन्ध्यास्त्रीसम्प्रयोगे परमाणुकर्मणि अध्ययनतुल्यत्वेऽप्येकत्र फलाभावे चेति चेत्? न, अदृष्टविलम्बो हि न तन्नाशानुत्पादौ, मण्यपसारणानुपदं दाहाभावप्रसङ्गात्। किञ्च नियमतो मणिसद्भावे कार्याभावस्तदभावे कार्यमिति दृष्टत्वात् मण्याद्यभाव एव कारणम्। अन्यथा कदाचित् मण्याद्यभावेऽपि तदभावान्न कार्यं स्यात्। वन्ध्यासम्प्रयोगे तु दृष्टव्यभिचाराददृष्टविलम्बादेव विलम्बः। अदृष्टञ्च क्वचित् साक्षाज्जनकम्, अन्यथा परम्पया हेतुरपि न स्यात्। न च समप्रज्ञयोः समञ्च निरपवादमभ्यस्यतोरेकः प्रगल्भो नापर इति दृश्यते। न च सर्वोत्पत्तिमतामदृष्टं निमित्तकारणम्, अगम्यागमनसाध्ये सुखे तदभावात्, तद्धि नोऽधर्मात् सुखत्वात् नापि धर्मात्। तेन अगम्यागमनमुत्पाद्य सुखमुत्पादनीयम्। तथा चागम्यागमनकारणत्वेन न स धर्मः, श्येनापूर्ववन्निषिद्धफलकत्वेनानर्थकत्वात्। दाहप्रतिकूलादृष्टादेव दाहाभाव इति चेत्? न, तस्योत्तेजकाभावसहितमण्यजन्यत्वे तत्रादाहार्थिनोऽप्रवृत्तिप्रसङ्गात्। तज्जन्यत्वेऽपि तदुत्पादकादेव दाहाभाव इति किमदृष्टेन, प्रथमोपस्थितत्वादुपजीव्यत्वाच्च। प्रतिबन्धकाभावहेतुत्वस्य तेनाभ्युपगमाद् अदृष्टोत्पत्तौ शौचाचमनादेः साधारणस्यात्राप्यन्वयः स्यात्, अशुचेरेव तदुत्पत्तौ शौचे सति तदभावापत्तेः, प्रतिपक्षसन्निधापकादृष्टस्यैव प्रतिबन्धकत्वे सति मण्यप्रयोगेऽपि दाहानापत्तिः, अग्रिमकाल एव सन्निधिदर्शनेन तदसिद्ध्यभावात्। अस्तु तर्ह्युत्तेजकाभावसहकृतप्रतिबन्धकाभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वम्। एवं केवलोत्तेजकसद्भावे उभयसत्त्वे उभयाभावे च विशिष्टभावोऽनुगतो हेतुः। प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वं, तच्च मण्याद्यभावत्वेन न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः। अत एव प्रतिबन्धकत्वाभिमतमण्यादीनामभावकूट एव कारणं, तेन मणिसद्भावे मन्त्राद्यभावेऽपि न कार्यम्।

अनतिरिक्ताभाववादिमते च व्यवहारार्थं तत्स्थानाभिषिक्तस्य हेतुत्वम्। न चाभावो न कारणं, भाववत्तद्ग्राहकतौल्यात्। दृष्टञ्च कुड्यसंयोगाभावस्य गतौ, अनुपलम्भस्याभावविज्ञाने, विहिताकरणस्य प्रत्यवाये, निर्दोषत्वस्य वेदप्रमाण्ये जनकत्वमिति प्राञ्चः।

मैवं, विशिष्टं हि नार्थान्तरं येन तदभावोऽनुगतः स्यात्, किन्तु विशेषण-विशेष्यसम्बन्धा इति तेषां प्रत्येकाभावस्य हेतुत्वे क्वचिद् विशेषणमण्यभावः, क्वचिदुत्तेजकाभावरूपविशेषणाभावः, क्वचिदुभयं कारणमिति व्यभिचारन्नैकमपि हेतुः स्यात्।

स्यादेतत्, प्रतियोगिभेदादिवत् प्रतियोगितावच्छेदकविशेषणभेदेऽप्यभावो भिद्यते, अन्यथा पृथिव्यादित्रयप्रत्येकरूपाभावेऽवगतेऽपि वायौ रूपसंशयो न स्यात्। एवञ्च यथा केवलदण्डसद्भावे दण्डपुरुषसद्भावे द्वयाभावे च विशेषणविशेष्योभयाभावप्रयुक्तः केवलपुरुषाभावोऽबाधितानुगतव्यवहारबलात् प्रतीतिसिद्धस्तथा विशेष्यस्य प्रतिबन्धकस्याभावे विशेषणस्योत्तेजकाभावस्याभावे द्वयाभावे च केवलप्रतिबन्धकाभावो विशेष्यविशषणोभयाभावव्यापकोऽनुगत एव दाहकारणमस्तु। अथ विशेषणाद्यभावादेव केवलपुरुषाभावव्यवहारः, एकशक्तिमत्त्वादिति चेत्? न, अनुगतव्यवहारस्यानुगतज्ञानसाध्यत्वात्, शक्ते-श्चातीन्द्रियत्वात्। अथोत्तेजकप्रयोगकाले मणेः कोऽभावः? न तावत् प्राक्प्रध्वं-साभावौ, तयोः प्रतियोग्यसमानकालत्वात्। न च श्यामोऽयमासीदित्यत्र यथा श्यामध्वंसप्रयुक्तः श्यामघटत्वेन पक्वघटस्य ध्वंस एव तथोत्तेजकाभावध्वंसप्रयुक्त उत्तेजकाभाववत्त्वेन मणिध्वंस एवेति वाच्यं, ध्वंसस्यानन्तत्वे उत्तेजकापनयेऽपि दाहप्रसङ्गात्। नाप्यत्यन्ताभावः, तस्य कादाचित्कत्वाभावादिति चेत्? न, यथा दण्डोपनयापनयदशायां केवलपुरुषाभाव उत्पादविनाशवान्, अन्यथाऽबाधित-केवलपुरुषाभावतदभावव्यवहारयोरुपपादयितुमशक्यत्वात्, तथोत्तेजकोपनया-पनयशृङ्खलायां प्रतिबन्धकाभावोऽपि तथैव स्वीकरणीयः, तुल्यन्यायत्वात्। यदि च संसर्गाभावत्रयवैधर्म्यात्तत्र नाऽन्तर्भवति, तदा तुरीय एव संसर्गाभावोऽस्तु, न हि क्लृप्तविशेषबाधे सामान्यबाधो, विशेषान्तरमादायापि तस्य सम्भवात्। अन्यथा क्लृप्तानादिसंसर्गाभाववैधर्म्येण ध्वंसोऽपि न सिध्येत्। व्यवहारानुपपत्तिश्च तुल्यैव। सोऽयमस्माकं सगोत्रकलहो न तु शक्तिवादः।

अस्तु वा ध्वंस एवासौ, संसर्गाभावविभागे जन्याभावत्वेन ध्वंसस्य विभजनात्। न चैवं विनाशवत्त्वेन प्रागभाव एव सः, परिभाषाया अपर्यनुयोज्यत्वात्। यद्वाऽत्यन्ताभाव एवासौ, तस्य नित्यत्वेऽपि कादाचित्का-प्रतीतिकार्यानुदयौ प्रत्यासत्तिकादाचित्कत्वात्। प्रत्यासत्तिश्च विशेषणाभावो विशेष्याभाव उभयाभावश्च, तदैव विशिष्टात्यन्ताभावसत्त्वादिति। तन्न, यदि ह्यतीतविशेषणावच्छेदेन विद्यमानस्यैव विशेष्यस्य ध्वंसः स्यात् तदा क्षणरूपातीतविशेषणावच्छिन्नत्वेन प्रतिक्षणं घटस्य विनाशः स्याद् इति क्षणभङ्गापत्तिः। किञ्च विद्यमानस्य विनष्टत्वेनाप्रतीतेः शिखा विनष्टा पुरुषो न विनष्ट इति विपरीताबाधितप्रत्ययाच्च न विशेषणाभावेऽपि विशेष्यध्वंसः। श्यामोऽयमासीत् केवलोऽयमासीत् पुरुष इत्यादौ ''सविशषणे ही''ति न्यायेन विशेष्यवति श्यामकैवल्यादिध्वंस एव प्रतीयते, ध्वंसस्य ध्वंसानुपपत्तेश्च न विद्यमानस्य ध्वंसः। एतेनोत्तेजकसद्भावे सत्युत्तेजकाभावविशिष्टमणेरुत्पन्नध्वंसस्योत्तेजकापनयसमये ध्वंसो जातोऽध्वस्तश्च ध्वंसः कारणमिति न विफल उत्तेजकापनय इत्यपास्तं, विद्यमानध्वंसस्य च ध्वंसाभावात्। न च ध्वंसान्यः संसर्गाभावो विशिष्टाभाव इति वाच्यम्, उत्पन्नाभावस्य विनष्टप्रत्ययहेतुतया ततोऽपि विद्यमानस्य विनष्टत्वप्रत्ययापत्तेः। नापि विशिष्टाभावोऽत्यन्ताभावः, तथा हि स एव क्वचिद् विशेषणाभावसहितः क्वचिद्विशेष्याभावसहितो दाहकारणमित्यननुगमस्तदवस्थ एव, विशेषणविशेष्याभावयोः प्रत्यासत्तित्वा-वच्छेदकानुगतधर्माभावात्।

अथ विशिष्टविरोधित्वं विशेषणविशेष्याभावयोरनुगतं तदवच्छेदकमस्ति, तयोश्च सत्त्व एव विशिष्टात्यन्ताभावसत्त्वादिति चेत्? तर्हि विशिष्टविरोधित्वेनानुगतेन तयोरेव हि विशिष्टाभावत्वेन दाहव्यवहारादौ जनकत्वमस्तु, कृतं तदुपजीविनाऽतिरिक्तविशिष्टाभावेन। अथोत्तेजककाले विद्यमानात्यन्ताभावा-नुवृत्तावप्युत्तेजकापनयने उत्तेजकाभावव्यक्तिर्या जाता तदवच्छिन्नमणेरभावो न तत्रेति तदा न कार्योदयः, तत्तदुत्तेजकाभावविशिष्टमणेरभावकूटस्य जनक-त्वादिति चेत्? न, तत्तदुत्तेजकाभावानामनुगतत्वेनानुगतविशिष्टाभावव्यवहारानुपपत्तेः, उत्तेजकाभावत्वेनानुगमेऽतिप्रसङ्ग एव।

अथ विशेषणविशेष्याभावयोर्विशिष्टविरोधित्वमनुगतकारणतावच्छेदकं यत्र तदन्यतराभावस्तत्र न विशिष्टं यत्र विशिष्टं तत्र न तयोरभाव इति

सहानवस्थाननियमस्य विरोधस्यानुभवसिद्धत्वादिति चेत्? न, सहानवस्थाननियमो न परस्परविरहरूपतया विशेषणविशेष्याभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशिष्टत्वापत्तेः, तथा च विशेष्यविशेषणयोः प्रत्येकं विशिष्टत्वापत्तिः, तदभावस्य तत्त्वात्। न चोभयाभावाभाव उभयं विशिष्टम्। एवं ह्यभावद्वयं विशिष्टाभावो न तु प्रत्येकाभावरूप इति प्रत्येकाभावाद्विशिष्टाभावव्यवहारो न स्यात्। नापि परस्परविरहव्याप्यत्वं तदाक्षेपकत्वं वा, विशेषणविशेष्याभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात् तदनाक्षेपकत्वाच्च, अभेदे तयोरभावात्। एतेनान्यदपि विशिष्टव्यवहारविरोधित्वादिनानुगतत्वमपास्तम्। केनाप्यनुगतेन रूपेण विशेषणविशेष्याभावस्य विशिष्टाभावत्वे प्रत्येकाभावाभावस्य विशेषणविशेष्यान्यतरमात्रस्य विशिष्टत्वापत्तेः, तदभावाभावस्य तत्त्वादित्युक्तत्वात्। तस्माद्विशेषणविशेष्याभावो विशेषणावच्छिन्नविशेष्याभावो न विशिष्टाभाव इति।

अत्रोच्यते-विशेषणविशेष्ययोः सम्बन्धाद्विशिष्टव्यवहार इति तयोः सम्बन्धाभावाद्विशिष्टाभावव्यवहार इति घटतदभावव्यवहाराविव घटसत्त्वासत्त्वाभ्याम्। न हि तयोरसम्बन्धे विशिष्टव्यवहारः, न वा तदभावे सति न विशिष्टाभावव्यवहारः। यस्य च यत्र सम्बन्धः स एव तत्र तस्य वैशिष्ट्यम्। स च सम्बन्धाभावो विशेषणाभावाद्विशेष्याभावाद् उभयाभावात् सर्वत्राविशिष्ट एकस्तेषां व्यापकोऽनुगतविशिष्टाभावव्यवहारकारणम्, इह दण्डी पुरुषो नास्तीत्यत्र तथा दर्शनात्। अत एव दण्डमात्रसद्भावे दण्डपुरुषसद्भावे उभयाभावे च कैवल्यपुरुषयोः सम्बन्धाभावः सर्वत्रास्तीत्यनुगतः केवलपुरुषभावव्यवहारः। एवञ्च प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धाभावो दाहकारणम्। स च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चास्ति, सर्वत्र प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धो नास्तीतिप्रतीतेः। नन्वेवं यत्र प्रतिबन्धकोत्तेजकाभावौ तत्रापि दाहः स्यात्, अधिकरणाभावयोरतिरिक्तसम्बन्धाभावादिति चेत्? न, तदभावेऽपि स्वरूपसम्बन्धस्याभावात् सर्वत्र स्वरूपसम्बन्धादेवाधिकरणाभावयोर्वैशिष्ट्यप्रतीतेः। तथापि प्रतिबन्धकोत्तेजकाभावावेव स्वरूपसम्बन्धस्तयोरभावश्च प्रतिबन्धकाभाव उत्तेजकञ्च दाहकारणं, तथा चोभयाभावे उत्तेजकासत्त्वे परं दाहः स्यात्, उत्तेजकवति च प्रतिबन्धके दाहो न स्यादिति चेत्? न, अधिकरणाभावावेव स्वरूपसम्बन्धः, तयोर्घटवद्भूतलचत्वरीयतदभावयोरपि स्वरूपसत्त्वे घटवति घटाभावव्यवहारापत्तेः।

किन्तूपश्लिष्टस्वभावत्वं, तच्च सम्बन्धान्तरं विना विशिष्टप्रत्ययजननयोग्यत्वम्। न च घटवद्भूतलचत्वरीयतदभावयोर्विशिष्टप्रत्ययजननयोग्यत्वमस्ति, घटवति कदापि घटाभावप्रत्ययानुदयात्। तदिहापि प्रतिबन्धकोत्तेजकाभावयोर्विशिष्ट-प्रत्ययजननयोग्यत्वं स्वरूपसम्बन्धः, अन्यथोत्तेजकवति प्रतिबन्धके चत्वरीयोत्तेजका-भावविशिष्टप्रत्ययापत्तेः। तादृशस्वरूपसम्बन्धाभावश्च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजक-सद्भावे उभयाभावे चाविशिष्ट एव।

यद्वा ऽदण्डपुरुषस्याभावे दण्डी पुरुषो न प्रतियोगी तस्यादण्डत्वाभावात्, किन्तु तदन्यः, तस्य चाभावो दण्डिसद्भावेऽपि दण्डमात्रसत्त्वे उभयासत्त्वे चाविशिष्ट इति। तस्मात् केवलपुरुषाभावव्यवहारोऽनुगतः। तदुक्तं ''न हि दण्डिनि सत्यदण्डानामन्येषां नाभावः, किन्तु दण्डाभावस्यैवेति युक्तम्, अन्यथा तत्राऽन्येषामिति पदस्य व्यर्थत्वापत्तेः। तथा केवलप्रतिबन्धकाभावे उत्तेजकसहकृतः प्रतिबन्धको न प्रतियोगी तस्य केवलत्वाभावात्, किन्तु तदन्यः, तदन्यस्य च केवलप्रतिबन्धकस्याभावे उत्तेजकसहितप्रतिबन्धकसत्त्वे उत्तेजकमात्रसत्त्वे उभयासत्त्वे वा विशिष्ट एवेति नाऽननुगमः। उत्तेजकापनये च केवलप्रतिबन्धकोऽस्तीति न तदभाव इति दाहो न भवती'ति।

ननु न प्रतिबन्धकाभावः कारणम्, एकदण्डान्वये घटोत्पत्तिवत् प्रतिबन्धकसत्त्वेऽपि तदन्यप्रतिबन्धकाभावेऽपि कार्यानुदयात्, न हि यावत् कारणतावच्छेदकावच्छिन्नं तावदन्वयेऽपि कार्यमिति चेत्? न, प्रतिबन्धकाभावत्वेन न हेतुत्वम्, अन्योन्याश्रयात्। किन्तु मण्याद्यभावत्वेनेत्युक्तत्वात्, तत्त्वेऽपि वा घटे दण्डसलिलादिवत्प्रतिबन्धकाभावकूटस्य दाहहेतुत्वात्।

यद्वा प्रतिबन्धकत्वावच्छिन्नप्रतियोगिक एवाभावः कारणम्। स च यावद्विशेषाभावनियत इति न प्रतिबन्धकसत्त्वेऽपरप्रतिबन्धकाभावेऽपि कार्योदयः। प्रतिबन्धकस्य च संसर्गाभावो हेतुः, तेन तत्सत्त्वे तदन्योन्याभावेऽपि न कार्यम्। अन्वयव्यतिरेकाभ्यां व्याप्तिकारणत्वयोर्ग्रहे संसर्गाभावस्य त्वयाऽपि हेतुत्वाङ्गीकारात्, अन्यथा सामग्रीव्यापकयोः सत्त्वे तदन्योन्याभावे कार्यव्याप्याभावापत्तौ कार्यकारणव्याप्यव्यापकभावे व्याघातात्। किञ्च तवापि प्रतिबन्धकाभावे शक्तिरस्तीति तत्सत्त्वे तदन्योन्याभावमादाय शक्तिसत्त्वप्रसङ्गः। न च स दुर्वचः, न वा प्रागभावादित्वेनाऽननुगमव्यभिचारौ, प्रतियोग्यधिकरणयोः संसर्गमारोप्य

यो निषेधः स संसर्गाभावः। भूतलं घटसंसर्गो नेत्यत्र भूतले घटसंसर्गस्य संसर्गो नारोप्यते किन्तु तादात्म्यम्।

वयन्तु ब्रूमः-यत्र प्रतियोगिनमधिकरणे समारोप्य निषेधावगमः स संसर्गाभावः, यत्र चाधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभावः। भूतलं न घट इत्यत्र भूतलस्य घटत्वावगमाद् घटत्वमेव च घटतादात्म्यम्। आरोपस्य हेतुत्वे किं मानमिति चेत्? मा भूत्तावदन्यत्, नेदमिह नेदमिदमित्यबाधितविलक्षणव्यवहारस्यैव तत्र मानत्वादिति। ननु प्रतिबन्धकात्यन्ताभावो न हेतुः, तस्मिन् सत्यपि कार्याभावात्। न हि करादौ मण्यत्यन्ताभावस्तत्संयोगात्यन्ताभावो वा, मणेः स्वावयववृत्तित्वात् संयोगस्य चाव्याप्यवृत्तित्वात्। अत एव न तत्प्रध्वंसप्रागभावौ हेतू, तयोः करादाववृत्तेः, गुणकर्मादिश्च प्रतिबध्यत्वानापत्तेश्च, तस्य जन्यधर्मानाश्रयत्वेन तत्र तयोरभावात्। न चान्यः संसर्गाभावोऽस्तीति चेत्? न, संसर्गावच्छिन्नप्रतियोगिकस्याभावविशेषस्य सति प्रतिबन्धकेऽभावात्। स च समयविशेषावच्छेदेन संसर्गितयाऽत्यन्ताभाव एव, तथैवान्वयव्यतिरेकावधारणात्। अथैवं प्रागभावप्रध्वंसस्थले समयविशेषावच्छिन्नात्यन्ताभावेनैवोपपत्तौ न तयोः सिद्धिः, अत्यताभावो ह्यव्याप्यवृत्तिस्तस्य चैकत्र भावाभावे क्वचिद्देशोऽवच्छेदकः क्वचित् काल इति चेत्? न, तत्र विद्यमानताविरोधित्वेनैव कपाले न घट इति प्रतीतिवैलक्षण्यात्, न त्वेवं भूतले घटाभावप्रतीतिः।

अन्ये तु भविष्यति घटो घटो नष्ट इति विलक्षणप्रतीत्या अत्यन्ताभावेनैकेन समर्थयितुमशक्यत्वाद् अन्य एवायं संसर्गाभाव इत्यप्याहुः।

एतेन विशेषणाभावविशेष्याभावतदुभयाभावघटितं सामग्रीत्रयमेवास्तु हेतुः, दाहे च जातित्रयकल्पनमिति प्रत्युक्तम्, अनुगतहेतुसत्त्वात्, दाहवैजात्यस्य योग्यानुपलब्धिबाधितत्वाच्च। व्यक्तियोग्यतयैव जातियोग्यत्वेन योग्येऽयोग्यजात्यभावात्। ननु प्रहरं मा दहेत्यादौ सावधिमन्त्रपाठे मन्त्रविनाशे दाहः स्यात्। न च सङ्कल्पविषयकालविशेष एव तत्र प्रतिबन्धकः, सङ्कल्पनाशसमयस्य स्वतोऽविशेषात्। न चोद्देश्यत्वमेव तत्र विशेषः, तस्य विनाशात्। न चोद्देश्यध्वंसोऽपि हेतुः, तस्य यामादूर्ध्वमपि सत्त्वात्। न च मन्त्रपाठजनितमदृष्टमेव

तत्र प्रतिबन्धकं तत्कालदाहाप्राप्तिकफलनाश्यत्वेन नाग्रे दाहप्रतिबन्ध इति वाच्यं, प्रतिबन्धकमन्त्रपाठस्यानिषिद्धत्वेनाविहितत्वेन चादृष्टाजनकत्वात् तदाचारस्य विगीतत्वेन श्रुत्याद्यननुमापकत्वादिति चेत्? मैवम्, उद्देश्यत्वज्ञानाहितसंस्कार-विषयकालस्य प्रतिबन्धकत्वात्। ननु प्रतिबन्धमकुर्वतामप्रतिबन्धकत्वेन शक्ति-मनपकुर्वतां मन्त्रादीनां न प्रतिबन्धकत्वमतः शक्तिसिद्धिः। न च कार्यानुत्पाद एव प्रतिबन्धस्ततज्जनकत्वमेव प्रतिबन्धकत्वमिति वाच्यं, कार्यानुत्पादो हि तत्र न तत्प्रागभावो न वा तदुत्तरकालसंसर्गः, तस्य मन्त्राद्यजन्यत्वादिति चेत्? न, मन्त्रादीनामप्रतिबन्धकत्वात्, तत्प्रयोक्तारस्तु प्रतिबन्धकाः, ते च किञ्चित्करा एव। मन्त्रादौ च कार्ये कारणोपचारात् स्वार्थिककन्प्रत्ययाद्वा तथा व्यपदेशः। प्रतिबन्धश्च सामग्रीविरहः। मन्त्राद्यभावघटितसामग्रीविरहश्च मन्त्रादेरेव, तदभावाभावस्य तत्त्वात्।

नव्यास्तु प्रतिबन्धकाभावो न कारणं न वा शक्तिः, किन्तु तत्तत्कालीनदाहविशेषं प्रति तत्तत्कालप्रतिबन्धेतरवह्नेः कारणत्वमिति प्रतिबन्धकाभावः कारणतावच्छेदको न तु कारणं दण्डत्ववत्। आकाशादौ त्वेकव्यक्तिके न यथा कारणत्वं क्वचित् प्रतिबन्धेऽप्यन्यत्र शब्दोत्पत्तेः, किन्तु भेर्यादिस्तथा कारणत्वमिति तत्प्रतिबन्धे शब्दोत्पत्तिर्नेत्याहुः।

तन्न, वह्निप्रतिबन्धकाभावयोरन्वयव्यतिरेकतौल्येनोभयस्यापि कारणत्वात्, न त्वेकमवच्छेदकं विनिगमकाभावात्। किञ्च यस्मिन् सत्यपि यदभावात् कार्याभावस्तस्य कारणत्वमायाति न तु तदवच्छेदकत्वम्। न हि कार्यायोगव्यवच्छेदः कारणत्वं, किन्तु नियतपूर्वसत्त्वं, तच्च सहकारिविरहप्रयुक्तकार्याभावेऽप्यक्षतम्। अन्यथा चक्रसहितदण्डत्वेन कारणत्वे सहकार्युच्छेदः। यस्य यद्धर्ममवगम्यैव नियतपूर्ववर्तित्वमवगम्यते तस्य तदवच्छेदकं दण्डत्वमिव, सहकारी तु न तथा।

ननु मा भूदर्थापत्तिः शक्तौ मानमनुमानन्तु स्यात्। तथाहि स्थिरोऽवयवी जनकदशाविशिष्टो वह्निरजनकदशाव्यावृत्तभावभूतधर्मवान् जनकत्वात् कुण्ठ-कुठारात्तीक्ष्णकुठारवद् दाह्यासंयुक्तवह्नेर्दाह्यसंयुक्तवह्निवच्च प्रतिबन्धकसत्त्वे संयोगादेरजनकदशावर्तित्वेन तदतिरिक्तातीन्द्रियभावभूतधर्मासिद्धिः। यद्यपि शक्ते-र्भावहेतुजन्यत्वेन नाजनकदशाव्यावृत्तत्वं, तथाप्युक्तविशिष्टायास्तथात्वम्। यद्वा धर्मेऽतीन्द्रियत्वं विशेषणम्। न च दृष्टान्तासिद्धिः, तुल्याधारत्वेऽपि लोह-

विशेषघटितकुठारे विलक्षणच्छिदाक्रियारूपकार्यबलादतीन्द्रियतीक्ष्णत्वसिद्धेः। अथ वा तथाभूत एव वह्निः कार्यानुकूलातीन्द्रियद्विष्ठधर्मसमवायी जनकत्वात् आत्मवत्, अतीन्द्रियत्वञ्च यद्यपि न साक्षात्काराविषयत्वम् अनित्यसाक्षात्काराविषयत्वं योगजधर्माद्यजन्यसाक्षात्काराविषयत्वं वा, परं स्वं वा प्रत्यसिद्धेः, संयोगादिपञ्चकजन्यज्ञानाविषयत्वमैन्द्रियकाणामपि, तथापि संयोगाद्यन्यतरप्रत्यासत्तिजन्यसाक्षात्काराविषयत्वमुभयवादिसिद्धम्, अन्यतरत्वञ्च तदन्यान्यत्वम्। न चाभावातीन्द्रियत्वं, तस्यासिद्धेः। न च वह्नौ स्थितिस्थापकेनार्थान्तरं, तत्र तदभावात् क्रियाया वेगेनादृष्टवदात्मसंयोगेन वोत्पत्तेः। न चात्मत्वं नित्यत्वं वोपाधिः, स्पर्शैकत्वादिमति द्व्यणुके साध्याव्यापकत्वात्। यद्वा पिण्डीभूतो वह्निः दाहानुकूलाद्विष्ठातीन्द्रयभावभूतधर्मवान् दाहजनकत्वाद् आत्मवत्। न चात्मत्वमुपाधिः, अदृष्टत्वस्य दाहानुकूलत्वेनादृष्टे साध्याव्यापकत्वात्। अथ वा करवह्निसंयोगः कार्यानुकूलातीन्द्रियधर्मसमवायी जनकत्वाद् आत्मवत् द्व्यणुकवच्च। न चात्मत्वं द्रव्यत्वं वोपाधिः, द्व्यणुकैकत्वस्पर्शादौ साध्याव्यापकत्वात्। यद्वा प्रतिबन्धकदशायां प्रत्यक्षसकलदाहहेतुसमवहितो दाहाजनको वह्निर्जनकदशावृत्तिकार्यानुकूलभावभूतधर्मशून्यः अजनकत्वात् कुण्ठकुठारवत्। यद्वा तथाभूतो वह्निः दाहजनकदशावृत्तिदाहानुकूलभावभूतधर्मशून्यः दाहाजनकत्वाद् दाह्यासंयुक्तवह्निवत्। अनुकूलत्वञ्च कार्याभावप्रयोजकाभावप्रतियोगित्वं कारणतदवच्छेदकसाधारणं, दृढदण्डत्वेन कारणत्वे दृढत्वाभावादपि कार्याभावदर्शनादिति।

उच्यते–साध्यं विनाप्युभयसिद्धप्रतिबन्धकाभावादेव जनकत्वादिहेतुसम्भवाद विपक्षबाधकाभावेनानुमानानामप्रयोजकत्वम्। यदि च सहचारदर्शनव्यभिचारा-

शक्तिवादे **करवह्निसंयोगो दाहानुकूलाद्विष्ठातीन्द्रियभावभूतधर्मवान् जनकत्वात्, आत्मवदिति।** अत्र प्रतिबन्धकाभावेनार्थान्तरवारणायोक्तं **भावेति।** अदृष्टवदात्मसंयोगेनार्थान्तरवारणायोक्त**मद्विष्ठेति।** संयोगत्वेनार्थान्तरवारणाया**तीन्द्रियेति।** कार्यानुकूलत्वेन सिद्ध्यत्वे तदर्थं **कार्यानुकूलेति।** तदपि विपक्षबाधकतर्कसूचनाय। दृष्टान्ते आत्मनि तादृशो धर्मो ऽ दृष्टमेवेत्यर्थः। अत्र प्रयोजकत्वादिति विशिष्टे समं हेतोर्व्याप्यव्यापकताग्राहकमानाभावादित्यर्थः। साध्ये भावभूतपदं व्यर्थं। व्यापकतानवच्छेदकत्वात्, गौरवात्।

दर्शनोपाध्यनुपलम्भमात्रादेव व्याप्तिग्रहस्तदा शक्तिसिद्ध्यनन्तरं तेनैव हेतुना शक्त्यतिरिक्तत्वप्रक्षेपेण शक्त्यतिरिक्तदाहानुकूलातीन्द्रियधर्मसिद्धिः। एवं तत्तदतिरिक्तत्वस्य प्रक्षेपात्तेनैव हेतुनाऽनन्ततादृशधर्मसिद्धिप्रसङ्गः। द्वितीयादितादृशधर्मं विनापि प्रथमानुमितशक्त्यैव जनकत्वाद्युपपत्तेर्न तादृशानन्तधर्मसिद्धिरिति चेत्? हन्तैवं शक्तिं विनापि तदर्थसिद्धेः किं शक्त्या। यद्वीश्वरानन्त्यवन्न शक्त्यानन्त्यमित्युक्तं, तदबोधात्। कार्यमात्रे हि कर्तृत्वेन कारणत्वं न त्वीश्वरत्वेन द्विकर्तृकत्वादिना वा, गौरवात्, घटे त्वार्थः समाजः। एवञ्च जनकदशाव्यावृत्तत्वेनैव प्रयोजकत्वं न तु भावभूतत्वेनेति गौरवात्। अपि च भावकार्यमात्रस्य समवायिकारणजन्यत्वेन शक्तेरपि तथात्वात् शक्त्यनुकूला शक्तिरपरासमवायिकारणे मन्तव्या, एवं सापि समवायिकारणजन्येति तदनुकूलशक्तिस्वीकारे शक्त्यनवस्था। किञ्च प्रथमानुमानेऽजनकत्वं न स्वरूपायोग्यत्वं, वह्नौ कुठारे च तदभावात्, किन्तु कार्यानुपधानम्। तथा च तदुपधानदशायामपि वह्नौ शक्तिः कुठारे तैक्ष्ण्यमिति बाधो दृष्टान्तासिद्धिश्च। लौहविशेषाणामेव सातिशयच्छिदाजनकत्वमतो नातीन्द्रियतैक्ष्ण्यसिद्धिः। अग्रिमचतुर्षु बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिः, तुल्योगक्षेमत्वेऽपि सन्दिग्धोपाधित्वेन दूषकत्वात्। अपि च जनकत्वस्य केवलान्वयित्वेन व्यतिरेकाप्रसिद्ध्या नान्वयव्यतिरेकी। न च जनकत्वाभावस्य शक्तावेव प्रसिद्धिः, अन्योन्याश्रयात्। न च गुरुवचनपरम्परात एव वाक्यार्थतया तत्प्रसिद्धिः, त्वन्नये सिद्धार्थस्याप्रमाणत्वात्। न च परार्द्धसंख्यायां साध्यजनकत्वव्यतिरेकयोः प्रसिद्धिः, अप्रत्यक्षायाः शब्दैकवेद्यायास्तस्याः प्रत्यक्षेण साध्यहेतुव्यतिरेकयोर्ग्रहीतुमशक्यत्वात्। एतेन पण्डापूर्वेऽपि तत्प्रसिद्धिरपास्ता।

स्यादेतत्, तृणारणिमणीनां वह्नौ कारणत्वादेकशक्तिमत्त्वमुपेयम्, एकजातीयकार्ये एकजातीयकारणत्वनियमात्। वह्न्यवान्तरजातीये तेषां प्रत्येकं कारणत्वमिति चेत्? न, वह्निजातीयत्वस्याकस्मिकतापत्तेः, कारणगतैकरूपमपहाय कार्यगतबहुतररूपकल्पने गौरवात्। तृणारणिमणिप्रभववह्निष्ववान्तरजातेरनुपलब्धिबाधितत्वाच्च। यत्र च तत्तदिन्धनप्रयोज्यं प्रदीपदारुदहनादौ वैजात्यमनुभूयते तत्र कारणेष्वेकशक्तिमत्त्वमपि नास्ति। किञ्च गोमय-वृश्चिकप्रभववृश्चिकादिषु

न च विशिष्टस्येति। तथा च विशिष्टाभावस्याप्यननुगतत्वेन तस्य कारणत्वासम्भवादित्यर्थः। **विशेषणविशेष्यसम्बन्ध इति**। तथा च यत्र विशेषणाभावः, यत्र वा विशेष्याभावः, यत्र वोभयाभावस्तत्रानुगत एव सम्बन्धाभावोऽस्त्येवेति भावः। तथा च प्रतिबन्धकाभावेनैवान्यथासिद्धिरिति मन्तव्यम्।

वैजात्यकल्पने तत्प्रभववृश्चिकेष्वपि वैजात्यं कल्प्यम्, एवं तत्प्रभवत्वं तत्प्रभवेष्वपीति वैजात्यानन्त्यं विजातीयकारणानां विजातीयकार्यजनकत्वनियमात्। न च तयोर्नैको वृश्चिको, बुद्धिव्यपदेशयोरविशेषात्। यदि विजातीयेष्वेककार्यशक्तिसमवायात् न कार्यविशेषात् कारणविशेषः, तदभावात्तदभावः क्वाप्यनुमीयेत तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसम्भवादिति चेत्? वह्निवृश्चिकादावेवमेतत् निरूपितनियतवह्न्यादिकारणकधूमादौ कुतो न तदनुमानम्। अन्यथा कार्यवैजात्येऽपि तृणस्य वह्निविशेष इव वह्नित्वेन धूमविशेष एव कारणत्वं न तु धूममात्रे। तृणादिप्रभवत्वग्रहानन्तरं वह्न्यवान्तरजातिग्रहवद् वह्नितदन्यजन्यत्वज्ञानानन्तरं धूमावान्तरजातिग्रहो भविष्यतीत्यप्याशङ्क्येत। बाधकं विना धूमत्वेन वह्निकार्यतेति चेत्? तर्हि बाधकं विना धूमं प्रति वह्नित्वेन कारणतेत्यपि तुल्यम्।

यत्तु तृणत्वेन कारणत्वग्रहस्योपजीव्यत्वात्तद्रक्षार्थं वह्नौ जातिविशेष एव कल्प्यत इति, तन्न, वह्नित्वेन कार्यत्वग्रहात्तद्रक्षार्थं तृणादौ शक्तिकल्पनौचित्यात्। यथा चान्वयव्यतिरेकाभ्यां तृणफूत्कारयोः परस्परसहकारित्वं तथैव तच्छक्तयोरपि परस्परसहकारित्वेन वह्न्यनुकूलत्वं, तथैव कार्यदर्शनात्। एवं तृणारणिमणिफूत्कारनिर्मन्थनतरणिकिरणानां वह्न्यनुकूलशक्तिमत्त्वेन कारणत्वेऽपि फूत्कारेण तृणादेव निर्मन्थनेनारणेरेव प्रतिफलिततरणिकिरणैर्मणेरेवाग्न्युपत्तिः, न तु मणिफूत्कारादिभ्यः, मणिफूत्कारशक्त्योः परस्परसहकारित्वविरहात्। यत्तु तृणफूत्कारादिस्तोमत्रये विशिष्टे शक्तिरिति, तन्न, तृणत्वेन गृहीतकारणताभङ्गप्रसङ्गादिति।

उच्यते–तृणारणिमणिफूत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्ति भावहेतुजनितानन्तशक्तिस्वीकारे गौरवं तावदनन्तव्यक्तिजन्यानन्तवह्निव्यक्तिषु जातित्रयकल्पने लाघवमिति तदेव कल्प्यते। न च जातौ योग्यानुपलब्धिबाधः, गोमयवृश्चिकप्रभववृश्चिकयोरीषन्नीलत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात्। तृणजन्यनानावह्निव्यक्तिषु तृणजन्यत्वज्ञानानन्तरं मणिजन्यव्यावृत्ताऽनुगतबुद्धिरस्ति जातिविषया। तृणजन्यत्वे नोपाधिनाऽसाविति चेत्? न, बाधकं विनानुगतबुद्धेस्तद्व्यङ्ग्य-

अत्र **यज्ञपत्युपाध्यायाः** यत्र विशेषणमभावः, विशेष्यं च भावरूपं तत्र विशिष्टाभावोऽपि स्वरूपसम्बन्धविरह एव। स चाननुगत एव। तथा च कथं सम्बन्धस्यापि विशिष्टत्वाङ्गीकारे नानुगम इति परिभावनीयमित्याहुः।

जातिविषयत्वनियमात्। न च गोमयवृश्चिकप्रभववृश्चिकपरम्परायामननुगतजात्यापत्तिः, गोमयजन्यवृश्चिकप्रभववृश्चिकेषु वृश्चिकप्रभवत्वजातेः सत्त्वात्। वह्निमात्रे च दाहस्पर्शवानवयवः, तत्संयोगः, पवनादिश्च कारणानि। न च तृणादिकं विनापि तदुत्पत्तिप्रसङ्गः, विशेषसामग्रीमादायैव सामान्यसामग्र्या जनकत्वात्।

ननु तृणारणिमणीनां वह्नौ कारणत्वग्रहे शक्तिवैजात्ययोरन्यतरकल्पनं, तद्ग्रहश्च नान्वयव्यतिरेकाभ्यां, व्यभिचारात्। अथारणिमण्यभाववति स्तोमविशेषे तृणं विना वह्निव्यतिरेकःतृणान्वये वह्निरित्यन्वयव्यतिरेकाभ्यां तत्रैव स्तोमे तदितरहेतुसकलसमवधाने तृणान्वयेऽवश्यं वह्निरिति नियतान्वयेन रासभादिव्यावृत्तेन तृणादिकारणत्वग्रह इति चेत्? न, तृणं विनापि वह्निरिति ज्ञाने सति वह्नि-नियतपूर्ववर्तित्वस्य कारणत्वस्य ग्रहीतुमशक्यत्वात्। तृणाजन्ये वह्नौ मणेः कारणत्वग्रह इति चेत्? न, व्यभिचारेण वह्नौ तृणजन्यत्वाग्रहे तदजन्यत्व-स्याप्यग्रहात्, वह्निमात्रस्यैव तदजन्यत्वाच्च। न च मण्यजन्यत्वेन तृणजन्यत्वग्रहः, अन्योन्याश्रयात्। यत्तु यत्र कारणताग्राहकं नास्ति तत्र व्यभिचारस्तद्ग्रहपरिपन्थीति, तन्न, अबाधितनियतपूर्ववर्तित्वाभावग्रहे तद्ग्रहस्यासम्भवाद् अभावप्रमायां भावज्ञानानुदयादिति।

उच्यते–उक्तग्राहकैर्वह्निनिष्ठकार्यतानिरूपितकारणतावच्छेदकरूपवत्त्वं तृणस्य तृणनिष्ठकारणतानिरूपितकार्यतावच्छेदकरूपवत्त्वं वह्नेर्वाऽकार्याकारणव्यावृत्तं रूपं परिच्छिद्यते, न तु तृणत्वेन कारणत्वं वह्नित्वेन कार्यत्वं वा, तच्चोभयथापि सम्भवति वह्नित्वेन कार्यतया तदनुकूलशक्तिमत्त्वेन च तृणादीणां कारणतया वह्नित्वावान्तरजातिविशेषेण कार्यतया वा, तत्र च विनिगमकमुक्तमेव।

अथ तृणारणिमणीनामभावत्रये न कार्यमभावत्रयाभावे कार्यमित्यन्वय-व्यतिरेकाभ्यामभावत्रयाभावत्वेन तृणादीनां कारणत्वमिति न व्यभिचारः, अभावाभावस्य भावपर्यवसन्नत्वादिति चेत्? अभावत्रयाणामभावः किं तृणादिप्रत्येकव्यापकोऽन्य एव, उत तृणादिप्रत्येकमेव। आद्येऽभावस्य कारणत्वमिति किमायातं तृणादिकारणत्वे, द्वितीये तृणस्य नारणिमण्यभावाभावत्वं, तदुभयापत्तेः।

इत एवास्वरसादाह **यद्वेति। विशेषणावच्छिन्नविशेष्याभाव** इति। तथा च विशेषणावच्छिन्नो विशिष्टाभावः सर्वत्र विशेषण-विशेष्य-तदुभयविरहेष्वविशिष्टो दाहे कारणमित्यर्थः। **न चाननुगम** इति। तथा चोक्तप्रकारेणानुगमे नाननुगम इत्यर्थः।

एतेनाभावत्रये न कार्यं तदभावे कार्यमित्यन्वयव्यतिरेकाभ्यां तृणादिप्रत्येकस्य कारणत्वग्रह इति परास्तम्।

स्यादेतत्, मा भूत् सहजशक्तिः, आधेयशक्तिस्तु स्यादेव, तथाहि व्रीहीन् प्रोक्षतीत्यत्र कालान्तरकार्यानुकूलोऽतीन्द्रियोऽतिशयः प्रोक्षणजन्योऽस्तीत्युभय-वादिसिद्धम्। स व्रीहिसमवेतो न वेति संशये व्रीहिनिष्ठ एव वाच्यः, कथमन्यथा प्रोक्षितानामेव तेषां कालान्तरेऽवघातादौ विनियोगः। न च मन्त्रादिसहकृतत्वमेव व्रीहिषु विशेषः, तेषां चिरध्वस्तत्वात्।

ननु कथं प्रोक्षितस्यैवावघातादावन्वयः 'व्रीहीनवहन्तीति' श्रुतेस्तन्मात्रा-न्वयेऽप्युपपत्तेः। अथ 'व्रीहिभिर्यजेत्' 'व्रीहन् प्रोक्षति' 'व्रीहीनवहन्ति' 'पुरोडाशैर्यजेते'त्यत्र यथा पुरोडाशे प्रकृत्यपेक्षायामवहतव्रीहीणामवयवानु-वृत्तिद्वाराऽन्वयः, प्रोक्षणे च यागार्थमुपात्तव्रीहीणां, तथाऽवघाते व्रीह्याकाङ्क्षायां प्रोक्षितानामेवान्वयः, बाधकं विना शब्दानां सन्निहितविशेषपरत्वनियमात्, 'व्यक्तिवचनानां सन्निहितविशेषपरत्वमिति' न्यायात्। अन्यथा प्रकरणादिसन्निहितत्यागे तदन्यसन्निधिकल्पने गौरवमिति चेत्? न, तर्ह्येकस्य द्वयं यत्र प्रोक्षणं तत्रावघातो न तु प्रोक्षणविशिष्टे, यत्र रूपं तत्र रस इति वत्। तथा च प्रोक्षणस्य शब्देन कालान्तरकार्यजनकत्वाऽबोधनात् कथं तन्निर्वाहार्थमतिशयकल्पनम्। 'प्रोक्षिता व्रीहयोऽवघाताय कल्पन्त' इति वाक्यशेषात् प्रोक्षणविशिष्टस्यावघाते कारणत्वबोध इति चेत्? अस्तु तावदेवं, तथापि प्रोक्षिता इत्यत्र भूते क्तानुशासनादतीतप्रोक्षणे व्रीहाववघातान्वयः,, तथा चावघाते प्रोक्षणध्वंसः कारणं न तु प्रोक्षणमिति चेत्?

मैवं, प्रोक्षणमवघातजनकं प्रमाणतस्तदर्थमुपादीयमानत्वाद् अवघाते व्रीहिवत्। न चासिद्धिः, अप्रोक्षितेऽवघाताभावादवश्यमवघातार्थं प्रोक्षणोपादानात्। न च प्रोक्षणध्वंस एव व्यापारः, प्रतियोगिनोऽहेतुत्वापातात्, अन्यथा यागादेरपि तथा स्यात्। फलस्य च नियतसमयोत्पत्तिकत्वमपूर्ववत् स्वभावादेव भविष्यति। न च प्रोक्षिता व्रीहयस्तथा, निरन्वयध्वस्तत्वेनोपलक्षणस्याहेतुत्वात्। कुरूणां क्षेत्रमित्यत्र तु कुरुज्ञानस्येतरव्यावृत्तक्षेत्रज्ञव्यवहारजनकत्वं न तु कुरोः, अन्यथा यागोपलक्षितो यज्वैव स्वर्गं फलिष्यति किमपूर्वेण। न च

अत एवोक्तं दण्डिपुरुषाभाव इत्यत्र दण्डाभावे पुरुषाभावे दण्डपुरुषाभावे सर्वत्राविशिष्ट इति। अत्र प्रतिपक्षानुमानं करतलवह्निसंयोगो न दाहानुकूलाद्विष्ठातीन्द्रियभावभूतधर्मवान् द्व्यणुकात्मान्यत्वात्, घटवत्। न चाप्रयोजकत्वं,

देवदत्ताद्यशरीरं देवदत्तविशेषगुणजन्यं जन्यत्वे सति तद्भागसाधनत्वात् तन्निमित्तस्रग्वदिति तत्सिद्धिः, जन्मान्तरीयैरदृष्टजनकत्वाभिमतैर्ज्ञानेच्छाप्रयत्नैः सिद्धसाधनात्। तस्मात् प्रोक्षणादयो भावभूतमतिशयं जनयन्त एव कालान्तरभाविकार्यजनकाः प्रमाणतस्तदर्थमुपादीयमानत्वाद् रोगचिकित्सावत्। स चातिशयो लाघवात् फलसमानाधिकरण इति व्रीहिनिष्ठ एव, तेन तत्समवहितत्वं व्रीहेः साक्षात्सम्बन्धात् पुरुषनिष्ठत्वेन च व्रीहिणो साक्षात्सम्बन्धाभावात् परम्परासम्बन्धे गौरवात् न साक्षात् व्रीहिसमवहितत्वं स्यात्। किञ्च यो यद्गतफलार्थितया क्रियते स बाधकं विना तद्गतमेव तदनुकूलमतिशयं जनयति रोगचिकित्सावत्। अथ प्रोक्षणे पुरुषसमवेतातिशयजनकं कालान्तरभाविकार्यजनकत्वे सति विहितत्वाद् यागवत्, अन्यथा विधिविरोधादिति चेत्? न, कृषिचिकित्सादिना व्यभिचारात्, अप्रयोजकत्वाच्च, तेन विनापि विधिसम्भवात्। अस्तु वा सकलव्रीहिनिष्ठ एक एव। न चैकव्रीहिनाशे तन्नाशापत्तिः, किञ्चिदाश्रयनाशस्य वृक्षादाविव कार्यानाशकत्वादिति।

उच्यते—अतिशयग्राहकमानाल्लाघवसहकृतात् स एक एव सिध्यति न नाना पुरुषनिष्ठश्च। तथाहि प्रोक्षणमपूर्वजनकं दृष्टद्वाराभावे सति कालान्तरभाविफलजनकतया विहितत्वाद् यागतदङ्गवत्। कृष्यादौ दृष्टद्वारसम्भवात् न व्यभिचारो न वाऽप्रयोजकत्वम्। यागदानहोमादितदङ्गानामपूर्वजनकत्वे दृष्टद्वाराभावे सति कालान्तरभाविकार्यजनकतया विहितत्वस्यैव प्रयोजकत्वात्, अन्यस्याननुगमात्। न च यो यद्गतफलार्थितया क्रियते स बाधकं विना तदगतमेव तदनुकूलं फलं जनयतीति नियमः, शत्रुवधमुद्दिश्य प्रवर्तिते श्येनयागादौ व्यभिचारात्, विपक्षे बाधकाभावाच्च। नापि यदुद्देशेन यत् क्रियते न तत्तत्र भाविकार्यानुकूलातिशयजनकमिति व्याप्तिः, हविस्त्यागादिभिर्व्यभिचारात्।

ननु प्रोक्षितव्रीहिणाऽदृष्टस्य जनितत्वात् बर्हिष इव पुनरुपयोगान्तरं स्यात्, विनियुक्तविनियोगविरोधात्, उपयोगे वा तज्जातीयान्तरमुपादीयेत, अविशेषात्। न, 'व्रीहीनवहन्ती' त्यत्रोक्तन्यायेन प्रोक्षितस्यैव व्रीहेरन्वयात्। विधेर्दुर्लङ्घ्यत्वात्। यथा 'बर्हिस्तृणोति' 'बर्हिषि हविरासादयती'त्यत्र।

दृष्टेनैव प्रतिबन्धकाभावेन दाहोपपत्तावदृष्टशक्तिरूपकारणकल्पनानवकाशात्। प्रतिबन्धकाभावस्यान्यत्र कारणत्वकल्पनात् क्लृप्तकल्प्यविरोधे हि लघुः क्लृप्तपरिग्रह इति न्यायात्। न चाभावस्य न कारणत्वम्, असत्त्वात् कारणतायाः सत्तागर्भत्वादिति

यद्वा विचित्राः संस्काराः केचिदुद्देश्यसहकारिण एवाग्रिमकार्यकारिणः। यथाऽभिचारसंस्कारो यं देहमुद्दिश्य प्रवृत्तस्तदपेक्ष एव तत्सम्बद्धस्यैव दुःखं जनयति, तथा प्रोक्षणसंस्कारा अपि उद्देश्यव्रीहिसहकृता एवाग्रिमकार्यकर्तारः, यथा च कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जलमुचामदृष्टसमवधानं तथा प्रोक्षणजन्यादृष्टवदात्मसंयोगाद्व्रीहीणामुत्तरक्रियाविशेषाः, कर्मकर्तृसाधनवैगुण्यात् फलाभावस्तुल्य एव। आगमिकत्वात् चाण्डालादिस्पर्शस्याहवनीयादिसंस्कारनाशकत्वश्रुतेर्व्यधिकरणस्याप्यपूर्वनाशकत्वं, धर्मनाशे कर्मनाशापारगमनवत् निषिद्धकीर्तनवच्च। किञ्च प्रोक्षणजन्यातिशयो व्रीहिनिष्ठो न नाना, आत्मवृत्तेरेकस्मादप्युक्तन्यायेन कार्योपपत्तेः। नाप्येकः, एकद्वित्राश्रयनाशानां प्रत्येकमननुगमेन कार्यनाशे आश्रयमात्रनाशस्य जनकत्वादेव व्रीहिनाशेन तन्नाशादपरप्रोक्षितव्रीहीणामनन्वयापत्तेः। अथ 'व्रीहीन् प्रोक्षती' तीप्सितद्वितीयाश्रुतेः क्रियाजन्येष्टफलभागित्वं व्रीहेरेवावगम्यते। न चापूर्वस्य व्रीहिवृत्तित्वं, साक्षात्सम्बन्धस्यैवौत्सर्गिकत्वादिति चेत्? न, धात्वर्थावच्छेदकसंयोगेन व्रीहिकर्मतोपपत्तेः। न च संयोगावच्छिन्न एव व्यापारविशेषः प्रोक्षणार्थः, तथा च कथं प्रोक्षणसाध्यतयाऽन्वय इति वाच्यं, संयोगस्योपलक्षणत्वेनापदार्थत्वात्। अन्यथा ग्रामं गच्छतीत्यादौ का गतिः, का वा 'सक्तून् प्रोक्षती'त्यादौ, तत्राधेयशक्त्यभावात्। किञ्च घटं साक्षात्करोतीत्यादौ क्रियाजन्यसंस्कारादीनां घटवृत्तित्वात् संस्कारस्य स्वरूपसम्बन्धेन घटवृत्तित्वं, वह्निमनुमिनोमीत्यादिवत्, प्रयोगसाधुरेव वा द्वितीयेति यदि, तदा प्रकृतेऽपि तथाऽस्तु। अथ प्रतिमादौ प्रतिष्ठाजन्यं न यजमानादृष्टं पूज्यत्वप्रयोजकं, भोगादिना तन्नाशेऽपि पूज्यत्वात्। तत्सत्त्वेऽपि चाण्डालादिस्पर्शेनापूज्यत्वात्, अन्यधर्मं प्रत्यन्यधर्मस्यानुपयोगाच्च। न च प्रतिष्ठाध्वंसस्तथा, तत एवोपजीव्यप्रतिष्ठाप्रयोजकत्वभङ्गापत्तेः। तस्मात् प्रतिष्ठाजन्याऽस्पृश्यस्पर्शादिनाश्या प्रतिमादिनिष्ठा शक्तिरभ्युपेयेति चेत्? प्रतिष्ठाविधिना प्रतिमादौ देवतासन्निधिरहङ्कारममकाररूपः क्रियते, स्वसादृश्यदर्शिनश्चित्रादाविव ज्ञानस्य नाशेऽपि संस्कासत्त्वात्। अस्पृश्यस्पर्शादिना तु

वाच्यं, सत्त्वं हि न तावत् सत्तासम्बन्धवत्त्वं कारणत्वे नियामकं, जात्यादेरनुगतमतिं प्रति कारणत्वाभावप्रसङ्गात्। स्वरूपसत्त्वमिति चेत्? अभावेऽपि तत्सत्त्वात्। तदुक्तं न ह्ययं तुच्छ इति। तत्र तत्र प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावानां

तन्नाशः। अचेतनदेवतापक्षे च यथार्थप्रतिष्ठितप्रत्यभिज्ञानस्यास्पृश्यस्पर्शादि-विरहसहकृतस्य तथात्वं 'प्रतिष्ठितं पूजयेदिति' विधिवलात्तत्प्रतिसन्धानस्यावश्यकत्वादिति प्राञ्चः।

नव्यास्तु प्रतिष्ठाविधिनैव तत्राधेयशक्तिवदपूर्वान्तरं जन्यते तददृष्टवदात्म-संयोगाश्रयस्य पूज्यत्वम्, अस्पृश्यस्पर्शेन तन्नाशे चापूज्यत्वमित्याहुः।

वयन्तु ब्रूमः-प्रतिष्ठितं पूजयेदिति विधिवाक्येन प्रतिष्ठायाः कारणत्वं न बोध्यते, किन्तु भूतार्थे क्तानुशासनादतीतप्रतिष्ठे पूज्यत्वं बोध्यते। तथा च प्रतिष्ठाध्वंसः प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शादिप्रतियोगिकानादिकालसंसर्गा-भावसहितः पूज्यत्वप्रयोजकः, स च प्रागभावोऽत्यन्ताभावश्च क्वचित्। कामिनीचरणाभिघातदोहदादिभिरशोकपुष्पोत्कर्षदर्शनादपि नाधेयशक्तिसिद्धिः, समयविशेषावच्छिन्नचरणदोहदादिसंयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताद्या-कृष्टभागान्तरजनितवृक्षादेव वा तदुपपत्तेः, कालान्तरे पुष्पाद्युत्कर्षाद् वृक्षावयवोपचयावश्यम्भावेन वृक्षभेदावश्यकत्वात्। नापि ताम्रकांस्यादावस्तु भस्मसंयोगादिजन्यशुद्धिरूपाऽऽधेयशक्तिः, तत्संयोगध्वंसस्य संयोगसमानकालीना-स्पृश्यस्पर्शादिप्रतियोगिकयावदनादिसंसर्गाभावसहितस्य शुद्धिपदार्थत्वात्।

भस्मादिसंयोगजनितः कांस्याद्युपभोक्तृनिष्ठः संस्कार एव शुद्धिरित्यन्ये।

अभिमन्त्रितपयःपल्लवादावपि समयविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्यथाद्यपनायकः, तत्तन्मन्त्रदेवतासन्निधिरेव वा। कलमबीजादीनामापरमाणवन्तभङ्गे तत्र चावान्तरजात्यभावे नियतकलमजातीयादिसिद्धिरपि परमाणुपाकजविशेषादेव, कार्यवृत्तिरूपादिसजातीयस्य पूर्वरूपादिविजातीयस्य परमाणौ पाकजरूपादेरु-भयसिद्धत्वात्। यथाहि कलमबीजं यवादेर्जात्या व्यावर्त्यते तथा तत्परमाणवोऽपि पाकजैरेव। एवं माघकर्षणजनितात् परमाणुपाकपरम्पराविशेपादेव हैमन्तिक-शस्योत्पत्तिः। एतेन लाक्षरसावसेकादयो व्याख्याताः। निमित्तविशेषजनितपाक-जात्तत्फलविशेषः, यथा हारीतमांसं हरिद्रानलसाधितमुपयोगात् सद्यो व्यापादयति नान्यथा साधितमित्यादि। यत्र च तोयतेजोवायुषु न पाकजो विशेषस्तत्रो-द्भवानुद्भवकठिनत्वादयो विशेषास्तत्तदुपनायकादृष्टविशेषादेव। तुलादौ चाधिवास-

प्रतिपादितत्वात्। किञ्चैवं स्वर्गं प्रति यागध्वंसस्यैव व्यापारत्वमिति तदुक्तपूर्वपक्षस्यालग्नकत्वापातात्, ध्वंसस्यापि सत्त्वविरहितयैव व्यापारत्वाभावेन शङ्काया अनुदयप्रसङ्गात्। प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वादिति समाधानस्याप्यनुत्थान-

पूर्वकतुलारोहणसामग्री तुल्यस्य सत्यासत्यप्रतिज्ञत्वसहिता प्राचीनधर्माधर्मफले तज्जयभङ्गौ जनयति। यद्वा अहं निष्पापः पापवान् वेति तुलाधिरूढाभिशस्तज्ञानविशेषसहिता सा तथा, तदाहुः-

तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुषः। इति।

अथ वा प्रतिज्ञाशुद्ध्यशुद्धी अपेक्ष्य तया धर्माधर्मौ जन्येते, ताभ्याञ्च जयपराजयौ, सत्यासत्यप्रतिज्ञाभिशस्ततुलारोहणस्येष्टानिष्टफलत्वेनार्थतो विधिनिषेधात् 'अभिशस्तः सत्यप्रतिज्ञो विजयकामस्तुलामारोहेदसत्यप्रतिज्ञो न तुलामारोहेदि' ति श्रुतेरुन्नयनात्। यद्वा तया देवतासन्निधिः क्रियते ताश्च कर्मानुरूपं लिङ्गमभिव्यञ्जयन्ति।

कस्तर्हि शक्तिपदस्यार्थः? कारणत्वम्। तच्च स्वस्वव्याप्येतरसकलसम्पत्तौ कार्याभावव्यापकाभावप्रतियोगित्वम्।

अथ वा यत्र कार्याभावव्याप्यता इतराभावावच्छिन्ना तत्कारणम्। बीजेऽङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते, इतरसमवधाने सति बीजादङ्कुरसम्भवात्। किन्त्वितराभावेनावच्छिद्यते, इतराभावे बीजस्याङ्कुराभावनियमात्। शिलाशकले त्वङ्कुराभावव्याप्यता शिलात्वेनैवावच्छिद्यते।

यद्वा ऽन्यासमवधानावच्छिन्नकार्यानुत्पत्तिव्याप्यत्वं कारणत्वम्। रासभादेः स्वत एव कार्याभावव्याप्यता, अन्यासमवधानस्य वैयर्थ्येनानवच्छेदकत्वात्।

अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं वा तत्त्वम्। अन्यथासिद्धत्वञ्च त्रिधा। येन सहैव यस्य यं प्रति पूर्ववर्तित्वमवगम्यते, यथा घटं प्रति दण्डरूपस्य। अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यं प्रति यस्य पूर्ववर्तित्वमवगम्यते, यथा शब्दं प्रति पूर्ववर्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य। अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वं, यथा गन्धवति गन्धानुत्पादाद गन्धं प्रति तत्प्रागभावस्य नियतपूर्ववर्तित्वकल्पनात् पाकजस्थले गन्धं प्रति रूपादिप्रागभावादीनामप्यन्यथासिद्धत्वम्। एतत्त्रितयव्यतिरेकनियतपूर्ववर्तित्वं कारणत्वम्। यागापूर्वयोस्तु यागपूर्ववर्तित्वेऽवगते न त्वगम्यमाने, यत्र जन्यस्य पूर्ववर्तित्वेऽवगते जनकस्य पूर्वभावोऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः।

प्रसङ्गापाताच्च। अपि च दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इत्यत्र सूत्रे उत्तरोत्तराभावानामुत्तरोत्तरं [प्रति]प्रयोजकत्वाभिधानमप्यसङ्गतं स्यात्। वस्तुतस्तु विनिगमनाविरहेण कार्यं प्रति विहितान्वयव्यतिरेकभावस्याभावस्येव

यत्र च जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगतिस्तत्र तद्द्वारा तस्य जनकत्वमेव। दण्डसंयोगभ्रमणयोस्तु युगपदेव पूर्वभावित्वग्रहः। स्वस्वानन्तरोत्पत्तिकसकलसमवधाने सत्यपि यस्याभावात् कार्यं न जायते सति च जायते तज्जातीयं प्रति तदनन्यथासिद्धम्।

अनन्यथासिद्धनियतपूर्ववर्तित्वं कारणत्वमित्यन्ये, तन्न, ईश्वरतद्बुद्ध्यादीनामसङ्ग्रहात्, तद्व्यतिरेकस्य तत्समवधानव्यतिरेकस्य वाऽभावात्। कार्यस्यान्यथानुपपद्यमानताव्यवस्थाप्यत्वं वाऽनन्यथासिद्धत्वम्।

नन्वेवमतिरिक्तशक्तौ साधकबाधकप्रमाणाभावान्नित्यं संशयः। न च साधकाभावस्य बाधकत्वं, बाधकाभावस्य साधकत्वादिति चेत्? न, साधकाभावेन वह्नावन्यत्र सिद्धातीन्द्रियधर्माभावसाधने लाघवं बाधकाभावेनातीन्द्रियधर्मसाधने च गौरवमिति साधकाभावात्तदभाव एव सिध्यतीति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ शक्तिवादः समाप्तः

कारणत्वे बाधकाभावात्, अनन्यथासिद्धनियतपूर्ववर्तित्वस्यैव कारणत्वात्, न तु तत्र भावत्वस्यापि प्रवेशो गौरवात्। मीमांसकैरपि प्रमां प्रति दोषाभावस्य कारणत्वाभ्युपगमाच्चेति संक्षेपः।।

श्रीरामचन्द्रयतिचन्द्रपदारविन्दनिस्यन्दमानमकरन्दमधुव्रतस्य।
श्रीचन्द्रशेखरयतीश्वरतार्किकस्य सूक्तीः सदैव सुधियः परिशीलयन्तु।।

इति श्रीचन्द्रशेखरभारतीकृतौ तत्त्वचिन्तामणिव्याख्यायां शक्तिवादः समाप्तः

इति परमहंसपरिव्राजकाचार्यवर्य-श्रीमच्चन्द्रशेखरभारती-
श्रीपादविरचिततत्त्वचिन्तामणिव्याख्यायाम् अनुमानविवेचनं समाप्तम्

।। मुक्तिवादः ।।

परमप्रयोजनन्त्वनुमानस्यापवर्गः, 'आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतेः। स च समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसः।

ननु नासौ पुरुषार्थः, अतीतदुःखध्वंसस्य सिद्धत्वात्, अनागतदुःखस्य ध्वंसयितुमशक्यत्वात्, वर्तमानस्य पुरुषप्रयत्नं विनैव विरोधिगुणनाश्यत्वात्। अतीतदुःखवत् हेतूच्छेदे पुरुषव्यापारः प्रायश्चित्तवदिति चेत्? न, तत्र किं हेतूच्छेदस्य सुखदुःखाभावेतरत्वेन स्वतोऽपुरुषार्थत्वात्, अनागतानुत्पादमुद्दिश्य क्रियमाणत्वाच्च यथा तत्र दुःखानुत्पादः पुरुषार्थस्तथेहापीति विवक्षितम्। अथानुत्पादस्य प्रागभावत्वेनासाध्यत्वात् फलान्तरस्याभावाच्चानन्यगतिकतया कण्टकनाशवद्दुःखसाधननाश एव स्वतः पुरुषार्थस्तथेहापीति वा। उभयथापि दुःखध्वंसस्यापुरुषार्थत्वमेव। न च तयोरपि पुरुषार्थत्वमिति वक्ष्यते।

मैवं, दुःखान्तरध्वंसस्याऽयत्नसाध्यत्वेऽपि तादृशदुःखध्वंसस्य मिथ्याज्ञानोच्छेदद्वारा पुरुषप्रयत्नाधीनतत्त्वज्ञानसाध्यत्वात्। तथाहि तत्त्वज्ञानात् सवासनमिथ्याज्ञानाभावे दोषानुत्पत्तौ प्रवृत्त्यभावेऽदृष्टानुत्पत्तौ जन्माभावे तादृशदुःखध्वंसो भवति। अथ चरमदुःख उत्पन्ने तद्ध्वंसस्तज्ज्ञानादेव भविष्यति, तदनुत्पादे तत्त्वज्ञानादपि न स्यादिति चेत्? न, प्रतियोगिवत्तत्त्वज्ञानस्यापि तद्धेतुत्वात्तुल्यवदुभयोरपि कारणत्वात्, तेन विना तदनुत्पत्तेः। अत एव शुकस्य तत्त्वज्ञानमुत्पन्नमिति तस्य तद्ध्वंस उत्पन्नो नास्मदादीनाम्। तत्र दुःखं नोत्पन्नमस्ति तेन स ध्वंसो नास्मदादीनामिति चेत्? अनादौ संसारे तत् कुतो नोत्पन्नम्? स्वकारणाभावादिति चेत्? न, अन्वयव्यतिरेकानुविधायिनस्तत्त्वज्ञानादन्यस्यान्विष्यमाणस्याभावात्। मुक्तौ स ध्वंसोऽस्त्येव तस्मिन् सति मुक्तिरस्त्येवेति स मुक्त्युपपादकोत्पाद्य इति सर्ववाद्युपगतम्। मुक्तिः सा अन्या वा? ननु ध्वंसार्थे दुःखमुपादेयं तदनुत्पाद्यध्वंसानुत्पादादिति चेत्? सत्यं, पुरुषार्थहेतुत्वेन लोके दुःखतत्साधनयोरप्युपादानदर्शनाद् अनागतकुम्भनाशार्थे मुद्गरादौ प्रवृत्तिदर्शनादनागतदुःखध्वंसार्थमपि प्रवृत्तिः। चरमदुःखध्वंसो न दुःखध्वंसत्वेनोद्देश्यः, अयत्नसिद्धदुःखान्तरध्वंसवदपुरुषार्थत्वादिति चेत्? न, समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसत्वेन तस्योद्देश्यत्वाद्दुःखासंभिन्नसुखवत्, तस्य च पुरुषप्रयत्नसाध्यत्वमेवेत्युक्तम्। एतेन दुःखध्वंसत्वमेव

मोक्षत्वं, तत्तदात्मयावद्दुःखध्वंससमुन्मूलनदशायान्तु तथा व्यपदेशः प्रतिपुरुषं दुःखध्वंसस्तोमस्य व्यक्तिस्थानीयत्वात् तेजोऽभावे संवलितेऽन्धतमसपदप्रयोगवत्, यथा संवलित एव द्वाविति बुद्धिव्यपदेशौ प्रवृत्तिरपि संवलनार्थमित्यपास्तं, मिलितानामसाध्यत्वात् मेलकस्यानतिरिक्तत्वेऽतिप्रसङ्गात्, अतिरिक्तत्वे जन्यस्य ध्वंसावृत्तेः अजन्यस्य पुरुषार्थत्वाभावात् साध्यतया संवलने भोगावश्यम्भावात्, अन्धतमसादौ तथासंवलन एव प्रयोगात्। अत एव संस्काराजनकभोग-विषयदुःखध्वंसः संस्काराजनकानुभवध्वंसो वा मुक्तिः। न चातिव्याप्तिः, जनकत्वस्याजनयत्यपि भावादिति निरस्तम्? अपुरुषार्थत्वात्।

अन्ये तु दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मुक्तिः। लोकेऽहिकण्ट-कादिनाशस्य वैदिके प्रायश्चित्तादौ पापनाशस्यानन्यगतिकतया दुःखसाधनध्वंसत्वेन पुरुषार्थत्वात्। अथाऽहिकण्टकादिपापं वा नाश्यतां तेन तज्जन्यं दुखं न भवतीति दुःखानुत्पादमुद्दिश्य प्रवृत्तेर्दुःखानुत्पाद एव प्रयोजनं न तु दुःखसाधनाभावः सुखदुःखाभावेतरत्वादिति चेत्? न, दुःखानुत्पादस्य प्रागभावत्वेनानादितया-ऽसाध्यत्वात्। न च तत्पालनं साध्यम्। पालनं हि न तत्स्वरूपं, तस्यासाध्यत्वात्। नोत्तरसमयसम्बन्धः, अभावे सम्बन्धिद्वयातिरिक्तस्य तस्याप्रामाणिक-त्वादनभ्युपगमाच्च। नापि सम्बन्धिद्वयस्वरूपं साध्यं, प्रागभावस्याप्यसाध्यत्वात् समयतदुपाध्योश्च प्रयत्नं विनैव सिद्धेः। अथ दुःखे द्वेषाद्यथा तदभावे इच्छा तथा दुःखसाधने द्वेषात्तदभावेऽपीच्छा, तया तत्साधने प्रवृत्तिरिति चेत्? न, यदिच्छया यत्साधने यस्य प्रवृत्तिस्तस्यैव तत्प्रयोजनत्वमिति दुःखसाधनाभावस्यैव प्रयोजनत्वात्। अथ चिकीर्षायोनिप्रयत्ने प्रयोजनज्ञानापेक्षा तेन विनोपाये चिकीर्षाविरहात्, न तु द्वेषयोनिप्रयत्ने, अनिष्टसाधनताज्ञानादहिकण्टकादौ द्वेषो द्वेषाच्च तत्त्यागानुकूलो यत्न उत्पद्यते। अयमेव हि द्वेषस्वभावो यत् प्रतिबन्धकं विना स्वविनाश्यविषयनाशानुकूलं यत्नमुत्पादयति अन्यथा प्रयत्नद्वैविध्यानुपपत्तेः। अत एव फलं विनैवोत्कटक्रोधान्धानामात्मघाते प्रवृत्तिरिति चेत्? न, प्रयोजनमनुद्दिश्य द्वेषमात्राद्दुःखैकफलके प्रेक्षावतां प्रयत्नानुत्पादात् क्रोधान्धानामपि तात्कालिकफलाभिमानोऽस्त्येव, उत्कटरागान्धानामिव परदारादावपि प्रवृत्तिरिति। तन्न, दुःखं मे मा भूदित्युद्दिश्य प्रायश्चित्तादौ प्रवृत्तेः दुखानुत्पादस्यैव प्रयोजनत्वात्। न च प्रागभावस्यासाध्यत्वं, दुःखकारणविघटनद्वारा तस्यापि कृतिसाध्यत्वात्। दुःखकारणसमवधानदशायां कृतौ सत्यां दुःखसाधननाशे सत्यग्रिमसमये प्रागभावस्वरूपमस्ति तेन विना नास्तीन्वयव्यतिरेकयोस्तत्र

सत्त्वात्। घटेऽपि कृतौ सत्यामग्रिमक्षणे तत्सत्त्वं तया विना नेत्येव कृतिसाध्यत्वं, न तु प्रागसतोऽग्रिमक्षणे सत्त्वमुत्पत्तिः गौरवात्, कृतिं विना न यत्स्वरूपं तत्कृतिसाध्यं तत्प्रागभावस्वरूपन्तु न तथेति चेत्? न, कृतिध्वंसेऽपि घटसत्त्वेनाग्रिमक्षणे इत्यावश्यकत्वात्। अत एव योगवत् क्षेमस्याप्यनागता-निष्टानुत्पादजनकस्य परीक्षकप्रवृत्तिविषयत्वमिति वक्ष्यते निषेधापूर्वप्रस्तावे।

ननु प्रायश्चित्तनाश्यपाजन्यदुःखस्य प्रागभावो यद्यस्ति तदा दुःखमावश्यकं तस्य प्रतियोगिजनकत्वनियमात्। नास्ति चेत्? तर्हि तदभावादेव दुःखानुत्पाद इत्युभयथाऽपि प्रायश्चित्तमफलम्। तस्मात् दुःखसाधनध्वंसमुखेन प्रागभावस्यापि साध्यतेति तत्रैव कृतिसाध्यतापर्यवसानाद् दुःखसाधनध्वंस एव पुरुषार्थो न तु दुःखानुत्पादार्थितयेति तत्र प्रागभावसत्त्वविचारो वायसदशनविचारवत्। अथ तदापि प्रागभावस्यासत्त्वे तदभावात् पापं न दुःखसाधनमिति न तन्नाशार्थं प्रवर्तते, तस्य सत्त्वे च पापमादायैव तस्य दुःखोत्पादकत्वनियमात् प्रायश्चित्ते सत्यपि गले पादिकया पापावस्थानमिति न ततः पापनाश इति चेत्? न, प्रागभावस्यासत्त्वेऽपि दुःखसाधनजातीयनाशस्य पुरुषार्थत्वात्, सत्त्वेऽपि पापान्तरमादायापि तस्य दुःखजनकत्वसम्भवात्, प्रायश्चित्तात् पापनाशः स्यादेवेति प्रागभावसत्त्वासत्त्वसन्देहेऽपि प्रायश्चित्तादौ प्रवृत्तिरप्रत्यूहैवेति।

उच्यते – तत्र दुःखप्रागभावोऽस्त्येव, तस्यैव दुःखानुत्पादरूपत्वेन पुरुषार्थत्वात्। स च पापनाशद्वारा प्रायश्चित्तसाध्य इति प्रागभावसत्त्वेऽपि न निष्फलं प्रायश्चित्तम्। तेन प्रागभावेन दुःखमवश्यं जननीयमिति चेत्? सत्यं, किन्तु पापान्तरमासाद्य। न चैवं प्रायश्चित्तमफलं, दुःखानुत्पादेन तस्य सफलत्वात्। न च दुःखानुत्पादस्यापि दुःखानुत्पादान्तरमेव फलं तच्च तत्र नास्तीत्यफलत्वं, स्वरूपसत एव तस्य पुरुषार्थत्वात्, अनवस्थानाच्च। अतोऽनेन पापेन दुःखं मे मा भूदिति विद्यमानपापनाशार्थं प्रायश्चित्ते प्रवृत्तिः। एतेन चीर्णप्रायश्चित्ते दुःखप्रागभावो नास्त्येव, अन्यथा तस्य प्रतियोगिनाश्यत्वे नानिर्मोक्षप्रसङ्गात्। न च प्रायश्चित्तवैफल्यं, न वा भगवतो दुःखमय-कर्मोपदेशकत्वेनानाप्तत्वं, तस्य पापध्वंसेनैव सफलत्वात् प्रागभावानिश्चयेऽपि नरकसाधनपापनिश्चयात्तन्नाशार्थं प्रवृत्तिरित्यपास्तं, दुःखसाधननाशस्य स्वतोऽपुरुषार्थत्वात्। पापान्तरेण तत्प्रतियोगिजनने तन्नाशात्। तस्मात् दुःखं मे मा भूदित्युद्दिश्य तत्साधनध्वंसार्थं प्रवृत्तिरिति दुःखानुत्पाद एव पुरुषार्थो न तु दुःखसाधनध्वंस इति स्थितम्। अपि च न तावद् दुःखमयसंसारबीजमिथ्याज्ञानस्य

ध्वंसो मुक्तिः, तत्त्वज्ञानात्तन्नाशेऽपि शरीरधर्मादिसत्त्वदशायां मुक्तिप्रसङ्गात्। नापि शरीरेन्द्रियबुद्ध्यादितन्निदानधर्माधर्मध्वंसः, अचीर्णप्रायश्चित्तकर्मणां भोगैकनाश्यत्वेन तत्त्वज्ञानानाश्यत्वात्, भोगद्वारा तन्नाशस्य च पुरुषार्थत्वादिति।

अपरे तु दुःखात्यन्ताभावो मुक्तिः। यद्यपि परदुःखात्यन्ताभावः स्वतःसिद्ध एव, दुःखात्यन्ताभावः स्वात्मन्यसम्भवी घटादावतिप्रसक्तोऽसाध्यश्च, तथापि दुःखसाधनध्वंस एव स्ववृत्तिदुःखस्यात्यन्ताभावसम्बन्धः, स च साध्य एव। न चावश्यकत्वेन स एव मुक्तिः, तस्य स्वतोऽपुरुषार्थत्वेन दुःखाभावमुद्दिश्य तत्र प्रवृत्तेः, "दुःखेनात्यन्तं विमुक्तश्चरती'त्यत्रात्यन्ताभावत्वेन मुक्तिश्रवणाच्च। यद्यपि दुःखसाधनध्वंसो न स्वतः पुरुषार्थः, अत्यन्ताभावश्च न साध्यः, तथापि विशिष्टस्य पुरुषार्थत्वं, विशेषणसाध्यत्वेन विशिष्टसाध्यत्वञ्च। अहिकण्टकादिनाशस्यापि तत्तद्व्यक्तिसाध्यदुःखात्यन्ताभावमुद्दिश्य तत्सम्बन्धत्वेनैव साध्यतेति, तन्न, अधर्मादिदुःखसाधनध्वंसस्य न मुक्तिनिर्वाहकत्वमित्युक्तत्वात्। किञ्च नानागतस्ववृत्तिदुःखस्यात्यन्ताभावसम्बन्धः साध्यः, मुक्तस्यानागतस्ववृत्तिदुःखानभ्युपगमात्, अभ्युपगमे वाऽमुक्तत्वापातात्, अत्यन्ताभावसम्बन्धविरोधाच्च। नाप्युत्पन्नस्ववृत्तिदुःखस्य, तद्वृत्तेस्तत्रात्यन्ताभावविरोधात्, तदभावस्य स्वतःसिद्धत्वात्, अतीतदुःखाभावस्यानुद्देश्यत्वाच्च। नापि परकीयदुःखात्यन्ताभावसम्बन्धः, तस्य स्वतःसिद्धत्वात्। अपि च दुःखसाधनध्वंसस्य नात्यन्ताभावसम्बन्धत्वे मानम्। दुःखसाधनध्वंसादावस्य दुःखस्यात्यन्ताभाव इति बुद्धिव्यपदेशौ स्त इति चेत्? न, तस्य समानाधिकरणदुःखाभावविषयत्वेनाप्युपपत्तावतिरिक्तसम्बन्धाविषयत्वात्। एतेन सर्वदुःखप्रागभावसम्बन्धाभावो मुक्तिः, घटादेश्च न मुक्तत्वं दुःखसाधनध्वंसविशेषितैतद्योगिनो मुक्तपदार्थत्वात्, तथैव व्यवहारात्, योगरूढिभ्यां पङ्कजादिपदवाच्यत्ववदिति परास्तं, प्रागभावसंसर्गाभावस्य स्वतोऽनुद्देश्यत्वात् प्रत्युतात्यन्ताभावस्यासाध्यत्वेन ध्वंसरूपत्वेन तस्य दुःखरूपतया हेयत्वात्।

प्राभाकरास्तु-आत्यन्तिकदुःखप्रागभावो मोक्षः। न च तस्यानादित्वेनापुरुषार्थत्वं, कदाचित् कृत्यनपेक्षत्वेऽपि प्रतियोगिजनकाधर्मनाशमुखेन तस्य कृतिसाध्यत्वात्, कृत्यधीनतत्त्वज्ञानादधर्मनाशे सत्यग्रिमसमये दुःखप्रागभावस्वरूपं नास्ति। तया च विनाऽधर्मेण दुःखाजननान्न तत्प्रागभावस्वरूपमस्तीति घटवत् कृतिसाध्यत्वात्। व्यवस्थापितञ्च त्वया प्रागभावस्य कृतिसाध्यत्वमहिकण्टकादिनाशप्रायश्चित्तक्षेमार्थिप्रवृत्तिस्थले। न चैवं युगपदधर्मध्वंस एव मुक्तिः,

प्रागभावस्यानादितया विवक्षितविवेकेन तत्रैव कृतिसाध्यत्वपर्यवसानादिति वाच्यम्, अधर्मध्वंसस्य स्वतोऽपुरुषार्थत्वात्, दुःखानुत्पादहेतुत्वेनैव तस्य प्रयोजनता वाच्या, सा च कथमसाध्यत्वे प्रागभावस्य स्यादिति। अत एव 'दुःखजन्मप्रवृत्तिदोषे'त्यादि सूत्रमपि सङ्गच्छते। अन्यथा मिथ्याज्ञानाद्यनुत्पादानां दुःखानुत्पादाहेतुत्वेनासङ्गतं स्यादित्यास्थिषत।

तदतिस्थवीयः। तथा ह्यस्तु प्रागभावस्य साध्यत्वं तथापि तस्य प्रतियोगिजनकत्वनियमात् मुक्तस्यापि दुःखोत्पादप्रसङ्गः। अधर्मशरीरादिसहकारिविरहान्न दुःखोत्पाद इति चेत्? तर्हि उत्तरावधिविधुरत्वेनानादेरत्यन्ताभावत्वापत्तौ प्रागभावत्वव्याकोपः। प्रतियोगिजनकनाश्यजातीयत्वेन तत्र प्रागभावत्वव्यपदेशो वस्तुतो नित्य एव स इति चेत्? न, नित्यत्वेनात्यन्ताभावरूपतया प्रागभावान्यत्वेन नाशजातीयत्वाभावात् प्रतियोगिजनकत्वनाशमुखेन तस्यासाध्यत्वाच्च। अपि च मुक्तेः प्रागभावस्य समानाधिकरणं भावि दुःखं न प्रतियोगि, तस्याभावात्, भावे वाऽमुक्तत्वापातात्। नापि समानाधिकरणमतीतं वर्तमानञ्च, तत्प्रागभावस्य विनष्टत्वात्। नापि व्यधिकरणम्, अन्यवृत्तिदुःखस्यान्यत्रात्यन्ताभावेन प्रागभावाभावात् तस्य प्रतियोगिसमानदेशत्वात्। न च दुःखमात्रं प्रतियोगि, स्वपरावृत्तेर्दुःखमात्रस्याप्रामाणिकत्वात् तस्यात्यन्तासतो नित्यानिवृत्तत्वेन तन्निवृत्तये प्रेक्षावत्प्रवृत्त्यनुपपत्तेः। अहिकण्टकादिनाशप्रायश्चित्तादिसाध्यदुःखप्रागभावस्य कलञ्जभक्षणप्रागभावस्य च समानाधिकरणमेव भावि दुःखं भक्षणञ्च प्रतियोगि।

ननु दुःखाभावो न पुरुषार्थः सुखस्यापि हानेस्तुल्यायव्ययत्वात्। न च बहुतरदुःखानुविद्धतया सुखस्यापि प्रेक्षावद्धेयत्वम्, आवश्यकत्वेन दुःखस्यैव हेयत्वात् सुखस्य निरुपधीच्छाविषयत्वात्, अन्यथा दुःखाननुविद्धतया तथात्वेन पुरुषार्थत्वविरोधादिति चेत्? न, सुखमनुद्दिश्यापि दुःखभीरूणां दुःखहानार्थं प्रवृत्तिदर्शनाद् दुःखाभावस्य स्वत एव पुरुषार्थत्वात्। न हि दुःखाभावदशायां सुखमस्तीत्युद्दिश्य दुःखाभावार्थं प्रवर्तते। वैपरीत्यस्यापि सम्भवे सुखस्याप्यपुरुषार्थत्वापत्तेः। अतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभावार्थिप्रवृत्तिप्रतिबन्धकम्। तस्मादविवेकिनः सुखमात्रलिप्सवो बहुतरदुःखानुविद्धमपि सुखमुद्दिश्य 'शिरो मदीयं यदि यातु यात्विति' कृत्वा परदारादिष्वपि प्रवर्तमानाः 'वरं वृन्दावनेऽरण्ये' इत्यादि वदन्तो नात्राधिकारिणः। ये च विवेकिनोऽस्मिन् संसारकान्तारे कियन्ति दुःखदुर्दिनानि कियती सुखखद्योतिकेति कुपितफणिफणामण्डलच्छायाप्रतिममिदमिति मन्यमानाः सुखमपि हातुमिच्छन्ति

तेऽत्राधिकारिणः। न च भोगार्थिनामप्रवृत्तौ पुरुषार्थता हीयते, कस्यचिदप्रवृत्तावपि चिकित्सादेः पुरुषार्थत्वात्।

अथ–

दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते।
न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः।।

पुरुषार्थत्वे सुखवज्ज्ञायमानत्वनियमात्, न च मुक्तिज्ञानं सम्भवतीति चेत्? न हि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः, किन्तु दुःखं मे मा भूदित्युद्दिश्येत्यतो दुःखाभाव एव पुरुषार्थः। तस्य ज्ञानन्तु स्वकारणाधीनं, न तु पुरुषार्थतोपयोगि, सुखीस्यामित्युद्दिश्य प्रवर्तते, न तु सुखं जानीयामिति, सुखमेव तथास्तु न तु तदवगमः तस्यावश्यकत्वेनान्यथासिद्धत्वात्, गौरवाच्च। किञ्च बहुतरदुःखजर्जरकलेवरा दुःखाभावमुद्दिश्य मरणेऽपि प्रवर्तमाना दृश्यन्ते। न च मरणे तस्य ज्ञानमस्ति। न ते विवेकिन इति चेत्? न, पुरुषार्थत्वे विवेकानुपयोगात्। किञ्च चरमदुःखानुभवेऽनागतदुःखध्वंसोऽपि विषयः, तथा चाग्रिमक्षणे तदुपरमः तद्विषयकञ्च विनश्यदवस्थं ज्ञानमस्तीति वर्ततमानमप्यचिरमनुभूयते। ज्ञानसमये मुक्तिलक्षणस्य सत्त्वाज्ज्ञानं मुक्तिविरोधि। प्रमाणन्तु–दुःखत्वं देवदत्तदुःखत्वं वा स्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्तिधर्मत्वात् सन्ततित्वाद्वा एतत्प्रदीपवत्। सन्ततित्वञ्च नानाकालीन-कार्यमात्रवृत्तिधर्मत्वम्। एवञ्च सुखत्वादावपि साध्यं,तेन समूलोच्छेदे मोक्षः। न चाप्रयोजकत्वं, सन्तत्युच्छेदे मूलोच्छेदस्य प्रयोजकत्वात्। प्रकृते च मिथ्याज्ञानस्य संसारमूलस्य श्रवणादिक्रमेणोत्पन्नतत्त्वज्ञानान्निवृत्तिः सम्भवत्येव। ''आत्मा ज्ञातव्यो न स पुनरावर्तत इति'' श्रुतिस्तत्र प्रमाणम्। रात्रिसत्रन्याये-नार्थवादोपनीतापुनरावृत्तेरधिकारिविशेषणत्वात्। स आत्मज्ञो न पुनरावर्तते न पुनः शरीरी भवतीत्यर्थः। 'आत्मा वा अरे श्रोतव्यो निदिध्यासितव्यः इत्युपक्रम्य 'दुःखेनात्यन्तं विमुक्तश्चरतीति' श्रुतिश्च मानम्।

आचार्यास्तु – ''अशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः'' इति श्रुतिस्तत्र मानम्। वावसन्तमिति यङ्लुकि। तेन संसारदशायां क्षणमात्रमशरीरत्वेन नान्यथासिद्धिः। ननु द्वन्द्वस्वरसेन मिलितसुखदुःखोभयनिषेधः प्रतीयते, स तु नित्यवत् प्राप्त एव, एकैकनिषेधे च वाक्यभेदापत्तिः। न च मुक्तौ प्रमाणमिति चेत्? न, द्वित्वेनैकेन रूपेणोपस्थितयोः प्रत्येकं निषेधान्वयेऽपि वाक्यभेदाभावात्, धवखदिरौ छिन्धीत्यत्र प्रत्येकं छिदान्वय इव, न हि तत्र मिलितच्छिदा। अपि

च न प्रियाप्रियरूपं किञ्चिदस्तीति मिलितनिषेधोऽप्येकैकान्वये प्रत्येकाभावे वा भवेत्, तत्रैकैकान्वयस्याशरीरे योग्यत्वात् प्रत्येकाभाव एव पर्यवस्यति। अत एव सर्वमुक्तिरपि, सर्वदुःखसन्ततिपक्षीकरणे तत्सिद्धेः, अन्यथा मुक्तिरपि न स्यात् तत्रैव व्यभिचारात्। यदि चोभयात्मान एव केचित्तदा तच्छङ्कया मोक्षार्थं न कश्चित्प्रवर्तेत। शमदमभोगानभिष्वङ्गादिमुक्तिचिह्नेन श्रुतिसिद्धेन सन्देहनिवृत्तिरिति चेत्? न, संसारित्वेन मुक्तियोग्यवात् न तु तद्विशेषणशमादिमत्त्वेन, सामान्ये बाधके सत्येव योग्यतया विशेषनिष्ठत्वात्। किञ्च शमादयः श्रुत्या मुक्तौ सहकारितया बोधिताः न तु योग्यतया। तत्त्वेऽपि संसारित्वेन तेऽपि साधनीयाः, शमादिकमपि हि कार्यं तत्रापि संसारित्वेनैव योग्यता सामान्ये बाधकाभावात्।

न च नित्यसुखाभिव्यक्तिर्मुक्तिः। सा हि न नित्या, मुक्तशरीरिणोरविशेषापातात्। नोत्पाद्या, तद्धेतुशरीराद्यभावात्, ज्ञानमात्रे सुखमात्रे वा तद्धेतुत्वावधारणात्। न च संसारदशायां तद्धेतुः, सामान्ये बाधकाभावात्। अत एव सर्गादौ शरीरकल्पना। किञ्च तज्जनकं न तावदात्ममनोयोगः, तस्यादृष्टादिनिरपेक्षस्याजनकत्वात्। विषयमात्रापेक्षणे तु संसारिदशायामपि तदभिव्यक्तिप्रसङ्गः। नापि योगजो धर्मः सहकारी, तस्योत्पन्नभावत्वेन विनाशित्वेऽपवर्गनिवृत्त्यापत्तेः। न च तज्जन्याभिव्यक्तिरनन्ता तस्या अपि तत एव नाशात्। अथ तत्त्वज्ञानात् सवासनमिथ्याज्ञाननाशे दोषाभावेन प्रवृत्त्याद्यभावाद्धर्माधर्मयोरनुत्पादे प्राचीनधर्माधर्मक्षयाद्दुःखसाधनशरीरादिनाश एव तत्र हेतुः, अत एव तस्यानन्त्येनाभिव्यक्तिप्रवाहोऽप्यनन्त इति चेत्? न, शरीरं विना तदनुत्पत्तेः, तस्य तद्धेतुत्वे मानाभावाच्च। न च मोक्षार्थप्रवृत्तिरेव तत्र मानं, दुःखहानार्थितया तदुपपत्तेः। न च नित्ये सुखे मानमस्ति। 'नित्यं विज्ञानमानन्दं ब्रह्म' 'आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यादि' श्रुतिर्मानमिति चेत्? न, उपजननापायवतोर्ज्ञानसुखयोरहं जानाम्यहं सुखीति भिन्नत्वेनानुभूयमानयोर्ब्रह्माभेदबोधने प्रत्यक्षबाधात्।

अथ सुखस्य ब्रह्माभेदबोधनादेवायोग्यतयाऽनित्यं सुखं विहाय वाक्यार्थत्वेन नित्यसुखसिद्धिः स्वर्गवत्, न तु नित्यसुखे सिद्धे तदभेदबोधनं येनान्योन्याश्रयः। यद्वा नित्यं सुखं बोधयित्वा तदभिन्नं ब्रह्म बोध्यते। न च वाक्यभेदः, वाक्यैकवाक्यत्वादिति चेत्? न, आत्मनोऽनुभूयमानत्वेन तदभिन्नस्य नित्यसुखस्याप्यनुभवप्रसङ्गात् सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमात्। तदननुभवे वाऽऽत्मनोऽप्यनुभवो न स्यात्। अथात्माभिन्नं नित्यसुखमनुभूयत एव सुखत्वं

तु तत्र नानुभूयत इति चेत्? न, सुखानुभवसामग्र्या एव सुखत्वानुभावकत्वात्। तस्मादानन्दं ब्रह्मेति मत्वर्थीयाच्प्रत्ययान्तत्वेनानन्दवत्त्वं बोध्यते नाभेदः, अन्यथा नपुंसकलिङ्गत्वानुपपत्तेः।

एतेन ब्रह्माद्वैततत्त्वसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः केवल्यात्माऽपवर्गे वर्तत इति वेदान्तिमतमपास्तं, स्वप्रकाशसुखात्मकब्रह्मणो नित्यत्वेन मुक्तसंसारिणोरविशेषप्रसङ्गात्, पुरुषप्रयत्नं विना तस्य सत्त्वादपुरुषार्थत्वाच्च। अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत्? अविद्या यदि मिथ्याज्ञानमर्थान्तरं वा, उभयथापि सुखदुःखाभावतत्साधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात्।

त्रिदण्डास्तु – आनन्दात्मकपरमात्मनि जीवात्मलयो मुक्तिः। लयश्च लिङ्गशरीरापगमः। लिङ्गशरीरञ्चैकादशेन्द्रियाणि पञ्च महाभूतानि सूक्ष्ममात्रया सम्भूयावस्थितानि जीवात्मनि सुखदुःखावच्छेदकानीत्याहुः।

तन्न, लिङ्गशरीरध्वंसस्य स्वतो दुःखसाधनाभावतयाऽपुरुषार्थत्वात्। न चोपाधिशरीरनाशे ह्यौपाधिकजीवनाशो लयः, स्वनाशस्यापुरुषार्थत्वात्, ब्रह्मणो नित्यत्वेन तदभिन्नस्य नाशानुपपत्तेः, भेदाभेदस्य विरोधेनाभावात्।

नाप्यनुपप्लवा चित्तसन्ततिरपवर्गः, आवश्यकत्वेनानुपप्लवस्य दुःखाभावस्य पुरुषार्थत्वे चित्तसन्ततेरपुरषार्थत्वात् शरीरादिकारणं विना चित्तसन्ततेरनुत्पादाच्च। न हि चित्तमात्रं तत्सामग्री, शरीरादिवैयर्थ्यापत्तेः। नापि दुःखत्वेनात्महानमेव मुक्तिः, सुखदुःखाभावेतरत्वेनापुरुषार्थत्वात्, ज्ञानरूपात्महानस्यायत्नसिद्धेरतिरिक्तहानस्याशक्यत्वात्।

यत्तु योगर्द्धिसाध्यनिरतिशयानन्दमयीं जीवन्मुक्तिमुद्दिश्य प्रवृत्तेः कारणवशादात्यन्तिकदुःखाभावरूपां मुक्तिमासादयतीति मतम्। तन्न, परममुक्तेरपुरुषार्थतापत्तेः, विरक्तस्य मोक्षेऽधिकारात् सुखोद्देशेनाप्रवृत्तेश्च।

मोक्षे च सर्वाश्रमिणामधिकारः, आश्रमचतुष्टयमुपक्रम्य 'ब्रह्मसंस्थोऽमृतत्वमेतीति' श्रुतेः, सङ्कोचे कारणाभावात्, आकाङ्क्षाया अविशेषेणानन्तर्यस्याप्रयोजकत्वात्। कथन्तर्हि 'मोक्षाश्रमश्चतुर्थो वै यो भिक्षोः परिकीर्तितः' इति प्रव्रज्यां मोक्षाश्रममाहुः, गृहस्थस्य च पुत्रदारादिसङ्गो दुर्वार इत्यसाधारण्येन तथोपदेशात्, 'तत्त्वज्ञाननिष्ठो गृहस्थोऽपि हि मुच्यत' इत्यागमाच्च। एवं स्थिते मोक्षमुपक्रम्य 'आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति श्रुतिः श्रुतिभ्यश्च शरीरादिभिन्नमात्मानमवधार्य शास्त्रेण पदार्थान्

विविच्य तद्बोधितोपपत्तिभिस्तस्य स्थिरीकरणरूपं मननं विदधाति। न च शब्दोपपत्तिजन्यतत्त्वज्ञानात् साक्षात्कारिसंसारबीजसवासनमिथ्याज्ञाननिवृत्तिः, दिङ्मोहादौ तथानुपलब्धेः। अतः श्रुतिस्मृत्युदितविधिना चिरनिरन्तरादरसेवितनिदिध्यासनजन्ययोगजधर्मादात्मतत्त्वसाक्षात्कारं संसारबीजसवासनमिथ्याज्ञानोन्मूलनसमर्थमासाद्य दोषाभावात् प्रवृत्त्यादेरभावेऽनागतधर्माधर्मानुत्पादेऽनादिभवसञ्चितकर्मणां भोगेन क्षयादपवृच्यते। उपदेशमात्राच्छरीरभिन्नात्मावगमेऽप्यन्यपरत्वशङ्कया शङ्कासूकस्य नाऽश्रद्धामलक्षालनमिति मननमावश्यकम्। तथा च'मन्तव्यश्चोपपत्तिभिः' इति श्रुतिरेवोपपत्तिबोधकस्य शास्त्रस्यापवर्गहेतुत्वं बोधयति, मननस्य तदेकसाध्यत्वात्। एवञ्च शमदमब्रह्मचर्याद्युपबृंहितयावन्नित्यनैमित्तिकसन्ध्योपासनादिकर्मसहितात्तत्त्वज्ञानान्मुक्तिः।

स्यादेतत्, ज्ञानकर्मणोर्न समप्राधान्येन समुच्चयः, कर्मणां स्ववाक्यात् फलान्तरार्थत्वेन श्रुतत्वान्मोक्षार्थकल्पनाविरोधात्, तत्त्वज्ञानस्य कर्मनैरपेक्ष्येण मुक्तिहेतुत्वप्रतीतेश्च। नाप्यङ्गाङ्गिभावेन, तथा हि न कर्म सन्निपत्योपकारकं, तत्त्वज्ञानशरीरानिर्वाहकत्वात्। नापि प्रयाजादिवदारादुपकारकं, स्ववाक्यत एव कर्मणां प्रयोजनलाभेन फलवत्सन्निधावफलत्वाभावात्। उपपत्तिविरुद्धश्च ज्ञानकर्मसमुच्चयः, काम्यनिषिद्धयोस्त्यागात्। नाप्यसङ्कल्पितफलवत्काम्यकर्मसमुच्चयः, चतुर्थाश्रमविधिविरोधात्। अत एव न यावन्नित्यनैमित्तिकसमुच्चयोऽपि। नापि यत्याश्रमविहितेन कर्मणा, तत्त्वज्ञाने सति गृहस्थस्यापि मुक्तेः—

न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि हि मुच्यते।।

इति स्मृतेः।

न चाऽननुगतमपि साधनं, स्वर्गवदपवर्गे प्रकारभेदाभावात्। न चापवर्गार्थिकर्तव्यतया विहितानि कर्माणि, येन तत्समुच्चयः स्यात्। ''संन्यस्य सर्वकर्माणीति' स्मृतेः सर्वकर्मसंन्यासो ज्ञानमात्राच्च मोक्ष इति।

मैवं, स्वस्वाश्रमविहितेन कर्मणा ज्ञानस्य समप्राधान्येन समुच्चयात् ज्ञानकर्मणोस्तुल्यत्वेन मुक्त्यर्थत्वाभिधानात्। तथा च भगवद्गीता –

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।।

श्रीविष्णुपुराणे

तस्मात् तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः।
तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामते।।

हारीतः–

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम्।।

श्रुतिश्च – ''सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येणेति''। एतन्मूलकमेव –

परिज्ञानाद् भवेन्मुक्तिरेतदालस्यलक्षणम्।
कायक्लेशभयाच्चैव कर्म नेच्छन्ति पण्डिताः।।

ज्ञानं प्रधानं न तु कर्महीनं कर्म प्रधानं न तु बुद्धिहीनम्।
तस्मात्तयोरेव भवेत् प्रसिद्धिर्न त्वेकपक्षो विहगः प्रयाति।।

न च फलान्तरार्थत्वेन श्रुतस्य कर्मणः फलान्तरार्थत्वमनुपपन्नं, तथा-वाक्यस्वरसात् ज्ञानतुल्यताप्रतीतेः। तत्तत्फलजनकत्वेऽपि कर्मणां शब्द एव मानमेवमन्यत्रापि। अथवा आरादुपकारितया अङ्गाङ्गिभावेन समुच्चयः, स च प्रयाजादिवदपूर्वद्वारैव। यत्तु जडभरतोपाख्याने –

न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिम्।
न ददर्श च कर्माणि शास्त्राणि जगृहे न च।।

तद् योगिधर्मसङ्गत्यागार्थं जातिस्मरत्वेन न शिक्षितानीत्येवं परं वा। तदुक्तं- ''जज्ञे जातिस्मरो द्विजः सर्वविज्ञानसम्पन्नः सर्वशास्त्रार्थतत्त्ववित्'' इति।

अत्र केचित्- अनुत्पन्नतत्त्वज्ञानस्य ज्ञानार्थिनस्तत्प्रतिबन्धकाधर्मनिवृत्तिद्वारा प्रायश्चित्तवदारादुपकारकं कर्म, सन्निपत्योपकारकन्तु तत्त्वज्ञानम्। उत्पन्नतत्त्वज्ञानस्य तु अन्तरालब्धवृष्टेः कारीरीसमाप्तिवदारब्धाश्रमपरिपालनं लोकसङ्ग्रहार्थम्। यदपि लोकसङ्ग्रहो न प्रयोजनं सुखदुःखाभावतत्साधनेतरत्वात्, तथाप्यकरणे लोकानां विगानान्निन्द्यत्वेन यज्ज्ञानं तत्परिहारार्थं तत्कर्मसाध्यदुःखोत्पादनेना-धर्मक्षयार्थञ्चेति। तन्न, तत्त्वज्ञानं प्रत्यङ्गत्वपक्षे कर्मणामपूर्वद्वारा, जनकत्वं दुरितध्वंसकल्पनातो लघुत्वात्। तस्माद् यानि कर्माण्युपनीतमात्रकर्तव्यत्वेन विहितानि सन्ध्योपासनादीनि तानि मोक्षार्थिभिरवश्यं कार्याणि, तत्परित्यागस्य

प्रत्यवायहेतुत्वेनाशास्त्रीयत्वात् सङ्कोचे मानाभावात्। निषिद्धानि काम्यानि च बन्धहेतुत्वात् मुक्तिपरिपन्थीनीति त्यज्यन्ते। धनमूलानि च धनत्यागादेव त्यज्यन्ते। सोऽयं 'संन्यस्य सर्वकर्माणि' इत्यस्यार्थः। अयमेव हि संन्यासपदार्थः। तथा च गीता–

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
नियतस्य तु संन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः।।इति।।

तत्त्वज्ञानं धर्मद्वारा मुक्तिसाधनं विहितत्वेन धर्मजनकत्वनियमादिति धर्मस्यैव प्राधान्यम्। स च धर्मो मुक्त्यैव फलेन नाश्यत इति केचित्। तन्न, मिथ्याज्ञाननिवृत्त्या दृष्टद्वारेणैवोपपत्तावदृष्टकल्पनानवकाशात्। अन्यथा भेषजादिष्वपि तथा स्यात्। एवञ्च तत्रैव विहितत्वस्य व्यभिचारः।

अत्र वदन्ति–संसारकारणोच्छेदक्रमेण कार्योच्छेदान्मोक्षः। एवञ्च तत्त्वज्ञानमात्रादेव मिथ्याज्ञानोच्छेदादपवर्गः। तत्र न तस्य कर्मसहकारित्वं, मिथ्याज्ञानोन्मूलने कर्मविनाकृतस्यैव तस्य दिङ्मोहादौ हेतुत्वावधारणात्। कर्मणामपवर्गहेतुताश्रुतिश्च तत्त्वज्ञानद्वाराप्युपपद्यते, साक्षात्तस्याश्रुतेः, तत्त्वज्ञानवतश्चाधिकारे नित्याकरणेऽपि दोषाभावेन प्रत्यवायाभावोपपत्तेः। अन्यथा भोगार्थं विहितनिषिद्धाचरणेन धर्माधर्मोत्पत्तौ मोक्षाभावप्रसङ्गः।

ननु तत्तत्तीर्थमहादानस्नानकाशीमरणादिकर्मणां तत्त्वज्ञाननैरपेक्ष्येण मुक्तिहेतुत्वं श्रूयते, तत्कथं तत्त्वज्ञानमेव तद्धेतुः। न च तेषां तत्त्वज्ञानमेव व्यापारः, अनुपदं तत्त्वज्ञानानुत्पादाददृष्टद्वारा तद्धेतुत्वं वाच्यम्। तथा चापवर्गकारणमेवादृष्टं कल्प्यतां लाघवात्। न च तत्त्वज्ञानप्रतिबन्धकाधर्मनाश एव तेषां व्यापारः, प्रतिबन्धकदुरितध्वंसतोऽपूर्वस्य लघुत्वात्। अथ तत्तत्कर्मणामननुगमात् कथं मुक्तिरनुगता, दुःखध्वंसे प्रकाराभावादिति चेत्? न, गुणनाशे समवाय्यसमवायिनाशविरोधिगुणानां नाशकत्वदर्शनात्। तत्तन्नाशविशेषे तु तत्तद्धेतुरिति चेत्? तर्हि तत्तद्दुःखध्वंसे तत्तत्कर्मणामपि तथात्वमस्तु, तथापि तत्त्वज्ञाने तत्प्रतिबन्धकदुरितध्वंसे चाननुगतानामेव तत्कर्मणां जनकत्वं, मुमुक्षुमुद्दिश्य विहितत्वादनुगतमस्तीति चेत्, न, ज्ञानकर्मणोर्निरपेक्षसाधनताश्रवणाद् व्रीहियववद्विकल्प एव। निरपेक्षैकसाधनावरुद्धेऽपरसाधनान्वयो न विकल्पं विना सम्भवति, आकाङ्क्षाविरहादिति न्यायात्। साहित्यबोधकं विनैकं प्रत्यनेकस्य हेतुता यत्र शब्देन बोध्यते तत्र विकल्पेनान्वयो यथा व्रीहियवयोरिति व्युत्पत्तेर्वा।

वस्तुतस्तु दृढभूमिसवासनमिथ्याज्ञानोन्मूलनं विना न मोक्ष इत्युभयसिद्धम्। तादृशमिथ्याज्ञाननाशे चान्वयव्यतिरेकाभ्यां तत्त्वज्ञानकरणमवधारितमतो न तेन विना स इति तत्रापि तत्त्वज्ञानमावश्यकम्। यद्यपि मिथ्याज्ञाननाशे विरोधिगुणमात्रस्यैव तद्धेतुत्वं, तथापि मिथ्याज्ञानप्रागभावासहवृत्तिमिथ्याज्ञानध्वंसस्य तदेकसाध्यत्वम् 'आत्मा ज्ञातव्यः, न स पुनरावर्तते' इत्यादिश्रुतेर्मोक्षं प्रति तत्त्वज्ञानस्य हेतुत्वावधारणात्। 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति श्रुत्या तत्त्वज्ञानं विना न मोक्षः किन्तु तस्मिन् सत्येवेति प्रतिपादनाच्च। अन्यथा स्वर्गादौ न शरीरादयः कल्प्येरन्, कर्मणां तत्त्वज्ञानद्वारापि मुक्तिजनकत्वसम्भवात्, प्रमाणवतो गौरवञ्च न दोषाय। कर्मणां तत्त्वज्ञानविशेष एव जनकत्वमतो न तत्राननुगमो दोषाय। वाराणसीमरणस्य तत्त्वज्ञानफलजनकत्वमागमादेवावगम्यते। तत्त्वज्ञानाददत्तफलान्येव कर्माणि प्रायश्चित्तादिव विनश्यन्ति, अनन्यथासिद्ध-शब्दबलात्। न च प्रायश्चित्तस्य दुरितोत्पत्तिनिमित्तकत्वं, पापनाशफलश्रवणात्। अत एव न ब्रह्महत्यादीनां प्रायश्चित्तदुःखमेव फलं, नरकफलश्रुतिविरोधात् प्रायश्चित्तविधिवैयर्थ्याच्च दुःखैकफलत्वेन तत्राप्रवृत्तेः। नापि कर्मान्तराधिकार एव फलं, महापातकातिरिक्तेऽनधिकाराभावात्। अन्यथा यत्किञ्चित्पापवतोऽकृत-प्रायश्चित्तत्वेनानधिकारापत्तेः, प्राणान्तिके तदभावाच्च। श्रूयते हि-

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परात्मनि।।

स्मृतिश्च-

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन!।इति।।

''नाभुक्तं क्षीयते कर्म' इत्यत्र च प्रायश्चित्तादिस्मृतितः सङ्कोचस्यावश्यकत्वेन शब्दबोधितनाशकानाश्यपरत्वं लाघवात्, न तु तत्तदन्यकर्मपरत्वं गौरवात्, पापपुण्यक्षयहेतूनां बहुतरत्वात् ज्ञानस्य नाशकत्वं शब्दबोध्यमित्युक्तम्।

अथ भस्मसात्पदस्य लाक्षणिकत्वेन यथा वह्नेः परम्परया भस्म तथा ज्ञानात् कर्मक्षय इत्यर्थः। तथा च 'नाभुक्तं क्षीयते कर्म' इति स्मृतिरुत्सर्गतो भोगेनैव क्षयमाह। अनन्यथासिद्धप्रायश्चित्तविधिना सा बाध्यते। ज्ञाननाश्यत्वञ्च भोगद्वारापि सम्भवतीत्यबाधे सम्भवति न बाधकल्पना नेति चेत्? न, कर्मणो भोगनाश्यत्वे ज्ञानस्यानाशकत्वात्। न हि भोगस्तत्त्वज्ञानव्यापारः, तथाऽश्रवणात्, तेन विनापि कर्मण एव तदुपपत्तेश्चाकर्मणो भोगनाश्यत्वे तत्त्वज्ञानानुपयोगात्। यत्तु माभुक्तमिति स्मृतिविरोधेन क्षीयन्त इत्यादिश्रुतेरन्यथावर्णनम्। तन्न, स्मृतेः प्रत्यक्षवेदबाधितत्वेन तद्विरुद्धार्थकवेदाननुमापकत्वात्। वामदेवसौभरिप्रभृतीनां

कायव्यूहश्रवणात्तत्त्वज्ञानेन कायव्यूहमुत्पाद्य भोगद्वारा कर्मक्षय इति चेत्? न, तपःप्रभावादेव तत्त्वज्ञानानुत्पादेऽपि कायव्यूहसम्भवात्। भोगजननार्थञ्च कर्मभिरवश्यं तत्तत्कायनिष्पादनमिति न तत्र तत्त्वज्ञानोपयोगः, यौगपद्यञ्च कायानां तज्जनककर्मस्वभावात् तपःप्रभावाद् वा। न च ज्ञानं भोगद्वारा कर्मनाशकमित्युक्तम्। एतेनागमयोः परस्परविरोधादनिर्णये विमतिपदं कर्म भोगनाश्यं प्रायश्चित्ताद्यनाश्यत्वे सति कर्मत्वाद् भुक्तभुज्यमानकर्मवदिति अनुमानान्निर्णय इत्यपास्तं, ज्ञानस्य प्रायश्चित्ततुल्यत्वेनाप्रयोजकत्वात्, श्रुतिबाधितत्वाच्च, शब्दबोधितनाशकानाश्यत्वस्योपाधित्वाच्च, अकृतप्रधानेन कृतप्रधानेन चाङ्गापूर्वेण व्यभिचाराच्च, तस्य प्रधानयागादिनाश्यत्वात्। न च तस्यापि यागस्येव स्वर्गफलकत्वमिति तन्नाश्यत्वमेव, अधिकृताधिकारेऽपि स्वर्गकामस्याधिकारात्, अन्यथा निष्फलेऽप्रवृत्तेरिति वाच्यं, स्वर्गफलत्वेऽङ्गत्वविरोधात्। प्रवृत्तिश्च फलवद्यागान्विततया, तदुक्तम्–''यागे रागादङ्गे वैधीति''।

ननु ''तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्यते कैवल्येन'' इति श्रुतेस्तावदेवास्योत्पन्नतत्त्वज्ञानस्य चिरं विलम्बो यावन्नोत्पन्नकर्मणो विमोक्षः, अथ संपत्स्यते कैवल्येनेत्यत्र भोगेन क्षपयित्वेति शेषः। न च शेषे मानाभावः, सत्यपि विज्ञाने कर्मावस्थाने क्लृप्तसामर्थ्यस्य भोगस्यैव नाशकत्वेनाक्षेपादिति चेत्? न, तत्त्वज्ञाने सति तत्त्वज्ञानदशायां न मोक्षः किन्तु तदग्रिमक्षण इत्यर्थत्वेनाप्युपपत्तेः। यत्तु अकृतप्रधानाङ्गापूर्वाभिप्रायमेतद्–'ज्ञानाग्निः सर्वकर्माणि' इत्यादि, तेषां कार्याणां नाशकान्तराभावादिति। तन्न, प्रधानार्थतया क्लृप्तानां तदभावे तत्सामग्र्यसिद्धेः, तत्सत्त्वेऽपि सर्वकर्मपदस्य कर्मान्तरापरिग्राहकस्य सङ्कोचे मानाभावात्। यदपि भस्मसात्करणादिना फलाजनकत्वमुच्यते तत्त्वज्ञानात् कृतमपि विहितं कर्म न फलायेति, तथा च श्रुतिः ''तद्यथा पुष्करपलाशे नापः श्लिष्यन्ते' इत्यादि। तदपि न, न हि भस्मसात्करणं क्षयश्चानुत्पत्तिरुच्यते। न च लक्षणा, मुख्ये बाधकाभावादिति।

उच्यते – कर्मणो भोगनाश्यत्वेऽपि ज्ञानस्य कर्मनाशकत्वं भोगस्य तत्त्वज्ञानव्यापारत्वात्। न च भोगमात्रस्यैव कर्मनाशे सामर्थ्यात्तत्त्वज्ञानव्यभिचारः, कर्मप्रागभावासहवृत्तिकर्मनाशे युगपत्कर्मभोगे वाऽव्यभिचारात्। अत एवानुमानेनागमबाधाप्रयोजकत्वेन च श्रुतिवाक्यशेषे मानाभावः। उत्पन्नतत्त्वज्ञानस्यापवर्गविलम्बोपपादनार्थमुक्तरीत्या भोगस्यैवाक्षेपादिति। तदस्यापवर्गस्य परमपुरुषार्थस्य श्रुतिसिद्धकारणमनुमानं विविक्तमिति।।

इति श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणौ मुक्तिवादः समाप्तः

।। इत्यनुमानखण्डम् ।।

परिशिष्टम्-१

ग्रन्थे समागताः केचन नियमाः

क्रमसंख्या		पृ.सं.	प.सं.
१	तत्तदर्थस्याभिधेयतामात्रेण सर्वसमासानां साधुत्वम्	३	६
२	भ्रमविषयप्रतिपादकवाक्यस्य बाधितार्थकखण्डवाक्यघटितस्यैव योग्यत्वम्	३	११
३	खण्डवाक्यस्य समभिव्याहृतपदार्थान्तरोपस्थापितज्ञानविशेष-विषयतापन्नविषयपरत्वम्	३	१२
४	समभिव्याहृतज्ञानविशेषविषयपरत्वे वह्निना सिञ्चतीत्यपि योग्यम्	३	१८
५	यत्रासंसृष्टयोरेव ज्ञानानुपरागेण संसर्गः प्रतिपाद्यस्तद्वाक्यमयोग्यम्	३	२०
६	प्रकारानुपरागेण संबन्धभानानभ्युपगमः	४	६
७	विशिष्टज्ञानसमूहालम्बनयोः वैलक्षण्यं प्रकारादिकृतम्	४	१०
८	साक्षात्परम्परासाधारणसम्बन्धिनः प्रकारत्वे भासमाने सम्बन्ध-भानाभ्युपगमः	४	१५
९	समवाये सम्बन्धान्तरानभ्युपगमः	४	२२
१०	द्वन्द्वस्य समस्यमानपदार्थभेदप्रतिपादकत्वम्	५	६
११	कर्मधारयस्यैवाभेदोपस्थापकत्वम्	५	३१
१२	यत्र यः सम्बन्धः स एव तस्य तद्वैशिष्ट्यम्	६	१
१३	द्वन्द्वोत्तरभावप्रत्ययस्यैव पदार्थतावच्छेदकद्वयसामानाधिकरण्य-व्युत्पत्तिः	७	१
१४	सम्बन्धमात्रस्यैव वैशिष्ट्यरूपत्वम्	७	९
१५	समाने विषये सिषाधयिषाविरहसहकृतानुमानातिरिक्तसाधक-मानस्यैव प्रतिबन्धकत्वम्	८	१५
१६	येन रूपेण यस्य यत्र प्रतिबन्धकत्वं तदवच्छिन्नाभावत्वेनैव तत्र तदभावस्य प्रयोजकत्वम्	८	१९
१७	अनुमितेः करणजन्यत्वम्	९	२८
१८	करणस्य सव्यापारकत्वम्	९	२८
१९	इदं रजतं इति ज्ञाने क्वचित्स्वरूपतो रजतत्वस्य वैशिष्ट्यविषयत्वं क्वचिदसतः	१४	२१
२०	न ह्येकमेव लक्षणं लक्ष्यतावच्छेदकञ्च सम्भवति	१५	१०
२१	शब्दस्यानुमानाधीनप्रथमसङ्केतग्रहमूलकत्वम्	१६	१३

७३	व्याप्यव्याप्यस्य सुतरां व्याप्यत्वम्	७४	१३
७४	विशेष्याभावविशिष्टाभावयोर्भेदेन विशेष्यव्यभिचारविशिष्टव्यभिचारयोरपि भेद:	८०	१५
७५	अनुमितेर्व्यापकतावच्छेदमात्रप्रकारकत्वम्	८०	१६
७६	व्याप्यतावच्छेदकप्रकारकज्ञानत्वापेक्षया व्याप्यत्वप्रकारकज्ञानत्वस्य कारणतावच्छेदकस्य लघुत्वम्	९३	२७
७७	यदवच्छेदेन यद्धर्मनिश्चयस्तदवच्छेदेन तद्धर्मज्ञानं तद्धर्मिकसंशय - विरोधि	९४	२१
७८	न केवलं व्यावर्तकधर्मदर्शनादेव संशयाभाव: किन्तु भिन्नविषये प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वादपि न संशय:	९४	२५
७९	तर्कितगौरवज्ञानस्य प्रमाणप्रवृत्त्यप्रतिबन्धकत्वम्	९९	२४
८०	द्वयो:साम्ये विशेषणानां बहुत्वे वा सामान्यस्य बाधकं विना प्रमाण - प्रवृत्तिविषयत्वं न तु सर्वत्र	१००	१४
८१	बलवत्त्वं फलबलकल्प्यम्	१००	२९
८२	समाने विषये लौकिकप्रत्यक्षसामग्र्या बलवत्त्वम्	१००	३०
८३	अनुमिते: पक्षविशेष्यकत्वनियमो नास्ति	१०३	२७
८४	परामर्शानुमित्यो: समानविशेष्यकत्वनियम:	१०४	१९
८५	मानान्तरासहकृतमनोजन्यत्वेन मानसाध्यक्षत्वे मित्यन्तरसामग्री - विरह: प्रतिबन्धक:	१०६	९
८६	सुखादिसाक्षात्कारे न मानसाध्यक्षं किन्तु विजातीयमेव प्रत्यक्षम्	१०६	१२
८७	मित्यन्तरप्रागभावासहकृतमनोजन्यत्वं मानसत्वप्रयोजकम्	१०६	१९
८८	इन्द्रियत्वेन मनोजन्यत्वं मानसत्वप्रयोजकम्	१०६	२०
८९	व्यवहारसिद्धे हि लक्षणं न तु लक्षणानुरोधेन व्यवहारसिद्धि:	१०६	२५
९०	परामर्शप्रागभावस्य नानुमितिकरणत्वम्	१०७	३
९१	आपाद्यव्यतिरेकनिश्चयं विनाऽऽपाद्यानुपपत्ति:	१०८	६
९२	व्याप्तिग्रहौपयिकस्यैव विशेषणस्य हेतौ सार्थकत्वम्	११०	१३
९३	संशयनिश्चयसाधारणेन प्रतियोगिज्ञानत्वेनाभावबुद्धिं प्रति कारणत्वम्	११५	१६
९४	तर्कविरहदशायामेव व्यभिचारसंशयस्य व्याप्तिग्रहपरिपन्थित्वम्	१२३	२६
९५	भ्रमरूपस्यापि विरोधिज्ञानस्य ज्ञानप्रतिबन्धकत्वम्	१८२	२५
९६	सत्तासम्बन्धवत्त्वरूपं सत्त्वं न कारणताप्रयोजकम्	२०७	२६
९७	प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वम्	२०८	२९

परिशिष्टम् – २

ग्रन्थे समुद्धृता: न्याया:

१	सूचीकटाहन्याय:	२	६
२	सविशेषणे हीति न्याय:(सविशेषणे हि विधिप्रतिषेधौ सति विशेष्ये ऽन्वयबाधे विशेषणमुपसङ्क्रामत:)	२२	७
३	अशोकवनिकान्याय:	२६	२३
४	तद्धेतोरितिन्याय:(तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन)	५३	२०
५	यद्विशेषयोरिति न्याय:(यद्विशेषयो: कार्यकारणभाव: असति बाधके तत्सामान्ययोरपि)	६८	१०
६	विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्याय:	१०४	२२
७	क्लृप्तकल्प्यविरोधे हि लघु: क्लृप्तपरिग्रह:	२०६	२८

परिशिष्टम् – ३

ग्रन्थे चर्चिता ग्रन्थकारा ग्रन्थाश्च

१ उपाध्याया:

२ वाचस्पतिमिश्रा:

३ मिश्रचरणा:

४ मिश्रा:

५ जयदेवमिश्रा:

६ नवीना:

७ अस्मद्गुरव:

८ विष्णुपत्युपाध्याया:

९ यज्ञपत्युपाध्याया:

१० अस्मदुपाध्यायमिश्रा:

११ नरसिंहमिश्रा:

१२ आचार्यचरणा:(उदयनाचार्या:)

१३ अत्र केचित् , केचित्तु , अत्राहु: , अन्ये इत्यादय:

१४ प्रमाणटीका, प्रमेयसूत्रम्, शशिधर:(शशिधरे)

२२	उपमानस्यानुमानमूलकातिदेशवाक्यरूपशब्दमूलकत्वम्	१६	१३
२३	विशिष्टज्ञानमात्रे विशेषणतानवच्छेदकाप्रकारकविशेषणज्ञानत्वेन हेतुत्वम्	१९	१४
२४	विशेषणविशेष्ययोरुभयो:स्वस्वविशेषणवैशिष्ट्यग्रहसामग्रीसत्त्वे विशिष्टवैशिष्ट्यबोधोपपत्ति:	१९	१७
२५	निर्विकल्पकस्यारोपहेतुत्वम्	१९	१९
२६	निर्विकल्पकात् नाभावधी:	१९	२३
२७	प्रतियोगितावच्छेदकविशिष्टप्रतियोग्युपलम्भाभावोऽभावप्रतीतिमात्रे हेतु:	२१	७
२८	प्रतियोग्यभावयो: स्वरूपं सम्बन्ध:	२१	१९
२९	अलीकस्याजनकत्वम्	२१	२५
३०	जनकत्वं सत्त्वगर्भम्	२१	२५
३१	प्रतियोगितातिरिक्तदेशावृत्तित्वं प्रतियोगितावच्छेकत्वम्	२६	१२
३२	व्यावर्तकधर्मस्यौत्सर्गिकं विशेषणत्वम्	२७	९
३३	यावद्विशेषाभावस्यैकावच्छिन्नस्य सामान्याभावव्याप्यत्वम्	२७	२०
३४	प्रतियोग्यभावाधिकरणतयोरेकावच्छेदेनैव विरोध:	२७	२२
३५	नियामकस्य सम्बन्धस्य व्याप्तिधीविषयकत्वेऽपि नियामकत्वरूप-तत्सम्बन्धाविषयकत्वम्	२८	६
३६	सम्बन्धत्वं विशेषविशेषान्यविशिष्टधीविषयत्वम्	२८	१०
३७	स्वरूपसम्बन्ध:स्वरूपेणैव भासते न तु सम्बन्धत्वेन	२८	१२
३८	इष्टसाधनताज्ञाने स्वरूपसदिष्टत्वस्येव स्वरूपसत एव सम्बन्धत्वस्य नियामकत्वम्	२८	१५
३९	स्वरूपसम्बन्धो विशेषणताविशेष:	२८	१७
४०	कालिकव्याप्तौ ध्वंसस्यापि विरोधित्वम्	२८	२८
४१	प्रतियोगिसमवायिदेशे एव ध्वंसात्यन्ताभावयोर्विरोध:	२९	१
४२	दैशिकव्याप्तौ प्रतियोग्यसमानदेशत्वं कालिकव्याप्तौ च प्रतियोग्य-समानकालीनत्वं प्रतियोग्यसामानाधिकरण्यम्	२९	८
४३	धर्मिकल्पनातो धर्मकल्पना लघीयसी	३०	२६
४४	प्रत्येकोभयातिरिक्तसमुदायो नाभ्युपगम्यते	३२	७
४५	प्रतियोगिवत् तत्प्रागभावस्यापि सामान्यात्यन्ताभावविरोधित्वम्	३२	२४
४६	सम्बन्धिद्वयप्रत्यक्षत्वे सम्बन्धस्यापि प्रत्यक्षत्वम्	३५	१९
४७	व्यभिचारज्ञानसहकृतसहचारज्ञानमनुमितिं प्रत्यन्यथासिद्धम्	३७	१९

४८	सामान्याभावस्य यत्किञ्चित्प्रतियोगिसत्त्वविरोधः	३८	२३
४९	यो हि संसर्गो यत्रारोप्य निबध्यते तेन संसर्गेणाभावस्य विरोधित्वम्	३९	२६
५०	यत्रोभयप्रतियोगिताधिकरणनिष्ठैकसंसर्गारोपादभावधीस्तत्रोभयसत्त्वं विरोधि	३९	२८
५१	यत्रैकधर्मावच्छिन्नाशेषस्य प्रत्येकसंसर्गारोपादभावधीस्तत्र यत्किञ्चि - त्सत्त्वं विरोधि	३९	२९
५२	पञ्चपदार्थभिन्नभावत्वं समवायत्वं तच्च योग्यमेव	४३	२७
५३	अन्योन्याभावस्याव्याप्यवृत्तित्वं नाभ्युपगम्यते	४५	४
५४	व्यर्थविशेषणत्वरहितत्वे सति व्यभिचारिव्यावृत्तत्वमेव हि धर्मस्य व्याप्तिनिरूपकत्वे तन्त्रम्	४५	१७
५५	व्याप्तिग्राहकसामग्र्यां सत्यामतिप्रसक्तधर्मेणापि तद्ग्रहे नानुपपत्तिः	४५	२१
५६	अवच्छित्तिप्रत्ययजनकत्वमवच्छेदकत्वम्	४६	१३
५७	जनकत्वं स्वरूपसम्बन्धविशेषः	४६	१५
५८	यदैव यस्य सहचारज्ञानसाहित्यं तदैव तेन व्याप्तिर्गृह्यते	५२	१५
५९	व्यतिरेकसहचारज्ञानस्य व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेनान्वय-व्याप्तिग्राहकत्वम्	५३	१०
६०	यत्राधिकरणे साध्यसाधनयोस्तदभावयोर्वा सहचारो गृह्यते न हि तत्र व्यभिचारज्ञानं सम्भवति	५३	१३
६१	न हि यत्कार्यं यद्वारा यज्जनयति तत्तेन विनाऽपि तज्जनयति	५४	३
६२	एकस्योभयसाक्षाद्विरोधित्वमसिद्धम्	६२	११
६३	सहचारज्ञानस्यानुमितिमात्रहेतुत्वे बीजाभावः	६२	१४
६४	कारणतावच्छेदकयत्किञ्चित्सत्त्वे एव कार्योत्पत्तिः	६२	१६
६५	निगमनेऽबाधितत्वादि वाक्यार्थतया भासते	६३	४
६६	प्रसिद्धस्य ज्ञानं विना तद्धर्मिकसंशयो नोत्पद्यते	६६	३
६७	धर्मीन्द्रियसन्निकर्षः प्रत्यक्षमात्रे हेतुः	६६	६
६८	सकलसम्बन्ध्युपस्थितिं विनाप्येकत्रापि सम्बन्धिन्येकनिष्ठसम्बन्धस्य भानं सम्भवति	६७	२७
६९	ज्ञानस्य समानविषयकत्वेनेच्छाजनकत्वम्	६९	७
७०	अभावप्रतीतिविषयधर्मावच्छिन्नप्रतियोगिज्ञानं सामान्याभावादि - ग्राहकम्	७०	३
७१	न ह्युपधेयाप्रतीतावुपाधेः प्रतीतिः	७०	११
७२	अन्यतरबाधप्राप्तावनेकबाधकल्पने गौरवम्	७२	२४

७३	व्याप्यव्याप्यस्य सुतरां व्याप्यत्वम्	७४	१३
७४	विशेष्याभावविशिष्टाभावयोर्भेदेन विशेष्यव्यभिचारविशिष्टव्यभि-चारयोरपि भेदः	८०	१५
७५	अनुमितेर्व्यापकतावच्छेदमात्रप्रकारकत्वम्	८०	१६
७६	व्याप्यतावच्छेदकप्रकारकज्ञानत्वापेक्षया व्याप्यत्वप्रकारकज्ञानत्वस्य कारणतावच्छेदकस्य लघुत्वम्	९३	२७
७७	यदवच्छेदेन यद्धर्मनिश्चयस्तदवच्छेदेन तद्धर्मज्ञानं तद्धर्मिकसंशय - विरोधि	९४	२१
७८	न केवलं व्यावर्तकधर्मदर्शनादेव संशयाभावः किन्तु भिन्नविषये प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वादपि न संशयः	९४	२५
७९	तर्कितगौरवज्ञानस्य प्रमाणप्रवृत्त्यप्रतिबन्धकत्वम्	९९	२४
८०	द्वयोःसाम्ये विशेषणानां बहुत्वे वा सामान्यस्य बाधकं विना प्रमाण - प्रवृत्तिविषयत्वं न तु सर्वत्र	१००	१४
८१	बलवत्त्वं फलबलकल्प्यम्	१००	२९
८२	समाने विषये लौकिकप्रत्यक्षसामग्र्या बलवत्त्वम्	१००	३०
८३	अनुमितेः पक्षविशेष्यकत्वनियमो नास्ति	१०३	२७
८४	परामर्शानुमित्योः समानविशेष्यकत्वनियमः	१०४	१९
८५	मानान्तरासहकृतमनोजन्यत्वेन मानसाध्यक्षत्वे मित्यन्तरसामग्री - विरहः प्रतिबन्धकः	१०६	९
८६	सुखादिसाक्षात्कारे न मानसाध्यक्षं किन्तु विजातीयमेव प्रत्यक्षम्	१०६	१२
८७	मित्यन्तरप्रागभावासहकृतमनोजन्यत्वं मानसत्वप्रयोजकम्	१०६	१९
८८	इन्द्रियत्वेन मनोजन्यत्वं मानसत्वप्रयोजकम्	१०६	२०
८९	व्यवहारसिद्धे हि लक्षणं न तु लक्षणानुरोधेन व्यवहारसिद्धिः	१०६	२५
९०	परामर्शप्रागभावस्य नानुमितिकरणत्वम्	१०७	३
९१	आपाद्यव्यतिरेकनिश्चयं विनाऽऽपाद्यानुपपत्तिः	१०८	६
९२	व्याप्तिग्रहौपयिकस्यैव विशेषणस्य हेतौ सार्थकत्वम्	११०	१३
९३	संशयनिश्चयसाधारणेन प्रतियोगिज्ञानत्वेनाभावबुद्धिं प्रति कारणत्वम्	११५	१६
९४	तर्कविरहदशायामेव व्यभिचारसंशयस्य व्याप्तिग्रहपरिपन्थित्वम्	१२३	२६
९५	भ्रमरूपस्यापि विरोधिज्ञानस्य ज्ञानप्रतिबन्धकत्वम्	१८२	२५
९६	सत्तासम्बन्धवत्त्वरूपं सत्त्वं न कारणताप्रयोजकम्	२०७	२६
९७	प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वम्	२०८	२९

परिशिष्टम् – २

ग्रन्थे समुद्धृताः न्यायाः

१	सूचीकटाहन्यायः	२	६
२	सविशेषणे हीति न्यायः(सविशेषणे हि विधिप्रतिषेधौ सति विशेष्ये ऽन्वयबाधे विशेषणमुपसङ्क्रामतः)	२२	७
३	अशोकवनिकान्यायः	२६	२३
४	तद्धेतोरितिन्यायः(तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन)	५३	२०
५	यद्विशेषयोरिति न्यायः(यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोरपि)	६८	१०
६	विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायः	१०४	२२
७	क्लृप्तकल्प्यविरोधे हि लघुः क्लृप्तपरिग्रहः	२०६	२८

परिशिष्टम् – ३

ग्रन्थे चर्चिता ग्रन्थकारा ग्रन्थाश्च

१ उपाध्यायाः

२ वाचस्पतिमिश्राः

३ मिश्रचरणाः

४ मिश्राः

५ जयदेवमिश्राः

६ नवीनाः

७ अस्मद्गुरवः

८ विष्णुपत्युपाध्यायाः

९ यज्ञपत्युपाध्यायाः

१० अस्मदुपाध्यायमिश्राः

११ नरसिंहमिश्राः

१२ आचार्यचरणाः(उदयनाचार्याः)

१३ अत्र केचित् , केचित्तु , अत्राहुः , अन्ये इत्यादयः

१४ प्रमाणटीका, प्रमेयसूत्रम्, शशिधरः(शशिधरे)

श्री शङ्कर अद्वैत शोध केन्द्रम्

SRI SHANKARA ADVAITA RESEARCH CENTRE